42 K1 missing ( cf. v. l. 25 ). —$^{a}$) K3. 4 T G M4 स्वगोष्ठे; T1 प्रकोष्ठे. Ś1 K3 निक्षिप्य. M1. 2 तथा कोष्ठेष्ववक्षिप्य. —$^{b}$) Ś1 K2–5 Dn1 D1–6 भांडं; B3. 5 Dc1 कोषं; T G M3. 4 गोष्ठे ( for कोष्ठं ). M1. 2 भांडं विना ( for भाण्डमना ). —$^{c}$) D3 स्वकाले; G1 स्वयं च; G3 M4 स्वकायं; M1. 2 स्वकोष्ठे. Ś1 K3

C. 14. 578
B. 14. 19. 46
K. 14. 20. 46

आत्मानं तत्र मार्गेत प्रमादं परिवर्जयेत् ॥ ४२
एवं सततमुद्युक्तः प्रीतात्मा नचिरादिव ।
आसादयति तद्ब्रह्म यद्दृष्ट्वा स्यात्प्रधानवित् ॥ ४३
न त्वसौ चक्षुषा ग्राह्यो न च सर्वैरपीन्द्रियैः ।
मनसैव प्रदीपेन महानात्मनि दृश्यते ॥ ४४
सर्वतःपाणिपादं तं सर्वतोक्षिशिरोमुखम् ।
जीवो निष्क्रान्तमात्मानं शरीरात्संप्रपश्यति ॥ ४५
स तदुत्सृज्य देहं स्वं धारयन्ब्रह्म केवलम् ।
आत्मानमालोकयति मनसा प्रहसन्निव ॥ ४६
इदं सर्वरहस्यं ते मयोक्तं द्विजसत्तम ।
आपृच्छे साधयिष्यामि गच्छ शिष्य यथासुखम् ॥ ४७
इत्युक्तः स तदा कृष्ण मया शिष्यो महातपाः ।
अगच्छत यथाकामं ब्राह्मणश्छिन्नसंशयः ॥ ४८

वासुदेव उवाच ।

इत्युक्त्वा स तदा वाक्यं मां पार्थ द्विजपुंगवः ।
मोक्षधर्माश्रितः सम्यक्तत्रैवान्तरधीयत ॥ ४९
कच्चिदेतत्त्वया पार्थ श्रुतमेकाग्रचेतसा ।
तदापि हि रथस्थस्त्वं श्रुतवानेतदेव हि ॥ ५०

---

निक्षिप्य; K$_{2.4.5}$ D$_1$ संक्षिप्य. D$_{5.6}$ स्वकाये च तथाक्षिप्य. —$^d$) Ś$_1$ K$_3$ अनिश्चलं; K$_2$ B$_2$ च निश्चलैः; K$_4$ D$_1$ असंयमैः; G$_3$ अनिश्चयैः (for °श्चलैः). —$^e$) K$_{3.5}$ मार्गे तु; G$_1$ M$_{1\ 2}$ मार्गेण (for मार्गेत). —$^f$) Ś$_1$ M$_4$ -वर्जयन्; B$_3$ -मार्जयेत् (for -वर्जे°). G$_{1.2}$ प्रमादमप(G$_2$ °व)मार्जयन्.

43 K$_1$ missing (cf. v. l. 25). —$^b$) G$_2$ अचिराद् (for नचि°). T G$_3$ स च (for इव). —$^c$) Ś$_1$ K$_3$ आवेदयति (for आसाद°). M$_2$ आसादयत तं ब्रह्म (sic). —$^d$) D$_5$ G$_3$ द्रष्टा (for दृष्ट्वा). G$_2$ प्रसादवान्; M$_4$ (*inf. lin.* as in text) प्रधानवान्.

44 K$_1$ missing (cf. v. l. 25). The portion of the text from 44 up to the end of this adhy. is lost in Dn$_1$, on a missing folio. —$^a$) K$_4$ च (for तु). —$^b$) K$_2$ भव (sic) (for न च). —$^c$) K$_{4.5}$ D$_1$ M$_{1.2}$ मानसेन; T G M$_{3.4}$ मनसा तु (for °सैव). D$_3$ G$_{1.3}$ M$_{1.2}$ प्रदीप्तेन. —$^d$) B Dc$_1$ D$_{2-5}$ T G M$_{1.2}$ आत्मा प्र- (B$_{1-3}$ Dc$_1$ स) (for आत्मनि).

45 K$_1$ missing (cf. v. l. 25). Dn$_1$ missing (cf. v. l. 44). 45$^{ab}$ = (var.) 6. 35. 13$^{ab}$. —$^a$) Ś$_1$ K$_3$ B -पादांतः (Ś$_1$ °ताः); K$_{2.4}$ Dc$_1$ D$_{1-4}$ -पादोयं; K$_5$ -पादौ च; D$_{5.6}$ T G$_3$ M$_4$ -पादं तत्; G$_2$ -पादं तु; M$_{1-3}$ -पादांतं (for -पादं तं). —$^b$) Ś$_1$ -शिरोमुखाः; K$_{2-4}$ B Dc$_1$ D$_{1-4.6}$ °मुखः. — After 45$^{ab}$, N (K$_1$ Dn$_1$ missing) T$_2$ ins.:

48* सर्वतःश्रुतिमाल्लोके सर्वमावृत्य तिष्ठति ।

[= (var. 6. 35. 13$^{cd}$). Ś$_1$ K$_4$ D$_3$ श्रुतिमल्लॅ. D$_3$ आत्मनि (for आवृत्य).]

—$^c$) M$_{2.3}$ जीवन् (for जीवो). —$^d$) D$_6$ संप्रदृश्यते.

46 K$_1$ missing (cf. v. l. 25). Dn$_1$ missing (cf. v. l. 44). —$^a$) B$_3$ एनम् (for स तद्). B$_1$ D$_{5.6}$ देहे. T तं; G$_3$ तद् (for स्वं). —$^b$) D$_6$ धारयेद्; T$_2$ ध्यायैतद्; G$_1$ पारयेद् (for धारयन्). —$^d$) K$_{2.4.5}$ D$_1$ च पिबन् (for प्रहसन्). — After 47, K$_{2.5}$ D$_{2-6}$ ins.:

49* तदेवमाश्रयं कृत्वा मोक्षं याति ततो मयि ।

[D$_3$ तदेव मन्मयं कृत्वा (for the prior half). K$_2$ मोक्षद्वारेण सर्ववित् (for the post. half).]

47 K$_1$ missing (cf. v. l. 25). Dn$_1$ missing (cf. v. l. 44). —$^a$) Ś$_1$ (*sup. lin.*) प्रश्न-; K$_5$ D$_6$ M$_4$ सर्वं (for सर्व-). K$_4$ D$_1$ च (for ते). T G$_3$ एवं सर्वं मयोक्तं ते. —$^b$) T G$_3$ रहस्यं (for मयोक्तं). B D (except D$_1$; Dn$_1$ missing) मया प्रोक्तं द्विजोत्तम. —$^c$) M$_{1.2}$ आपृच्छ्य. G$_3$ आपृच्छेथ गमिष्यामि. —$^d$) Ś$_1$ K$_3$ B$_{1.2.5}$ D$_{2-6}$ विप्र (for शिष्य).

48 K$_1$ missing (cf. v. l. 25). Dn$_1$ missing (cf. v. l. 44). —$^b$) K$_{2.5}$ तदा; K$_4$ D$_1$ तथा (for मया). —$^c$) K$_{2.4.5}$ B$_5$ D$_1$ अ(K$_{2.4}$ आ)गच्छच्च; K$_3$ D$_{4-6}$ आगच्छत; B$_{1.2}$ G$_2$ M अगच्छत्स; T$_2$ G$_3$ °च्छद्वै; G$_1$ °च्छत्तु (for °च्छत). —$^d$) B Dc$_1$ D$_{2-5}$ M$_4$ ब्राह्मणः संशि(D$_{3.4}$ M$_4$ शंसि)तव्रतः. — After 48, Ś$_1$ K$_3$ M$_4$ ins. an addl. colophon [*Sub-parvan:* Ś$_1$ K$_3$ M$_4$ अनुगीता. — *Adhy. no.:* Ś$_1$ 21; M$_4$ 19].

49 K$_1$ missing (cf. v. l. 25). Dn$_1$ missing (cf. v. l. 44). G$_3$ M$_{1-3}$ om. the ref. T G$_{1.2}$ M$_4$ श्रीभगवान् (for वासुदेव). —$^a$) G$_2$ इत्युक्तः. D$_4$ T G$_3$ M$_4$ (*inf. lin.*) पार्थ (for वाक्यं). —$^b$) K$_3$ आमंत्र्य; K$_4$ D$_4$ मां वाक्यं; T G$_3$ M$_4$ (*inf. lin.*) वाक्यं मां; G$_2$ M$_{3.4}$ महार्थं (for मां पार्थ). K$_2$ B$_{1.2.5}$ D$_4$ G$_{1.2}$ -सत्तमः; K$_3$ D$_{2.3.5.6}$ -सत्तम (for -पुंगवः). —$^c$) K$_{2.4.5}$ D$_1$ -धर्मावृतं; K$_3$ B$_{3.4}$ T G M$_4$ °श्रितं.

50 Dn$_1$ missing (cf. v. l. 44). K$_1$ missing up

नैतत्पार्थ सुविज्ञेयं व्यामिश्रेणेति मे मतिः ।
नरेणाकृतसंज्ञेन विदग्धेनाकृतात्मना ॥ ५१
सुरहस्यमिदं प्रोक्तं देवानां भरतर्षभ ।
कच्चिन्नेदं श्रुतं पार्थ मर्त्येनान्येन केनचित् ॥ ५२
न ह्येतच्छ्रोतुमर्होऽन्यो मनुष्यस्त्वामृतेऽनघ ।
नैतदद्य सुविज्ञेयं व्यामिश्रेणान्तरात्मना ॥ ५३
क्रियावद्भिर्हि कौन्तेय देवलोकः समावृतः ।
न चैतदिष्टं देवानां मर्त्यै रूपनिवर्तनम् ॥ ५४
परा हि सा गतिः पार्थ यत्तद्ब्रह्म सनातनम् ।
यत्रामृतत्वं प्राप्नोति त्यक्त्वा दुःखं सदा सुखी ॥ ५५
एवं हि धर्ममास्थाय येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ५६
किं पुनर्ब्राह्मणाः पार्थ क्षत्रिया वा बहुश्रुताः ।
स्वधर्मरतयो नित्यं ब्रह्मलोकपरायणाः ॥ ५७
हेतुमच्चैतदुद्दिष्टमुपायाश्चास्य साधने ।
सिद्धेः फलं च मोक्षश्च दुःखस्य च विनिर्णयः ।
अतः परं सुखं त्वन्यत्किं नु स्याद्भरतर्षभ ॥ ५८
श्रुतवाञ्श्रद्दधानश्च पराक्रान्तश्च पाण्डव ।

C. 14. 596
B. 14. 19. 64
K. 14. 20. 64

---

to तदापि हि र ( in $50^c$ ) ( cf. v. l. 25 ). — $^a$ ) $G_3$ कचिद् ( for कच्चिद् ). $G_1$ एवं ( for एतत् ). — $^b$ ) T $G_{2.3}$ एकांत- ( for एकाग्र- ). — $^c$ ) $T_2$ $G_{1.3}$ M तथा ( for तदा ). $K_{2.4.5}$ $D_1$ च ; $G_1$ यो ( for हि ). $K_{2.4.5}$ $D_1$ रणस्थस् ( for रथ° ). $D_1$ हि ( for त्वं ). — $^d$ ) $T_1$ स्मृतवान् ( for श्रुत° ). $B_{3.4}$ ह ( for हि ).

51 $Dn_1$ missing ( cf. v. l. 44 ). — $^a$ ) $G_3$ पार्थस्य ( for पार्थ सु- ). $G_1$ न तत्त्वार्थमिति ज्ञेयं. — $^c$ ) $G_1$ -संगेन ( for -संज्ञेन ). $G_3$ न तेनाक्षरसंज्ञेन ; $M_{2-4}$ नरेण कृतसंगेन. — $^d$ ) $Ś_1$ विजितेन ; $Ś_1$ ( marg. ) $D_{2-6}$ $T_2$ $G_2$ विशुद्धेन ; $K_{2.4.5}$ $D_1$ कृतघ्नेन ; $B_{2-4}$ विमुग्धेन ( for विदग्धेन ). $Ś_1$ $K_{1-3.5}$ B D ( $Dn_1$ missing ) $T_1$ [अं]तरात्मना ( for [अ]कृता° ).

52 $Dn_1$ missing ( cf. v. l. 44 ). $K_4$ $D_1$ om. ( hapl. ) 52–53. — $^a$ ) $K_2$ $D_{5.6}$ स- ( for सु- ). $K_5$ चोक्तं ( for प्रोक्तं ). $G_{1.2}$ $M_{3.4}$ रहस्यं खल्विदं प्रोक्तं ; $M_{1.2}$ न तदर्हमिदं प्रोक्तं. — $^b$ ) $B_4$ देवानामपि भारत. — $^c$ ) $G_{1.2}$ M ( $M_4$ *inf. lin.* as in text ) किंचिन् ( for कच्चिन् ). $G_1$ तु ( for न ). $Ś_1$ $K_{1.3}$ [ए]तत् ( for [इ]दं ). — $^d$ ) $T_2$ $M_{3.4}$ मन्ये न ; $G_1$ मम न ; $G_2$ मान्येन ( for मर्त्येन ). $K_5$ न मनुष्येण कर्हिचित् ; B $D_{2-6}$ मनुष्येणे- ( $D_3$ °ष्यैरि )ह कर्हिचित्.

53 $Dn_1$ missing ( cf. v. l. 44 ). $K_4$ $D_1$ om. 53 ( cf. v. l. 52 ). — $^a$ ) T $G_3$ तु ( for हि ). T ज्ञातुम् ( for श्रोतुम् ). $D_{5.6}$ अन्योर्हो ( by transp. ). — $^b$ ) $G_3$ मानुषस् ( for मनुष्यस् ). S त्वदृते. $K_3$ त्वामृते मानुषोनघ. — $^c$ ) $K_{2.5}$ हि ( for [ए]तद् ). $K_{2.5}$ चैतत् ; $T_1$ पार्थ ; $M_{2-4}$ अन्यत् ( for अद्य ). $T_2$ $G_{2.3}$ अन्यस्य ( for अद्य सु- ). $Dc_1$ किं तदद्य स्वविज्ञेयं. — $^d$ ) T $G_3$ व्यामिश्रेणेति मे मतिः ( = $51^b$ ).

54 $Dn_1$ missing ( cf. v. l. 44 ). — $^a$ ) $K_5$ $G_2$ $M_2$ क्रियाविद्भिर्. — $^c$ ) $K_5$ तच् ( for न ). $Ś_1$ $K_{1.3}$ [ए]व न( $K_3$ द )ष्टं ( for [ए]तदिष्टं ). $M_{1.2}$ न चेदनिष्टं लोकानां. — $^d$ ) $K_{2.5}$ B D ( $Dn_1$ missing ) $G_2$ मर्त्य-रूप-. $K_3$ -निवर्तिनं ; $K_4$ -निवेदनं. T $G_{1.3}$ $M_{1.2.4}$ ( *inf. lin.* ) मर्त्यैरुपरि वर्तनं ( $M_{1.2}$ °र्तितं ); $M_{3.4}$ अन्यै-रुपरि वर्तनं.

55 $Dn_1$ missing ( cf. v. l. 44 ). — $^c$ ) $K_{2.5}$ $D_1$ तत्र ( for यत्र ). — $^d$ ) $K_{2.4.5}$ $D_1$ त्यक्तदुःखः ; $D_{2-5}$ त्यक्त्वा देहं ( for त्यक्त्वा दुःखं ). $K_4$ $D_1$ $G_2$ सुखं ( for सुखी ).

56 $Dn_1$ missing ( cf. v. l. 44 ). — $^a$ ) $Ś_1$ $K_{1.3}$ B D ( except $D_1$ ; $Dn_1$ missing ) इमं ( $Ś_1$ $K_{1.3}$ एतं ; $Dc_1$ इदं ) धर्मं समास्थाय. — $56^{bcd}$ = 6. 31. $32^{bcd}$. — $^b$ ) $G_1$ हि ( for ऽपि ). — $^d$ ) $B_3$ ते यांति परमां गतिं.

57 $Dn_1$ missing ( cf. v. l. 44 ). $57^{ab}$ = ( var. ) 6. 31. $33^{ab}$. — $^a$ ) $G_1$ ब्राह्मणः. $Ś_1$ $K_{1-3}$ $D_1$ पुण्याः ( for पार्थ ). — $^b$ ) $G_1$ क्षत्रियो. $M_{1.2}$ च ( for वा ).

58 $Dn_1$ missing ( cf. v. l. 44 ). $K_3$ om. $58^{ab}$. — $^a$ ) $G_1$ हेतुमद्वा ; $M_4$ हेतुमपि ( for °मच्च ). $D_{5.6}$ हेतुमुच्चैस्तदुद्दिष्टम्. — $^b$ ) $Ś_1$ $K_{1.5}$ $B_6$ $Dc_1$ $D_{3.6}$ $T_2$ $G_3$ $M_4$ ( *inf. lin.* ) उपायश्च ; $K_2$ तथा यच्च ; $K_4$ $D_1$ उपायस्य ( for °याश्च ). $K_2$ $T_1$ $G_{1.2}$ $M_4$ साधनं. — $^c$ ) $K_{4.5}$ $D_1$ $G_3$ $M_{2.4}$ सिद्धैः ; $Dc_1$ $D_{2-6}$ सिद्धिं ; $G_{1.2}$ सिद्धौ ( for सिद्धेः ). $K_{3.4}$ $D_1$ $T_1$ $G_3$ मोक्षं ; $K_5$ मोक्षाच् ( for मोक्षश् ). — $^d$ ) $Ś_1$ $K_{1.3}$ मोक्षस्य ; $T_2$ $G_3$ $M_4$ ( *inf. lin.* ) सुखस्य ( for दुःखस्य ). — $K_3$ om. $58^{ef}$. — $^e$ ) $B_2$ ( marg. ).$_{3-5}$ D ( except $D_1$ ; $Dn_1$ missing ) नातः परं. T च ( for तु ). $B_2$ नातः परतरं किंचित्.. — $^f$ ) $K_{1.5}$ $D_4$ T $G_1$ M किं न ( $K_5$ T तु ; $D_4$ च ); $B_{1.2}$ सुखं ; $Dc_1$ $D_{2.3.5.6}$ किंचित् ( for

C. 14. 597
B. 14. 19. 65
K. 14. 20. 65

यः परित्यजते मर्त्यो लोकतन्त्रमसारवत् ।
एतैरुपायैः स क्षिप्रं परां गतिमवाप्नुयात् ॥ ५९
एतावदेव वक्तव्यं नातो भूयोऽस्ति किंचन ।
षण्मासान्नित्ययुक्तस्य योगः पार्थ प्रवर्तते ॥ ६०

इति श्रीमहाभारते आश्वमेधिकपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥

## २०

**वासुदेव उवाच ।**

अत्राप्युदाहरन्तीमितिहासं पुरातनम् ।
दंपत्योः पार्थ संवादमभयं नाम नामतः ॥ १
ब्राह्मणी ब्राह्मणं कंचिज्ज्ञानविज्ञानपारगम् ।
दृष्ट्वा विविक्त आसीनं भार्या भर्तारमब्रवीत् ॥ २
कं नु लोकं गमिष्यामि त्वामहं पतिमाश्रिता ।
न्यस्तकर्माणमासीनं कीनाशमविचक्षणम् ॥ ३
भार्याः पतिकृताल्ँलोकानाप्नुवन्तीति नः श्रुतम् ।
त्वामहं पतिमासाद्य कां गमिष्यामि वै गतिम् ॥ ४
एवमुक्तः स शान्तात्मा तामुवाच हसन्निव ।
सुभगे नाभ्यसूयामि वाक्यस्यास्य तवानघे ॥ ५
ग्राह्यं दृश्यं च श्राव्यं च यदिदं कर्म विद्यते ।

---

किं नु ).

59 Dn1 missing ( cf. v. l. 44 ). — a ) Ś1 K1.4 D1 श्रद्धावान्; K5 B4 शुद्धिमान्; B1–3.5 Dc1 D2–6 बुद्धिमान् ( for श्रुतवान् ). — b ) D6 G1 भारत ( for पाण्डव ). K4 पराक्रांतस्य पांडव; G2 पारगंता च भारत. — c ) K3 partly damaged. K1.3 B D1–4 परित्यज्यते ( sic ); D6 °ष्वजते. — d ) B2 लोके ( for लोक- ). Ś1 K3 B ( except B3 ) Dc1 D3.5.6 -सारम् ( for -तन्त्रम् ). K4 D1 समाचरन् ( for असारवत् ). D4 मर्त्यो वै लोकसारवत्. — f ) D2–6 S अवाप्नुते.

60 Dn1 missing ( cf. v. l. 44 ). K3 om. 60ab. — a ) Ś1 K1 G1.2 M एतद् ( for एव ). — b ) B1 and Bom. ed. नांतो; M1.2 जितो ( for नातो ). M1.2 केचन ( for किंचन ). — c ) G3 षाण्मासान्; M4 षण्मास-. — d ) K2.4.5 D1 पार्थ योगः ( K2 °गं ) ( by transp. ).

Colophon missing in Dn1. — *Sub-parvan :* Ś1 K1.3.5 B Dc1 D2–6 M4 अनुगीता; M1.2 उपगीता. — *Adhy. name :* K2.4 ब्राह्मणसिद्ध( K4 सिद्धब्राह्मण )-प्रोक्ता गीता; D1 ब्राह्मणप्रोक्ता गीता; D5.6 श्रीभगवदर्जुनसंवादः; T मोक्षविवरणं; G3 मोक्षधर्मविवरणं; M1.2 योगरहस्यं. — *Adhy. no.* ( figures, words or both ): Ś1 22; D4 T2 G1.2 M 19 ( as in text ); T1 G3 20.

### 20

1 T G श्रीभगवान् ( for वासुदेव ). — c ) B D ( except D1 ) संवादो. — d ) Ś1 M1–3 अभवं ( for अभयं ). B D ( except D1 ) योभवद्भरतर्षभ; T1 अभयं कामकामितः; G2 °यं कामनामतः.

2 a ) Ś1 कश्चिज्; K4 G3 काचिज् (sic). — c ) K4.5 D1 G1 M1.2 विविक्तम्. — K4 D1 om. ( hapl. ) 2d–3c. — d ) K2.5 भर्तारमिदमब्रवीत्; B1.2 Dc1 भर्तारं सा स पृ( Dc1 सानुपृ )च्छति; B4 °रमनुपृच्छति.

3 K4 D1 om. 3abc ( cf. v. l. 2 ). Before 3, M1–3 ins. ब्राह्मणी. — a ) B5 Dc1 T G3 M1.2 किं; M4 ( *inf. lin.* as in text ) क्व ( for कं ). D2.3 G1 तु ( for नु ). K1 लोके; G3 लोकान्.

4 a ) G1 पतिगताल्ँ. — b ) T1 G1.2 M1.3.4 प्राप्नुवंति. K4 B1.2 D1 [इ]ह ( for [इ]ति ). G3 निश्चयं ( for नः श्रुतम् ). — c ) K2–5 D1 आश्रित्य ( for आसाद्य ).

5 Before 5, T G3 ins. श्रीभगवान्; M4 वासुदेवः. — a ) K4 D1.3 प्र-; G1.3 तु ( for स ). — b ) G1 प्रत्युवाच ( for तामु° ). — Before 5c, T G3 ins. श्रीभगवान्; M1.2 ब्राह्मणः; M4 वासुदेवः. K3 om. 5c–6d. — c ) K1 नात्यसूयामि. — d ) K2 [ए]तस्य वा ( for [अ]स्य तव ). T1 M वाक्यमेतत्तवा( M1.2 °त्त्वया )नघे.

एतदेव व्यवस्यन्ति कर्म कर्मेति कर्मिणः ॥ ६
मोहमेव नियच्छन्ति कर्मणा ज्ञानवर्जिताः ।
नैष्कर्म्यं न च लोकेऽस्मिन्मौर्तमित्युपलभ्यते ॥ ७
कर्मणा मनसा वाचा शुभं वा यदि वाशुभम् ।
जन्मादिमूर्तिभेदानां कर्म भूतेषु वर्तते ॥ ८
रक्षोभिर्वध्यमानेषु दृश्यद्रव्येषु कर्मसु ।
आत्मस्थमात्मना तेन दृष्टमायतनं मया ॥ ९
यत्र तद्ब्रह्म निर्द्वंद्वं यत्र सोमः सहाग्निना ।
व्यवायं कुरुते नित्यं धीरो भूतानि धारयन् ॥ १०
यत्र ब्रह्मादयो युक्तास्तदक्षरमुपासते ।
विद्वांसः सुव्रता यत्र शान्तात्मानो जितेन्द्रियाः ॥ ११
घ्राणेन न तदाघ्रेयं न तदाद्यं च जिह्वया ।
स्पर्शेन च न तत्स्पृश्यं मनसा त्वेव गम्यते ॥ १२
चक्षुषा न विषह्यं च यत्किंचिच्छ्रवणात्परम् ।
अगन्धमरसस्पर्शमरूपाशब्दमव्ययम् ॥ १३
यतः प्रवर्तते तन्त्रं यत्र च प्रतितिष्ठति ।

C. 14. 612
B. 14. 20. 14
K. 14. 21. 13

---

6 K$_3$ om. 6 (cf. v. l. 5). —$^a$) D$_{5.6}$ श्राव्यं (for ग्राह्यं). M$_{1.2}$ द्रव्यं (for दृश्यं). Ś$_1$ K$_1$ च द्रव्यं च; K$_{2.4}$ B$_4$ D$_1$ च श्रव्यं च; Dn$_1$ D$_{2-6}$ च सत्यं वा; T G M$_{3.4}$ त(G$_1$ य)था श्राव्यं (for च श्राव्यं च). —$^c$) K$_5$ एतदेवं. —Ś$_1$ K$_1$ om. (hapl.) 6$^d$–7$^a$. —$^d$) D$_3$ कार्यं (for कर्म). K$_2$ T$_1$ [अ]कर्मेति.

7 Ś$_1$ K$_1$ om. 7$^a$ (cf. v. l. 6). —$^a$) T$_2$ एवं. K$_2$ G$_{1.2}$ M निगच्छंति. K$_3$ परं पारं न गच्छंति. —$^b$) K$_{2-4}$ कर्मिणो; M$_4$ कर्मणो. G$_3$ कर्मणो ज्ञानमार्जिताः. —$^c$) Dn$_1$ नैष्कर्म्यै. B$_5$ D$_{2.3}$ च न (by transp.). —$^d$) Ś$_1$ वृत्तम्; K$_3$ पूर्तम्; T छन्नम्; G M$_4$ मौर्ख्यम् (for मौर्तम्). M$_3$ [ए]व (for [उ]प-). K$_2$ मूर्तिमच्चापि विद्यते; K$_4$ D$_1$ मूर्तिर्नापि च विद्यते; K$_5$ B Dc$_1$ Dn$_1$ D$_{2-6}$ मुहूर्तमपि लभ्य(K$_5$ Dc$_1$ °मुपलभ्य-; D$_{5.6}$ °मपि विद्य)ते; M$_{1.2}$ ***नैव गम्यते.

8 $^c$) Ś$_1$ K$_{1.3.5}$ B$_3$ (marg.) Dc$_1$ Dn$_1$ D$_{2.5}$ -भेदांतं; K$_2$ -भूतांता; K$_4$ D$_1$ -भूतानां (for -भेदानां). D$_4$ G$_3$ जन्मादिमूर्तभेदांतं (G$_3$ °दानां); D$_6$ °मूर्तिना भेदं. —$^d$) T कर्म भेदेन दृश्यते.

9 $^a$) G$_1$ रक्षिभिर्. D$_3$ बध्यमानेषु; T$_1$ विध्य°; Cv वध्य° (as in text). —$^b$) K$_2$ दृश्यं सर्वेषु; K$_3$ corrupt; K$_4$ D$_1$ दृश्यते सर्व-; K$_5$ D$_{5.6}$ T G$_3$ दृश्यमानेषु; Dc$_1$ Dn$_1$ Cv दृश्यादृश्येषु; G$_{1.2}$ M$_4$ दृश्यश्राव्येषु. K$_5$ कर्मिषु; Dn$_1$ D$_{2-6}$ वर्त्मसु; Cv कर्मसु (as in text). —$^c$) Bom. ed. तेभ्यो (for तेन). D$_3$ आत्मस्थमदनांतेन. —$^d$) G$_{1.2}$ M$_{3.4}$ (*inf. lin.* as in text) महत् (for मया). K$_5$ दृष्टमात्रतमं मया; D$_6$ दृष्टमायतने मया; Cv as in text.

10 $^a$) K$_1$ तत्र; Cv यत्र (as in text). D$_3$ निर्द्वंदो; Cv निर्द्वंद्वं (as in text). —$^b$) K$_4$ D$_1$ यतः; K$_5$ यत्तः (for यत्र). —$^c$) Ś$_1$ K$_1$ (before corr.) व्य(K$_1$ वृ)धायं; Cv व्यवायं (as in text). K$_4$ D$_1$ M$_{1.2}$ व्यवसायं प्रकु(M$_{1.2}$ हि कु)रुते. —$^d$) B$_2$ नरो (for धीरो). D$_3$ धारयेत्. K$_1$ धीरो भूत**जयन्; K$_4$ D$_1$ नित्यं धीर उ(K$_4$ °रमु)दीरयन्; M (M$_4$ *inf. lin.* as in text) धी(M$_3$ शि)रो भूत्वा निधारयन्.

11 $^a$) Dc$_1$ देवास्; M मुक्तास् (for युक्तास्). —$^c$) B$_2$ संयता; Dc$_1$ सव्रता (for सु°). —$^d$) K$_4$ D$_1$ यतेंद्रियाः.

12 $^a$) G$_{1.2}$ ब्राह्मणेन (sic); M$_4$ न घ्राणेन (by transp.). B$_3$ M$_{1.2}$ च; T$_1$ G$_3$ तु (for न). K$_5$ तदा गंधं; G$_3$ तदानेयं (for तदाघ्रेयं). K$_4$ D$_1$ ब्राह्मेन न यदाघ्रेयं. —$^b$) B$_{2.3}$ तद्भक्ष्यं; T G$_3$ M$_4$ (*inf. lin.*) चास्वाद्यं; G$_{1.2}$ M$_{1-3}$ तदद्यं. K$_{2.4.5}$ D (except Dc$_1$) नास्वा(K$_4$ D$_1$ न स्वा)द्यं चैव जिह्वया. —$^c$) G$_1$ वा (for च). B$_{3.4}$ T$_1$ तदस्पृश्यं (for न तत्स्पृश्यं). Ś$_1$ K$_{1.3}$ न स्पृश्ये(K$_1$ °शे)न हि तत्स्पृश्यं (Ś$_1$ °ष्टं); K$_{2.5}$ B$_2$ D$_6$ स्पर्शनेन च तत्स्पृश्यं (K$_5$ °त्स्पर्शं); K$_4$ D$_1$ स्पर्शेनैव च (D$_1$ स्पर्शने चैव) संस्पर्शं; B$_5$ Dn$_1$ D$_{2-5}$ स्पर्शनेन तदस्पृश्यं. —$^d$) Ś$_1$ B$_2$ (marg.).$_{3.4}$ नैव; K$_2$ नाव-; K$_5$ B$_{1.2.5}$ Dc$_1$ Dn$_1$ D$_{2-6}$ T G$_3$ त्वव-; D$_1$ त्वेष (for त्वेव).

13 $^a$) Dc$_1$ T चक्षुषां. G$_1$ सुविषह्यं; G$_2$ अपि सह्यं; M$_4$ अविलभ्यं (for न विषह्यं). K$_{2.4.5}$ B Dn$_1$ D$_{1-6}$ M$_4$ चक्षुषामविष(D$_{2-6}$ °स)ह्यं च. —$^c$) K (except K$_1$) D$_{1.4}$ G$_2$ M अगंधरसमस्पर्शम्; Cv as in text. —$^d$) K$_1$ M$_4$ (*inf. lin.*) अ(K$_1$ स)रूपशब्दम्. B$_2$ (marg.).$_3$ Dn$_1$ D$_{2-6}$ अरूपा(B$_3$ D$_6$° प)शब्दलक्षणं; T$_1$ G$_3$ अरूपं (G$_3$ °शब्दं) चैवं शाश्वतं; G$_{1.2}$ M$_4$ अरूपं शब्दवर्जितं.

14 G$_1$ M$_{3.4}$ read 14$^{ab}$ twice. —$^a$) K$_2$ G$_1$ M$_{3.4}$ (last three second time) ततः; K$_4$ D$_1$ यत्र (for

C. 14. 612
B. 14. 20. 14
K. 14. 21. 14

प्राणोऽपानः समानश्च व्यानश्चोदान एव च ॥ १४
तत एव प्रवर्तन्ते तमेव प्रविशन्ति च ।
समानव्यानयोर्मध्ये प्राणापानौ विचेरतुः ॥ १५
तस्मिन्सुप्ते प्रलीयेते समानो व्यान एव च ।
अपानप्राणयोर्मध्ये उदानो व्याप्य तिष्ठति ।
तस्माच्छयानं पुरुषं प्राणापानौ न मुञ्चतः ॥ १६
प्राणानायम्यते येन तमुदानं प्रचक्षते ।
तस्मात्तपो व्यवस्यन्ति तद्भवं ब्रह्मवादिनः ॥ १७
तेषामन्योन्यभक्षाणां सर्वेषां देहचारिणाम् ।
अग्निर्वैश्वानरो मध्ये सप्तधा विहितोऽन्तरा ॥ १८
घ्राणं जिह्वा च चक्षुश्च त्वक्च श्रोत्रं च पञ्चमम् ।
मनो बुद्धिश्च सप्तैता जिह्वा वैश्वानरार्चिषः ॥ १९
घ्रेयं पेयं च दृश्यं च स्पृश्यं श्रव्यं तथैव च ।
मन्तव्यमथ बोद्धव्यं ताः सप्त समिधो मम ॥ २०
घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चमः ।
मन्ता बोद्धा च सप्तैते भवन्ति परमर्त्विजः ॥ २१
घ्रेये पेये च दृश्ये च स्पृश्ये श्रव्ये तथैव च ।
हवींष्यग्निषु होतारः सप्तधा सप्त सप्तसु ।

---

यतः). K$_{2.3}$ D$_{3}$ तत्र; M$_{4}$ (*inf. lin.* as in text) मंत्रं; **C**v तत्रं (as in text). —$^{b}$) T M$_{1.2.4}$ (second time) तत्र; G$_{1}$ (second time).$_{2}$ M$_{3}$ (second time) नात्र (for यत्र). G$_{1}$ (first time) यत्र चैतत्प्रतिष्ठितं. — G$_{3}$ om. (hapl.) 14$^{c}$–16$^{d}$. —$^{d}$) B$_{1–3}$ D$_{6}$ उदानो व्या-(B$_{2.3}$ °नव्या)न एव च.

15 G$_{3}$ om. 15 (cf. v. l. 14). D$_{6}$ om. (hapl.) 15$^{a}$–16$^{b}$. —$^{a}$) Ś$_{1}$ K$_{1–4}$ तत एते; K$_{5}$ एते सर्वे (for तत एव). —$^{b}$) K$_{2.4.5}$ तत्रैव; B D (D$_{6}$ om.) T$_{2}$ तदेव (for तमेव). —$^{c}$) M$_{4}$ (*inf. lin.* as in text) -प्राणयोर् (for -व्यान°). — K$_{3}$ om. (hapl.) 15$^{d}$–16$^{c}$. —$^{d}$) Ś$_{1}$ M$_{2}$ विचेरतः; **C**np विमुंचतः.

16 G$_{3}$ om. 16$^{abcd}$ (cf. v. l. 14). K$_{3}$ om. 16$^{abc}$; D$_{6}$ om. 16$^{ab}$ (for both, cf. v. l. 15). —$^{a}$) D$_{1}$ शेते; Bom. ed. लीने (for सुप्ते). Ś$_{1}$ K$_{1}$ नि(K$_{1}$ वि)लीयेते; K$_{2.4}$ G$_{1.2}$ M$_{1–3}$ प्रलीयंते; K$_{5}$ Dc$_{1}$ Dn$_{1}$ D$_{2–5}$ °येत. —$^{d}$) M$_{1.2}$ ह्युदानो. —$^{e}$) M$_{1.2}$ तस्माच्छयानः पुरुषः. —$^{f}$) M$_{1.2}$ वि- (for न).

17 The portion from 17 up to 26 is lost in Dn$_{1}$, on a missing folio. —$^{a}$) K$_{1.3}$ आयमते. K$_{5}$ D$_{2.4.5}$ प्राणानामायतत्वेन; B Dc$_{1}$ °ना(B$_{2.3}$ Dc$_{1}$ °न्ना)मयते येन; D$_{3}$ °पानायतत्वेन; D$_{6}$ °नां पावने तत्त्वे; T$_{1}$ G$_{1.2}$ प्राणेनोपहते यत्तु; T$_{2}$ प्राणमागच्छति हीयं; G$_{3}$ प्राणानायम्यति हीयं; M प्राणेनावहते यत्तु (M$_{4}$ *sup. lin.* °स्तु). —$^{b}$) G$_{3}$ अपानं (for उदानं). B$_{1.2}$ D$_{1}$ प्रचक्ष्यते. —$^{c}$) B$_{2.4}$ (marg.).$_{5}$ तयोर्; B$_{3}$ ततो (for तपो). —$^{d}$) Ś$_{1}$ K$_{1.3.5}$ तद्व्रतं; B$_{5}$ G$_{1.2}$ तद्भयं; Dc$_{1}$ उत्तरं; D$_{2.4.5}$ मद्व्रतं; T तत्परं; M$_{1}$ तद्भावं; M$_{2}$ तद्भावो. K$_{2}$ ब्रह्मवादिनं.

18 Dn$_{1}$ missing (cf. v. l. 17). K$_{4}$ D$_{1}$ om. 18$^{ab}$. —$^{a}$) Ś$_{1}$ K$_{3}$ D$_{3}$ T -भक्ष्याणां; G$_{1.2}$ -सक्तानां; G$_{3}$ -क्लिष्टानां; M$_{3.4}$ -भक्तानां. —$^{b}$) T$_{1}$ कष्टानां (for सर्वेषां). K$_{3}$ देहधारिणां. —$^{c}$) T$_{1}$ मन्ये (for मध्ये). —$^{d}$) Ś$_{1}$ K$_{1.3}$ B$_{1–3}$ निहितोंतरा; K$_{2.4.5}$ D$_{1}$ T$_{1}$ विहितोंतरे (K$_{2}$ °रं); B$_{5}$ दीप्यतेंतरा; D$_{3}$ दिव्यतेंतरा; D$_{4}$ दीर्यतेंतरा; D$_{5}$ दिव्यते तदा; G$_{3}$ M$_{3}$ विहितोंतरः; M$_{1.2}$ भवितांतरा. D$_{6}$ सप्तधा व्यसते सदा.

19 Dn$_{1}$ missing (cf. v. l. 17). —$^{a}$) D$_{3}$ T$_{1}$ घ्राण-; G$_{1}$ M (M$_{4}$ *inf. lin.* as in text) घ्राणो. K$_{3}$ D$_{6}$ जिह्वाश्. Dc$_{1}$ घ्राणो जिह्वा रसश्चक्षुस्. —$^{b}$) K$_{2.4}$ D$_{1}$ T$_{2}$ M$_{3}$ त्वक्श्रोत्रं चैव पंचमं. —$^{c}$) G$_{2}$ M$_{1.2}$ तु सप्तैते (G$_{2}$ °व) (for च सप्तैता).

20 Dn$_{1}$ missing (cf. v. l. 17). D$_{4}$ reads 20 on marg. —$^{a}$) D$_{3}$ घ्राणं (for घ्रेयं). D$_{2.4–6}$ घ्रेयं दृ(D$_{2}$ प)श्यं च पेयं च. —$^{b}$) K$_{3}$ स्वाद्यं; K$_{4}$ D$_{1}$ स्पर्शं (for स्पृश्यं). K$_{5}$ द्रव्यं; D$_{3.6}$ G M श्राव्यं; T ग्राह्यं (for श्रव्यं). —$^{c}$) K$_{4}$ D$_{1}$ इति; K$_{5}$ T$_{1}$ G$_{1.2}$ अव- (for अथ). —$^{d}$) B$_{1.2}$ T G M$_{4}$ (*inf. lin.*) मताः (for मम).

21 Dn$_{1}$ missing (cf. v. l. 17). —$^{a}$) K$_{2}$ व्रतो (for घ्राता). B$_{1.2}$ G$_{3}$ स्प्रष्टा (for द्रष्टा). —$^{b}$) K$_{2.4}$ D$_{6}$ स्पृष्टा श्रोता; K$_{3}$ श्रोता प्रष्टा; B$_{1.2}$ G$_{3}$ द्रष्टा श्रोता. K$_{4}$ M$_{2.3}$ पंचमं. —$^{c}$) Dc$_{1}$ मंता बोध्य च सप्तैव. —$^{d}$) K$_{1}$ B$_{5}$ परमद्विजः (for °मर्त्विजः).

22 Dn$_{1}$ missing (cf. v. l. 17). T$_{1}$ G$_{1.2}$ om. 22$^{ab}$. —$^{a}$) K$_{1}$ घ्रेयं पेयं; **C**v घ्रेये पेये (as in text). K$_{3}$ भक्ष्ये; D$_{2}$ दृश्यं. D$_{2}$ ते (for च). M (M$_{4}$ *inf. lin.* as in text) घ्रेयं पेयं च दृश्यं च. —$^{b}$) K$_{1.5}$ स्पृश्ये द्रव्ये; K$_{3}$ दृश्ये श्रव्ये; D$_{3}$ स्पृश्यश्रव्ये; D$_{4}$ स्पर्शे श्रव्ये; T$_{2}$ स्पृश्ये गृह्ये; G$_{3}$ M$_{4}$ (*inf. lin.*) स्पृश्ये श्राव्ये; M

सम्यक्प्रक्षिप्य विद्वांसो जनयन्ति स्वयोनिषु ॥ २२
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ।
मनो बुद्धिश्च सप्तैते योनिरित्येव शब्दिताः ॥ २३
हविर्भूता गुणाः सर्वे प्रविशन्त्यग्निजं मुखम् ।
अन्तर्वासमुषित्वा च जायन्ते स्वासु योनिषु ।
तत्रैव च निरुध्यन्ते प्रलये भूतभावने ॥ २४
ततः संजायते गन्धस्ततः संजायते रसः ।
ततः संजायते रूपं ततः स्पर्शोऽभिजायते ॥ २५
ततः संजायते शब्दः संशयस्तत्र जायते ।
ततः संजायते निष्ठा जन्मैतत्सप्तधा विदुः ॥ २६
अनेनैव प्रकारेण प्रगृहीतं पुरातनैः ।
पूर्णाहुतिभिरापूर्णास्तेऽभिपूर्यन्ति तेजसा ॥ २७ C. 14. 627 B. 14. 20. 28 K. 14. 21. 28

इति श्रीमहाभारते आश्वमेधिकपर्वणि विंशोऽध्यायः ॥ २० ॥

---

स्पृश्यं श्राव्यं. — After $22^{b}$, Ś1 K D1–6 ins. :

50* मन्तव्येऽप्यथ बोद्धव्ये सुभगे पश्य सर्वदा ।

[ K2. 4 D1 चैव ( for ऽप्यथ ). ]

— K3 om. $22^{cd}$. —$^{d}$) K4 D1 सप्त वा ; B1. 2. 4 ( marg. ) समिधः ( for सप्तधा ). —$^{f}$) Dc1 स्व ; D6 सु- ( for स्व- ). — After 22, B1. 2 T2 ins. :

51* करणं कर्म कर्ता च मोक्षमित्येव वादिनः ।

[ T2 मोक्ष इत्येव वा फलं ( for the post. half ). ]

23 Dn1 missing ( cf. v. l. 17 ). G3 om. ( hapl. ) 23–24. —$^{c}$) B Dc1 D2–6 सप्तैता. —$^{d}$) D6 अंतेव ( for इत्येव ).

24 Dn1 missing ( cf. v. l. 17 ). G3 om. 24 ( cf. v. l. 23 ). —$^{a}$) Ś1 K3 B3. 5 Dc1 हवि र्भूत- ; D3 हव्यभूता ; T1 G1. 2 M4 हविर्भूत्वा. D2 G1 गणाः. —$^{b}$) K1 B5 Dc1 सुखं ; K4. 5 D2–4 गुगं ; G1 मुखे. D5. 6 प्रविशंति गुणेग्नि( D6 °ग्र )जे. — D4 om. ( ? hapl. ) $24^{c}$–$26^{d}$. —$^{c}$) K1. 3 अग्निवासम् ; K4 D1 अंतर्धानम् ; K5 B2 अनुवासम्. K3 उपागम्य ( for उषित्वा च ). —$^{d}$) D2. 3. 5. 6 G1 जायते. K2 तासु ; D3 स्वांश- ; G1 हि सु- ( for स्वासु ). —$^{e}$) D3 तत्रैवं. Ś1 ( *inf. lin.* ) K1 निरुप्यंते ; K5 निरुह्यंत ( for °ध्यन्ते ). —$^{f}$) Some MSS. प्रळये. K5 पूत- ( for भूत- ).

25 Dn1 missing ( cf. v. l. 17 ). D4 om. 25 ( cf. v. l. 24 ). D3 om. ( hapl. ) 25. Dc1 om. ( hapl. ) $25^{a}$. D5 reads 25 on marg. Ś1 reads $25^{ab}$ twice. —$^{a}$) D6 शद्बः ( for गन्धस् ). —$^{b}$) D6 स्पर्शः संजायते ततः. — K4 D1 om. ( hapl. ) $25^{c}$–$26^{b}$. —$^{c}$) M2 रसस् ( for रूपं ). —$^{d}$) K3 [ ऽ ]पि ; M1. 2 हि ; M3 वि- ( for ऽभि- ). D5. 6 रसः संजायते ततः ( cf. $25^{b}$ ).

26 Dn1 missing ( cf. v. l. 17 ). D4 om. 26 ( cf. v. l. 24 ). K4 D1 om. $26^{ab}$ ( cf. v. l. 25 ). —$^{a}$) D5. 6 गंधः ( for शब्दः ). —$^{b}$) M1–3 संश्रयस्. B1. 2 ( marg. ) स्त्वथ ; B2 स्त्वत्र ( for तत्र ). —$^{c}$) D3 अतः. D6 ततो निष्ठा त्वभूत्तत्र. —$^{d}$) G1 शर्मैतत् ; M1. 2 जंतोस्तत् ( for जन्मैतत् ).

27 $^{b}$) K2 प्रगृहीत ; K3 T1 °हीता ; G3 M4 ( *inf. lin.* ) °हीताः. G1. 2 पुरातनं. —$^{c}$) M1. 2 आकीर्णास् ( for आपू° ). —$^{d}$) K3 B2 तेपि ; B1. 5 Dn1 D2–6 त्रिभिः ; G1 ते हि ; M4 ताभिः ( for तेऽभि- ). D4 -तप्यंति ; G2 -पूर्यंत ; M1. 2 -पूज्यंति ( for -पूर्यन्ति ). D1 G1 M1. 2 तेजसः. K2 ते पूजयंति तेजसा ; T G3 तैः पूर्यंते हि ( G3 ह ) तेजसा.

Colophon. — *Sub-parvan :* Ś1 K1–3 T1 G1 M4 अनुगीता ; T2 M1–3 उपगीता. — *Adhy. name :* K2. 4. 5 B D ब्राह्मणगीता ; T G3 ब्राह्मणब्राह्मणीसंवादः ; M1–3 दंपतीसंवादः. — *Adhy. no.* ( figures, words or both ) : Ś1 23 ; Dn1 D4 T2 G1. 2 M1–3 20 ( as in text ) ; T1 G3 M4 21.

# २१

C. 14. 628
B. 14. 21. 1
K. 14. 22. 1

ब्राह्मण उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
निबोध दशहोतॄणां विधानमिह यादृशम् ॥ १

सर्वमेवात्र विज्ञेयं चित्तं ज्ञानमवेक्षते ।
रेतः शरीरभृत्काये विज्ञाता तु शरीरभृत् ॥ २
शरीरभृद्गार्हपत्यस्तस्मादन्यः प्रणीयते ।

---

## 21

1 K$_4$ D$_1$ श्री( K$_4$ om. )वासुदेव ( for ब्राह्मण ). — After $1^b$, T G$_2$ ins. :

52* इन्द्रियाणां च संवादं मनसश्चैव भामिनि ।

— $^c$ ) K$_3$ D$_6$ -होत्राणां. — $^d$ ) G$_3$ निदानम् ( for विधा° ). D ( except Dc$_1$ D$_1$ ) अथ ( for इह ). — Ś$_1$ K$_{1.3.5}$ B$_{1.2}$ D ( except Dc$_1$ ) T$_2$ ins. after 1 : K$_{2.4}$ after $2^b$ :

53* श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चरणौ करौ ।
उपस्थः पायुरेतानि होतॄणि दश भामिनि ।
शब्दस्पर्शौ रूपरसौ गन्धो वाक्यं क्रिया गतिः ।
रेतोमूत्रपुरीषाणां त्यागो दश हवींषि च ।
दिशो वायू रविश्चन्द्रः पृथ्व्यग्नी विष्णुरेव च । [5]
इन्द्रः प्रजापतिर्मित्रमग्नयो दश भामिनि ।
दशेन्द्रियाणि होतॄणि हवींषि दश भामिनि ।
विषया नाम समिधो हूयन्ते तु दशाग्निषु ।

[ ( L. 1 ) Ś$_1$ K$_1$ B$_{1.2}$ D$_{5.6}$ नासा वाक् ( for नासिका ). T$_2$ नासिका श्रोत्रं जिह्वा च चक्षुस्त्वग्वाक्करौ पदौ. — ( L. 2 ) K$_{1.5}$ Dn$_1$ D$_{2-6}$ उपस्थं. K$_5$ D$_{4.5}$ वायुर् ( for पायुर् ). K$_5$ इति वाग्; Dn$_1$ D$_{2.4-6}$ इति वा ; D$_3$ अथ वाग्; T$_2$ इतीह ( for एतानि ). K$_2$ D$_1$ वागुपस्थं पायुरिति ( for the prior half ). D$_3$ दश होतॄणि ( by transp. ). — D$_1$ om. ( hapl. ) lines 3–6. — ( L. 3 ) K$_{2.4}$ B$_{1.2}$ T$_2$ शब्दः स्पर्शो रसो रूपं ( for the prior half ). T$_2$ om. from क्यं क्रिया up to मग्नयो ( in line 6 ). Ś$_1$ K$_3$ गतिः क्रिया ( by transp. ). — ( L. 5 ) K$_{2.4}$ च शतक्रतुः ( for विष्णुरेव च ). B$_{1.2}$ रसो विद्युद्धविश्चंद्रो विधयोग्निः शतक्रतुः. — ( L. 6 ) K$_{2.4}$ विष्णुः ; B$_{1.2}$ पायुः ( for इन्द्रः ). — K$_3$ D$_3$ om. ( hapl. ) line 7. — ( L. 7 ) Ś$_1$ होतॄणां. K$_{1.2}$ Dn$_1$ D$_2$ भाविनि ; B$_{1.2}$ तानिह ( for भामिनि ). — ( L. 8 ) Ś$_1$ K$_{1-4}$ B$_{1.2}$ D$_1$ विषयाः ( K$_4$ D$_1$ °ज्ञेयाः ) समिधांद्दशे ( for the prior half ). K$_{1.2.4}$ D$_1$ च दश ; K$_3$ दश वा ; T$_2$ दश च ( for तु दश ). ]

B$_{1.2}$ Dn$_1$ D$_{5.6}$ T$_2$ cont. : B$_{3-5}$ Dc$_1$ T$_1$ ins. after 1 :

54* चित्तं स्रुवं च वित्तं च पवित्रं ज्ञानमुत्तमम् ।
सुविभक्तमिदं सर्वं जगदासीदिति श्रुतम् ।
ततो विविक्ता चिन्तासीत्सा चित्तं पर्यवेक्षते ।

[ ( L. 1 ) B$_{1.2}$ श्रुतं ( for स्रुवं ). Dc$_1$ च चित्ति च; T चित्तचितं ( T$_2$ °त्ति ) ( for च वित्तं च ). — T$_1$ om. lines 2–3. — ( L. 2 ) Dc$_1$ अविभक्तम्. — Dn$_1$ D$_{5.6}$ om. line 3. — ( L. 3 ) B$_{1.2.4}$ ( also as above ) ततश्चित्तिर्विभक्तासीत् ( for the prior half ). B$_{3.4}$ प्रत्यपेक्षते. ]

B Dc$_1$ cont :

55* श्रुत्वा चित्तं स्रुगित्येव मनश्चित्तं तदुच्यते ।
तयोर्विविक्ता नागासीदचला शब्दलक्षणा ।
नग्नेव योषा सव्रीडा सा वासः पर्यवेक्षते ।
तस्मात्संजज्ञिरे वर्णाः स्वरा मन्त्रास्तथैव च ।
एतच्च नः सरस्वत्याः प्रजापतिरथाब्रवीत् । [5]

[ ( L. 1 ) B$_{3.5}$ श्रद्धा ( for श्रुत्वा ). B$_{1.2}$ श्रद्धा चित्ति श्रुवश्चैव ( for the prior half ). — ( L. 2 ) B$_{1.2}$ विभक्ता. — ( L. 4 ) B$_{1.2.5}$ सर्व- ( for स्वरा ). — ( L. 5 ) B$_3$ चैव ; B$_5$ चलः ( for च नः ). ]

2 D$_4$ om. $2^{ab}$. K$_{2.4}$ repeat $2^{ab}$ after 53*. — $^a$ ) T$_2$ G$_3$ M$_4$ ( *inf. lin.* ) सत्यम् ( for सर्वम् ). K$_{2.4}$ ( both first time ) [अ]नु- ; K$_5$ Dn$_1$ D$_{2.3.5.6}$ [अ]थ ( for [अ]त्र ). — $^b$ ) K$_4$ ( second time ) D$_1$ चिंता; T$_1$ G$_3$ M$_4$ चित्त- ; G$_1$ चित्ते ( for चित्तं ). K$_3$ B$_{1.2}$ अवेक्ष्यते ; B$_{3.4}$ M$_3$ अपेक्षते ; T G M$_4$ ( *inf. lin.* ) अवेक्षतां. K$_{2.4}$ ( both first time ) चित्तं विज्ञानमीक्षते. — K$_3$ om. ( hapl. ) $2^c$–$4^b$. — After $2^b$, K$_{2.4}$ ins. 53*. — $^c$ ) B ( except B$_4$ ) Dc$_1$ G$_3$ M$_4$ ( *inf. lin.* ) Cv चेतः ; D$_4$ ततः ; M$_4$ इंजे ( for रेतः ). K$_5$ -धृक्काये ; G$_3$ M$_4$ Cv -भोक्ता च ( for -भृत्काये ). — $^d$ ) Ś$_1$ K$_1$ B$_{1.2}$ विज्ञातात्र ; B$_{3.4}$ Dc$_1$ T$_2$ G$_1$ M$_{1-3}$ °नात्तु ; B$_5$ °नाद्दु ( sic ) ; Dn$_1$ D$_1$ °ता नु ; T$_1$ °यात्म- ; G$_2$ °तं तु ; G$_3$ यो विज्ञाता ( for विज्ञाता तु ).

3 K$_3$ om. 3 ( cf. v. l. 2 ). — $^b$ ) T G अग्निः ; M अन्यत् ; Cv अन्यः ( as in text ). D$_1$ M$_{1.2}$ प्रलीयते. — After $3^b$, T G M$_4$ read $4^{cd}$, repeating it in its

ततश्चाहवनीयस्तु तस्मिन्संक्षिप्यते हविः ॥ ३
ततो वाचस्पतिर्जज्ञे समानः पर्यवेक्षते ।
रूपं भवति वै व्यक्तं तदनुद्रवते मनः ॥ ४

ब्राह्मण्युवाच ।

कस्माद्वागभवत्पूर्वं कस्मात्पश्चान्मनोऽभवत् ।
मनसा चिन्तितं वाक्यं यदा समभिपद्यते ॥ ५
केन विज्ञानयोगेन मतिश्चित्तं समास्थिता ।
समुन्नीता नाध्यगच्छत्को वैनां प्रतिषेधति ॥ ६

ब्राह्मण उवाच ।

तामपानः पतिर्भूत्वा तस्मात्प्रेष्यत्यपानताम् ।
तां मतिं मनसः प्राहुर्मनस्तस्मादवेक्षते ॥ ७
प्रश्नं तु वाङ्मनसोर्मां यस्मात्त्वमनुपृच्छसि ।
तस्मात्ते वर्तयिष्यामि तयोरेव समाह्वयम् ॥ ८
उभे वाङ्मनसी गत्वा भूतात्मानमपृच्छताम् ।
आवयोः श्रेष्ठमाचक्ष्व छिन्धि नौ संशयं विभो ॥ ९
मन इत्येव भगवांस्तदा प्राह सरस्वतीम् ।

C. 14. 642
B. 14. 21. 15
K. 14. 22. 15

---

proper place. —$^{c}$) Dn$_1$ D$_{2-6}$ मनश् (for ततश्). K$_{2.4}$ तु (for च). K$_5$ D$_3$ च (for तु). D$_1$ नमः-स्वाहाश्चाहुतयो. —$^{d}$) Ś$_1$ K$_1$ ततः; K$_{2.4.5}$ D$_1$ G$_2$ M यस्मिन्; T G$_1$ तस्मात् (for तस्मिन्). K$_5$ B D (except D$_1$) G$_3$ प्रक्षिप्यते (for संक्षि°).

4 K$_3$ om. $4^{ab}$ (cf. v. l. 2). —$^{a}$) K$_{2.4}$ Dc$_1$ D$_{1-3.5.6}$ यज्ञे; D$_4$ यज्ञं; M$_{1.2}$ अभूत् (for जज्ञे). —$^{b}$) K$_1$ B$_{2.3.4}$ (marg. as in text) Dc$_1$ समानं; B$_{1.5}$ Dn$_1$ D$_{1-6}$ तं मनः; G$_3$ **C**v मनसा (for समानः). K$_2$ T$_1$ G$_1$ पर्युपेक्षते; D$_1$ M$_{1.2}$ पर्यपेक्षते. M$_4$ (*inf. lin.*) मनसा यदवेक्षते. — T G M$_4$ read (without var.) $4^{cd}$ for the first time after $3^{b}$. —$^{c}$) K$_5$ B$_{1.2}$ (marg. as in text).$_4$ (marg.) पूर्वं; **C**v रूपं (as in text). K$_5$ D$_3$ च (for वै). Ś$_1$ वाक्तं; K$_1$ वाक्तु; K$_{2.4}$ D$_1$ चक्षुस्; K$_3$ T G$_{1.2}$ वक्त्रं; K$_5$ [ए]षा वाक्; B$_{1.4}$ (marg.) D$_2$ वाक्च; B$_2$ (marg. as in text).$_{3-5}$ Dc$_1$ M$_{1.2}$ वक्तुं; Dn$_1$ D$_{4.5}$ वर्णं; D$_3$ [ए]वायं; D$_6$ चैव; M$_3$ भर्तुस्; M$_4$ (*inf. lin.* as in text) कर्तुं (for व्यक्तं). —$^{d}$) Ś$_1$ K$_{1-4}$ M$_4$ (*inf. lin.*) तमनु-; K$_5$ B$_{1.4}$ (marg.) D$_2$ तामनु-; B$_{2-5}$ Dc$_1$ Dn$_1$ D$_{3-6}$ समनु- (for तदनु-). M$_{1.2}$ मनोथ दधते महान्. ❀ **C**v : तन्, मनः अनुद्रवते । ❀

5 D$_5$ om. 5. M$_{1.2}$ om. 5–6 together with the ref. D$_1$ om. the ref. D$_{5.6}$ ब्राह्मण. —$^{a}$) T$_2$ G$_1$ यदा (for कस्माद्). D$_1$ भगवतः; D$_{2.3.6}$ G$_2$ M$_{3.4}$ (*inf. lin.*) वा भगव(M$_3$ °वा)न्. —$^{b}$) K$_3$ अभून्मनः; D$_{1-4}$ मनो भवेत्. —$^{c}$) K$_3$ कार्यं; K$_5$ वाचा; T G$_{1.2}$ M$_{3.4}$ पूर्वं (for वाक्यं). —$^{d}$) K$_2$ यथा; T G$_{1.2}$ M$_{3.4}$ वाक्यं; G$_3$ सदा (for यदा). K$_3$ -गृह्यते (for -पद्यते).

6 M$_{1.2}$ om. 6 (cf. v. l. 5). —$^{a}$) K$_4$ D$_1$ तेन (for केन). —$^{b}$) G$_3$ मनश्चासं (for मतिश्चित्तं). K$_2$ B$_2$ Dc$_1$ M$_{3.4}$ समाप्लुता; K$_4$ D$_1$ समश्नुते; B$_{1.2}$ (marg.).$_{3-5}$ T$_2$ समाप्नुयात्; D$_3$ समन्विता; T$_1$ समावृता; G$_1$ अवाप्लुतः; G$_3$ समाप्लुतं (for °स्थिता). G$_2$ मतिवित्तसमाप्नुता. —$^{c}$) K$_4$ D$_{1.6}$ समतीतां (D$_6$ °ता) (for समुन्नीता). Ś$_1$ K$_{3.5}$ चाभ्यगच्छत्; K$_1$ चाति°; D$_{2.4}$ चाध्य°; S नाधिगच्छेत्. —$^{d}$) B Dc$_1$ चैनां; Dn$_1$ D$_{1-5}$ वै तां (for वैनां). K$_5$ G$_3$ प्रतिषेधते; B D (except D$_1$) °बाध(D$_4$ °बोध्य)ते.

7 M$_{1-3}$ om. the ref. K$_4$ D$_1$ om. $7^{ab}$. —$^{a}$) K$_2$ **C**v तामुदानः; T G M$_4$ (*inf. lin.*) तं म(T$_2$ तां म-; G$_2$ तन्म)नस्थ- (for तामपानः). M$_{1.2}$ तमपानं गतिर्भूत्वा; M$_3$ तमपानो व्रतीभूत्वा. —$^{b}$) K$_3$ कस्मात्. K$_{3.5}$ B D (except Dc$_1$; D$_1$ om.) प्रेषति; G$_3$ M$_{1.2}$ प्रेक्षति. Ś$_1$ (marg.) B [अ]पातनीं; K$_{1-3}$ °नती; Dc$_1$ [अ]पातनी; Dn$_1$ °व्रतां; M$_{1.2}$ °ननीः (for °नताम्). T$_1$ तस्मात्प्रेष्यान्निबोधति; T$_2$ °त्प्रेष्याथ जानतीं; G$_1$ °त्प्रेहंन्निवायति (sic); G$_2$ °त्प्रेष्यंति बोधति; M$_3$ °त्प्रेत्य महानिति; M$_4$ °त्प्रेत्यमपानती (*inf. lin.* °त्प्रैक्षतमानतं). —$^{c}$) Dn$_1$ गतिं; **C**np मतिं (as in text). K$_{1.3}$ मनसा; D$_6$ तमसः. —$^{d}$) B D (except D$_1$) T$_1$ अपेक्षते.

8 $^{a}$) B$_1$ प्रश्नस्. Ś$_1$ K$_{1.3.4}$ B$_{3.4}$ Dc$_1$ D$_1$ G$_3$ M$_4$ मां (Ś$_1$ M$_4$ मा; K$_1$ वा; B$_3$ G$_3$ वै) वाङ्मनसोर् (by transp.); D$_4$ T G$_{1.2}$ वाङ्मनसयोर्. M$_{1.2}$ प्रेक्ष्यमानस्तु मनसा (sic). —$^{b}$) K$_4$ B$_{2.3}$ D$_1$ यन्मां (for यस्मात्). K$_4$ D$_1$ परि- (for अनु-). —$^{c}$) D$_3$ तं (for ते). K$_2$ दर्शयिष्यामि; K$_3$ D$_{5.6}$ वर्णं° (for वर्तं°). —$^{d}$) K$_4$ एतं; D$_1$ एवं (for एव). Ś$_1$ K$_1$ समाह्वयत्; B$_4$ T$_2$ समागमं (for °ह्वयम्).

9 $^{a}$) B$_{1.2}$ उभये (hypermetric) (for उभे). K$_3$

C. 14. 642
B. 14. 21. 15
K. 14. 22. 15

अहं वै कामधुक्तुभ्यमिति तं प्राह वागथ ॥ १०
स्थावरं जङ्गमं चैव विद्ध्युभे मनसी मम ।
स्थावरं मत्सकाशे वै जङ्गमं विषये तव ॥ ११
यस्तु ते विषयं गच्छेन्मन्त्रो वर्णः स्वरोऽपि वा ।
तन्मनो जङ्गमं नाम तस्मादसि गरीयसी ॥ १२
यस्मादसि च मा वोचः स्वयमभ्येत्य शोभने ।
तस्मादुच्छ्वासमासाद्य न वक्ष्यसि सरस्वति ॥ १३
प्राणापानान्तरे देवी वाग्वै नित्यं स्म तिष्ठति ।
प्रेर्यमाणा महाभागे विना प्राणमपानती ।
प्रजापतिमुपाधावत्प्रसीद भगवन्निति ॥ १४
ततः प्राणः प्रादुरभूद्वाचमाप्याययन्पुनः ।
तस्मादुच्छ्वासमासाद्य न वाग्वदति कर्हिचित् ॥ १५
घोषिणी जातनिर्घोषा नित्यमेव प्रवर्तते ।
तयोरपि च घोषिण्योर्निर्घोषैव गरीयसी ॥ १६
गौरिव प्रस्रवत्येषा रसमुत्तमशालिनी ।
सततं स्यन्दते ह्येषा शाश्वतं ब्रह्मवादिनी ॥ १७

---

G3 वाङ्मनसे; Dc1 वाङ्मानसा. B2 (marg.). 3 (marg. as in text). 5 ध्यात्वा (for गत्वा). T1 उभेव मनसी भूत्वा. —$^{b}$) B5 अपृच्छतौ (sic); D1 °च्छत. —$^{c}$) T1 अनयोः (for आवयोः). —$^{d}$) K3 B3. 4 Dc1 नः (for नौ). B1. 2 भृशं (for विभो).

10 $^{a}$) M1. 2 तत (for मन). G3 [आ]ह (for [ए]व). —$^{b}$) K4 D1 तथा; T G1 M ततः (for तदा). K4 B4 D3 सरस्वती. —$^{c}$) K5 अयं (for अहं). D1 च (for वै). Ś1 K1. 3 अहं कामदुघा तुभ्यम्. —Dc1 om. 10$^{d}$. —$^{d}$) K2 अथ (for इति). K1 ते; G3 [इ]दं (for तं). K4 D1 चानघ; G2 वाग्विधिं (for वागथ).

11 Before 11, Ś1 ins. ब्रह्मा; K2. 4. 5 B3 D (except Dc1) ब्राह्मण उवाच; G3 M4 प्रजापतिः. G1 om. 11$^{bc}$. —$^{b}$) B4 T2 विद्येते; B5 विद्ध्येते; D3 वियुग्मे (for विद्ध्युभे). D3 स्थितं (for मम). —$^{d}$) K1 D4 विशते (for विषये). ❀ Cv : जङ्गमं तव विषये वर्तते । ❀

12 $^{a}$) K1. 3 G3 मत्तु (for यस्तु). K4. 5 D (except Dc1 D1) तं (for ते). T G M3. 4 विषये. G1. 3 M गच्छन्. —$^{b}$) Ś1 K1. 4. 5 D1 G3 M वर्णो मंत्रः (by transp.); K2 धर्मो मंत्रः. —$^{c}$) B4 (marg. as in text) तं मोक्षं; Dc1 तन्मोक्षं; M4 तस्मान्नो (for तन्मनो). —$^{d}$) Ś1 D3 G2. 3 M1. 2 अपि (for असि).

13 $^{a}$) K2. 4 B3 D1 अपि; K5 अति; G3 M4 (*inf. lin.*) Cv इदं (for असि). K2. 4. 5 G3 M4 (*inf. lin.*) तु; Cv त्वं (for च). K4 मां वोचः; K5 मे वाचः. B1. 2. 3 (marg.). 4. 5 Dc1 Dn1 D2–6 य( Dc1 त-; D5. 6 अ )स्मादपि समाधिस्ते; T G1. 2 M3. 4 त- ( M3. 4 य )स्मान्नवितुमर्हामि; M1. 2 यस्मान्नवितुं मामिच्छेत्. —$^{b}$) K3 M3 अभ्येति; Dn1 अपेत्य; D1 अभ्येत्तु; G1 अप्येत्य. —$^{d}$) Ś1 प्रवक्ष्यसि; B (except B1) Dn1 D2–6 प्रवक्ष्यामि; M1. 2 त्वं वक्ष्यसि. B1–3 G3 सरस्वतीं (G3 °ती). K2. 4. 5 D1 न वाग्वदति कर्हिचित्; K3 T G1. 2 M3. 4 प्रव( K3 ते व )क्ष्यामि सरस्वतीं; M4 (*inf. lin.*) न वक्ष्यति सरस्वती.

14 $^{a}$) Ś1 K1. 3 नित्या; K2. 4. 5 D1 M1. 2 निल्यं; G2. 3 M3. 4 यस्माद् (for देवी). B2 प्राणाः प्राणांतरे देवी; T G1 प्राणापानावंतरे यद्. —$^{b}$) T1 वाचे; G2 अहं; M1. 2 वाक्ये (for वाग्वै). G3 यत्र (for नित्यं). S (except M1. 2) प्रतिष्ठिता (for स्म तिष्ठति). K2. 4. 5 D1 वाग्वै सम्यक्प्रतिष्ठिता; D5. 6 वागेवे( D6 °वै )ति प्रतिष्ठिता. —$^{c}$) Ś1 (by corr.) K1. 3. 5 पूर्यमाणा; K4 D1 प्रेक्ष्य°; G2 M4 प्रेर्यमाणं ( M4 °णो ) (for °माणा). T1 G1 प्रीयमाणो महाभागे (T1 °गैर्). —$^{d}$) K3 corrupt. K4. 5 Dn1 D2–6 प्राणान्; B4 (marg.). 5 पानम् (for प्राणम्). B2–5 D2 अपातनी; M1–3. 4 (*inf. lin.* as in text) अमानिनी (for अपानती). T1 G1. 2 विना प्राणांश्च (G2 °णं च) मामपि. —K4 reads 14$^{ef}$ on marg.

15 $^{a}$) Ś1 om. ततः. Ś1 K1. 2 प्राणाः; K4 D1 प्राणात्. M1. 2 पुनर् (for प्रादुर्). K2 आसन् (for अभूद्). —$^{b}$) G3 प्राणम् (for वाचम्). Ś1 K2–5 D3 आप्याययत्; G3 M1. 2 आध्याययत्. T G1. 2 M3. 4 इव (for पुनः). —$^{d}$) D5. 6 विंदति (for व°).

16 $^{a}$) K1 D1 T M घोषणी; Cv घोषिणी (as in text). —$^{b}$) Ś1 K D1 G3 M4 (*inf. lin.*) एषा; M4 एवं (for एव). —$^{c}$) G2 सु- (for च). K1–4 D1 M1–3 घोषिण्यो; K5 Dn1 D2–6 घोषेण; B T2 घोषिण्या; Dc1 घोषीयं; T1 G1 घोषिण्यां. —$^{d}$) Dc1 om.; D2 निर्घोषेण; G1 निर्मोहैव. K3 गरीयसे.

17 $^{a}$) B1 Dc1 D3. 4 T2 गौरीव. K2 D4. 5 T G1. 3

दिव्यादिव्यप्रभावेन भारती गौः शुचिस्मिते ।
एतयोरन्तरं पश्य सूक्ष्मयोः स्यन्दमानयोः ॥ १८
अनुत्पन्नेषु वाक्येषु चोद्यमाना सिसृक्षया ।
किं नु पूर्वं ततो देवी व्याजहार सरस्वती ॥ १९
प्राणेन या संभवते शरीरे
प्राणादपानं प्रतिपद्यते च ।
उदानभूता च विसृज्य देहं
व्यानेन सर्वं दिवमावृणोति ॥ २०
ततः समाने प्रतितिष्ठतीह
इत्येव पूर्वं प्रजजल्प चापि ।
तस्मान्मनः स्थावरत्वाद्विशिष्टं
तथा देवी जङ्गमत्वाद्विशिष्टा ॥ २१

C. 14. 654
B. 14. 21. 26
K. 14. 22. 26

इति श्रीमहाभारते आश्वमेधिकपर्वणि एकविंशोऽध्यायः ॥ २१ ॥

---

प्रसवति ; K5 स्रवतीति ; B1. 2. 5 D3 प्रश्नवति. B5 D ( except Dc1 D1 ) [अ]र्थान् ( for [ए]षा ). — [b]) T वासम् ; G1 मासम् ; Cv रसम् ( as in text ). K4 उत्तर- ( for उत्तम- ). Cv -पाळिनी ( for -शालिनी ). — [c]) K2 T2 G1. 2 M1–3 स्यंदति ; D6 तस्य ते ; G3 M4 स्यंदिनी. — [d]) K5 D2 M1. 2 शाश्वती ; D5 शाश्वत-. Ś1 K1 -भाविनी ; D2 शाश्वतीं ब्रह्मवादिनीं.

18 [a]) K2. 4. 5 D1 -प्रकारेण ; Dc1 -प्रधानेन ( for -प्रभावेन ). — [b]) G3 M4 ( *inf. lin.* ) शुचिस्मिता. — [c]) D5. 6 लक्ष्यं ( for पश्य ). — [d]) K2 स्पर्धमानयोः ; Dc1 Dn1 D2. 4. 5 स्पंद° ; S ( except G3 ; M4 *inf. lin.* as in text ) यतमानयोः.

19 [a]) S ( M4 *inf. lin.* as in text ) चान्येषु ( for वाक्येषु ). — [b]) K2. 4 D1 नोद्यमाना. K5 D ( except Dc1 D1 ) विवक्षया ; B1. 2 हि सूक्ष्मया ( for सिसृक्षया ). B3 चोद्यमानानि सूक्ष्मया. — [c]) K2 अनु- ; K4 D1 कं तु ; K5 कं नु ; T2 G1. 2 M किं तत् ( for किं नु ). D5. 6 सर्वं ( for पूर्वं ). Ś1 K1. 3. 4 B5 D ( except Dc1 ) तदा ( for ततो ).

20 [a]) D1 T2 G1. 2 M प्राणो न ( for प्राणेन ). B1–3. 4 ( marg. as in text ). 5 Dc1 यः ; G3 सा ( for या ). Ś1 K1–3 G3 संश्रि( G3 °श्र )यते ; K4. 5 B4 ( marg. ) D1 संभृ( K5 °ह )यते ; D3 संभरते ; D5 संभवेसे ; T G1. 2 M संभ्रमते ( for संभवते ). K1. 3 शरीरं ; D5. 6 शरीरी. — [b]) K4 प्रतिपद्य एव ; T G °द्यते तु ( for °द्यते च ). — [c]) K4 B Dc1 T G1 M3. 4 -भूतश्च ( for -भूता च ). Ś1 K1. 3 उदानभूतादविसृ( K3 °रा )ज्य देहं. — [d]) K1 M1–3 सर्वें ; B1. 2. 4 ( marg. ) Dc1 T1 G2 सर्वां ; B4 दिव्यं ( for सर्वं ). Ś1 ( by corr. ) B1. 4 ( marg. ) Dc1 T1 G2 दिशम् ( for दिवम् ). M4 ( *inf. lin.* ) आतनोति ( for आवृणोति ).

21 The portion from 21 up to the end of the adhy. 22 is lost in Dn1, on missing folios. — [a]) K2. 4 समानः. K1. 2 प्रवि- ( for प्रति- ). T G1 M [इ]-यम् ; G3 स्वयम् ( for [इ]ह ). — [b]) K4 D1 इत्येष. K2 स पूर्वं ; D3 पूर्वेषु ; Cv सर्वं प्र- ( for पूर्वं प्र- ). T प्रतिजल्प ( for प्रज° ). K5 D2–6 वाणी ; B3 काले ; D1 वापि ; T1 G1 वागपि ; T2 वागथ ; G3 यापि ( for चापि ). — [c]) K3 ततो ( for तस्मान् ). Cv विशिष्टस् ( for °ष्टं ). — [d]) G1 तदा ( for तथा ). D5. 6 देही ( for देवी ). K5 विशिष्टः ; G2 °ष्टं ; Cv °ष्टा ( as in text ).

Colophon missing in Dn1. — *Sub-parvan :* Ś1 K1–3 T G1. 3 M4 अनुगीता ; K5 B Dc1 D4. 5 ब्राह्मणगीता ; M1–3 उपगीता. — *Adhy. name :* G3 आत्मयज्ञविधानं. — *Adhy. no.* ( figures, words or both ): Ś1 24 ; B1 D4 T2 G2 M 21 ( as in text ) ; T1 G3 M4 ( by corr. ) 22 ; G1 19.

## २२

C. 14. 655
B. 14. 22. 1
K. 14. 23. 1

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
सुभगे सप्तहोतॄणां विधानमिह यादृशम् ॥ १
घ्राणं चक्षुश्च जिह्वा च त्वक्श्रोत्रं चैव पञ्चमम् ।
मनो बुद्धिश्च सप्तैते होतारः पृथगाश्रिताः ॥ २
सूक्ष्मेऽवकाशे सन्तस्ते न पश्यन्तीतरेतरम् ।
एतान्वै सप्तहोतॄंस्त्वं स्वभावाद्विद्धि शोभने ॥ ३

ब्राह्मण्युवाच ।

सूक्ष्मेऽवकाशे सन्तस्ते कथं नान्योन्यदर्शिनः ।
कथंस्वभावा भगवन्नेतदाचक्ष्व मे विभो ॥ ४

ब्राह्मण उवाच ।

गुणाज्ञानमविज्ञानं गुणिज्ञानमभिज्ञता ।
परस्परगुणानेते न विजानन्ति कर्हिचित् ॥ ५
जिह्वा चक्षुस्तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च ।
न गन्धानधिगच्छन्ति घ्राणस्तानधिगच्छति ॥ ६
घ्राणं चक्षुस्तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च ।
न रसानधिगच्छन्ति जिह्वा तानधिगच्छति ॥ ७
घ्राणं जिह्वा तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च ।

---

## 22

☞ This adhy. is missing in D$_{n1}$ (cf. v. l. 12. 21. 21).

1 $^{a}$) K$_{3.4}$ D$_{1}$ [ए]व (for [अ]पि). — $^{d}$) T$_{1}$ विनाशम् (sic); G$_{3}$ निधानम् (for विधा°). G$_{1}$ इव (for इह).

2 $^{a}$) K$_{2}$ D$_{1.6}$ M$_{1.2}$ प्राणश्; K$_{4}$ B$_{3.5}$ D$_{2-5}$ G$_{3}$ घ्राणश् (for घ्राणं). D$_{c1}$ जिह्वाश्. — $^{b}$) K$_{3}$ जिह्वा त्वक् (for त्वक्श्रोत्रं). B$_{2}$ त्वक्च श्रोत्रं च पंचमं. — $^{d}$) K$_{5}$ सुखम्; D$_{5.6}$ पथम् (for पृथग्). Ś$_{1}$ K$_{1-3}$ T G$_{1.2}$ आश्रयाः; B$_{1.2}$ आदृताः (for आश्रिताः).

3 $^{a}$) Ś$_{1}$ K$_{1-3.5}$ T$_{2}$ G$_{3}$ सूक्ष्मावकाशे. K$_{2.4}$ शक्तास्ते; B D$_{c1}$ D$_{2-6}$ T$_{2}$ G$_{3}$ तिष्ठंतो (T$_{2}$ G$_{3}$ °ति); T$_{1}$ G$_{2}$ संप्राप्ते; M$_{1}$ संतप्ते (for सन्तस्ते). G$_{1}$ सूक्ष्माकाशे समं प्राप्ते. — $^{b}$) D$_{3}$ वि- (for न). K$_{3}$ कथं नान्योन्यधर्षितः (cf. 4$^{b}$). — $^{c}$) T G$_{1.2}$ M एतद्वै (M$_{1.2}$ °त्ते) सप्तहोतृत्वं; G$_{3}$ एतांश्च सप्तहोतॄणां. — $^{d}$) M$_{1.2}$ स्वभावं. G$_{3}$ भावान्साध्वी च शोभने.

4 $^{a}$) K$_{1-3}$ G$_{3}$ सूक्ष्मावकाशे. D$_{3}$ M$_{1}$ संतप्ते; G$_{2}$ संप्राप्ते (for सन्तस्ते). T G$_{1}$ सूक्ष्माकाशे समं प्रा(G$_{1}$ तु संप्रा)प्ते. — $^{b}$) T$_{1}$ च (for न). K$_{3}$ कथा नान्योन्यधार्षितः (sic). — $^{c}$) K$_{4.5}$ D$_{c1}$ D$_{1}$ T G M$_{3}$ -स्वभावाद्. — $^{d}$) K$_{2}$ B D$_{c1}$ D$_{2-6}$ मे प्रभो; K$_{4}$ D$_{1}$ विस्तरात् (for मे विभो).

5 D$_{1}$ om. the ref. — $^{a}$) K$_{1.3.4}$ B (except B$_{1}$) D$_{c1}$ D$_{1}$ G$_{2.3}$ **C**$_{v}$ गुणज्ञानम् (for गुणा°). K$_{4}$ अतिज्ञानं; B$_{1-3.4}$ (marg. as in text).$_{5}$ D$_{c1}$ M$_{3.4}$ **C**$_{v}$ अभि° (for अवि°). K$_{2}$ मनोज्ञानं गुणज्ञानं; T$_{1}$ G$_{1}$ गुणाज्ञानेषु विज्ञानं. — $^{b}$) K$_{4}$ D$_{1}$ पुण्यं; K$_{5}$ B$_{2.4.5}$ D$_{2-6}$ T$_{2}$ G$_{2}$ M गुण-; D$_{c1}$ गुणे (for गुणि-). K$_{4}$ D$_{1.3}$ अविज्ञता (for अभि°). K$_{2}$ मतिज्ञानं प्रतिज्ञाया (sic). — $^{c}$) K$_{5}$ B$_{1}$ D$_{2-6}$ T$_{2}$ G$_{2}$ परस्परं. K$_{4}$ त्वेते; B$_{2.4}$ (marg. as in text).$_{5}$ एतान्; B$_{3}$ एवं; D$_{1}$ ह्येते; G$_{3}$ एति (for एते). — $^{d}$) B D (except D$_{1}$; D$_{n1}$ missing) G$_{2}$ [अ]भिजानंति; G$_{3}$ विजानाति. B$_{4}$ केचन (for कर्हिचित्).

6 $^{a}$) B$_{2}$ च श्रोत्रं च; G$_{3}$ तथा श्रोत्रे. — $^{b}$) K$_{5}$ B$_{2.5}$ D$_{5.6}$ G$_{3}$ M$_{1-3.4}$ (*inf. lin.* as in text) वाङ्मनो (for त्वङ्मनो). — After 6$^{b}$, G$_{1}$ reads 10$^{cd}$. K$_{1.3}$ D$_{2.5.6}$ G$_{1}$ M$_{4}$ om. (hapl.) 6$^{c}$–7$^{b}$. G$_{3}$ om. (hapl.) 6$^{c}$–8$^{b}$. — $^{c}$) G$_{2}$ शब्दम् (for गन्धान्). K$_{2}$ आभि-; M$_{1.2}$ अपि (for अधि-). — $^{d}$) K$_{4.5}$ B$_{3}$ D$_{c1}$ घ्राणं; B$_{1.2}$ (marg. as in text) चक्षुस् (for घ्राणस्). — After 6, D$_{c1}$ reads 9 for the first time, repeating it after 11, while T G$_{2}$ read 9–10.

7 G$_{3}$ om. 7; K$_{1.3}$ D$_{2.5.6}$ G$_{1}$ M$_{4}$ om. 7$^{ab}$ (for all, cf. v. l. 6). B$_{1.2}$ om. (hapl.) 7–8. D$_{1}$ om. (hapl.) 7. — $^{a}$) M$_{1.2}$ घ्राणश्. K$_{4}$ जिह्वा (for चक्षुस्). — $^{b}$) K$_{5}$ B$_{5}$ वाङ्मनो (for त्वङ्मनो). — K$_{2}$ reads 7$^{cd}$ after 8. — $^{d}$) B$_{3}$ -तिष्ठति (for -गच्छति).

न रूपाण्यधिगच्छन्ति चक्षुस्तान्यधिगच्छति ॥ ८
घ्राणं जिह्वा च चक्षुश्च श्रोत्रं बुद्धिर्मनस्तथा ।
न स्पर्शानधिगच्छन्ति त्वक्च तानधिगच्छति ॥ ९
घ्राणं जिह्वा च चक्षुश्च त्वङ्मनो बुद्धिरेव च ।
न शब्दानधिगच्छन्ति श्रोत्रं तानधिगच्छति ॥ १०
घ्राणं जिह्वा च चक्षुश्च त्वक्श्रोत्रं बुद्धिरेव च ।
संशयान्नाधिगच्छन्ति मनस्तानधिगच्छति ॥ ११
घ्राणं जिह्वा च चक्षुश्च त्वक्श्रोत्रं मन एव च ।
न निष्ठामधिगच्छन्ति बुद्धिस्तामधिगच्छति ॥ १२
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
इन्द्रियाणां च संवादं मनसश्चैव भामिनि ॥ १३

मन उवाच ।

न घ्राति मामृते घ्राणं रसं जिह्वा न बुध्यते ।
रूपं चक्षुर्न गृह्णाति त्वक्स्पर्शं नावबुध्यते ॥ १४
न श्रोत्रं बुध्यते शब्दं मया हीनं कथंचन ।
प्रवरं सर्वभूतानामहमस्मि सनातनम् ॥ १५

C. 14. 669
B. 14. 22. 15
K. 14. 23. 15

---

8 G3 om. $8^{ab}$ ( cf. v. l. 6 ). B1. 2 om. 8 ( cf. v. l. 7 ). B3 T1 om. ( hapl. ) 8. — $^{a}$ ) B4. 5 Dc1 नासा ; S ( T1 G3 om. ) घ्राणो ( for घ्राणं ). T2 G2 जिह्वास्. Ś1 च चक्षुश्च ( for तथा श्रोत्रं ). — $^{b}$ ) Ś1 श्रोत्रं त्वग् ; K5 D2–6 वाङ्मनो. — $^{c}$ ) K2 D1 रूपेण ; M1. 2 रूपान् ( for रूपाणि ). — $^{d}$ ) D1 रूपं ( for चक्षुस् ). K2. 3 B5 D1. 3. 6 M1–3 तान् ( for तानि ). — After 8, K2 reads $7^{cd}$.

9 K2 om. ( hapl. ) 9–11. G1 om. $9^{a}$–$10^{b}$. Dc1 reads 9 for the first time after 6, repeating it after 11. T G2 read 9–10 after 6. K4 reads $9^{ab}$ after 10. — $^{a}$ ) M1 घ्राणो. Ś1 K5 D2. 3. 5. 6 ततश्चक्षुः ; K4 D1 रसश्चक्षुः ( for च चक्षुश्च ). T घ्राणं चक्षुश्च जिह्वा च. — D4 om. ( hapl. ) $9^{b}$–$10^{a}$. — $^{b}$ ) B Dc1 ( both times ) बुद्धिः श्रोत्रं ( by transp. ). K1 त्वङ्मनो बुद्धिरेव च. — K4 om. $9^{cd}$. — $^{c}$ ) K1 शब्दान् ; T G2 स्पर्शम् ( for स्पर्शान् ). M स्पर्शांश्च नाधिगच्छंति. — $^{d}$ ) Dc1 ( second time ) बुद्धिस् ; G3 श्रोत्रं ; M त्वक्तु ( for त्वक्च ). T G2 एतद् ( for च तान् ).

10 For the sequence in T G2, cf. v. l. 9. K2 om. 10 ; D4 om. $10^{a}$ ; G1 om. $10^{ab}$ ( for all, cf. v. l. 9 ). D1 om. ( hapl. ) 10–11. G3 om. ( hapl. ) 10. K3 repeats $10^{ab}$ after $10^{cd}$. — $^{a}$ ) M घ्राणो. B5 श्रोत्रं ( for चक्षुश्च ). T G2 transp. जिह्वा and चक्षुश्च. K4 घ्राणं जिह्वास्तथा चक्षुस्. — $^{b}$ ) K3 ( second time ) B5 श्रोत्रं त्वग् ; B1 वाङ्मनो. — After $10^{b}$, B5 reads $11^{cd}$ for the first time, repeating it in its proper place. B5 om. $10^{cd}$. G1 reads $10^{cd}$ after $6^{b}$. — $^{c}$ ) T G1. 2 शब्दम् ( for शब्दान् ). — $^{d}$ ) T G1 तम् ; G2 तद् ( for तान् ). — After 10, K4 reads $9^{ab}$ ; while B1–4 ins. after 10 :

56* घ्राणं चक्षुश्च श्रोत्रं च त्वग्जिह्वा बुद्धिरेव च ।

[ B3. 4 घ्राणं चक्षुस्तथा श्रोत्रं ( for the prior half ). B3. 4 जिह्वा त्वग् ( by transp. ). ]

— B1–4 read $11^{cd}$ for the first time after the above.

11 K2 om. 11 ( cf. v. l. 9 ). D1 om. 11 ( cf. v. l. 10 ). T1 om. ( hapl. ) 11–12. K4 B3 om. $11^{ab}$. B4 reads 11 twice. — $^{a}$ ) T2 G1. 2 M1. 2. 4 घ्राणो. — $^{b}$ ) Ś1 श्रोत्रं त्वग् ( by transp. ). K3 मन ( for बुद्धिर् ). B1. 2. 4 ( first time ) त्वक्च ( B2 बुद्धिः ) श्रोत्रं मनस्तथा ; B4 ( second time ) त्वक्श्रोत्रं च मनस्तथा. — B1–4 read $11^{cd}$ for the first time after 56* ; B5 after $10^{b}$. — $^{c}$ ) K4 न स्पर्शम् ; K5 B ( first time ) D2–6 T2 G1. 2 संशयम् ; Dc1 संकल्पान् ( for संशयान् ). — $^{d}$ ) K4 त्वक्च ; B ( first time ) बुद्धिस् ( for मनस् ). D5. 6 तम् ( for तान् ). — After 11, Dc1 repeats 9.

12 T1 om. 12 ( cf. v. l. 11 ). D4 om. ( hapl. ) 12. K2. 4 om. $12^{ab}$. — $^{a}$ ) T2 G1 M घ्राणो. — $^{b}$ ) G3 श्रोत्रं त्वङ् ( by transp. ). — $^{d}$ ) B1. 2. 4. 5 Dc1 D1 M1–3 तान् ( for ताम् ). D6 अनु- ( for अधि- ). — After 12, M4 ins. an addl. colophon [ *Sub-parvan* : अनुगीता. — *Adhy. no.* : 13 ].

13 Before 13, M4 ins. ब्राह्मणः. — $^{d}$ ) B Dc1 भाविनि.

14 $^{a}$ ) K5 B D4. 5 नाघ्राति ; G3 न घ्राणं. G2. 3 महते ( for मामृते ). K3 प्राणं ; T G1. 2 M1. 3. 4 ( *inf. lin.* as in text ) घ्राणो ; M2 प्राणो. — $^{b}$ ) K2. 4 B1. 2 D1 रसाञ्. B D ( except D1 ; Dn1 missing ) वेत्ति च ( for बुध्यते ). — $^{c}$ ) B1. 2 चक्षू रूपं ( by transp. ). — $^{d}$ ) T G1. 2 स्पर्शं त्वङ् ( by transp. ). Ś1 K1. 3 B3. 4 च ; T2 वि- ( for [अ]व- ). B1 -बुध्यति. B2 G3 त्वक्च स्पर्शं न बुध्यते ( B2 °ति ).

C. 14. 670
B. 14. 22. 16
K. 14. 23. 16

अगाराणीव शून्यानि शान्तार्चिष इवाग्नयः ।
इन्द्रियाणि न भासन्ते मया हीनानि नित्यशः ॥ १६
काष्ठानीवार्द्रशुष्काणि यतमानैरपीन्द्रियैः ।
गुणार्थान्नाधिगच्छन्ति मामृते सर्वजन्तवः ॥ १७

इन्द्रियाण्यूचुः ।

एवमेतद्भवेत्सत्यं यथैतन्मन्यते भवान् ।
ऋतेऽस्मानस्मदर्थांस्तु भोगान्भुङ्क्ते भवान्यदि ॥ १८
यद्यस्मासु प्रलीनेषु तर्पणं प्राणधारणम् ।
भोगान्भुङ्क्ते रसान्भुङ्क्ते यथैतन्मन्यते तथा ॥ १९
अथ वास्मासु लीनेषु तिष्ठत्सु विषयेषु च ।
यदि संकल्पमात्रेण भुङ्क्ते भोगान्यथार्थवत् ॥ २०
अथ चेन्मन्यसे सिद्धिमस्मदर्थेषु नित्यदा ।
घ्राणेन रूपमादत्स्व रसमादत्स्व चक्षुषा ॥ २१
श्रोत्रेण गन्धमादत्स्व निष्ठामादत्स्व जिह्वया ।
त्वचा च शब्दमादत्स्व बुद्ध्या स्पर्शमथापि च ॥ २२
बलवन्तो ह्यनियमा नियमा दुर्बलीयसाम् ।
भोगानपूर्वानादत्स्व नोच्छिष्टं भोक्तुमर्हसि ॥ २३
यथा हि शिष्यः शास्तारं श्रुत्यर्थमभिधावति ।

---

15 $^{a}$) S शृणुयात् ( for बुध्यते ). — $^{b}$) Ś$_1$ D$_1$ G$_3$ M$_4$ ( *inf. lin.* ) कदाचन. — $^{d}$) Ś$_1$ K$_{1.3}$ एकं ( for अस्मि ). B$_4$ सनातनः.

16 $^{a}$) K$_2$ B$_1$ D$_{2.3.6}$ आगाराणि ; M$_{1.2}$ नगराणि. K$_3$ [ए]व ( for [इ]व ). — D$_{c1}$ om. ( ? hapl. ) $16^{b}$–$17^{a}$. — $^{c}$) D$_{2-4}$ भाषंते ( for भासन्ते ). — $^{d}$) Ś$_1$ हीना न ( for हीनानि ). B$_{1.2.5}$ सर्वशः ( for नित्यशः ).

17 D$_{c1}$ om. $17^{a}$ ( cf. v. l. 16 ). — $^{a}$) K$_3$ G$_{1.2}$ M [ऊ]र्ध्वं- ; G$_3$ [अ]थ ( for [आ]र्द्र- ). K$_{1-3}$ D$_3$ M$_2$ -शुष्कानि. — $^{b}$) D$_6$ अतींद्रियैः. — $^{d}$) S मदृते.

18 D$_6$ om. the ref. — $^{a}$) D$_5$ एवमेव सत्यं भवेद् ; D$_6$ इंद्रियाणामेव तत्सत्यं ( hypermetric ). — $^{b}$) K$_4$ M$_{1.2}$ मन्यसे ; D$_3$ मनुते. — $^{c}$) Ś$_1$ K$_{1.2.4.5}$ D ( except D$_{c1}$ ; D$_{n1}$ missing ) G$_1$ त्वं ; K$_3$ T$_1$ G$_{2.3}$ वै ( for तु ). — $^{d}$) Ś$_1$ K$_{1.2.4.5}$ D$_1$ भुंज्याद् ; K$_3$ भुंजन् ; M$_3$ भुंजेद् ( for भुङ्क्ते ). K$_5$ अपि ( for यदि ). G$_3$ भोगान्भुंजीत चेद्भवेत्.

19 $^{a}$) K$_5$ च लीनेषु ; M$_{1.2}$ प्रणष्टेषु ( for प्रलीनेषु ). K$_3$ इंद्रियेषु च लीनेषु. — K$_4$ D$_1$ om. $19^{bc}$. — $^{c}$) K$_5$ भुंक्ष्व ; B D ( D$_1$ om. ; D$_{n1}$ missing ) T G$_{1.2}$ M$_{1.2}$ भुंक्ते ( for भुङ्क्ते ). B D$_{c1}$ D$_{2-6}$ T$_2$ भवान् ( for रसान् ). K$_5$ भुंक्ष्व ; B D ( D$_1$ om. ; D$_{n1}$ missing ) T$_2$ सत्यं ; T$_1$ G$_{1.2}$ वेत्ति ; G$_3$ M$_4$ ( *inf. lin.* ) वेत्सि ; M$_{1.2}$ भुंक्ते ( for भुङ्क्ते ). — $^{d}$) K$_4$ D$_{c1}$ D$_1$ तथा ( for यथा ). K B$_4$ D$_{c1}$ D$_1$ G$_3$ M$_{1.2}$ मन्यसे. K$_3$ यथा ; S ( except G$_3$ ) भवान् ( for तथा ).

20 $^{a}$) Ś$_1$ K$_{1.3}$ G$_3$ विप्र- ; K$_{2.4}$ D$_1$ संप्र- ; K$_5$ संसु- ; T$_1$ [अ]स्य प्र- ; T$_2$ G$_{1.2}$ M [अ]प्यप्र- ( for [अ]स्मासु ). — $^{c}$) Ś$_1$ K$_1$ -मात्रेषु ( for -मात्रेण ). — $^{d}$) Ś$_1$ K$_{1.3}$ भुंक्ष्वे ; K$_{2.5}$ भुंक्ष्व ; G$_3$ भुक्त- ; M$_{3.4}$ भुंक्षे. D$_{c1}$ T$_2$ यथार्थवित् ; T$_1$ G M तदार्थव( T$_1$ °वि )त्.

सद्भिरध्यासिता धीरैः कर्मभिर्धर्मसेतवः ॥ ३४
एतेषां पृथगध्यास्ते यो धर्मं संशितव्रतः ।
कालात्पश्यति भूतानां सदैव प्रभवाप्ययौ ॥ ३५
अतस्तत्त्वानि वक्ष्यामि याथातथ्येन हेतुना ।
विषयस्थानि सर्वाणि वर्तमानानि भागशः ॥ ३६
महानात्मा तथाव्यक्तमहंकारस्तथैव च ।
इन्द्रियाणि दशैकं च महाभूतानि पञ्च च ॥ ३७
विशेषाः पञ्चभूतानामित्येषा वैदिकी श्रुतिः ।

---

द्वितीयं गार्हपत्यं तु. — $^{e}$) K5 D1 अतः (for ततः). D4 निबोधत महाभागा (= 29$^{c}$); D5.6 संन्यासपरमं ज्ञेयम्. — $^{f}$) B2 G2 अध्यात्म-.

31 M1.2 om. $31^{abcd}$ (cf. v. l. 30). — $^{c}$) K5 D2 G2 नापैति; T1 G1 M3 नावैति; M4 न चैति (for नोपैति). Ś1 K1.3 तावद् (for या°). K2 D1.4–6 अध्यात्म्यं. — $^{d}$) Ś1 K1.3 यावद् (for ता°). K4 D1.3 M4 (*inf. lin.* as in text) देवान्; T2 एनान्; G3 एनं (for एतान्). — $^{e}$) K4 D1 वश्योपायं; G3 तस्य रूपं; M2 तस्योपायः. K2.4 तु (for प्र-). — $^{f}$) Ś1 K1.3 परमं; B1.2 प्रथमं (for पुरस्तात्). B4.5 M3 तु; M1.2 तन् (for तं). Ś1 K2–4 D1 निबोध मे (for °धत).

32 $^{a}$) T1 G1 -मूलाशन-; G3 -मूलतृण- (for -मूलानिल-). D6 फलमूलानि बुभुजां; G2 °लशतानां तु; M4 (*inf. lin.*) °लाशनवतां. — $^{b}$) B (except B3) चरतां (for वसतां). K4 D3 M4 मुने (for वने). — $^{c}$) K4 द्वितीयानां; Dc1 द्विजातानां. — $^{d}$) Dc1 त्रायताम् (for त्रयाणाम्). K2 अनु- (for उप-). D3 -दिश्यति (for °ते).

33 $^{a}$) K4 D1 त्रयाणाम् (for सर्वेषाम्). — $^{b}$) K4 D1 गार्हस्थ्यो (D1 °स्थो). K4 D1 [ऽ]यं; B1.2.4 Dc1 T2 सं- (for तद्). D5.6 विशिष्यते (for विधीयते). Ś1 K1.3.5 B3 गार्हस्थो वि(K5 °स्थ्यवि-; B3 °स्थ्यो वि)धिरुच्यते; K2 °स्थ्यो विधिरिष्यते; T1 G M गृ(T1 G ग्र)हस्थोयं विशिष्यते. — After $33^{b}$, M3 ins. 73*. — $^{c}$) Dc1 श्रुत्वा; T2 श्राद्ध-; M1.2 श्रद्धां (for श्रद्धा-). Ś1 K3 T1 [ए]तं; K4.5 D1 M3.4 [ए]तद्; G1.2 [ए]कं (for [ए]वं). — $^{d}$) K2 ब्रह्म धीराः; K3 धर्मं धीरः; K4 D1 ब्रह्मचारी; D6 धर्मे धीराः (for धर्मं धीराः). — T G1.2 ins. after 33: M3 after $33^{b}$:

73* नैष्ठिकोऽथ यतिर्वापि विभक्तो ब्रह्मचारिणः ।

[G1 M3 विरक्तो (for विभक्तो). G2 -दर्शनः; M3 -दंसने (for -चारिणः).]

34 G3 om. $34^{a}$–$36^{b}$. — $^{a}$) Dc1 M4 [ए]तद्; Dn1 D2–6 [ए]वं; T1 lacuna (for [ए]ते). K4.5 D1 वै; D3 नः (for वः). G1.2 तेषां तु (G2 एतेषां) देवयानानि. — $^{b}$) D3 पंथानं. Ś1 K1.3 संप्र- (for परि-). — $^{c}$) K2 M3 अध्यास(M3 °सि)तो; G1 अध्यसिता; M1.2 अभ्युषिता (for अध्यासिता). Ś1 K1.3 ते समाध्यासिता धीरैः; K5 ते समप्यसिता वीरैः. — $^{d}$) K2 -चेतसः (for -सेतवः).

35 G3 om. 35 (cf. v. l. 34). Ś1 reads $35^{a}$–$36^{b}$ on marg. — $^{a}$) M1.2 अध्यायो (for अध्यास्ते). — $^{b}$) T1 ये; M1 lacuna; M2 स्व- (for यो). M1–3 धर्मः (for धर्मं). K2.3 T1 G2 संशितव्रताः; K4 B1.2 D1–4.6 शंसितव्रतः (B1.2 °ताः). — $^{c}$) Dc1 M3.4 कालः (for कालात्). B3 पश्यंति. D5.6 भूतानि. — $^{d}$) K1.3.5 स तदा; K2.4 D1 M2–4 सदा हि; T G1.2 सतां हि; M1 सर्वेषां (for सदैव). K4 B3.4 (marg.) D4 प्रभवाप्ययौ.

36 G3 om. $36^{ab}$ (cf. v. l. 34). G1 om. (hapl.) $36^{a}$–$39^{b}$. Ś1 reads $36^{ab}$ on marg. — $^{a}$) K2.4 D1 अथ (for अतस्). K5 तान्प्रति-; D4 तत्त्वादि; M1.2 तत्त्वं प्र-; M3.4 स्म तानि (for तत्त्वानि). — $^{b}$) Ś1 K1.3 D1 T1 M1.2 यथातथ्येन. D5.6 हि (D6 हे) द्विजाः (for हेतुना). — $^{c}$) M2 विषमस्थानि.

37 G1 om. 37 (cf. v. l. 36). — $^{a}$) K2.4 D1 महान्बुद्धिस्; M4 °त्मा च (for °नात्मा). Ś1 [अ]व्यक्तं.

38 G1 om. 38 (cf. v. l. 36). — $^{a}$) Ś1 विशेषः. K3 सर्व- (for पञ्च-). — $^{b}$) B Dc1 Dn1 D2–4.5

चतुर्विंशतिरेषा वस्तत्त्वानां संप्रकीर्तिता ॥ ३८
तत्त्वानामथ यो वेद सर्वेषां प्रभवाप्ययौ ।
स धीरः सर्वभूतेषु न मोहमधिगच्छति ॥ ३९
तत्त्वानि यो वेदयते यथातथं
गुणांश्च सर्वानखिलाश्च देवताः ।
विधूतपाप्मा प्रविमुच्य बन्धनं
स सर्वलोकानमलान्समश्नुते ॥ ४०

इति श्रीमहाभारते आश्वमेधिकपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

## ३६

ब्रह्मोवाच ।
तदव्यक्तमनुद्रिक्तं सर्वव्यापि ध्रुवं स्थिरम् ।
नवद्वारं पुरं विद्यात्त्रिगुणं पञ्चधातुकम् ॥ १
एकादशपरिक्षेपं मनो व्याकरणात्मकम् ।
बुद्धिस्वामिकमित्येतत्परमेकादशं भवेत् ॥ २
त्रीणि स्रोतांसि यान्यस्मिन्नाप्यायन्ते पुनः पुनः ।
प्रणाड्यस्तिस्र एवैताः प्रवर्तन्ते गुणात्मिकाः ॥ ३
तमो रजस्तथा सत्त्वं गुणानेतान्प्रचक्षते ।

C. 14. 990
B. 14. 36. 4
K. 14. 37. 4

---

(marg. *sec. m.* as in text). 6 इति सर्गः (D$_{5.6}$ धर्मः) सनातनः. — $^{c}$) K$_{1.4}$ D$_{1.5}$ एषा च; K$_{5}$ B D$_{c1}$ D$_{n1}$ D$_{2-4.6}$ एका च; G$_{3}$ एवैषा; M$_{1.3}$ एषां वस् (for एषा वस्). — $^{d}$) K$_{4}$ D$_{1}$ च प्र-; K$_{5}$ T परि- (for संप्र-). B D$_{c1}$ D$_{n1}$ D$_{2-6}$ तत्त्वसंख्या प्रकीर्तिता.

39 G$_{1}$ om. $39^{ab}$ (cf. v. l. 36). — $^{ab}$) D$_{5.6}$ transp. यो वेद and सर्वेषां. T$_{1}$ विदुषां (for सर्वेषां). D$_{c1}$ M$_{2}$ प्रभवाव्ययौ. — $^{c}$) K$_{2}$ वीरः; G$_{3}$ मोहं (for धीरः). K$_{4}$ D$_{1}$ -भूतानां (for -भूतेषु).

40 $^{a}$) K$_{2}$ तं चानि (sic) (for तत्त्वानि). G$_{2}$ M$_{1.2}$ तथा तथा; G$_{3}$ यथा तथा; M$_{3.4}$ यथावद् (for यथा तथं). Ś$_{1}$ K$_{1.3}$ B$_{3}$ तत्त्वानि यो वेद यथातथं हि (K$_{3}$ °तथा हि; B$_{3}$ °तथं च). — $^{b}$) D$_{c1}$ om. from सर्वान् up to समश्नुते (in $40^{d}$). T$_{2}$ देवान् (for सर्वान्). K$_{3}$ D$_{6}$ T G$_{1.2}$ M$_{3.4}$ अ(T G$_{1}$ नि)खिलांश्च; M$_{1.2}$ निखिलेन (for अखिलाश्च). T$_{1}$ देवान्; T$_{2}$ सर्वान्; G$_{1}$ M$_{3.4}$ वेदान्; G$_{2}$ दैवतान् (for देवताः). — $^{c}$) T G$_{1}$ -पापः (for -पाप्मा). Ś$_{1}$ K$_{1.3}$ प्रविमुक्तबंधनः; K$_{4}$ D$_{3}$ प्रतिमुच्य बंध(D$_{3}$ वर्ध)नं; B$_{5}$ परिमुंच**नं; G$_{3}$ हि विमुच्य बंधनात् (for प्रविमुच्य बन्धनं). M$_{1.2}$ विधूय पापान्प्रतिमुच्य बंधनात्. — $^{d}$) D$_{3}$ corrupt. K$_{4}$ D$_{1}$ अखिलान्; B$_{3.4}$ मतिमान्; G$_{3}$ M$_{1.2}$ अमलः (for °लान्).

Colophon om. in S (except G$_{3}$ M$_{4}$). — *Sub-parvan :* K$_{2.3}$ G$_{3}$ अनुगीता; K$_{5}$ ब्रह्मगीता. — *Adhy. name :* K$_{2.4}$ B D G$_{3}$ गुरुशिष्यसंवादः. — *Adhy. no.* (figures, words or both): Ś$_{1}$ M$_{4}$ (*inf. lin. sec. m.*) 37; D$_{n1}$ D$_{4}$ 35 (as in text); G$_{3}$ 36. — *Śloka no. :* D$_{n1}$ 50.

### 36

1 K$_{4}$ D (except D$_{c1}$ D$_{n1}$) ब्राह्मण (for ब्रह्मा). — $^{a}$) G$_{1}$ तम् (for तद्). — $^{b}$) B$_{3}$ damaged. G$_{2}$ स्थितं (for स्थिरम्). G$_{3}$ सर्वव्याधिभिरावृतं. — $^{c}$) D$_{c1}$ G$_{1.2}$ नवद्वार-. K$_{5}$ विंद्यात्. — $^{d}$) D$_{1}$ पंचधात्मकं.

2 $^{a}$) K$_{5}$ -परिक्षिप्तं; B$_{2}$ °क्षेत्रं; D$_{6}$ °ज्ञेयं (for °क्षेपं). K$_{2.4}$ D$_{1}$ एकाक्षरं प(D$_{1}$ °रप)रिक्षिप्तं. — $^{c}$) G$_{3}$ बुद्धेः (for बुद्धि-). — $^{d}$) Ś$_{1}$ K$_{1}$ पुरम्; K$_{2.4}$ D$_{1}$ पदम् (for परम्). T$_{1}$ G$_{1.3}$ M$_{4}$ एकादशाद्. K$_{4}$ D$_{1}$ भजेत् (for भवेत्).

3 $^{a}$) K$_{2}$ D$_{c1}$ D$_{2.3}$ श्रोतांसि (for स्रो°). B$_{1.2}$ चान्यानि; T$_{2}$ G$_{1}$ यान्यानि (sic) (for यान्यस्मिन्). K$_{4}$ D$_{1}$ त्रीणि श्रोत्राणि चान्यस्मिन्. — $^{b}$) K$_{2.5}$ आश्रयंते; K$_{4}$ D$_{1}$ आश्रयेत; D$_{4}$ आयम्यंते; G$_{3}$ आप्लवंते; M$_{1.2}$ यन्नाप्यन्ये (for आप्यायन्ते). D$_{c1}$ om. one पुनः. — $^{c}$) K$_{2}$ D$_{1-4}$ M$_{4}$ (*inf. lin.* as in text) प्रा(D$_{4}$ प्र)णाद्यास्; K$_{5}$ B D$_{n1}$ D$_{5}$ (marg. *sec. m.*) M$_{3}$ Cv प्रनाड्यस्; D$_{5.6}$ प्रवृद्धास्; T$_{1}$ G$_{2}$ प्राणस्य; G$_{1}$ प्रसाद्यं; M$_{1.2}$ प्राणान्यास् (for प्रणाड्यस्). K$_{2.4}$ D$_{1}$ एता वै; D$_{3}$ यश्चैताः; G$_{3}$ एतेषां (for एवैताः). — $^{d}$) G$_{1.3}$ गुणात्मकाः.

C. 14. 990
B. 14. 36. 4
K. 14. 37. 4

अन्योन्यमिथुनाः सर्वे तथान्योन्यानुजीविनः ॥ ४
अन्योन्यापाश्रयाश्चैव तथान्योन्यानुवर्तिनः ।
अन्योन्यव्यतिषक्ताश्च त्रिगुणाः पञ्च धातवः ॥ ५
तमसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः ।
रजसश्चापि सत्त्वं स्यात्सत्त्वस्य मिथुनं तमः ॥ ६
नियम्यते तमो यत्र रजस्तत्र प्रवर्तते ।
नियम्यते रजो यत्र सत्त्वं तत्र प्रवर्तते ॥ ७
नैशात्मकं तमो विद्यात्रिगुणं मोहसंज्ञितम् ।
अधर्मलक्षणं चैव नियतं पापकर्मसु ॥ ८
प्रवृत्त्यात्मकमेवाहू रजः पर्यायकारकम् ।
प्रवृत्तं सर्वभूतेषु दृश्यतोत्पत्तिलक्षणम् ॥ ९
प्रकाशं सर्वभूतेषु लाघवं श्रद्दधानता ।
सात्त्विकं रूपमेवं तु लाघवं साधुसंमितम् ॥ १०
एतेषां गुणतत्त्वं हि वक्ष्यते हेत्वहेतुभिः ।
समासव्यासयुक्तानि तत्त्वतस्तानि वित्त मे ॥ ११
संमोहोऽज्ञानमत्यागः कर्मणामविनिर्णयः ।

---

4 $^{b}$) K$_2$ प्रवक्ष्यते ( for प्रचक्षते ). — K$_4$ D$_1$ om. ( hapl. ) 4$^{cd}$. — $^{c}$) K$_2$ अन्योन्यं. — $^{d}$) G$_3$ तदा ( for तथा ). K$_2$ -बंधनाः ; K$_3$ -वर्तिनः ; G$_2$ -जीवनं ; M$_4$ -जीवनाः.

5 $^{a}$) Ś$_1$ K$_{1.3.4}$ B$_3$ Dn$_1$ D$_{1.2.4}$ [अ]पि ( for [ए]व ). K$_{2.5}$ D$_3$ अन्योन्यापाश्रयाच्चा( D$_3$ °यश्चा )पि ; B$_4$ °न्यगतयश्चापि ; Dc$_1$ °न्यापाश्रयाण्येव ; D$_{5.6}$ °न्यार्थाश्रयाश्चापि ; T G$_{1.3}$ °न्यमा( G$_3$ °न्यं चा )श्रयाश्चैव. — $^{b}$) K$_2$ -बंधिनः ; K$_3$ -जीविनः ; K$_4$ D$_1$ -बंधनाः ( for -वर्तिनः ). K$_5$ तथान्योन्यानुपाश्रयाः. — $^{c}$) K$_{1.5}$ B$_2$ Dn$_1$ D$_{2.6}$ -व्यतिस( K$_1$ °श )क्ताश्च ; K$_4$ °षिक्ताश्च. D$_4$ T G$_{1.2}$ अन्योन्यम( D$_4$ °न्यं व्य )तिसक्ताश्च. — $^{d}$) K$_3$ त्रिगुणः पंचधातुकः.

6 $^{a}$) M$_{1.2}$ मनसो ( for तम° ). M$_2$ गत्वा ( for सत्त्वं ). D$_3$ तमन्यो मिथुने सत्त्वं ( sic ). — D$_1$ om. ( hapl. ) from रजः ( in 6$^{b}$ ) up to मिथुनं ( in 6$^{d}$ ). — $^{c}$) K$_4$ च ( for स्यात् ). D$_{5.6}$ रजसो मिथुनं सत्त्वं. — $^{d}$) K$_1$ T G$_{1.3}$ ततः ; Dc$_1$ रजः ( for तमः ).

7 $^{a}$) D$_{5.6}$ रजो ( for तमो ). — K$_2$ D$_1$ om. ( hapl. ) 7$^{bc}$. — $^{b}$) T$_1$ G$_{1.2}$ नि- ( for प्र- ). — Ś$_1$ K$_{1.3}$ B$_{1.2}$ G$_{1.3}$ om. ( hapl. ) 7$^{cd}$. — $^{c}$) M$_4$ ( *inf. lin. sec. m.* ) यदा सत्त्वं ( for रजो यत्र ). — $^{d}$) M$_4$ ( *inf. lin. sec. m.* ) तमस् ( for सत्त्वं ). T G$_2$ नि- ( for प्र- ).

8 $^{a}$) Ś$_1$ निशात्मकं ; T$_1$ नैशात्मिकं. K$_4$ D$_{1.2}$ विंद्यात्. M$_{1.2}$ नियामकं ततो विद्यात्. — $^{b}$) D$_1$ द्वि- ( for त्रि- ). Ś$_1$ K$_{1.5}$ -संज्ञिकं ; K$_3$ -संज्ञकं. — $^{d}$) Ś$_1$ K$_1$ नियमं. G$_2$ प्राप्त- ( for पाप- ). G$_3$ -कर्मणः ( for -कर्मसु ). — After 8, B$_5$ Dc$_1$ ins. :

74* तामसं रूपमेतत्तु दृश्यते चापि संगतम् ।

9 $^{a}$) K$_{1-3}$ D ( except D$_1$ ) T$_1$ G$_1$ M$_{1.2}$ प्रकृत्यात्मकम् ; M$_3$ प्रवृत्ता°. D$_2$ [आ]ह ; G$_3$ [अ]भूद् ; M$_4$ [अ]त्र ( for [आ]हू ). B$_{1.2}$ प्रवृत्तात्मकमेवोक्तं. — $^{b}$) B$_{3.5}$ Dn$_1$ D$_{2-6}$ प्रत्यय- ( for पर्याय- ). Ś$_1$ K ( except K$_4$ ) D$_1$ -वाचकं ; B$_{1.2}$ -लक्षणं ( for -कारकम् ). G$_2$ प्रजापर्यायकारणं. — $^{c}$) T G$_{1.2}$ सत्त्वं तु ( G$_2$ च ) ( for प्रवृत्तं ). M$_{1.2}$ सह- ( for सर्व- ). — $^{d}$) K$_2$ Dc$_1$ दृश्येत ; K$_5$ Dn$_1$ D$_{2-4}$ दृश्यम् ; B$_{4.5}$ पश्यत ; T G M$_{3.4}$ पश्यति ; M$_{1.2}$ दृष्टम् ( for दृश्यत ). K$_3$ दृश्यते साधुसंमतं ; D$_{5.6}$ दृश्यमुह्यंति लक्षणं.

10 K$_3$ B Dc$_1$ S ( except T$_2$ ) om. 10. — $^{a}$) K$_5$ D$_{2.4}$ T$_2$ प्रा( D$_4$ प्र )काश्यं. — $^{b}$) T$_2$ लाघवे. — $^{c}$) K$_{2.4}$ D$_1$ एतत् ( for एवं ). Ś$_1$ K$_1$ सात्त्विकं सर्वभूतेषु. — $^{d}$) K$_5$ T$_2$ -संमतं. Ś$_1$ K$_{1.2.4}$ D$_1$ कथ्य( Ś$_1$ K$_1$ दृश्य )ते साधुसंमतं ; D$_6$ लाघवे साधुसाम्मितं.

11 $^{a}$) G$_2$ एषां हि ( for एतेषां ). K$_{2.4.5}$ B$_3$ D$_1$ -सत्त्वं हि ; B$_{1.2}$ -तत्त्वं च ; B$_5$ Dn$_1$ D$_{2-6}$ -तत्त्वानि ( D$_3$ °नां ) ( for -तत्त्वं हि ). G$_3$ एतेषां गुणवत्त्वं हि. — $^{b}$) T$_1$ G$_1$ M$_{3.4}$ लक्ष्यते ( for व° ). Ś$_1$ B$_{3.5}$ Dn$_1$ D$_{2-6}$ वक्ष्यं( Ś$_1$ B$_3$ °क्ष्य )ते तत्त्वहेतुभिः ; K$_4$ वक्ष्यते हेतुभिः समः ; B$_{1.2.4}$ °ते गुणहेतुभिः ; Dc$_1$ °ते नव°. — $^{c}$) G$_3$ -ध्यान- ( for -व्यास- ). B$_{1.2}$ -युक्तं च ( for -युक्तानि ). G$_1$ M$_{1.2}$ समानव्यानयुक्तानि. — $^{d}$) M$_{1.2}$ ततस् ( submetric ) ( for तत्त्वतस् ). Ś$_1$ M$_{1.2}$ वित्थ मे ; K$_5$ चिंतयेत् ; B$_{3.4}$ ( marg. as in text ) D$_5$ बोधत ; D$_1$ बोध मे ( for वित्त मे ). K$_4$ T$_1$ तत्त्वतस्तान्निबोध मे ; B$_{1.2.5}$ Dc$_1$ Dn$_1$ D$_{2-4.6}$ °स्ता( B$_{1.2.5}$ Dc$_1$ °स्त )न्निबोधत ; G$_1$ °स्तान्निवर्त मे.

12 $^{a}$) T$_1$ उद्योगः ( for अत्यागः ). Ś$_1$ K D$_1$ G$_3$ संमोहो मनसस्त्यागः ; M$_{1.2}$ संमोहाज्ज्ञानमत्यागं. — $^{b}$) T$_2$ G$_{1.2}$ M$_{1.2.4}$ अपि ; G$_3$ अस्य ( for अवि- ). B$_4$ कर्मकाले विनिर्णयः. — $^{c}$) G$_3$ दर्पः ( for स्वप्नः ). D$_{5.6}$

स्वप्नः स्तम्भो भयं लोभः शोकः सुकृतदूषणम् ॥ १२
अस्मृतिश्चाविपाकश्च नास्तिक्यं भिन्नवृत्तिता ।
निर्विशेषत्वमन्धत्वं जघन्यगुणवृत्तिता ॥ १३
अकृते कृतमानित्वमज्ञाने ज्ञानमानिता ।
अमैत्री विकृतो भावो अश्रद्धा मूढभावना ॥ १४
अनार्जवमसंज्ञत्वं कर्म पापमचेतना ।
गुरुत्वं सन्नभावत्वमसितत्वमवाग्गतिः ॥ १५
सर्वे एते गुणा विप्रास्तामसाः संप्रकीर्तिताः ।
ये चान्ये नियता भावा लोकेऽस्मिन्मोहसंज्ञिताः ॥१६
तत्र तत्र नियम्यन्ते सर्वे ते तामसा गुणाः ।
परिवादकथा नित्यं देवब्राह्मणवैदिकाः ॥ १७
अत्यागश्चाभिमानश्च मोहो मन्युस्तथाक्षमा ।
मत्सरश्चैव भूतेषु तामसं वृत्तमिष्यते ॥ १८
वृथारम्भाश्च ये केचिद्वृथादानानि यानि च ।
वृथाभक्षणमित्येतत्तामसं वृत्तमिष्यते ॥ १९
अतिवादोऽतितिक्षा च मात्सर्यमतिमानिता ।

C. 14. 1006
B. 14. 36. 20
K. 14. 37. 20

---

स्वप्नः स्तंभोपलं( D$_6$ °ले )भश्च ; T$_1$ G$_1$ स्वयं निस्तंभयं लोकः ( sic ). —$^{d}$ ) D$_{2-6}$ स्वप्नः ; Bom. ed. स्वतः ( for शोकः ). K$_5$ सुकृति- ; B$_{1-3}$ D$_{2-6}$ स्वकृत-. T$_1$ M$_4$ -दूषणः.

13 $^{a}$ ) D$_{c1}$ D$_{n1}$ अमृतिश् ; G$_3$ अस्मृतं. K$_{4.5}$ D$_1$ T G M$_{3.4}$ [अ]विवेकश् ; D$_6$ [अ]व्यपाकश् ; M$_{1.2}$ विषादं ( for [अ]विपाकश् ). —$^{b}$ ) K$_{1.2}$ M$_{1-3}$ -वृत्तता. — B$_{3-5}$ D$_{c1}$ om. ( hapl. ) 13$^{cd}$. —$^{c}$ ) B$_{1.2}$ निर्विशेषतमं तत्त्वं. —$^{d}$ ) K$_{2.5}$ D$_{n1}$ D$_{2.3}$ M -वृत्तता ; B$_{1.2}$ -वर्तिता ( for -वृत्तिता ).

14 $^{a}$ ) D$_1$ कृतमानत्वम्. —$^{c}$ ) G$_3$ अमैत्रे. Ś$_1$ विकृतिभावो ; K$_{2.5}$ B$_5$ D$_{n1}$ D$_{2-6}$ T$_1$ °ताभावो ; B$_{1-4}$ °ता भावा. —$^{d}$ ) Ś$_1$ K$_5$ [ऽ]थाश्रद्धा ; K$_2$ B$_{3-5}$ D$_{n1}$ D$_{2.3.5.6}$ T$_1$ ह्यश्रद्धा ; G$_1$ अरुद्धा ; M$_2$ अशुद्धा ( for अश्रद्धा ). K$_{1.3}$ T$_1$ G$_1$ M$_{3.4}$ गूढ- ; G$_3$ [अ]श्रद्ध- ; M$_{1.2}$ गुण- ( for मूढ- ).

15 $^{a}$ ) Ś$_1$ K$_{1.3-5}$ असाम्यं च ; K$_2$ असौम्यत्वं ; B$_2$ असंगत्वं ( for °ज्ञत्वं ). G$_3$ अनार्जवत्वमज्ञत्वं ( sic ). —$^{b}$ ) K$_5$ -पाकम् ( for पापम् ). D$_3$ अचेतसा ; G$_1$ °तनं. —$^{c}$ ) K$_1$ अन्न- ( sic ) ; B$_{1.2.4}$ सत्त्व- ; B$_3$ अल्प- ; B$_5$ सर्व- ; D$_{c1}$ अन्य- ; D$_6$ सत्य- ( for सन्न- ). M$_{1.2}$ गुरुत्वं संनिबोधत्वम् ( sic ). —$^{d}$ ) Ś$_1$ K$_1$ B$_5$ D$_{c1}$ D$_{n1}$ D$_{3-6}$ T G$_3$ अवशित्वम् ; D$_2$ अवशत्वम् ; G$_1$ अस्मितत्वम् ( for असितत्वम् ). K$_{2.4}$ D$_1$ अवाङ्मिता ; M$_{1.2}$ अपां गतिः ( for अवाग्गतिः ).

16 $^{a}$ ) K$_4$ D$_1$ M$_2$ विप्र ; D$_{n1}$ D$_{2-6}$ T$_1$ वृत्तास् ; T$_2$ G M$_4$ ( *inf. lin.* ) चैव ; M$_3$ विप्रस् ( for विप्रास् ). —$^{b}$ ) Ś$_1$ K B$_{1.2.4}$ D$_{c1}$ G$_3$ परि- ( for संप्र- ). T$_2$ -वर्तिताः ( for -कीं° ). — B$_3$ om. ( hapl. ) 16$^{cd}$. —$^{c}$ ) M$_{1.2}$ वा ( for च ). B$_{1.5}$ D ( except D$_{c1}$ D$_1$) वि( B$_5$ नि )हिता ( for नियता ). —$^{d}$ ) B$_{1.2.5}$ D ( except D$_1$ ) भाव- ; T G$_1$ दृढ- ; G$_{2.3}$ मूढ- ( for मोह- ). K$_4$ D$_{c1}$ D$_1$ -संहिताः ( for -संज्ञिताः ).

17 $^{a}$ ) M$_{1.2}$ यत्र यत्र ( for तत्र तत्र ). D$_4$ नियम्येते. D$_5$ तत्र नियम्यते सर्वे. —$^{b}$ ) D$_3$ ते चैव ; D$_6$ ते नाम ( for सर्वे ते ). D$_1$ M$_4$ मानसा ( for तामसा ). —$^{c}$ ) B$_{1.2}$ अतिवाद- ; D$_1$ परिवादे ; T$_1$ परीवाद-. —$^{d}$ ) B$_3$ G$_{1.2}$ वेद- ( for देव- ). K$_{4.5}$ D$_{n1}$ D$_{1-4}$ T$_2$ C$_{np}$ -निंदकाः ; D$_{5.6}$ -निंदनं ; G M$_3$ -वैरिता ; Bom. ed. -वैदिकी ( for -वैदिकाः ). M$_{1.2}$ देवता ब्रह्मवादिता ; M$_4$ वेदब्राह्मणवेदिता.

18 $^{a}$ ) K$_{2.4}$ D$_1$ अत्याशश् ( for °गश् ). Ś$_1$ K$_4$ T G$_{1.2}$ M$_{3.4}$ [अ]ति- ( for [अ]भि- ). M$_{1.2}$ अत्यागज्ञातिमानश्च. —$^{b}$ ) D$_5$ मृत्युस् ( for मन्युस् ). Ś$_1$ K$_{1-3.5}$ [आ]त्मनः ( for [अ]क्षमा ). K$_4$ D$_1$ मोहमन्यू तथात्मनः. —$^{c}$ ) S ( except T$_1$ G$_2$ ) मात्सर्यं ( for मत्सरश् ). Ś$_1$ K$_{1.3}$ सर्व- ( for चैव ). —$^{d}$ ) M$_{1.2}$ वृत्तिम्. K$_{1.3}$ उच्यते ( for इष्यते ). D$_1$ तामसं वृत्तिलक्षणं ; G$_2$ °साः संप्रकीर्तिताः.

19 Ś$_1$ K$_1$ T$_2$ om. ( hapl. ) 19. K$_3$ D$_1$ G$_3$ om. ( hapl. ) 19-20. —$^{a}$ ) G$_2$ व्यर्थारंभाश् ( for वृथा° ). D ( except D$_{c1}$ ; D$_1$ om. ) हि ( for च ). —$^{b}$ ) B$_{1.2.4}$ D$_{c1}$ D$_{n1}$ वृथा दानव्रतानि च ; D$_3$ वृथा दीना वृथानि च ( sic ). —$^{c}$ ) B ( except B$_4$ ) -भरणम् ; D$_{c1}$ -करणम् ; M -लक्षणम् ( for -भक्षणम् ). B$_{1.2}$ इत्येवं. —$^{d}$ ) D$_4$ M$_{1.2}$ वृत्तिम्. K$_4$ उच्यते ( for इष्यतं ).

20 K$_3$ D$_1$ G$_3$ om. 20 ( cf. v. l. 19 ). D$_3$ G$_1$ om. ( hapl. ) 20. —$^{a}$ ) Ś$_1$ K$_1$ विवित्सा ; K$_2$ [ऽ]विधित्सा ; K$_5$ [ऽ]विविक्षा ; T$_2$ [ऽ]तितीक्षणा ( for °तिक्षा ). D$_{c1}$ वै ( for च ). K$_4$ अभिवादेविधित्सा च. —$^{b}$ ) Ś$_1$ K$_5$ B D$_{n1}$ D$_{2.4-6}$ अभि- ; K$_1$ इति ; D$_{c1}$ प्रति- ; M$_{1.2}$ चाति- ( for अति- ). —$^{c}$ ) S ( G$_{1.3}$ om. ) अश्रद्धताभ्य-

C. 14. 1006 B. 14. 36. 20 K. 14. 37. 20 अश्रद्दधानता चैव तामसं वृत्तमिष्यते ॥ २०
एवंविधास्तु ये केचिल्लोकेऽस्मिन्पापकर्मिणः ।
मनुष्या भिन्नमर्यादाः सर्वे ते तामसा जनाः ॥ २१
तेषां योनिं प्रवक्ष्यामि नियतां पापकर्मणाम् ।
अवाङ्निरयभावाय तिर्यङ्निरयगामिनः ॥ २२
स्थावराणि च भूतानि पशवो वाहनानि च ।
क्रव्यादा दन्दशूकाश्च कृमिकीटविहंगमाः ॥ २३
अण्डजा जन्तवो ये च सर्वे चापि चतुष्पदाः ।
उन्मत्ता बधिरा मूका ये चान्ये पापरोगिणः ॥ २४
मग्नास्तमसि दुर्वृत्ताः स्वकर्मकृतलक्षणाः ।
अवाक्स्रोतस इत्येते मग्नास्तमसि तामसाः ॥ २५
तेषामुत्कर्षमुद्रेकं वक्ष्याम्यहमतः परम् ।
यथा ते सुकृताल्ँलोकाल्ँलभन्ते पुण्यकर्मिणः ॥ २६
अन्यथा प्रतिपन्नास्तु विवृद्धा ये च कर्मसु ।
स्वकर्मनिरतानां च ब्राह्मणानां शुभैषिणाम् ॥ २७
संस्कारेणोर्ध्वमायान्ति यतमानाः सलोकताम् ।
स्वर्गं गच्छन्ति देवानामित्येषा वैदिकी श्रुतिः ॥ २८
अन्यथा प्रतिपन्नास्तु विवृद्धाः स्वेषु कर्मसु ।

---

सूया च. —$^d$) D$_4$ वृत्तिम् (sic). Ś$_1$ K$_2$ उच्यते (for इष्यते). K$_4$ तामसं वृत्तलक्षणं.

21 $^a$) Dc$_1$ एतद्- (for एवं-). K$_2$ B$_{1.2}$ D (except Dc$_1$ D$_1$) M$_{1.2}$ च (for तु). —$^b$) D$_4$ M$_{1.2}$ -कर्मणः. — K$_3$ om. 21$^c$–28$^d$. D$_1$ om. (hapl.) 21$^c$–22$^b$. —$^d$) B$_{3.5}$ Dn$_1$ D$_{2-4}$ T$_1$ transp. सर्वे and ते. K$_2$ मताः; K$_{4.5}$ B Dn$_1$ D$_{2-4}$ स्मृताः (for जनाः). D$_{5.6}$ तामसाः परिकीर्तिताः.

22 K$_3$ om. 22; D$_1$ om. 22$^{ab}$ (for both, cf. v. l. 21). —$^a$) K$_{2.4}$ एषां (for तेषां). B D (D$_1$ om.) योनीः. —$^b$) K$_5$ B Dn$_1$ D$_{2,4-6}$ नियताः (K$_5$ °तं); G$_3$ नियमं. K$_{2.4.5}$ B$_{3.5}$ D$_{2-6}$ T G$_{1.2}$ M$_{3.4}$ -कार्मिणां; Dc$_1$ Dn$_1$ -कर्मिणं (Dn$_1$ °णः). —$^c$) D$_3$ M$_{1.2}$ अवाङ्निरयता भावास्; T$_2$ °यगा ये वै; G$_1$ °यगाबाधे (sic); G$_3$ °ङ्नियमभावा वै. —$^d$) K$_2$ B$_4$ Dc$_1$ D$_1$ -गामिनां; G$_2$ -भाविनः; G$_3$ -भागिनः (for -गामिनः). M$_{1.2}$ तिर्यङ्निरयतां गताः.

23 K$_3$ om. 23 (cf. v. l. 21). —$^d$) Ś$_1$ K$_1$ D$_3$ क्रिमि- (for कृमि-).

24 K$_3$ om. 24 (cf. v. l. 21). —$^a$) Ś$_1$ K$_1$ अप्सरा; K$_{4.5}$ D$_1$ असुरा; T$_1$ G$_2$ अज्ञाता; G$_1$ अब्जांता; G$_3$ अपरे; M$_{1.2}$ अपर्णा; M$_3$ अचरा; M$_4$ अस्वरा (sic) (for अण्डजा). B$_5$ Dn$_1$ D$_{1-3.5.6}$ चैव (for ये च). K$_2$ अश्वा गजादयो ये च; D$_4$ अंडजास्तंतवश्चैव. —$^b$) K$_2$ वै च; K$_4$ D$_1$ एते (for चापि). D$_4$ M$_{3.4}$ चतुष्पदः. —$^c$) B$_2$ उन्मत्त-; M$_4$ (*inf. lin.* as in text) उन्मुक्ता (for उन्मत्ता). G$_2$ मूर्खा (for मूका). K$_{2.4}$ D$_1$ उन्मत्तबधिरांधाश्च. —$^d$) K$_1$ -रोगिनः; M$_{1-3}$ -कारिणः.

25 K$_3$ om. 25 (cf. v. l. 21). —$^b$) Ś$_1$ सु- (sic) (for स्व-). G$_3$ -रक्षणाः. —$^c$) K$_{2.4}$ D$_4$ अवाक्श्रोतस; Dc$_1$ D$_6$ M$_{1.2}$ अर्वाक्स्रो°; D$_{1.5}$ अर्वाक्श्रो°; D$_3$ अवाक्श्रोतसि. Ś$_1$ K$_1$ [ए]व (for [ए]ते). —$^d$) D$_1$ सर्वे (for मग्नास्).

26 K$_3$ om. 26 (cf. v. l. 21). B$_4$ om. 26$^{ab}$. —$^b$) T G$_1$ इह ततः (for अहमतः). D$_3$ तेन वक्ष्याम्यहं ततः. —$^c$) D$_1$ तथा (for यथा). Ś$_1$ तेषु; B$_2$ D$_6$ ते स्व- (for ते सु-). D$_3$ परं यथा ते सुकृताल्ँ. —$^d$) K$_2$ G$_3$ -कर्मणां; K$_4$ D$_1$ -कर्मभिः; K$_5$ B$_4$ -कार्मिणां; D$_4$ -कर्मणि.

27 K$_3$ om. 27 (cf. v. l. 21). K$_5$ om. 27$^{ab}$. —$^a$) K$_4$ Dc$_1$ D$_1$ G$_3$ ते (for तु). — K$_4$ D$_1$ G$_3$ om. (hapl.) 27$^b$–29$^a$. —$^b$) Ś$_1$ K$_1$ B$_{4.5}$ M$_3$ स्वेषु; B$_{1.2}$ M$_4$ (*inf. lin.*) ये स्व- (for ये च). D (D$_1$ om.) कर्म(D$_{5.6}$ °र्मि)णः (for कर्मसु). —$^c$) Ś$_1$ सु- (for स्व-). B$_5$ -नियतानां (for -निर°). —$^d$) K$_{2.5}$ जयैषिणां; M$_{1.2}$ शुभे क्षणे (for शुभैषिणाम्).

28 K$_3$ om. 28 (cf. v. l. 21). K$_4$ D$_1$ G$_3$ om. 28 (cf. v. l. 27). —$^a$) D$_6$ आयाता. —$^b$) B$_4$ यततां च (for °मानाः). B$_2$ D$_3$ स्व- (for स-). —$^c$) Dn$_1$ D$_{4-6}$ M$_3$ स्वर्गं. K$_{2.5}$ D$_3$ गच्छति. —$^d$) Dc$_1$ [ए]का (for [ए]षा).

29 K$_4$ D$_1$ G$_3$ om. 29$^a$ (cf. v. l. 27). —$^a$) B$_6$ D (D$_1$ om.) ते (for तु). —$^b$) Ś$_1$ निवृद्धाः; B$_{3.5}$ Dn$_1$ D$_{2.3.6}$ विबुद्धाः (D$_6$ °द्धे); G$_1$ विविधाः (for विवृद्धाः). D$_3$ तेषु (for स्वेषु). —$^c$) K$_2$ पुरा निवृत्त-; K$_3$ पुनरावृत्त- (for °वृत्ति-). Ś$_1$ -धर्मास्ते; M$_{1.2}$ -धर्मेण. K$_4$ D$_1$ पुरावृत्तकृताल्ँलोकाल्ँ. —$^d$) Ś$_1$ भवंतीह च मानुषाः; K$_4$ D$_1$ लभंते भुवि मा°.

पुनरावृत्तिधर्माणस्ते भवन्तीह मानुषाः ॥ २९
पापयोनिं समापन्नाश्चण्डाला मूकचूचुकाः ।
वर्णान्पर्यायशश्चापि प्राप्नुवन्त्युत्तरोत्तरम् ॥ ३०
शूद्रयोनिमतिक्रम्य ये चान्ये तामसा गुणाः ।
स्रोतोमध्ये समागम्य वर्तन्ते तामसे गुणे ॥ ३१
अभिषङ्गस्तु कामेषु महामोह इति स्मृतः ।
ऋषयो मुनयो देवा मुह्यन्त्यत्र सुखेप्सवः ॥ ३२
तमो मोहो महामोहस्तामिस्रः क्रोधसंज्ञितः ।
मरणं त्वन्धतामिस्रं तामिस्रं क्रोध उच्यते ॥ ३३
भावतो गुणतश्चैव योनितश्चैव तत्त्वतः ।
सर्वमेतत्तमो विप्राः कीर्तितं वो यथाविधि ॥ ३४
को न्वेतद्बुध्यते साधु को न्वेतत्साधु पश्यति ।
अतत्त्वे तत्त्वदर्शी यस्तमसस्तत्त्वलक्षणम् ॥ ३५
तमोगुणा वो बहुधा प्रकीर्तिता
यथावदुक्तं च तमः परावरम् ।
नरो हि यो वेद गुणानिमान्सदा
स तामसैः सर्वगुणैः प्रमुच्यते ॥ ३६

C. 14. 1022
B 14. 36. 36
K. 14. 37. 36

इति श्रीमहाभारते आश्वमेधिकपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥

---

30 ${}^{b}$) B5 Dc1 D5.6 चांडाला. T1 G3 M1–3 पुल्क-; T2 वृष्ण-; G1 कृष्ण-; G2 पुष्क-; M4 (*inf. lin.* as in text) पुष्प- (for मूक-). K2 -चूचुपाः; K4 D1 -वाचकाः; D3 -चूचकाः; D4 -चुततुः (sic) (for -चूचुकाः). B4 (marg.) चंडाला लुप्तचूडकाः (also °चोचुकाः). — ${}^{c}$) Ś1 K1.3 बलात्; K4 Dc1 D1 वर्णाः; B5 T2 G1 वर्णात्. T2 G1.2 M3.4 [ए]व (for [अ]पि). M1.2 वर्णान्पर्यायशब्दाश्च. — ${}^{d}$) Ś1 K1.3 B2 [उ]त्तरोत्तरान्.

31 K2 om. (? hapl.) 31${}^{ab}$. — ${}^{a}$) K4.5 D1 ये दुर्योनिम् (for शूद्रयो°). D4 इति (for अति-). — ${}^{b}$) T1 नराः (for गुणाः). — ${}^{c}$) K3 स्रोतमध्यं; B Dc1 Dn1 D2.3.6 श्रोतोमध्ये. K2.5 S स्रो(K2.5 श्रो)तोमध्यममागम्य; K4 D1 श्रौते मे मनसा गम्ये; Cv स्रोतोमध्यमथागम्य. — ${}^{d}$) K1.3 M1–3 वर्तंते; D6 वर्त्तंते. K4 D1 गुणाः (for गुणे). K5 वर्तंते तामसैर्गुणैः.

32 ${}^{a}$) K4 B1.3.4 Dn1 D1.4–6 M1.2 अभिष्वंगस्; K5 D2.3 °गम्यः (for °षङ्गस्). Ś1 K1.5 च (for तु). K2 अभिगम्य स्वकामिषु (sic). — ${}^{c}$) T G1 दिव्या (for देवा). — ${}^{d}$) K4 Dn1 M4 मुह्यंते; M1.2 मुह्यंस् (for मुह्यन्ति).

33 ${}^{a}$) B1 Dn1 ततो मोहो; D1 मनोमोहो. — ${}^{b}$) K4 D1 तामिश्रं; B5 D3 तामिश्रः; D5.6 तमिश्रः. K2.5 T2 G1.3 ह्यंधु-; T1 [ऽ]प्यंध- (for क्रोध-). K3 G1 -संज्ञितं (K3 °ताः). — ${}^{c}$) K2.4.5 B5 D1.6 त्वं(K4 D1 चां-; K5 अं)धतामिश्रं; Dc1 द्वंद्व * * *; Dn1 D2–5 G3 त्वंधतामिस्र(D3 °श्र)स् (for °तामिस्रं). — ${}^{d}$) K2.4.5 B5 D1.3.5.6 तामिश्रः (K5 °श्रं); B1–4 Dc1 Dn1 D2.4 G2 तामिस्रः; T2 G1 तमिस्रः.

34 ${}^{a}$) Ś1 K1.3 B5 पापतो; K2.5 D2 T1 भवतो; B1.2 D3–6 Cnp पाकतो; B3.4 भवतां; Dn1 वर्णतो (for भावतो). — ${}^{b}$) K5 जातितश्; G3 योनिभिश् (for °तश्). B4.5 सत्त्वतः. D3 योनिश्चैव च तत्त्वतः. — ${}^{c}$) K4 D1.5.6 सर्वमेव; T G1.2 सर्व(G1 °म)मेकं; G3 °तश्च (for °मेतत्). Ś1 K1.3.4 D1 तु वो; K5 तु मे (for तमो). K1 विप्र. M1.2 सर्वमेव मया विप्र (M1 °प्राः). — ${}^{d}$) Ś1 K1.3.4 Dc1 D1 वै (for वो).

35 ${}^{a}$) Ś1 K1.3 पश्यते (for बुध्यते). G2 लोके (for साधु). — K4 D1 om. 35${}^{bc}$. — ${}^{b}$) M2 [ए]तान् (for [ए]तत्). Ś1 K1.3.5 मन्यते (for पश्यति). — ${}^{c}$) B3 एतद्बो (for अतत्त्वे). Ś1 यत् (for यस्). — ${}^{d}$) T G1 तामसं (for तमसस्). K2.4.5 B4 D1 T G1.3 तच्च; B3 Dc1 तस्त्व-; M तत्तु (for तत्त्व-). D6 तमस्तत्त्वस्य लक्षणं.

36 ${}^{a}$) B1 तमोगुणो. B2.5 T1 M1.2 वा बहुधा; Dn1 D2–4 बहुविधाः; D5.6 बहवो वः; G3 ये बहवो (for वो बहुधा). K2 G M [अ]नु- (for प्र-). K4 तमोगुणो बहुधा वः प्रकीर्तितो; D1 °णो वा बहुधा तु कीर्तितो; T2 °णा वा बहु यः सुकीर्तिता (sic). — ${}^{b}$)

## ३७

C. 14. 1023
B. 14. 37. 1
K. 14. 38. 1

**ब्रह्मोवाच ।**

रजोऽहं वः प्रवक्ष्यामि याथातथ्येन सत्तमाः ।
निबोधत महाभागा गुणवृत्तं च सर्वशः ॥ १
संघातो रूपमायासः सुखदुःखे हिमातपौ ।
ऐश्वर्यं विग्रहः संधिर्हेतुवादोऽरतिः क्षमा ॥ २
बलं शौर्यं मदो रोषो व्यायामकलहावपि ।
ईर्ष्येप्सा पैशुनं युद्धं ममत्वं परिपालनम् ॥ ३
वधबन्धपरिक्लेशाः क्रयो विक्रय एव च ।
निकृन्त छिन्धि भिन्धीति परमर्मावकर्तनम् ॥ ४
उग्रं दारुणमाक्रोशः परवित्तानुशासनम् ।
लोकचिन्ता विचिन्ता च मत्सरः परिभाषणम् ॥ ५
मृषावादो मृषादानं विकल्पः परिभाषणम् ।
निन्दा स्तुतिः प्रशंसा च प्रतापः परितर्पणम् ॥ ६
परिचर्या च शुश्रूषा सेवा तृष्णा व्यपाश्रयः ।

---

$K_{2.4}$ $D_4$ तमसः (for च तमः). $B_{1.2}$ परस्परं; $B_4$ $Dc_1$ परापरं (for °वरम्). —$^{d}$) $K_{2.4}$ $D_1$ T $G_{1.2}$ M वि- (for प्र-). $G_3$ स तामसात्सर्वगुणाद्विमुच्यते.

Colophon. — *Sub-parvan :* $K_{2.3}$ T $G_1$ $M_{3.4}$ अनुगीता. — *Adhy. name :* $K_{2.5}$ B $D_{2-6}$ गुरुशिष्यसंवादः; $G_3$ तामसलक्षणं. — *Adhy. no.* ( figures, words or both ): $Ś_1$ $M_4$ ( *inf. lin.* ) 38; $Dn_1$ $D_4$ 36 ( as in text ); $T_1$ 28; $T_2$ $G_2$ $M_{3.4}$ 27; $G_{1.3}$ 37. — *Śloka no.:* $Dn_1$ 36.

### 37

1 $D_4$ $M_2$ om. the ref. $B_4$ $D_3$ $M_{3.4}$ ब्राह्मण ( for ब्रह्मा ). —$^{a}$) $Ś_1$ K $D_1$ [ऽ]हं सं-; $Dn_1$ $D_{2-6}$ हि वः; $M_1$ -भावं ( for ऽहं वः ). —$^{b}$) $Ś_1$ $K_{1.3.4}$ $Dc_1$ $T_2$ $G_{1.3}$ यथातथ्येन. $K_1$ $D_3$ सत्तम. —$^{c}$) $D_{5.6}$ महाभाग. —$^{d}$) $D_{5.6}$ गुणवृत्ते. $B_4$ $Dc_1$ तु ( for च ). B D ( except $D_1$ ) राजसं ( for सर्वशः ).

2 $^{a}$) $B_2$ संघात-; $B_5$ संहातो; $Dn_1$ $D_{5.6}$ संतापो; $M_{1.2}$ संयाता ( for संघातो ). $G_3$ संयम्य रूपमाश्वास्य. —$^{b}$) $K_4$ $D_1$ सुखं दुःखं. $M_{1.2}$ हितालसौ ( for हिमातपौ ). T सुखदुःखे( $T_1$ °खा )भिमानिता; $G_3$ °खौ हिताहितौ ( sic ). —$^{c}$) $K_4$ विग्रहं; T $M_{1.4}$ निग्रहः ( for वि° ). $K_2$ संधेर्; $K_4$ $D_1$ संधिं; $T_2$ $G_{2.3}$ सिद्धिर्. $G_1$ $M_{2.3}$ ऐश्वर्यनिग्रहः संधिर्. —$^{d}$) $K_5$ हेतुर्वादो; $D_6$ °वादी. $K_4$ $D_1$ हेतुवादारतिः क्षमा.

3 $^{a}$) $K_5$ बलैः शौर्यं; $T_2$ बलशौर्यं; $G_2$ बलं कार्यं; $M_{1.2}$ बलं शौर्यो ( sic ). $K_4$ $G_1$ दोषो; $M_{1.2}$ दोष- ( for रोषो ). —$^{b}$) $Ś_1$ $K_1$ -कलहा ( for °हाव् ). —$^{c}$) $K_{2.4}$ $D_1$ ईर्ष्येप्सुः; $B_3$ ईप्सेर्ष्ये; $D_{5.6}$ $T_1$ $G_2$ $M_{1.2}$ ईर्ष्या च ( $T_1$ वा; $G_2$ वै; $M_{1.2}$ सा ). $K_3$ पैशुन्यं; D ( except $Dc_1$ $D_1$ ) पिशुनं. $G_1$ ईर्ष्या ह्यपिशुनं युद्धं ( sic ). —$^{d}$) $K_{1.5}$ समत्वं. $K_2$ -तापनं; $D_{5.6}$ -पालने. $K_4$ $D_1$ ममत्वमतिताप( $D_1$ °पि )नं.

4 $^{a}$) $B_2$ वरबंध-; $D_6$ वधवेध- ( for °बन्ध- ). $G_1$ वधो बंधः परिक्लेशः. —$^{b}$) $K_2$ $T_1$ क्रय-; $G_3$ स्त्रियो ( for क्रयो ). —$^{c}$) $Ś_1$ निकृतश्; $K_1$ नियंत; $K_2$ $Dn_1$ $M_3$ निकृतं; $T_2$ निकृते; $M_4$ निकृंधि ( for निकृन्त ). $K_5$ छिंधि भिंधीति वचनं; $M_{1.2}$ निकृंत भिंधि छिंधीति. —$^{d}$) $K_4$ $D_1$ च क( $K_4$ की )र्तितं; $G_2$ [उ]पकर्तनं; $G_3$ [अ]वकृंतनं; $M_1$ [अ]पवर्तनं; $M_{2.3}$ [अ]वकर्तनः. $D_{4.5}$ परवर्मावकर्तनं.

5 $^{a}$) $Ś_1$ $K_{1.2}$ उग्र- ( for उग्रं ). $K_3$ आक्रोशाः; $K_4$ $D_1$ आक्रोशं. $G_3$ उग्रताडनमाक्रोशः. —$^{b}$) $K_{1.2}$ $B_1$ परि- ( for पर- ). $K_4$ $B_2$ ( marg. ).$_{3.4}$ $Dn_1$ $D_{2-6}$ $M_{1-3.4}$ ( *inf. lin.* as in text ) -चित्तानु-; Bom. ed. -च्छिद्रानु- ( for -वित्तानु- ). T $G_{2.3}$ $M_4$ ( *inf. lin.* ) -राग( T °गि )ता ( for -शासनम् ). $G_1$ परिवृत्तानुरागिता. — $K_4$ $D_1$ om. $5^{c}$–$6^{b}$. —$^{c}$) $K_3$ एवं ( for लोक- ). $T_1$ $M_{1.2}$ om. ( hapl. ) विचिन्ता. $K_5$ [अ]ति-; $B_4$ [आ]त्म-; D ( except $Dc_1$; $D_1$ om. ) $M_3$ [अ]नु- ( for वि- ). —$^{d}$) $G_1$ वत्सलः; $M_{1.2}$ मात्सर्यं ( for मत्सरः ). $Ś_1$ $K_{1.3.5}$ D ( $D_1$ om. ) -पालकं; $G_3$ -भावना ( for -भाषणम् ).

6 $K_4$ $D_1$ om. $6^{ab}$ ( cf. v. l. 5 ). $T_1$ $G_{1.3}$ $M_{1.2}$ om. ( hapl. ) $6^{ab}$. —$^{a}$) $K_{2.5}$ मृषावाक्यं ( for °वादो ). $T_2$ $G_2$ $M_{3.4}$ वृथाशाक्यं ( $T_2$ मृषाशास्त्रं ) मृषावादो. —$^{b}$) $K_1$ $B_4$ $T_2$ $G_2$ $M_3$ विकल्प-. $K_{2.5}$ विकल्पपरिकत्थनं. $M_4$ ( *inf. lin.* as in text ) परिहासो विभाषणं. —$^{c}$) $K_{1.3}$ निंदास्तुति-. —$^{d}$) $G_3$ कृतवः ( sic ) ( for प्रतापः ).

व्यूहोऽनयः प्रमादश्च परितापः परिग्रहः ॥ ७
संस्कारा ये च लोकेऽस्मिन्प्रवर्तन्ते पृथक्पृथक् ।
नृषु नारीषु भूतेषु द्रव्येषु शरणेषु च ॥ ८
संतापोऽप्रत्ययश्चैव व्रतानि नियमाश्च ये ।
प्रदानमाशीर्युक्तं च सततं मे भवत्विति ॥ ९
स्वधाकारो नमस्कारः स्वाहाकारो वषट्क्रिया ।
याजनाध्यापने चोभे तथैवाहुः परिग्रहम् ॥ १०

इदं मे स्यादिदं मे स्यात्स्नेहो गुणसमुद्भवः ।
अभिद्रोहस्तथा माया निकृतिर्मान एव च ॥ ११
स्तैन्यं हिंसा परीवादः परितापः प्रजागरः ।
स्तम्भो दम्भोऽथ रागश्च भक्तिः प्रीतिः प्रमोदनम् ॥ १२
द्यूतं च जनवादश्च संबन्धाः स्त्रीकृताश्च ये ।
नृत्तवादित्रगीतानि प्रसङ्गा ये च केचन ।
सर्व एते गुणा विप्रा राजसाः संप्रकीर्तिताः ॥ १३

C. 14. 1036
B. 14. 37. 14
K. 14. 38. 14

---

Ś$_1$ K$_{1.3}$ -हर्षणं; K$_{2.4.5}$ B$_4$ Dc$_1$ D$_1$ M$_{1.2}$ -सर्पणं; B$_2$ corrupt; B$_3$ -सर्पवः (sic); Dn$_1$ D$_{2-6}$ -घ( D$_4$ -ध )र्षणं ( for -तर्पणम् ).

7 $^{a}$) K$_{1.3}$ G$_2$ M [अ]थ; B$_3$ [आ]त्म-; Dn$_1$ D$_{2-6}$ [अ]नु- ( for च ). K$_5$ परेषां चैव शुश्रूषा. — $^{b}$) Dc$_1$ तृष्णा सेवा ( by transp. ); G$_3$ नैव तृष्णा. M$_3$ व्यपाश्रया. — $^{c}$) G$_3$ M$_{1.2}$ व्यूढो ( for व्यूहो ). K$_1$ प्रसादश्; K$_{2.4}$ D$_1$ प्रमो°. K$_5$ स्नेहो मोहः प्रसादश्च. — $^{d}$) B$_{1.2}$ D ( except Dc$_1$ D$_1$ ) परिवादः ( for °तापः ).

8 $^{a}$) K$_5$ इति; G$_1$ एव ( for ये च ). B$_5$ लोके च; D ( except Dc$_1$ ) लोकेषु ( for लोकेऽस्मिन् ). — $^{b}$) D$_6$ नृषु ( for the second पृथक् ). — $^{c}$) K$_{2.4}$ ( before corr. ).$_5$ D$_1$ द्रव्येषु; K$_4$ ( by corr. ) दिव्येषु ( for भूतेषु ). D$_6$ नारीभूतेषु द्रव्येषु; T G$_{1.2}$ स्त्रीपुर( T$_2$ G$_2$ °रि )ग्रामभूतेषु; M$_{3.4}$ ( *inf. lin.* as in text ) त्रिषु वार्षिषु भू°. — $^{d}$) K$_{2.5}$ D$_1$ भूतेषु; D$_6$ तथा तु; M$_{1.2}$ द्रव्ये च ( for द्रव्येषु ). T$_1$ च वनेषु; T$_2$ च रसेषु ( for शरणेषु ).

9 $^{a}$) K$_{2.3}$ B$_{2.4}$ T M$_{1.2}$ प्रत्य( B$_2$ °ल )यश् ( for ऽप्र° ). — $^{b}$) Dc$_1$ वृतानि; T$_1$ G$_{1.2}$ व्रतादि-; M$_3$ व्रता वि- ( for व्रतानि ). K$_2$ ययोः; K$_4$ B$_{1.2}$ D$_1$ तथा ( for च ये ). T$_2$ प्रायश्चित्तं च मंगलं ( cf. post. half of 76* ). — $^{c}$) G$_2$ प्रधानम्; M$_3$ प्रमोदम्; M$_4$ प्रमादम् ( for प्रदानम् ). G$_3$ प्रमादशीलयुक्ताश्च; M$_{1.2}$ प्रमादमाशयुक्तश्च (sic). — $^{d}$) K$_2$ भविष्यति ( for भवत्विति ). — For 9$^{cd}$, K$_5$ B D ( except D$_1$ ) subst. :

75* आशीर्युक्तानि कर्माणि पौर्तानि विविधानि च ।

10 $^{a}$) Dn$_1$ D$_{2-6}$ स्वाहाकारो; T$_2$ स्वधाकार- ( for °कारो ). K$_{2.4}$ D$_1$ वषट्कारः ( for नमस्कारः ). — $^{b}$) Dn$_1$ D$_{2-6}$ स्वधाकारो; T$_2$ M स्वाहाकार-. K$_{2.4}$ D$_1$ नमास्क्रिया; K$_5$ मखाक्रिया ( for वषट्क्रिया ). — $^{c}$) K$_4$ M$_4$ यो( M$_4$ य )जनाध्यापने; D$_{3.6}$ याजनाध्ययने; D$_4$ M$_{1.2}$ यात( D$_4$ °ज )नाध्ययना (sic). — $^{d}$) K$_1$ [आ]ह ( for [आ]हुः ). Ś$_1$ K ( except K$_3$ ) M प्रतिग्रहं. B Dn$_1$ D$_{2.3.5}$ T$_2$ यजनाध्ययने अपि ( B$_{1.2}$ °ने तथा; T$_2$ °नेपि च ); Dc$_1$ यजनाध्यापनेष्वति; D$_4$ यजनाध्ययनादपि; D$_6$ याजनाध्यापने अपि. — After 10, B Dc$_1$ Dn$_1$ D$_{2-6}$ T$_2$ ins. :

76* दानं प्रतिग्रहश्चैव प्रायश्चित्तानि मङ्गलम् ।

[ Dc$_1$ प्रतिगृहश्; T$_2$ °ग्रहं. T$_2$ प्रायश्चित्तं च मंगलं ( for the post. half ). ]

11 $^{a}$) G$_3$ प्रतिग्रहम् ( for इदं मे स्याद् ). — $^{b}$) D$_{5.6}$ मोहो; T$_1$ G$_2$ रजो ( for स्नेहो ). — K$_5$ om. 11$^{cd}$. — $^{c}$) K$_3$ अनु- ( for अभि- ). B$_{1.2}$ च माया च; D$_6$ T$_2$ तथा मोहो ( for तथा माया ). M$_{1.2}$ अभितोमाथ माया ( sic ). — $^{d}$) M$_{1.2}$ निर्वृतिर्; M$_3$ निष्कृतिर्. K$_{2.4}$ D$_1$ निष्कृ( K$_2$ विकृ )तिर्मतिरे( K$_2$ °मे )व च.

12 $^{a}$) K$_2$ D$_1$ स्तैन्य-; D$_4$ दैन्यं; T G M$_{3.4}$ स्तेयं ( for स्तैन्यं ). M$_{1.2}$ निंदा ( for हिंसा ). K$_5$ Cnp परिवादः; B$_{1-4}$ Dc$_1$ परी( Dc$_1$ °रि )तापः; B$_5$ Dn$_1$ D$_{2-6}$ जुगुप्सा च ( for परीवादः ). — $^{b}$) B$_{1-4}$ Dc$_1$ T$_2$ G$_2$ परी( B$_{2.4}$ Dc$_1$ °रि )वादः; G$_3$ तितिक्षा च ( for परितापः ). K$_4$ D$_1$ प्रजायते ( for °गरः ). — $^{c}$) K$_1$ स्तंभो दंभो; K$_2$ दानं दर्पो; K$_{4.5}$ B$_5$ D ( except Dc$_1$ ) T G M$_{3.4}$ दं( M$_4$ डं )भो दर्पो; M$_{1.2}$ स्तंभो डंभो ( for स्तम्भो दम्भो ). B$_{1-3}$ च; T G [ऽ]ति- ( for ऽथ ). — $^{d}$) Ś$_1$ K$_4$ D$_1$ शक्तिः ( for भक्तिः ). Dc$_1$ प्रमोहनं. K$_5$ शक्रस्य प्रीतिमोदनं.

13 $^{a}$) K$_3$ जनवादाश्; K$_5$ Dn$_1$ D$_{2.3.6}$ °वादं; T$_1$ दानवादश् ( for जन° ). — $^{b}$) Dc$_1$ corrupt. D$_6$ संबाधाः; M$_{1.2}$ बंधनाः; M$_3$ संबंध-. K$_5$ त्रयः; T च ते ( for च ये ). G$_1$ संबंधाः स्त्रीकृताबले ( sic ). — $^{c}$) K$_1$ यत्तु; K$_{2.4.5}$ नृत्य- ( for नृत्त- ). B D नृत्यवादित्रगीतानां ( D$_1$ °नि ). — $^{d}$) M$_{1.2}$ प्रसंगे. K$_{3.5}$ T G$_1$ M$_{1.2}$ न ( for च ). G$_3$ प्रसंगो येन केनचित्. — $^{e}$) M$_2$ गुणान्. K$_4$ Dn$_1$ D$_{1-4}$ M$_2$ विप्र ( for विप्रा ).

C. 14. 1037
B. 14. 37. 15
K. 14. 38. 15

भूतभव्यभविष्याणां भावानां भुवि भावनाः ।
त्रिवर्गनिरता नित्यं धर्मोऽर्थः काम इत्यपि ॥ १४
कामवृत्ताः प्रमोदन्ते सर्वकामसमृद्धिभिः ।
अर्वाक्स्रोतस इत्येते तैजसा रजसावृताः ॥ १५
अस्मिँल्लोके प्रमोदन्ते जायमानाः पुनः पुनः ।
प्रेत्यभाविकमीहन्त इह लौकिकमेव च ।
ददति प्रतिगृह्णन्ति जपन्त्यथ च जुह्वति ॥ १६
रजोगुणा वो बहुधानुकीर्तिता
यथावदुक्तं गुणवृत्तमेव च ।
नरो हि यो वेद गुणानिमान्सदा
स राजसैः सर्वगुणैर्विमुच्यते ॥ १७

इति श्रीमहाभारते आश्वमेधिकपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

## ३८

ब्रह्मोवाच ।
अतः परं प्रवक्ष्यामि तृतीयं गुणमुत्तमम् ।
सर्वभूतहितं लोके सतां धर्ममनिन्दितम् ॥ १
आनन्दः प्रीतिरुद्रेकः प्राकाश्यं सुखमेव च ।

---

—$^{f}$) K5 B1.2 G3 परि-; M1.2 प्रति- ( for संप्र- ). K1.3 राजसः संप्रकीर्तितः.

14 $^{a}$) K4 -भविष्यानां; D1 °ष्यामो. —$^{b}$) K2 S ( except M1.2 ) भूतानां ( for भावानां ). K1.3.5 D1.3.5.6 M3.4 ( *inf. lin.* as in text ) भुवि भावना; T G1.3 भव्यभावना: ( T1 °वनां; T2 °वना; G3 °विनां ); G2 भूतभावन:; M1.2 भूतिभावना. —$^{c}$) Ś1 K1.3 विवर्ण- ( for त्रिवर्ग- ). B1 त्रिवर्गो नियतो नित्यं. —$^{d}$) K2.4 B4 Dn1 धर्मार्थौ. K3 G3 M1.2.3 ( *sup. lin.* ) एव च ( for इत्यपि ).

15 $^{a}$) M1.2 प्रमोदंति. — K2 om. ( hapl. ) $15^{b}$–$16^{a}$. —$^{c}$) Ś1 K3 मध्यस्रोतस; K1.4 D1 मध्यश्रोतस; B1.3 D3.6 अर्वाक्श्रोतस. —$^{d}$) K4 D1 T G1.3 M1-3.4 ( *inf. lin.* ) ते जना; K5 B3-5 Dc1 Dn1 D2-6 G2 मनुष्या; B1.2 राजसा ( for तैजसा ). Ś1 K3 रजसावृत:; B3 T2 G2 M1.2 राजसावृता: ( T2 °सा: स्मृता: ). M4 लोकास्ते तेजसावृता:.

16 K2 om. $16^{a}$ ( cf. v. l. 15 ). —$^{a}$) B2 T2 G1 तस्मि.लँ. — M1.2 om. ( hapl. ) $16^{bc}$. —$^{b}$) Ś1 T1 G1 जायमान:. Dc1 om. one पुन:. —$^{c}$) K4 D1 प्रति- ( for प्रेत्य- ). K3 G1 -भावकम्. K3 एहंत:; B1.2 ऐहंत; T1 G2.3 M3.4 इच्छंत; T2 इच्छंति; G1 इच्छंतं. —$^{d}$) Ś1 K1.3 B3 पा( K1.3 प )रलौकिकम्; K2.4 D1 ऐहिलौ°; B1.2.4.5 Dn1 D2.4-6 G2 ऐह°; D3 एने लौ°; G1 श्रीहलौ°. G3 ऐह्यलौकिकमेव च. — For $16^{cd}$, K5 subst.:

77* प्रेत्यभावकरीं सिद्धिमीहन्ते राजसा जना: ।

—$^{e}$) Ś1 K4 D1.2 ददंति; Dc1 D4.6 ददाति; G3 दानानि. K2 D3 -गृह्णाति. —$^{f}$) K1 जायंति; T G तृप्यंति; M3 तर्प्यंति; M4 तृप्यंते ( for जपन्ति ). T2 G1 [अ]पि ( for [अ]थ ). K4 D1 जपं( K4 °यं )त्यथ जुह्वंति च; B Dn1 D2-6 तर्पयंत्यथ ( B1 °ति च ) जुह्वति ( D4 °थ ); M1.2 ***थ च जुह्वते.

17 $^{a}$) K4 राज्ञो गुणा. Ś1 K1.3 वै; K2 ( also as in text ).5 मे; M1.3 वा ( for वो ). K2 बहवो ( for बहुधा ). Ś1 K1.3 B2-4 Dc1 प्र- ( for [अ]नु- ). D1 राज्ञो गुणानां बहवो यथावद्. —$^{b}$) K3.4 D4 om. च. D1 उक्तं तथा ते गुणवृत्तमेव. —$^{c}$) B3.4 D ( except Dn1 D1 ) T G1 [ऽ]पि ( for हि ). K1.3 वेदयते ( for वेद गुणान् ). T2 G1 M3.4 transp. गुणानिमान् and सदा. M1.2 बहून् ( for सदा ). —$^{d}$) Ś1 K1.3 B1.2 प्र- ( for वि- ).

Colophon om. in K3. — *Sub-parvan* : K2 T G1.3 अनुगीता. — *Adhy. name* : K2 B Dn1 D4-6 गुरुशिष्यसंवाद:; Dc1 गुरुशिष्यसंवादे रजोगुण:; G3 राजसगुणानुवर्णनं. — *Adhy. no.* ( figures, words or both ): Ś1 M4 ( *inf. lin.* ) 39; B2 Dn1 37 ( as in text ); D4 35; T1 29; T2 G1.2 M3.4 28; G3 38; M1.2 27. — *Śloka no.* : Dn1 19.

38

☞ M1.2 read this adhy. twice.

1 Ś1 K1 om. the ref. K2.5 D1 M3 ब्राह्मण ( for ब्रह्मा ). —$^{a}$) G3 सत: ( for अत: ). —$^{b}$) M1.2 ( both

अकार्पण्यमसंरम्भः संतोषः श्रद्दधानता ॥ २
क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।
अक्रोधश्चानसूया च शौचं दाक्ष्यं पराक्रमः ॥ ३
मुधा ज्ञानं मुधा वृत्तं मुधा सेवा मुधा श्रमः ।
एवं यो युक्तधर्मः स्यात्सोऽमुत्रानन्त्यमश्नुते ॥ ४
निर्ममो निरहंकारो निराशीः सर्वतः समः ।
अकामहत इत्येष सतां धर्मः सनातनः ॥ ५
विश्रम्भो ह्रीस्तितिक्षा च त्यागः शौचमतन्द्रिता ।
आनृशंस्यमसंमोहो दया भूतेष्वपैशुनम् ॥ ६
हर्षस्तुष्टिर्विस्मयश्च विनयः साधुवृत्तता ।
शान्तिकर्म विशुद्धिश्च शुभा बुद्धिर्विमोचनम् ॥ ७
उपेक्षा ब्रह्मचर्यं च परित्यागश्च सर्वशः ।
निर्ममत्वमनाशीस्त्वमपरिक्रीतधर्मता ॥ ८
मुधा दानं मुधा यज्ञो मुधाधीतं मुधा व्रतम् ।

C. 14. 1050
B. 14. 38. 9
K. 14. 39. 9

---

first time ) द्वितीयं. $K_4$ $D_1$ तृतीयं गुणसंज्ञितं. —$^c$) $M_{1.2}$ ( both first time ) शृणु ( for सर्व- ). $K_3$ नित्यं ( for लोके ). —$^d$) $K_3$ स तं ( for सतां ). $K_4$ $D_1$ सर्वम् ( for धर्मम् ). $K_2$ अनुत्तमं ( for अनिन्दितम् ). $K_5$ सतां धर्मसमन्वितं.

2 $^a$) $Dn_1$ आनंदं. —$^b$) Ś$_1$ K $Dn_1$ $D_{5.6}$ प्रकाश्यं ( $K_5$ °शः ). —$^c$) $K_2$ $M_4$ असंरंभं.

3 $^a$) Ś$_1$ $K_3$ $M_{1.2}$ ( last two first time ) -वृत्तिर् ( for धृतिर् ). —$^b$) $K_{2.3}$ ममता ( for स° ). — $D_3$ om. $3^c$–$4^b$. —$^c$) $K_2$ $Dn_1$ $D_{2.6}$ [अ]नुसूया ( sic ) ( for [अ]न° ). —$^d$) $T_2$ $G_3$ दाक्ष्यँ; $G_2$ दक्ष्यं. $K_4$ $M_2$ ( first time )$_{.4}$ पराक्रमं.

4 $D_3$ om. $4^{ab}$ ( cf. v. l. 3 ). —$^a$) $K_{1.2}$ $B_{1.3.4}$ $D_6$ सुधा ज्ञानं सुधा वृत्तं; $K_{3.4}$ $D_1$ $G_3$ मुदा ज्ञा( $D_1$ दा )नं मुदा वृत्तं; $M_{1.2}$ ( both first time ) बुधा ज्ञानं बुधा वृत्तं. —$^b$) $Dn_1$ सुधा ( for the first मुधा ). Ś$_1$ $K_{1.5}$ $D_1$ मुधा( $K_1$ °दा )श्रयः; $D_5$ ( marg. as in text ) मुदा श्रमः. $K_{2.4}$ $B_{1.2.4}$ सुधा सेवा सुधा श्रमः ( $K_2$ $B_4$ °धाश्रयः ); $M_{1.2}$ ( both first time ) बुधा सेवा बुधाश्रयः. —$^c$) Ś$_1$ $K_{1.3}$ ध्रुवं ( for एवं ). $G_3$ युक्तस्य ( for यो युक्त- ). Ś$_1$ $K_{2.3}$ $B_3$ मुक्तधर्मः; $K_{1.4}$ $D_1$ मुक्तधर्मा; $B_2$ $M_{1.2}$ ( last two first time ) धर्मयुक्तः ( for युक्तधर्मः ). —$^d$) $K_{1.3}$ [ऽ]प्यत्र ( for ऽमुत्र ). $K_5$ $Dn_1$ $D_{2-4}$ $T_2$ [अ]त्यंतम् ( for [आ]नन्त्यम् ).

5 $^a$) $B_2$ निर्मोहो ( for निर्ममो ). —$^b$) $K_4$ $D_1$ निराशः. $K_5$ संवृतः ( for सर्वतः ). $G_2$ निराशीः सर्वसंमतः. —$^c$) $K_2$ -हित; $B_2$ ( marg. ) -भूत; $G_1$ -व्याम ( for -हत ). $B_3$ इत्येव; $B_4$ नित्येषु; $Dc_1$ इत्येषां ( for °ष ). $K_4$ $D_1$ अकामहित इत्येते; $B_5$ $Dn_1$ $D_{2-6}$ °भूत इत्येव ( $Dn_1$ °वं ); $T_2$ अकर्तव्योत इत्येष.

6 $^a$) $K_{1.3}$ $B_2$ $D_{2.4}$ S विस्रंभो; $B_4$ विश्वस्तो. —$^c$) $Dc_1$ अनृशंस्यम्. $K_3$ अनृशंस्यमसंमोहं. —$^d$) $K_1$ $D_6$ यदा; $T_2$ यथा ( for दया ). $K_1$ $D_{3.4}$ $M_{1.2}$ ( last two first time ) पैशुनं; $K_4$ $Dn_1$ $D_1$ वै शुभं ( for [अ]पैशुनम् ).

7 $^a$) $B_1$ चष्टिर् ( sic ) ( for तु° ). $K_2$ विवित्सा ( for विस्मयश् ). $B_1$ तु ( for च ). $B_2$ हर्षश्च विस्मयस्तुष्टिर्. —$^b$) $G_1$ सार- ( for साधु- ). Ś$_1$ $K_4$ $D_1$ -वृत्तयः; $B_{2.4.5}$ $Dn_1$ $D_{2-4.6}$ -वृत्तिता ( for -वृत्तता ). —$^c$) $G_3$ $M_{1.2}$ ( last two both times )$_{.3.4}$ शांतिः. $K_4$ -कर्मश्च ( for -कर्म वि- ). $T_1$ -शुद्धश्. B D ( except $D_1$ ) $T_2$ शांति( $D_{5.6}$ °त )कर्म( $B_4$ $D_2$ °र्मा )णि शुद्धि( $Dc_1$ सिद्धि-; $T_2$ शुद्ध )श्च. —$^d$) $K_5$ S ( except $G_3$; $M_{1.2}$ second time ) भावशुद्धिर् ( for शुभा बुद्धिर् ). Ś$_1$ $K_1$ $B_{1-3}$ विनोदनं; $G_3$ विमोहनं; $M_{1.2}$ ( both first time ) विमोचनः. $K_3$ शुभाशुभविनोदनं.

8 $^b$) $K_3$ -त्यागाश्. Ś$_1$ कीर्तिता ( for सर्वशः ). —$^c$) $K_1$ निर्दमत्वम् ( for निर्म° ). $K_4$ $D_1$ corrupt; $G_{2.3}$ अनाशित्वम्; $M_{1.2}$ ( both first time ) °शिष्टम्; $M_3$ अमानित्वम्; Bom. ed. अनाशीष्ट्वम् ( for °शीस्त्वम् ). —$^d$) T corrupt. $K_{2.4}$ $D_1$ अपरिक्रांतधर्मता; $B_{1.2}$ अपरीक्षित°; $B_{3-5}$ $Dc_1$ $Dn_1$ $D_{2-6}$ अपरि( $B_5$ °री )क्षत°; $G_1$ अनिष्क्रीतस्वध°; $G_2$ परिकीर्तितध°.

9 $^a$) $K_1$ प्रदाधानं; $K_2$ $B_{1-3}$ $D_6$ सुधा दानं; $K_4$ $G_3$ मुदा दानं; $D_1$ मधुदानं; $G_1$ मुधा नाम ( for मुधा दानं ). $K_{1.2}$ $B_{1.3}$ $D_6$ सुधा यज्ञो; $K_{3.5}$ मुधा यज्ञं; $G_3$ मुदा यज्ञो ( for मुधा यज्ञो ). $M_{1.2}$ ( both first time ) बुधा दानं बुधा यज्ञो. —$^b$) $M_1$ ( first time ) बुधा चित्तं; $M_2$ ( first time ) बुधाधीतं ( for मुधाधीतं ). $M_{1.2}$ ( both first time ) बुधा ( for the second मुधा ). $K_{1.2}$ $B_{1.3}$ $D_6$ सुधाधीतं सुधा व्रतं; $G_3$ मुदाधीतं मुदा व्रतं. —$^c$) $B_{1.3}$ $D_6$ सुधा; $T_2$ $G_3$ मुदा ( for मुधा ). $K_4$ परि- ( for प्रति- ). $G_1$ मुधा प्रतिगृहीतश्च; $M_{1.2}$ ( both first time ) बुधा प्रतिग्रहं चैव. —$^d$) $K_3$ $B_{1.3}$ $D_{1.6}$ सुधा; $G_3$ मुदा ( for the first मुधा ).

C. 14. 1050
B. 14. 38. 9
K. 14. 39. 9

सुधा प्रतिग्रहश्चैव सुधा धर्मो सुधा तपः ॥ ९
एवंवृत्तास्तु ये केचिल्लोकेऽस्मिन्सत्त्वसंश्रयाः ।
ब्राह्मणा ब्रह्मयोनिस्थास्ते धीराः साधुदर्शिनः ॥ १०
हित्वा सर्वाणि पापानि निःशोका ह्यजरामराः ।
दिवं प्राप्य तु ते धीराः कुर्वते वै ततस्ततः ॥ ११
ईशित्वं च वशित्वं च लघुत्वं मनसश्च ते ।
विकुर्वते महात्मानो देवास्त्रिदिवगा इव ॥ १२
ऊर्ध्वस्रोतस इत्येते देवा वैकारिकाः स्मृताः ।
विकुर्वते प्रकृत्या वै दिवं प्राप्तास्ततस्ततः ।
यद्यदिच्छन्ति तत्सर्वं भजन्ते विभजन्ति च ॥ १३
इत्येतत्सात्त्विकं वृत्तं कथितं वो द्विजर्षभाः ।
एतद्विज्ञाय विधिवल्लभते यद्यदिच्छति ॥ १४
प्रकीर्तिताः सत्त्वगुणा विशेषतो
यथावदुक्तं गुणवृत्तमेव च ।
नरस्तु यो वेद गुणानिमान्सदा
गुणान्स भुङ्क्ते न गुणैः स भुज्यते ॥ १५

इति श्रीमहाभारते आश्वमेधिकपर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥

---

$K_1$ $G_3$ मुदा; $K_2$ $B_{1.3}$ $D_6$ सुधा ( for the second सुधा ). $B_5$ व्रत: (for तप: ). $M_{1.2}$ ( both first time ) बुधा धर्मो बुधा तप:.

10 $^a$) Ś$_1$ $K_{1.3}$ $G_3$ -विधास्तु; $K_{2.4}$ $D_1$ -भूताश्च; $B_3$ $Dc_1$ -वृत्ताश्च ( for -वृत्तास्तु ). — $^b$) Ś$_1$ $K_1$ सत्य-; T $G_1$ सर्व- ( for सत्त्व- ). — $^c$) $K_3$ ब्राह्म- ( for ब्रह्म- ). $D_4$ -योनिष्ठास् ( for °स्थास् ). — $^d$) $K_5$ $M_{1.2}$ ( last two both times ) वीरा: ( for धीरा: ). $Dc_1$ सत्त्व-; $G_2$ सर्व- ( for साधु- ). $K_3$ ते धीरान्साधुदर्शन:.

11 $^a$) $K_4$ $D_1$ दत्त्वा; $G_3$ जित्वा ( for हित्वा ). $B_{4.5}$ $Dc_1$ कर्माणि ( for सर्वाणि ). $B_{1.2}$ $M_{1.2}$ ( last two second time ).$_4$ हित्वा पापानि कर्मा( $M_4$ सर्वा )णि. — $^b$) $K_2$ $G_3$ विशोका. $B_5$ $Dn_1$ $D_{2-6}$ [अ]थ मानवा: ( for [अ]जरामरा: ). $B_{1-4}$ $Dc_1$ ग( $B_1$ श )तशोकाश्च मानवा:. — $^c$) $G_{1.3}$ दिव्यं. $B_{1.2}$ $M_1$ ( both times ).$_2$ ( first time ).$_3$ च ते; $M_2$ ( second time ) कृते ( for तु ते ). Ś$_1$ $K_{1-3}$ $D_6$ $M_{1.2}$ ( last two first time ) वीरा: ( for धीरा: ). — $^d$) $K_4$ $D_1$ कुर्वंति. $T_2$ $G_{1.2}$ $M_{1.2}$ ( last two second time ).$_{3.4}$ स्म ( for वै ). $M_4$ तपस् ( for ततस् ). $K_{4.5}$ $Dn_1$ $D_{2-6}$ तनू:; $D_1$ T $G_{1.3}$ तप: ( for तत: ). B $Dc_1$ यथेष्टं ( $B_{1.2}$ °च्छं ) कुर्वंते तनू: ( $Dc_1$ नृप ).

12 $D_6$ om. 12–13. — $^a$) Ś$_1$ ईशित्वा; $K_4$ $D_1$ $G_3$ ईशत्वं. — $^b$) $K_2$ वशित्वं ( for लघुत्वं ). $T_1$ लघुत्वं चाशुतां तथा; $T_2$ $G_1$ °त्वं चासतां तदा; $G_{2.3}$ $M_{1.2}$ ( last two both times ).$_{3.4}$ °त्वं चाणुतां तथा. — $^c$) $K_4$ $D_{1.5}$ विकुर्वंतो ( $D_1$ °ते; $D_5$ °ति ); $K_5$ $Dn_1$ $D_{2-4}$ ये कुर्वंति; $M_{1.2}$ ( both first time ) विकुर्वंतो. — $^d$) $K_3$ त्रिदिवगाद्.

13 $D_6$ om. 13 ( cf. v. l. 12 ). Ś$_1$ $K_{1.3}$ repeat ( without var. ) $13^{ab}$ after $13^{ef}$. — $^a$) $K_2$ $Dn_1$ $D_{1.3}$ -श्रोतस; $G_1$ $M_{1.2}$ ( last two first time ) -रेतस ( for -स्रोतस ). $K_5$ ऊर्ध्वं श्रोतांसि इत्येता ( sic ). — $^b$) $K_4$ $D_1$ वै सात्त्विका: ( for वैकारिका: ). — $^c$) $K_2$ विकुर्वंत्या; B D ( except $D_1$; $D_6$ om. ) °र्वंत:. $K_3$ [ए]व ( for वै ). — $^d$) $G_1$ दिशं ( for दिवं ). $K_{1.3}$ प्राप्तस्. $Dc_1$ om. one तत:. — $^e$) $G_2$ $M_{1.2}$ ( last two first time ) इच्छति. — $^f$) $K_1$ $G_2$ भजते; $Dc_1$ $G_3$ भजंति; $Dn_1$ $D_{2-6}$ $M_1$ ( second time ) लभंते.

14 Ś$_1$ $K_{1.3.5}$ transp. $14^{ab}$ and $14^{cd}$. $Dn_1$ $D_{3.5.6}$ om. $14^{cd}$. — $^{cd}$) $B_1$ T $G_{1.2}$ M ( $M_{1.2}$ both both times ) transp. विधिवत् and लभते. Ś$_1$ $G_3$ लभ्यते. $K_3$ ईप्सितं ( for इच्छति ).

15 $^a$) $K_3$ प्रकीर्तित:. $K_3$ सत्य-; T $G_{1.2}$ $M_{1.2}$ ( last two first time ) सर्व- ( for सत्त्व- ). $B_2$ om. ( hapl. ) from विशेषतो up to गुणा ( in $15^c$ ). — $^b$) $Dc_1$ यथा यद् ( for यथावद् ). $K_5$ $D_1$ $G_3$ om. च. — $^c$) Ś$_1$ $K_{1.3}$ $B_3$ स सात्त्विकानिमान्; $B_4$ $Dc_1$ $G_3$ सदा गुणानिमान् ( by transp. ); $D_{5.6}$ गुणान्सदेमान्. $G_3$ om.; $M_{1.2}$ ( both first time ) शुभान् ( for सदा ). — $^d$) Ś$_1$ $K_{1.3}$ $B_3$ तु; $K_{2.4}$ च ( for स ). $K_4$ स नरैर्न ( for न गुणै: स ). $K_5$ D ( except $Dc_1$ ) युज्यते.

## ३९

**ब्रह्मोवाच ।**

नैव शक्या गुणा वक्तुं पृथक्त्वेनेह सर्वशः ।
अविच्छिन्नानि दृश्यन्ते रजः सत्त्वं तमस्तथा ॥ १
अन्योन्यमनुषज्जन्ते अन्योन्यं चानुजीविनः ।
अन्योन्यापाश्रयाः सर्वे तथान्योन्यानुवर्तिनः ॥ २
यावत्सत्त्वं तमस्तावद्वर्तते नात्र संशयः ।
यावत्तमश्च सत्त्वं च रजस्तावदिहोच्यते ॥ ३
संहत्य कुर्वते यात्रां सहिताः संघचारिणः ।
संघातवृत्तयो ह्येते वर्तन्ते हेत्वहेतुभिः ॥ ४
उद्रेकव्यतिरेकाणां तेषामन्योन्यवर्तिनाम् ।
वर्तते तद्यथान्यूनं व्यतिरिक्तं च सर्वशः ॥ ५
व्यतिरिक्तं तमो यत्र तिर्यग्भावगतं भवेत् ।
अल्पं तत्र रजो ज्ञेयं सत्त्वं चाल्पतरं ततः ॥ ६
उद्रिक्तं च रजो यत्र मध्यस्रोतोगतं भवेत् । C. 14. 1064 B. 14. 39. 7 K. 14. 40. 7

---

Colophon. — *Sub-parvan :* K2.3 T G1 M1.2 (last two second time). 3.4 अनुगीता ; K5 D6 ब्राह्मणगीता. — *Adhy. name :* K2.3 B Dn1 D4.5 M4 गुरूशिष्यसंवादः ; G2 सत्त्वगुणवर्णनं ; M1.2 (both first time) सात्त्विकवृत्तं. — *Adhy. no.* (figures, words or both): Ś1 M4 40 ; Dn1 38 (as in text); D4 36 ; T1 30 ; T2 G1.2 M1.2 (last two second time). 3.4 (*sup. lin.*) 29 ; G3 39 ; M1.2 (both first time) 28. — *Śloka no.:* Dn1 15.

### 39

1 K2 om. the ref. K4 D1 M3 ब्राह्मण (for ब्रह्मा). — $^a$) D6 [ए]वं ; T G1.2 M वै (for [ए]व). G3 न मे शक्ता वृथा वक्तुं. — $^b$) B1.2.4 (marg. as in text) विस्तरेण (for पृथक्त्वेन). K2.4 D1 च ; Dn1 D2–6 G2 M4 [ए]व ; T G1 हि (for [इ]ह). — $^c$) D6 सर्वाणि (for दृश्यन्ते). K4 D1 अविच्छिन्ना न दृश्यंते. — $^d$) B1.2 रजःसत्त्वतमांसि च.

2 $^a$) Ś1 K1.3 B4 अभिष(B4 °स)ज्जंते ; K2 D1 T G1.2 M1–3 अनुषज्यं(K2 °जं)ते ; K5 °सज्यंते ; B5 °रज्यंते ; Dc1 अन्वसज्जंते (sic); Dn1 D2–6 अथ र(D6 °पर)ज्यंते ; G3 अनुभुज्यंते (for °षज्जन्ते). — B2 om. 2$^{bc}$. — $^b$) T G1.2 अन्योन्येन ; G3 °न्यस्य ; M त्वन्योन्यं च. D5.6 [अ]र्थ- (for [अ]नु-). Ś1 K1.3 अन्योन्यस्यानुवर्तिनः ; B1.3.4 Dc1 तथान्योन्यानुजीविनः ; Dn1 D2–4 ह्यन्योन्यं चार्थजीविनः (D3 °नं). — $^c$) K5 अन्योन्योपाश्रयाः ; D (except D1) G3 °न्यमा(G3 °स्या)श्रयाः. — $^d$) Ś1 K1.3 B2 (marg.) -जीविनः ; M3 -वर्त्मिनं (sic) (for -वर्तिनः). T G1 तथान्योन्येन जीविनः.

3 $^a$) K5 B2.3 D (except Dc1 D1) T1 रजस् (for तमस्). — $^b$) K4 D1 वर्धते. — $^c$) K1 तु पश्चात् (for तमश्च). — $^d$) M3 इव (for इह).

4 $^a$) K2 कुर्वाते ; K3.4 D1 कुरुते. — $^b$) M1.2 संहिताः (for स°). Ś1 K1.3 संग- ; D2–6 सह- ; T2 G1 सर्व- (for संघ-). M4 (*inf. lin.*) -वारिणः (for -चा°). — $^c$) K4 D1 संघशो ; T1 संभूत- (for संघात-). — $^d$) Dc1 D3 वर्तंते ; D6 वर्तेते. M4 हेत्वहेतुतः (for °तुभिः). K4 D1 प्रवर्तंते ह्यहेतुभिः.

5 $^a$) Ś1 K1 -व्यतिरेकानां ; K2.5 B Dc1 Dn1 D2–6 °रिक्तानां ; T G1.2 °रेकेण (for °रेकाणां). K4 D1 G3 उद्रिक्त(G3 °द्रैक)व्यतिरिक्तानां. — $^b$) K4 -वर्जितां (for -वर्तिनाम्). — $^c$) K3–5 B D वक्ष्य(D1 वक्ष-; D3 चक्ष्य)ते (for वर्तते). B Dc1 S यद् (for तद्). Ś1 K1–3 D3 T2 यथानूनं ; B3 G3 यथा(G3 °दा)न्योन्यं ; B4 Dc1 D5.6 यथान्यायं ; G1.2 M2–4 यदान्यूनं ; M1 यदन्यूनं (for यथान्यूनं). — $^d$) K5 अतिरिक्तं (for व्यति°).

6 $^b$) T G1 शुभं (for भवेत्). — $^c$) K4 D1.6 तमो ज्ञेयं ; M च (M4 [अ]पि) सत्त्वं स्यात् (for रजो ज्ञेयं). — $^d$) Ś1 अतश् ; K1 तमश् ; K4 M रजश् (for सत्त्वं). K5 B D (except D1) T G1.2 अल्प- (for चाल्प-). K5 Dn1 D2.3.6 यथा ; B Dc1 D4.5 T G2 तथा ; D1 भवेत् ; G1 तदा (for ततः).

7 Ś1 K1.3.4 G1 om. (hapl.) 7-8. B2 Dc1 G3 om. (hapl.) 7. — $^a$) K2 B1 D1 T M तु (for च). D6 रसो (for रजो). — $^b$) K2 D1.3 -श्रोतोगतं. — $^c$) D4 T रजो (for तमो). — $^d$) K2 B5 रजश् (for सत्त्वं). B1 Dn1 D1.4–6 अल्प- (for चाल्प-).

C.14. 1064
B. 14. 39. 7
K. 14. 40. 7

अल्पं तत्र तमो ज्ञेयं सत्त्वं चाल्पतरं ततः ॥ ७
उद्रिक्तं च यदा सत्त्वमूर्ध्वस्रोतोगतं भवेत् ।
अल्पं तत्र रजो ज्ञेयं तमश्चाल्पतरं ततः ॥ ८
सत्त्वं वैकारिकं योनिरिन्द्रियाणां प्रकाशिका ।
न हि सत्त्वात्परो भावः कश्चिदन्यो विधीयते ॥ ९
ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणसंयुक्ता यान्त्यधस्तामसा जनाः ॥ १०
तमः शूद्रे रजः क्षत्रे ब्राह्मणे सत्त्वमुत्तमम् ।
इत्येवं त्रिषु वर्णेषु विवर्तन्ते गुणास्त्रयः ॥ ११
दूरादपि हि दृश्यन्ते सहिताः संघचारिणः ।
तमः सत्त्वं रजश्चैव पृथक्त्वं नानुशुश्रुम ॥ १२
दृष्ट्वा चादित्यमुद्यन्तं कुचोराणां भयं भवेत् ।
अध्वगाः परितप्येरंस्तृष्णार्ता दुःखभागिनः ॥ १३
आदित्यः सत्त्वमुद्दिष्टं कुचोरास्तु यथा तमः ।
परितापोऽध्वगानां च राजसो गुण उच्यते ॥ १४
प्राकाश्यं सत्त्वमादित्ये संतापो राजसो गुणः ।
उपप्लवस्तु विज्ञेयस्तामसस्तस्य पर्वसु ॥ १५
एवं ज्योतिःषु सर्वेषु विवर्तन्ते गुणास्त्रयः ।

---

B$_{1.2}$ Dn$_1$ D$_{2.4–6}$ तथा ; D$_3$ यथा ( for ततः ).

8 Ś$_1$ K$_{1.3.4}$ G$_1$ om. 8 ( cf. v. l. 7 ). K$_5$ B$_5$ D$_6$ om. (hapl.) 8. —$^{a}$) D$_1$ T G$_{2.3}$ तु ( for च ). D$_{4.5}$ रजः ; T$_1$ सदा ( for यदा ). —$^{b}$) B$_{2.4}$ D$_1$ ऊर्ध्वं-श्रोतोगतं ; D$_{4.5}$ अध्यश्रोतो° ( sic ). —$^{c}$) K$_2$ B ( B$_5$ om. ) D ( D$_6$ om. ) तमो ( for रजो ). —$^{d}$) K$_2$ B$_{1–4}$ Dc$_1$ Dn$_1$ D$_{1–3}$ रजश् ; D$_4$ सत्त्वश् ; D$_5$ सत्त्वम् ( for तमश् ). B$_{3.4}$ Dc$_1$ स्वल्प- ; D$_6$ अल्प- ( for चाल्प- ). B$_{1.3}$ Dn$_1$ D$_{2–5}$ T$_2$ तथा ; G$_3$ भवेत् ( for ततः ).

9 $^{a}$) B Dc$_1$ Dn$_1$ D$_{2.4}$ M$_3$ वैकारिकी ; D$_{3.5}$ G$_3$ °रिका ; D$_6$ चैकापि यो ( sic ). —$^{b}$) Ś$_1$ प्रकाशिकः ; K$_2$ °शकं ; K$_3$ °शका ; K$_4$ °शनं ; K$_5$ M$_{1.2}$ °शिता ; D$_1$ °शसाः ( sic ). — D$_1$ om. $9^{c}$–$10^{b}$. —$^{c}$) B D ( D$_1$ om. ) धर्मः ; M$_2$ भावं. —$^{d}$) B$_1$ अत्र ( for अन्यो ).

10 = ( var. ) 6. 36. 18. D$_1$ om. $10^{ab}$ ( cf. v. l. 9 ). —$^{c}$) K$_4$ M$_3$ -वृत्ति( M$_3$ °त्त )स्था ; K$_5$ B$_{1.4}$ T G$_1$ M$_{1.2.4}$ -युक्तास्तु ; G$_2$ -युक्ता हि ( for -संयुक्ता ). G$_3$ जघन्ययोर्वियुक्तास्तु. —$^{d}$) B$_{1.2}$ नराः ; D$_1$ बलाः ; D$_6$ गुणाः ( for जनाः ). M$_3$ अधो गच्छंति तामसाः.

11 $^{b}$) D$_{2–4}$ ब्राह्मणः. —$^{c}$) D$_1$ [ए]ते ( for [ए]वं ). D$_1$ om. ( hapl. ) वर्णेषु वि-. —$^{d}$) K$_{1.3}$ निवर्तंते ; K$_2$ S प्रव° ; K$_5$ निवसंति.

12 $^{a}$) B$_4$ ह ; T G$_{1.2}$ M च ; G$_3$ [इ]द ( for हि ). —$^{b}$) K$_3$ संग- ; B$_2$ T G$_{1.2}$ सह- ( for संघ- ). Dc$_1$ D$_1$ M$_4$ ( *inf. lin.* as in text ) -वारिणाः ( M$_4$ °णः ). —$^{d}$) B$_{1–3.5}$ Dc$_1$ Dn$_1$ D$_{2–6}$ पृथक्त्वेन ( for °क्त्वं न ). K$_{2.4}$ D$_1$ अनु- ( for नानु- ). K$_{2.4.5}$ D$_{1.3–6}$ M$_1$ -शुश्रुमः. T$_2$ पृथक्त्वान्नाम शुश्रुवुः.

मनोमलात्तपोऽशक्यं कर्म चाविद्यया हतम् ।
दानमप्यर्थदोषेण नाम तस्मात्कलौ स्मरेत् ।
यदि गन्तुं कृता बुद्धिर्वासुदेव नमोऽस्तु ते । [5]

[(L. 1) T सर्वेषामीश्वरो; G2 सर्वस्य ई° (for सर्वस्यापी°). —(L. 2) T -लोकाय (for -लोकात्मन्). —(L. 5) M4 नारायण (for वासुदेव).]

—$^{c}$) K2. 4 D1 गच्छाम; K5 गत्वा स (for गच्छावो). —$^{d}$) Ś1 K1 नाग- (for गज-).

51 $^{b}$) K5 धर्मकामं (for धर्मात्मानं). —$^{c}$) K2 T2 समनुप्राप्य (for °ज्ञाप्य). K5 दुर्धर्षः; B1. 5 D2–4

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

# ५१

### वैशंपायन उवाच ।

ततोऽभ्यचोदयत्कृष्णो युज्यतामिति दारुकम् ।
मुहूर्तादिव चाचष्ट युक्तमित्येव दारुकः ॥ १
तथैव चानुयात्राणि चोदयामास पाण्डवः ।
सज्जयध्वं प्रयास्यामो नगरं गजसाह्वयम् ॥ २
इत्युक्ताः सैनिकास्ते तु सज्जीभूता विशां पते ।
आचख्युः सज्जमित्येव पार्थायामिततेजसे ॥ ३
ततस्तौ रथमास्थाय प्रयातौ कृष्णपाण्डवौ ।
विकुर्वाणौ कथाश्चित्राः प्रीयमाणौ विशां पते ॥ ४
रथस्थं तु महातेजा वासुदेवं धनंजयः ।
पुनरेवाब्रवीद्वाक्यमिदं भरतसत्तम ॥ ५
त्वत्प्रसादाज्जयः प्राप्तो राज्ञा वृष्णिकुलोद्वह ।
निहताः शत्रवश्चापि प्राप्तं राज्यमकण्टकम् ॥ ६
नाथवन्तश्च भवता पाण्डवा मधुसूदन ।
भवन्तं प्लवमासाद्य तीर्णाः स्म कुरुसागरम् ॥ ७
विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वसंभव ।

C. 14. 1485
B. 14. 52. 8
K. 14. 52. 8

---

धर्मज्ञं; B2 Dc1 धर्मज्ञ; B3.4 Dn1 D5.6 राजानं; D1 M दुर्धर्ष. — $^{d}$) Ś1 K D1 स्वपुरीं; D5.6 स्वपुरं. Ś1 K1.3.5 B3.4 G3 गंतुम् (for यातुम्).

Colophon. — *Sub-parvan :* Ś1 K1.3 गुरुशिष्यसंवादोनुगीता च [समाप्ता]; K2 शिष्यानुगीता [समाप्ता]; T G M2–4 अनुगीता [समाप्ता (G3 °प्तिः; M2 °प्तं)]. — *Adhy. name :* B4 Dn1 D3–6 गुरुशिष्यसंवादः; D1 गुरुशिष्यसंवादे गीतासंवादः. — *Adhy. no.* (figures, words or both): Ś1 58; B2.5 50 (as in text); Dn1 D4 M4 (*inf. lin.*) 51; T1 37; T2 G2.3 M 36.

## 51

1 K4 D1 om. the ref. After the ref., G3 reads $3^{ab}$. — $^{a}$) K2 corrupt. Dn1 D1.5.6 [ऽ]भ्यनोदयत्; G3 ह्यचोदयत्. — $^{b}$) K1 दानकं; K2 दारुकः; D5.6 दारकं. — $^{c}$) Ś1 K1 चाख्य(Ś1 [before corr.] °ख्या)त्स; K2 चाचष्टे; T G1 चोवाच (for चाचष्ट). K4 D1 G3 सुमु(D1 स मु)हूर्तादिवाचष्ट; K5 मुहूर्तादब्रवीद्राजन्. — $^{d}$) M2 मुक्तम् (for युक्तम्). D5.6 दारुकं.

2 $^{a}$) Dn1 D5.6 -यात्रादि (for °णि). — $^{b}$) Dc1 corrupt. K4 D1 नोदयामास (for चोद°). — $^{c}$) T G1.2 संनह्यध्वं (for सज्जयध्वं). Ś1 K1.3 प्रयास्यावो. — $^{d}$) K3 B1–4 S नाग- (for गज-).

3 G3 reads $3^{ab}$ after the ref. in st. 1. — $^{a}$) K2 D1 प्रत्युक्ताः. K5 D2–4 ते वै; M4 सर्वे (for ते तु). — $^{b}$) M2.4 सज्जीभूत्वा. — K5 om. (hapl.) $3^{c}$–$4^{d}$. — $^{c}$) B3.5 आचक्षुः. D2.3 कृतम्; G2 सज्यम् (for सज्जम्). K2.3 B1–3 Dc1 D1 इत्येवं. — $^{d}$) B3 पार्थम् (for पार्थाय).

4 K5 om. 4 (cf. v. l. 3). — $^{b}$) G2 -पार्थिवौ (for -पाण्डवौ). — $^{c}$) K1 D5.6 विकुर्वाणाः (sic); B3.4 Dc1 प्रकुर्वाणौ; G2.3 तौ कुर्वाणौ. — $^{d}$) G3 क्रियमाणौ.

5 $^{a}$) D3 स्वस्थस्था (for रथस्थं). Ś1 K1 T2 G1.2 तं (for तु). G3 रथस्थौ तौ महातेजौ. — $^{b}$) K2 D2 G3 वासुदेवधनंजयौ. — $^{d}$) K1 भरतसत्तमः; B1 T1 भारतसत्तम; D1.4 वचनमुत्तमं; D5.6 उर्वीशसत्तम.

6 Before 6, M1.2 ins. अर्जुनः. — $^{a}$) G2.3 जयं. — $^{b}$) T1 M3 राज्ञो; G2.3 राजा (for राज्ञा). D6 -कुलोद्भव. — $^{c}$) Ś1 K1.3 चैव (for चापि). D5.6 सर्वे हताः शत्रवश्च. — $^{d}$) K5 B1.2 M3 राज्यं प्राप्तम् (by transp.).

7 $^{b}$) T2 G1 भवाम (for पाण्डवा). — After 7, T G ins.:

94* भक्तांस्त्वमाश्रितानस्मान्पालयामुत्र चेह च ।

[T2 त्वाम् (for त्वम्).]

8 $^{a}$) Ś1 K1.2 विश्वकर्म; K4 D1 सर्वकर्म. — $^{b}$) D6 विश्वात्मा. K2 -संभवः; K4 -संभवं; Dn1 -सत्तम (for -संभव). — $^{c}$) K2.4.5 D1 तथा (for यथा). K3 त्वं (for [अ]हं). K2 D1 त्वां वि-; K3 चाभि-; K4 त्वानु-; B1.3–5 Dc1 D2.4 T1 G3 त्वाभि- (for त्वा वि-). Ś1 K1 यथा त्वं नाभिजानामि; Dn1 D5.6 तथा त्वामपि जा(Dn1 °भिजा)नामि. — $^{d}$) Bom. ed.

C. 14. 1485 B. 14. 52. 8 K. 14. 52. 8 यथाहं त्वा विजानामि यथा चाहं भवन्मनाः ॥ ८
त्वत्तेजःसंभवो नित्यं हुताशो मधुसूदन ।
रतिः क्रीडामयी तुभ्यं माया ते रोदसी विभो ॥ ९
त्वयि सर्वमिदं विश्वं यदिदं स्थाणुजङ्गमम् ।
त्वं हि सर्वं विकुरुषे भूतग्रामं सनातनम् ॥ १०
पृथिवीं चान्तरिक्षं च तथा स्थावरजङ्गमम् ।
हसितं तेऽमला ज्योत्स्ना ऋतवश्चेन्द्रियान्वयाः ॥ ११
प्राणो वायुः सततगः क्रोधो मृत्युः सनातनः ।
प्रसादे चापि पद्मा श्रीर्नित्यं त्वयि महामते ॥ १२
रतिस्तुष्टिर्धृतिः क्षान्तिस्त्वयि चेदं चराचरम् ।
त्वमेवेह युगान्तेषु निधनं प्रोच्यसेऽनघ ॥ १३
सुदीर्घेणापि कालेन न ते शक्या गुणा मया ।
आत्मा च परमो वक्तुं नमस्ते नलिनेक्षण ॥ १४
विदितो मेऽसि दुर्धर्ष नारदाद्देवलात्तथा ।
कृष्णद्वैपायनाच्चैव तथा कुरुपितामहात् ॥ १५
त्वयि सर्वं समासक्तं त्वमेवैको जनेश्वरः ।
यच्चानुग्रहसंयुक्तमेतदुक्तं त्वयानघ ॥ १६
एतत्सर्वमहं सम्यगाचरिष्ये जनार्दन ।

---

मतः ( for मनाः ). $K_{2-5}$ $Dn_1$ $D_{1.5.6}$ $T_2$ त( $K_3$ $T_2$ य )था चाहं ( $K_2$ $D_1$ °ह ) भवान्मम ( $D_{5.6}$ °नः ); $T_1$ $G_2$ तथाहं भगवन्मनाः; $G_3$ तथा हि भगवान्मम. —After 8, $B_{1.2}$ ins.:

95* भवामि सततं कृष्ण तथा कुरु महामते ।

9 $^{a}$) $Dc_1$ -संस्तवे ( for -संभवो ). — $^{b}$) B D ( except $D_1$ ) भूतात्मा ( for हुताशो ). — $^{c}$) $K_{1.2}$ $D_6$ रति-; $K_3$ गतोः; $T_2$ $G_{1.2}$ रात्रिः ( for रतिः ). — $^{d}$) $K_{1.3}$ $T_2$ $M_4$ ( *inf. lin.* as in text ) मया ते; $G_3$ मायातो ( for माया ते ). $K_2$ दर्शिता; $D_6$ रोधसी ( for रोद° ). $K_1$ प्रभो. Ś$_1$ मया ते नोच्यसे विभो.

10 $^{a}$) $B_{1.2}$ $Dc_1$ सक्तम्; $B_{4.5}$ शक्तम् ( for सर्वम् ). — $^{b}$) $K_{2.4.5}$ $D_1$ यत्किंचित् ( for यदिदं ). $K_1$ स्थावर- ( hypermetric ); $K_3$ स्थास्नु- ( for स्थाणु- ). $D_3$ यदि स्थाणुं च जंगमं. — $^{c}$) $B_{1.2}$ $D_{2-4}$ त्व( $B_2$ त )मप्येतद्; $G_3$ त्वयि सर्वं ( for त्वं हि सर्वं ). Ś$_1$ हि ( for वि- ). — $^{d}$) Ś$_1$ $K_{1.3}$ सनातनः; B D ( except $D_1$ ) चतुर्विधं ( $D_3$ °धः ).

11 $^{a}$) $K_{1.3}$ $Dc_1$ $D_1$ $T_2$ पृथिवी. $B_{1-3.5}$ चांतरीक्षं. $D_6$ पृथिवी चांतरिक्षे यस्. — $^{b}$) $Dn_1$ $D_{5.6}$ द्यां चै( $D_5$ [ marg. *sec. m.* ] द्यौश्चै-; $D_6$ त्वं चै )व मधुसूदन. — $^{c}$) $K_4$ $D_1$ $G_3$ सहितं; $T_1$ $G_2$ असितं ( for हसितं ). Ś$_1$ $G_3$ ते महा-; Ś$_1$ ( before corr. ) $K_3$ ते मया; $K_4$ $D_1$ तेमलं ( for तेऽमला ). — $^{d}$) $K_1$ corrupt. $K_2$ om.; $K_5$ तु ( for च ). $K_{2.4.5}$ $B_{3.4}$ $D_1$ [ इं ]द्रियाणि ते; $B_{1.2.5}$ $Dc_1$ $Dn_1$ $D_{2-6}$ $G_{2.3}$ °याणि च; T $G_1$ °यास्तव ( for °यान्वयाः ).

12 $^{a}$) Ś$_1$ $K_4$ $M_{1-3}$ प्राणे. $K_2$ च सततं; $K_4$ $D_1$ च स ततः; $B_3$ सर्वगतः ( for सततगः ). $G_3$ प्राणे वायुः स तु गतः. — $^{b}$) Ś$_1$ $K_{3.4}$ $Dc_1$ $D_1$ $M_{1-3}$ क्रोधे. $D_3$ तव प्रभो ( for सनातनः ). — $^{c}$) $D_6$ प्रमोदे ( for प्रसादे ). $K_2$ $D_1$ वापि; $G_3$ देव ( for चापि ). — $^{d}$) $K_{2.4.5}$ $B_5$ $D_1$ S तव ( for त्वयि ).

13 $^{a}$) $K_{1.3}$ वृत्तिः; $G_3$ स्मृतिः ( for धृतिः ). $T_2$ $G_1$ कांतिस् ( for क्षान्तिस् ). — $^{b}$) B $Dc_1$ $D_{2-4}$ चा- ( $B_4$ आ )यतिश्च; $Dn_1$ $D_{5.6}$ मतिः कांतिश् ( for त्वयि चेदं ). — $^{c}$) Ś$_1$ $K_{1.4.5}$ $D_1$ $G_3$ हि ( for [ इ ]ह ). — $^{d}$) $D_2$ विधानं ( for निधनं ). $K_{2.4}$ $D_{1.2.6}$ $G_{2.3}$ Cv प्रोच्यते. $G_3$ युगे ( for ऽनघ ).

14 $^{a}$) $D_6$ $G_2$ सुदीर्घेन. $B_3$ [ ए ]व ( for [ अ ]पि ). — $^{b}$) $D_5$ [ इ ]ह; $D_6$ हि ( for ते ). $B_{1.2}$ $Dc_1$ $D_{2-4}$ मया गुणाः ( by transp. ). — $K_5$ om. 14$^{c}$–15$^{b}$. — $^{c}$) $K_2$ आत्मा ह परमोऽव्यग्रं; $K_3$ $D_1$ आत्मासि परमोऽव्यक्तं; B $Dc_1$ $Dn_1$ $D_{2-6}$ आत्मा च परमात्मा च.

15 $K_5$ om. 15$^{ab}$ ( cf. v. l. 14 ). — $^{a}$) $K_4$ $D_1$ विदितं. $K_{3.4}$ $B_5$ $Dn_1$ $D_{1.5.6}$ $G_3$ मे सु-; $B_4$ [ ऽ ]सि सु-; T [ ऽ ]पि हि; $G_1$ [ ऽ ]सि हि; $M_2$ मे वि- ( for मेऽसि ). $Dc_1$ दुर्धर्षो. $B_{1.2}$ $D_{2-4}$ विदितोसि दुराधर्ष. — $^{c}$) $K_5$ $B_5$ $D_{2-4}$ S ( except $G_3$ ) [ अ ]पि ( for [ ए ]व ). — $^{d}$) $K_4$ $D_1$ गुरु- ( for कुरु- ).

16 $^{a}$) $K_{2.4}$ $B_{3.4}$ $D_6$ $T_2$ $G_2$ समायुक्तं; $K_5$ $T_1$ M °यत्तं ( for °सक्तं ). — $K_3$ om. ( ? hapl. ) 16$^{bc}$. — $^{b}$) $G_3$ एको वै ( for एवैको ). $K_4$ $D_1$ $M_{1.2}$ जनेश्वर; $B_{3.4}$ $Dc_1$ नरेश्वरः ( $Dc_1$ °र ); T G जनार्दनः ( $T_2$ $G_{1.3}$ °न ). — $^{c}$) $Dc_1$ यस्य; $T_1$ तं च ( for यच्च ).

17 $^{a}$) $K_3$ सर्वमेतद् ( by transp. ). — $^{b}$) $T_1$ $G_{2.3}$ M करिष्यामि ( $M_2$ °मो ); $T_2$ चरिष्यामि ( for आचरिष्ये ). — $^{c}$) $D_{5.6}$ तदेव ( for इदं च ). $K_1$ अत्यक्तं; $K_3$ अव्यक्तं; $Dn_1$ $D_{5.6}$ अत्यंतं ( for अत्यर्थं ). — $^{d}$)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

इदं चाद्भुतमत्यर्थं कृतमस्मत्प्रियेप्सया ॥ १७
यत्पापो निहतः संख्ये कौरव्यो धृतराष्ट्रजः ।
त्वया दग्धं हि तत्सैन्यं मया विजितमाहवे ॥ १८
भवता तत्कृतं कर्म येनावाप्तो जयो मया ।
दुर्योधनस्य संग्रामे तव बुद्धिपराक्रमैः ॥ १९
कर्णस्य च वधोपायो यथावत्संप्रदर्शितः ।
सैन्धवस्य च पापस्य भूरिश्रवस एव च ॥ २०
अहं च प्रीयमाणेन त्वया देवकिनन्दन ।
यदुक्तस्तत्करिष्यामि न हि मेऽत्र विचारणा ॥ २१
राजानं च समासाद्य धर्मात्मानं युधिष्ठिरम् ।
चोदयिष्यामि धर्मज्ञ गमनार्थं तवानघ ॥ २२
रुचितं हि ममैतत्ते द्वारकागमनं प्रभो ।
अचिराच्चैव दृष्टा त्वं मातुलं मधुसूदन ।
बलदेवं च दुर्धर्षं तथान्यान्वृष्णिपुंगवान् ॥ २३
एवं संभाषमाणौ तौ प्राप्तौ वारणसाह्वयम् ।
तथा विविशतुश्चोभौ संप्रहृष्टनराकुलम् ॥ २४
तौ गत्वा धृतराष्ट्रस्य गृहं शक्रगृहोपमम् ।
ददृशाते महाराज धृतराष्ट्रं जनेश्वरम् ॥ २५
विदुरं च महाबुद्धिं राजानं च युधिष्ठिरम् ।
भीमसेनं च दुर्धर्षं माद्रीपुत्रौ च पाण्डवौ ।

C. 14. 1504
B. 14. 52. 27
K. 14. 52. 26

---

Ś1 K1. 3. 4 B1. 2 D1. 3 G2 प्रियेच्छया ( for °प्सया ). K5 कृतवान्मद्धितेच्छया.

18 K2 corrupt. —$^{a}$) Dc1 स ( for यत् ). D5. 6 निर्हतः ( for निहतः ). M1–3 संखे. T G1. 2 यत्त्व( G2 मे त्व )या निहताः ( T1 °तः ) संख्ये ; G3 यत्पापा निहताः सर्वे. —$^{b}$) K2 B4 D2–4 M1. 2 कौरवो ; B2 कैतवो ; T2 G2 कौरवा. T1 G1. 3 कौरव्या धृतराष्ट्रजाः. —$^{c}$) M2 एतत् ( for हि तत् ). —$^{d}$) K4 D1 त्वया ( for मया ). K2 च जयम् ; G3 विज्ञातम् ( for विजि° ).

19 $^{a}$) K1 भवतस्. B2 D2–4 सर्वं ( for कर्म ). —$^{b}$) K5 येन चाप्तो ; T यथा वाप्तो. —$^{d}$) K2 न च बुद्धिपराक्रमे.

20 $^{a}$) D6 कर्ता तस्य ( for कर्णस्य च ). K5 हि ( for च ). K3 वधोपाये ; K4 वधापायो. —$^{d}$) K3 सः ( for च ). — After 20, T G M3 ins. :

96* तस्मात्त्वमेव संचिन्त्य हितं कुरु यथा तथा ।

[ G1 तस्य ( for तस्मात् ). G3 संचोद्य ( for संचिन्त्य ). G3 यथातथं ; M3 पुरो यथा ( for यथा तथा ). ]

21 $^{a}$) Ś1 K1 अयं ( for अहं ). K2 Dn1 D3 प्रियमाणेन ; T G प्रीयमाणोस्मि ( T1 G1 °णोस्य ). —$^{b}$) D5 -नंदक ( for -नन्दन ). —$^{c}$) K5 B ( except B2 ) Dc1 S ( except T1 ) यदुक्तं. —$^{d}$) K4 G3 [ऽ]स्ति ( for ऽत्र ).

22 $^{a}$) K3 ज्ञानं ( submetric ) ( for राजानं ). D3 राजानं वशमासाद्य. —$^{c}$) K4 D1. 5 नोदयिष्यामि धर्मज्ञं ( D5 °ज्ञ ). —$^{d}$) B4 गमनाय. T2 तदा ( for तव ).

23 D2 om. 23. —$^{a}$) K5 रुचिरं ; D4 G3 उचितं ; G1 आदृतं ( for रुचितं ). K2. 4 D1 S [अ]प्येतद् ( for [ए]तत्ते ). —$^{b}$) Ś1 द्वारिकागमनं ; D6 द्वारकानंतरं. K2. 4 B3. 4 ( marg. as in text ) D1 T G प्रति ; K5 B1. 2 विभो ( for प्रभो ). —$^{c}$) T2 G2 न चिराच् ; G1 न विना ( for अचिराच् ). B ( except B5 ) Dc1 Dn1 D5. 6 एव ( for चैव ). T G1. 2 M [अ]सि ( for त्वं ). G3 द्रष्टासि न चिराच्चैव. —$^{d}$) B Dc1 Dn1 D3–6 मातुलं मे जनार्दन. —$^{e}$) Ś1 दुराधर्षं ( for च दुर्धर्षं ). —$^{f}$) K1. 3 अथ ( for तथा ). — After 23, Ś1 K1. 3 ins. an addl. colophon [ *Adhy. name :* Ś1 K1. 3 अर्जुनवाक्यं. — *Adhy. no. :* Ś1 59 ].

24 Before 24, Ś1 K1. 3 M1. 2 ins. वैशंपायन उवाच. —$^{a}$) K3 D5. 6 संभाष्यमाणौ. D5. 6 तु ( for तौ ). K4 D1 एवं संभाषमाणे तु. —$^{b}$) D4 -साह्वये. —$^{c}$) K4 D1 चैव ; D2–4 तौ तु ( for चोभौ ). K1 तथा विविशतश्चैव ; K3 ततो विविशतश्चोभौ. —$^{d}$) Ś1 ( by corr. ) K2–5 D1 T G2. 3 -जनाकुलं. Ś1 G1 संप्रहृष्टमनाकुलं.

25 $^{a}$) K4 D1 भोगान्दृष्ट्वा हि राष्ट्रस्य. —$^{b}$) K2 चंद्र- ( for शक्र- ). D3 T1 -ग्रहोपमं. K4 D1 ग्रहं प्राप्य ग्रहोपमं. —$^{c}$) G3 दृष्टवंतौ. Ś1 K4 B3–5 Dc1 D1–4 G2 महाराजं ; B1. 2 M3 °त्मानं ( for °राज ). —$^{d}$) B3 नरेश्वरं ; S ( except G3 ) जनाधिपं ( for जनेश्वरम् ).

26 $^{a}$) K1. 2 D3. 6 महाबुद्धी ; K4 °बाहुं ; B4 °त्मानं ; D4 म**हुं. —$^{e}$) K5 समासीनं ; D1 उपासंतं ; D4 च राजानं ( for उपासीनं ). —$^{f}$) K4 Dn1 D4 युयुत्सं. S ( except G2 ) [अ]पि भारत ( G1 °तं ) ( for [अ]पराजितम् ).

C. 14. 1504
B. 14. 52. 27
K. 14. 52. 27

धृतराष्ट्रमुपासीनं युयुत्सुं चापराजितम् ॥ २६
गान्धारीं च महाप्राज्ञां पृथां कृष्णां च भामिनीम् ।
सुभद्राद्याश्च ताः सर्वा भरतानां स्त्रियस्तथा ।
ददृशाते स्थिताः सर्वा गान्धारीं परिवार्य वै ॥ २७
ततः समेत्य राजानं धृतराष्ट्रमरिंदमौ ।
निवेद्य नामधेये स्वे तस्य पादावगृह्णताम् ॥ २८
गान्धार्याश्च पृथायाश्च धर्मराज्ञस्तथैव च ।
भीमस्य च महात्मानौ तथा पादावगृह्णताम् ॥ २९
क्षत्तारं चापि संपूज्य पृष्ट्वा कुशलमव्ययम् ।
तैः सार्धं नृपतिं वृद्धं ततस्तं पर्युपासताम् ॥ ३०
ततो निशि महाराज धृतराष्ट्रः कुरूद्वहान् ।
जनार्दनं च मेधावी व्यसर्जयत वै गृहान् ॥ ३१
तेऽनुज्ञाता नृपतिना ययुः स्वं स्वं निवेशनम् ।
धनंजयगृहानेव ययौ कृष्णस्तु वीर्यवान् ॥ ३२
तत्रार्चितो यथान्यायं सर्वकामैरुपस्थितः ।
कृष्णः सुष्वाप मेधावी धनंजयसहायवान् ॥ ३३
प्रभातायां तु शर्वर्यां कृतपूर्वाह्णिकक्रियौ ।
धर्मराजस्य भवनं जग्मतुः परमार्चितौ ।

---

27 Dc1 om. (hapl.) $27^{abcde}$. — $^{a}$) K1 B D2.3 महाप्रज्ञां. — $^{b}$) D5 (marg. *sec. m.* as in text). 6 तथा (for पृथां). B5 D2.3 भाविनीं. — $^{c}$) T G सुभद्राम- (G3 °द्रां चा)पि ताः सर्वा. — K3 om. (hapl.) $27^{de}$. — $^{d}$) K2.4 D1 T G2 M3.4 भारतानां. K2 तदा (for तथा). G3 भारतानां तथा स्त्रियः. — $^{e}$) T G दृष्टवंतौ (for ददृशाते). B1.2 D2-4 च ताः; B3-5 Dn1 T1 स्त्रियः (for स्थिताः). — $^{f}$) K5 T1 G1.2 गांधारी (sic). T1 G तौ (for वै). K2 गांधारीं चापराजितां; K4 °री परिचर्यंता (sic); B Dc1 Dn1 D2-6 T2 °रीपरिचारि(D5 °र)काः; D1 °रीं परिचर्यंतीः.

28 $^{b}$) Ś1 K3 B D2-4 T1 G2.3 अरिंदमं; K1 आरिंदम. — $^{c}$) K3 B Dc1 D2-6 G3 नामधेयं स्वं. — $^{d}$) K2.4 D1 T G1.2 M तस्य पादौ (T2 °दा) ववंदं(K2.4 D1 °द)तुः; G3 वंदेतां चरणौ ततः.

29 K4 D1 om. (hapl.) 29. — $^{b}$) B D (D1 om.) T G1.3 धर्मराजस्य चैव ह (B2 Dn1 D5.6 G3 हि); G2 °राजस्य धीमतः. — $^{d}$) Ś1 K1.5 Dc1 तदा; K3 ततः (for तथा). K2 तथा पादौ ववंदतुः. — For $29^{cd}$, T G M4 (*sec. m.*) subst.:

97* भीमस्य च ववन्दाते तथा पादौ महात्मनः ।

[ T1 महात्मनां. ]

While, M1-3 subst.:

98* महात्मानौ तथा पादौ ववन्दतुररिंदमौ ।

[ M2 कृष्णपार्थौ ववंदतुः (for the post. half). ]

M4 cont. after 97*:

99* महात्मानौ महावीर्यौ तथा पादौ ववन्दतुः ।

30 $^{a}$) K4 यत्तारं (for क्ष°). K2 चाभि-; B1.2 D2-4 अपि (for चापि). K2.4 D1 पूज्याथ; Dn1 D2-6 संगृह्य (for संपूज्य). — $^{b}$) K1 दृष्ट्वा (for पृष्ट्वा). K4 D1 दृ(D1 पृ)ष्ट्वा क्षेममनामयं. — After $30^{b}$, S ins.:

100* परिष्वज्य महात्मानं वैश्यापुत्रं महारथम् ।

[ G1 वेश्यापुत्रं. ]

— $^{d}$) K2 Dn1 D5.6 तौ (for तं). K3 D3 पर्युपासतं (D3 °ता). S उपासीनौ (G3 °साते; M °सीतां) ततस्तु तौ.

31 $^{a}$) K3-5 B1.4.5 D M3.4 महाराजो; M1.2 °बाहो. — $^{b}$) K1 धृतराष्ट्रान्; T2 G3 °राष्ट्रं. K2.4.5 D1 कुरूद्वह (K5 °हः); D2-4 कुरूत्तमान्; T G जनेश्वरं (T1 °रः) (for कुरूद्वहान्). — $^{d}$) K1 विससर्जत (sic); K2 G3 विसर्जयत. Ś1 गृहं; K2.4 D1 प्रभुः; T G1 गृहात्.

32 K5 om. $32^{a}$-$33^{b}$. — $^{a}$) B4 om. ते. — $^{b}$) B3 प्रययुः (for ययुः स्वं). Dc1 Dn1 स्व- (for the second स्वं). — D4 om. $32^{c}$-$33^{b}$. — $^{c}$) K2 -गृहेष्वेव; K4 D1 -गृहं चैव (for -गृहानेव). — $^{d}$) B1.2 [ऽ]पि; D2.3 च; G1 स (for तु).

33 K5 D4 om. $33^{ab}$ (cf. v. l. 32). Ś1 K1.3 om. (hapl.) 33. — $^{a}$) B2 अत्र; D2.3 ततो (for तत्र). D5.6 [उ]षिते; G1 [अ]र्चिते. G3 यथाकामं (for °न्यायं). — $^{b}$) K2.4 B3 S उपस्थितैः. — $^{c}$) Dc1 सुस्वाप. D4 माधवोपि ययुर्गेहं (sic); D6 कृष्णस्तु परमेधावी.

34 $^{a}$) K2 प्रयातायां रजन्यां तु. — $^{b}$) Some MSS. -पूर्वाह्णिक-; D2-4 -पौर्वाह्णि(D4 °ह्नि)क-; M3 -सर्वाह्णिक-. B Dc1 Dn1 D5.6 कृत्वा पौर्वाह्णिकीं क्रि(Dc1 °ह्णिकाक्रि-; D5.6 °ह्णिकीं क्रि)यां; T2 कृतपौर्वाह्णिकी क्रिया (sic). — $^{c}$) D4 भुवनं; D6 सदनं. — $^{d}$) K2 B3.5 Dc1

यत्रास्ते स सहामात्यो धर्मराजो महामनाः ॥ ३४
ततस्तौ तत्प्रविश्याथ ददृशाते महाबलौ ।
धर्मराजानमासीनं देवराजमिवाश्विनौ ॥ ३५
तौ समासाद्य राजानं वार्ष्णेयकुरुपुंगवौ ।
निषीदतुरनुज्ञातौ प्रीयमाणेन तेन वै ॥ ३६
ततः स राजा मेधावी विवक्षू प्रेक्ष्य तावुभौ ।
प्रोवाच वदतां श्रेष्ठो वचनं राजसत्तमः ॥ ३७
विवक्षू हि युवां मन्ये वीरौ यदुकुरूद्वहौ ।
ब्रूत कर्तास्मि सर्वं वां न चिरान्मा विचार्यताम् ॥ ३८
इत्युक्ते फल्गुनस्तत्र धर्मराजानमब्रवीत् ।
विनीतवदुपागम्य वाक्यं वाक्यविशारदः ॥ ३९
अयं चिरोषितो राजन्वासुदेवः प्रतापवान् ।
भवन्तं समनुज्ञाप्य पितरं द्रष्टुमिच्छति ॥ ४०
स गच्छेदभ्यनुज्ञातो भवता यदि मन्यसे ।
आनर्तनगरीं वीरस्तदनुज्ञातुमर्हसि ॥ ४१

युधिष्ठिर उवाच ।

पुण्डरीकाक्ष भद्रं ते गच्छ त्वं मधुसूदन ।
पुरीं द्वारवतीमद्य द्रष्टुं शूरसुतं प्रभुम् ॥ ४२
रोचते मे महाबाहो गमनं तव केशव ।
मातुलश्चिरदृष्टो मे त्वया देवी च देवकी ॥ ४३

C. 14. 1522
B. 14. 52. 45
K. 14. 52. 44

---

$D_{3.4}$ परमार्चितं; $K_3$ केशवार्जुनौ; $B_{1.2}$ कृष्णफाल्गुनौ. — $^{c}$) $K_{2.4}$ $D_1$ यत्र चास्ते; $D_6$ यत्रास्ति स (for °स्ते स). $T_2$ $G_{1.2}$ M तु; $G_3$ च (for स). $K_2$ महाराजो; $K_3$ $D_6$ $T_2$ महामात्यो; $B_4$ हसामात्यो (by metathesis). — $^{d}$) $K_4$ युधिष्ठिरं (sic); $Dn_1$ $D_{5.6}$ महाबलः; $D_1$ युधि*रः (for महामनाः).

35 $^{a}$) $K_2$ प्रविवेश्याथ; $K_4$ $D_1$ संप्रविश्याथ; $T_2$ $G_1$ तत्प्रविश्यांतो. B $Dc_1$ $Dn_1$ $D_{2-5}$ तौ प्रविश्य महात्मानौ; $D_6$ तौ प्रविशतुर्महात्मानौ (hypermetric). — $^{b}$) B D (except $D_1$) तद्गृहं परमार्चितं. — $^{c}$) $K_2$ T G धर्मराजं त($K_2$ $G_3$ स)मासीनं; B D (except $D_1$) °जं ददृश($Dn_1$ °दर्श)तुर्. — $^{d}$) $D_6$ इवाश्विनं.

36 $^{a}$) $M_4$ तं (for तौ). $Ś_1$ (before corr.) राजानौ (for °नं). $Dn_1$ $D_{5.6}$ समासाद्य तु राजानं. — $^{b}$) S (except $G_3$) -नंदनौ (for -पुंगवौ). — $^{c}$) $B_{1.2.4}$ निषेदतुर्. — $^{d}$) $K_4$ $D_1$ प्रीयमाणौ च; $D_6$ °मानेन; T $G_1$ M °माणौ तु (for °माणेन). B D (except $D_1$) तौ (for वै).

37 $^{a}$) $T_1$ $G_1$ राजर्षिर् (for मेधावी). $K_2$ ततो राजा धर्मराजः. — $K_2$ om. 37$^{b}$. — $^{b}$) $T_1$ प्रेक्षण (sic); $T_2$ $G_3$ विवक्षुः; $G_{1.2}$ पक्षेण (for विवक्षू). M लक्ष्य (for प्रेक्ष्य). $Ś_1$ $K_{1.3.5}$ विवक्षू तौ निश($K_5$ °शा)म्य ह; $K_4$ $D_1$ विवक्ष्य ($D_1$ °कक्षे) लक्षितावुभौ. — $^{c}$) $K_2$ प्रोवाच वचनं ततः. — $K_2$ om. 37$^{d}$. — $^{d}$) $K_{1.3}$ $D_{3.5.6}$ -सत्तम; $K_4$ °मं.

38 Before 38, MSS. ins. युधिष्ठिर उवाच. — $^{a}$) $K_2$ $M_2$ विविक्षू ($K_2$ °क्षु); $K_4$ $D_{1.4}$ विवक्षु ($K_4$ °क्ष्या). $K_{2.4}$ $D_1$ पश्ये; S वीरौ (for मन्ये). $Ś_1$ $K_{1.3.5}$ युवां विवक्षू पश्यामि. — $^{b}$) $D_2$ वीरौ यदि; S यदूद्वह- (for वीरौ यदु-). $D_{4.5}$ -कुलोद्वहौ (for -कुरू°). — $^{c}$) $K_4$ $D_1$ कृतं; $K_5$ T $G_{1.3}$ M ब्रूतां; $B_{1.3.5}$ $D_2$ $G_2$ ब्रूतं; $Dc_1$ ब्रूहि (for ब्रूत). $K_4$ कर्तासि. $K_{2.4}$ $D_4$ $G_2$ $M_2$ सर्वं वा; $G_3$ हि युवां (for सर्वं वां). — $^{d}$) $K_{2.4.5}$ $Dc_1$ $D_{1-4}$ अचिरान्मा; $T_1$ न चिरान्नो; $G_3$ सम्यगत्र.

39 $^{a}$) $K_5$ B D (except $D_1$) इत्युक्तः ($D_6$ °क्त्वा). Some MSS. फाल्गुनस्; $K_4$ फाल्गुने. — $^{b}$) $T_2$ धर्मराजं समब्रवीत्. — For 39$^{ab}$, $G_3$ subst.:

101* इत्युक्ते धर्मराजेन फल्गुनः प्रत्यभाषत ।

— $K_2$ om. 39$^{cd}$.

40 $^{a}$) $K_1$ $D_{1.4}$ विशेषितो; $D_3$ विरो°; $D_6$ निर्नो° (for चिरो°). — $^{b}$) $K_{1.2.4}$ $Dc_1$ वासुदेव-. — $^{c}$) $K_2$ समनुज्ञाय; $B_5$ $Dc_1$ °प्राप्य.

41 $^{a}$) $Ś_1$ $K_{1.3}$ गच्छेत; $G_3$ गच्छति (for गच्छेद्). $K_4$ रसगंधभ्यनुज्ञातो (sic). — $^{c}$) $K_1$ अनंत-; $D_6$ अनर्त-. $K_{2.3}$ $Dc_1$ $D_{2-4}$ -नगरं. $D_4$ $G_{2.3}$ $M_4$ वीर. — $^{d}$) $K_3$ corrupt.

42 $^{a}$) $Dc_1$ पुंडरीकाख्य. — $^{b}$) $K_3$ गजसाह्वयात्; $D_3$ $M_3$ मधूसूदनं ($M_3$ °नः). — $^{c}$) $G_3$ स्वद्य (for अद्य). — $^{d}$) $Dc_1$ corrupt. $K_2$ om.; $K_4$ $D_1$ सुर-; $M_{1.2}$ शूरं (for शूर-). $K_2$ प्रभुः; $K_5$ $B_{1.2}$ $D_{2-4}$ $G_2$ विभो; $B_{3-5}$ $Dn_1$ $D_{5.6}$ T प्रभो; $G_3$ विभुं (for प्रभुम्).

43 $^{a}$) $K_1$ ते; $D_3$ न (for मे). — $K_2$ om. (hapl.) 43$^{c}$–44$^{b}$. — $^{c}$) $Dc_1$ मातुश्च (for मातुलश्). $K_{1.3.4}$ $D_1$ T $G_{1.2}$ $M_{1.3.4}$ हि; $Dc_1$ om.; $G_3$ ते

C. 14. 1523
B. 14 52. 46
K. 14. 52. 45

मातुलं वसुदेवं त्वं बलदेवं च माधव ।
पूजयेथा महाप्राज्ञ मद्वाक्येन यथार्हतः ॥ ४४
स्मरेथाश्चापि मां नित्यं भीमं च बलिनां वरम् ।
फल्गुनं नकुलं चैव सहदेवं च माधव ॥ ४५
आनर्तानवलोक्य त्वं पितरं च महाभुज ।
वृष्णींश्च पुनरागच्छेर्हयमेधे ममानघ ॥ ४६
स गच्छ रत्नान्यादाय विविधानि वसूनि च ।
यच्चाप्यन्यन्मनोज्ञं ते तदप्यादत्स्व सात्वत ॥ ४७
इयं हि वसुधा सर्वा प्रसादात्तव माधव ।
अस्मानुपगता वीर निहताश्चापि शत्रवः ॥ ४८
एवं ब्रुवति कौरव्ये धर्मराजे युधिष्ठिरे ।
वासुदेवो वरः पुंसामिदं वचनमब्रवीत् ॥ ४९
तवैव रत्नानि धनं च केवलम्
धरा च कृत्स्ना तु महाभुजाद्य वै ।
यदस्ति चान्यद्द्रविणं गृहेषु मे
त्वमेव तस्येश्वर नित्यमीश्वरः ॥ ५०
तथेत्यथोक्तः प्रतिपूजितस्तदा
गदाग्रजो धर्मसुतेन वीर्यवान् ।
पितृष्वसामभ्यवदद्यथाविधि
संपूजितश्चाप्यगमत्प्रदक्षिणम् ॥ ५१

---

(for मे). — $^d$) D$_4$ तथा (for त्वया).

44 K$_2$ om. 44$^{ab}$ (cf. v. l. 43). — $^a$) G$_{1.3}$ वासुदेवं. K$_4$ D$_1$ T G$_{1.2}$ M च (for त्वं). K$_5$ B D$_{c1}$ D$_{n1}$ D$_{2-6}$ समेत्य (B D$_{c1}$ D$_3$ स मे त्वं) मातुलं गत्वा. — $^b$) B$_4$ D$_{n1}$ D$_{5.6}$ मानद (for माधव). K$_4$ D$_1$ तत्र गत्वा तु माधव. — $^c$) K$_1$ D$_2$ महाप्रज्ञ; K$_2$ °बाहो; D$_{5.6}$ °राज.

45 K$_3$ om. 45. — $^a$) K$_2$ मा; D$_6$ om.; T$_1$ मे (for मां). B$_5$ transp. मां and नित्यं. K$_5$ B$_{1.2}$ D$_{2-4}$ स्मरेश्चापि च मां नित्यं. — $^b$) K$_2$ वर. — $^{cd}$) Some MSS. फाल्गुनं; Ś$_1$ K$_1$ फल्गुणं. D$_{n1}$ D$_{5.6}$ फाल्गुनं सहदेवं च नकुलं चैव मानद.

46 $^a$) K$_1$ अनंतान् (for आनर्तान्). K$_4$ D$_1$ अवलोकं (for °लोक्य). — $^b$) K$_2$ B$_4$ G$_3$ महाभुजं; K$_4$ D$_1$ °बलं. — $^c$) D$_4$ वृष्णिं. K$_{2.5}$ D$_6$ S आगच्छ (for °च्छेर्). K$_3$ तूर्णं पुनरथागच्छेर्. — $^d$) T G$_{1.2}$ M हयमेधं. K$_2$ यथार्थं मधुसूदन; D$_4$ हयमेधेन मानद.

47 $^a$) T$_2$ G$_{1.2}$ निर्गच्छ; G$_3$ संगम्य (for स गच्छ). — $^b$) D$_3$ वसूनि विविधानि च. — $^c$) G$_3$ यद्वा हि (for यच्चापि). S (except G$_3$) अभिप्रेतं (for मनोज्ञं ते). K$_4$ D$_1$ वै (for ते). — $^d$) K$_{1-4}$ D$_1$ T$_2$ G$_2$ M चापि (for अपि). T G$_2$ [आ]धत्स्व. Ś$_1$ K सर्वतः (for सात्वत). G$_3$ तच्चाप्याधत्स्व माधव.

48 $^a$) D$_3$ सेयं (for इयं). B (except B$_3$) D (except D$_1$) च (for हि). B D$_{c1}$ D$_{n1}$ D$_{2.5.6}$ कृत्स्ना; D$_3$ कृष्ण (for सर्वा). G$_3$ इयं च सर्ववसुधा. — $^b$) B D (except D$_1$) केशव (for माधव). — $^c$) K$_2$ अनुगता; K$_3$ T G M$_{1.2}$ उपा° (for उप°). K$_4$ D$_1$ अस्मांश्चानुगता वीर. — After 49, T G ins.:

102* स्वर्गापवर्गविषयं त्वद्भक्तानां न दुर्लभम् ।
संसारगहने त्वद्य पापाग्निं प्रशमाम्बुद ।

[(L. 2) T$_2$ चेद्ध; G$_3$ वेद्य (for त्वद्य). G$_1$ प्रशमांबुध.]

49 $^a$) K$_2$ व्रजंति (sic); M$_4$ वदति (for ब्रुवति). K$_5$ B$_{3.5}$ D$_{2-4}$ कौंतेये; D$_{5.6}$ कौरव्य. — $^c$) T G$_1$ परः (for वरः).

50 Before 50, B$_{2.3}$ D$_{c1}$ ins. वासुदेव उवाच. — $^a$) K$_2$ तत्र; D$_2$ तथा (for तव). K$_5$ रत्नं च (for रत्नानि). K$_4$ D$_1$ तथैव रत्नं च धरा च केवला. — $^b$) K$_4$ D$_1$ धनं (for धरा). D$_6$ om. from च up to वै. B$_3$ D$_{n1}$ D$_{2-4}$ T G$_1$ तु (for च). K$_{1.3}$ B$_2$ कृत्स्नास्; K$_4$ D$_1$ कृत्स्नं. K$_{2.4.5}$ D$_{1-4}$ सु-; G$_3$ M$_{1.2}$ च (for तु). B$_{1.2}$ om. वै. — $^c$) D$_3$ G$_3$ यदि (for यद्). K$_4$ D$_1$ गृहे मे; D$_{n1}$ गृहे मम (for गृहेषु मे). K$_5$ D$_3$ om.; G$_3$ वै (for मे). — $^d$) K$_2$ corrupt. M$_2$ कस्य (sic) (for तस्य). Ś$_1$ K$_{1.3}$ इत्यपि (for नित्यम्). K$_4$ D$_1$ तस्येश्वरस्त्वं नियतं तथैव.

51 $^a$) K$_2$ [इ]व (for [इ]ति). Ś$_1$ K D$_{1-4}$ च (for [अ]थ). G$_3$ [उ]क्तं परि- (for [उ]क्तः प्रति-). M$_{1.2.4}$ तथा (for तदा). — $^b$) T G$_1$ गदाग्रजेनैव तु तेन वीर्यवान्. — $^c$) Ś$_1$ (*sup. lin.*) T$_1$ पितृष्वसारम्. K$_3$ D$_{c1}$ D$_4$ यथा विधिः. K$_5$ D$_{n1}$ D$_{5.7}$ T$_2$ पितृष्वसारं त्ववद(K$_5$ °मपत)द्यथाविधि; B$_{1.2}$ °रं प्रतिनंद्य शाश्वतः; G$_3$ M$_{1.2}$ °रं त्वभिवाद्य सात्वतीं. — $^d$) Ś$_1$ K$_{1.3}$ B$_{1.2}$ प्र-; T$_2$ G$_2$ M सु- (for सं-). K$_{2.4}$ D$_1$ G$_3$ -पूजयंश्च (for -पूजितश्च). Ś$_1$ K$_{1.3.5}$ B$_{3.4}$ [अ]करोत् (for [अ]गमत्).

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तया स सम्यक्प्रतिनन्दितस्तदा
तथैव सर्वैर्विदुरादिभिस्ततः ।
विनिर्ययौ नागपुराद्गदाग्रजो
रथेन दिव्येन चतुर्युजा हरिः ॥ ५२
रथं सुभद्रामधिरोप्य भामिनीं
युधिष्ठिरस्यानुमते जनार्दनः ।
पितृष्वसायाश्च तथा महाभुजो
विनिर्ययौ पौरजनाभिसंवृतः ॥ ५३
तमन्वगाद्वानरवर्यकेतनः
ससात्यकिर्माद्रवतीसुतावपि ।
अगाधबुद्धिर्विदुरश्च माधवं
स्वयं च भीमो गजराजविक्रमः ॥ ५४
निवर्तयित्वा कुरुराष्ट्रवर्धनां-
स्ततः स सर्वान्विदुरं च वीर्यवान् ।
जनार्दनो दारुकमाह सत्वरः
प्रचोदयाश्वानिति सात्यकिस्तदा ॥ ५५
ततो ययौ शत्रुगणप्रमर्दनः
शिनिप्रवीरानुगतो जनार्दनः ।
यथा निहत्यारिगणाञ्शतक्रतु-
र्दिवं तथानर्तपुरीं प्रतापवान् ॥ ५६

C. 14. 1535
B. 14. 52. 58
K. 14. 52. 56

इति श्रीमहाभारते आश्वमेधिकपर्वणि एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

---

52 $^a$) K$_2$ तथा (for तया). Ś$_1$ K$_{1.3.5}$ च; Dc$_1$ D$_3$ om.; T G$_1$ [अ]पि (for स). S (except M$_4$) -पूजितस् (for -नन्दितस्). K$_4$ T$_1$ M$_3$ तथा; B Dn$_1$ D$_{2-4}$ ततस्; Dc$_1$ om. (for तदा). — $^b$) K$_1$ सुतः (sic); K$_4$ D$_1$ तु सः; B$_{1.3-5}$ D$_{2.3}$ तदा; B$_2$ Dc$_1$ Dn$_1$ D$_{4.5}$ G$_3$ तथा; D$_6$ च (for ततः). — $^d$) Ś$_1$ K$_1$ चतुर्भुजा; K$_2$ °र्युजो; B$_2$ (marg. as in text).$_3$ Dn$_1$ D$_{5.6}$ G$_{1.2}$ °र्भुजः. Ś$_1$ K$_1$ तदा; K$_3$ तथा; K$_5$ B Dc$_1$ D$_{2-4}$ प्रभुः; Dn$_1$ D$_{5.6}$ स्वयं (for हरिः).

53 $^a$) K$_{2.5}$ B$_{1.2.5}$ Dn$_1$ D$_{2-6}$ रथे. K$_{3.4}$ D$_1$ अभि- (for अधि-). K$_5$ B (except B$_2$) Dc$_1$ Dn$_1$ D$_{2-4}$ भाविनीं (D$_3$ °नि); M$_3$ माधवीं. — $^b$) K$_3$ गदाग्रजः; B$_{1.2}$ महात्मनः. — $^c$) K$_5$ B D (except D$_1$) पितृष्वसुश्चापि (for °ष्वसायाश्च). K$_{2.4}$ D$_1$ तदा (for तथा). K$_3$ महाभुजस्तथा (by transp.); G$_3$ जनार्दनस्तदा. Ś$_1$ K$_1$ पितृस्व(K$_1$ °श्व)सायाश्च महाभुजस्तदा. — $^d$) Dn$_1$ D$_{5.6}$ राज- (for पौर-). K$_3$ G$_2$ -वंदितः; G$_3$ -सत्कृतः (for -संवृतः).

54 $^a$) K$_1$ अन्वयुर् (sic); K$_4$ Dn$_1$ D$_{1.5.6}$ G$_3$ M$_{1.2}$ °याद्; Dc$_1$ °शाद् (sic) (for °गाद्). K$_3$ तमन्वगच्छत्कपिवर्यकेतनः. — $^b$) K$_1$ D$_1$ ससात्यकिमा(D$_1$ °म)द्रिवती-; K$_4$ °कीमाद्रवती-. Ś$_1$ उभौ (for अपि). — $^c$) K$_1$ D$_3$ -बुद्धि- (for -बुद्धिर्). — K$_1$ repeats 54$^d$ after 55$^c$. — $^d$) K$_1$ (second time) नग- (for गज-). K$_3$ -विद्रुताः (sic) (for -विक्रमः).

55 $^a$) K$_1$ तान्वर्तयित्वा; G$_3$ निवर्त्य चैनान् (for निवर्तयित्वा). K$_{2.3.5}$ D$_1$ T G$_1$ M$_2$ -राष्ट्रवर्धनं; K$_4$ -शब्दवर्धनं; D$_5$ -राजवर्धनांस्. — $^b$) D$_3$ G$_3$ च; M$_2$ om. (for स). D$_{5.6}$ सम्यग् (for सर्वान्). — D$_3$ om. (? hapl.) 55$^c$–56$^b$. — $^c$) K$_3$ दाहकामाह (sic); G$_1$ दारुक एव (sic) (for °कमाह). Ś$_1$ K B$_4$ Dc$_1$ D$_{1.5.6}$ M$_1$ सत्वरं. — After 55$^c$, K$_1$ repeats 54$^d$. K$_1$ om. 55$^d$–56$^d$. — $^d$) Dc$_1$ चचोदय (sic); D$_1$ प्रनो° (for प्रचो°). Ś$_1$ अथ (for इति). B Dn$_1$ D$_{2.4-6}$ G$_{2.3}$ M सात्यकिं; Dc$_1$ °कस्. K$_{2.3.5}$ Dn$_1$ D$_{4-6}$ T$_1$ G$_1$ M तथा (for तदा).

56 K$_1$ om. 56; D$_3$ om. 56$^{ab}$ (for both, cf. v. l. 55). — $^a$) G$_3$ ततो ययौ तत्र गणावमर्दनः. — $^b$) K$_{2.4}$ Dc$_1$ D$_1$ शनि- (for शिनि-). — $^c$) B$_5$ T$_1$ G$_2$ M$_{3.4}$ तथा (for यथा). K$_3$ B$_1$ Dn$_1$ D$_{5.6}$ -गणं; G$_3$ -भटाञ् (for -गणाञ्). — $^d$) T$_1$ G$_{1.2}$ M$_{3.4}$ यथा (for तथा). K$_{2.4}$ Dc$_1$ [आ]नर्तपुरिं (K$_2$ °रं). D$_4$ G$_3$ जनार्दनः (for प्रतापवान्).

Colophon. — *Sub-parvan* : D$_{2.3}$ उत्तंकोपाख्यानं. — *Adhy. name* : K$_{2.4}$ D$_1$ श्रीकृष्णप्रयाणं; G$_3$ श्रीकृष्णप्रतियानं; M$_{1.2}$ वासुदेवनिर्याणं. — *Adhy. no.* (figures, words or both): Ś$_1$ 60; B$_{1.2}$ G$_3$ 51 (as in text); Dn$_1$ M$_4$ (*inf. lin.*) 52; D$_4$ 48; T$_1$ 38; T$_2$ G$_{1.2}$ M 37. — *Śloka no.* : Dn$_1$ 58.

# ५२

C. 14. 1536
B. 14. 53. 1
K. 14. 53. 1

वैशंपायन उवाच ।
तथा प्रयान्तं वार्ष्णेयं द्वारकां भरतर्षभाः ।
परिष्वज्य न्यवर्तन्त सानुयात्राः परंतपाः ॥ १
पुनः पुनश्च वार्ष्णेयं पर्यष्वजत फल्गुनः ।
आ चक्षुर्विषयाच्चैनं ददर्श च पुनः पुनः ॥ २
कृच्छ्रेणैव च तां पार्थो गोविन्दे विनिवेशिताम् ।
संजहार तदा दृष्टिं कृष्णश्चाप्यपराजितः ॥ ३
तस्य प्रयाणे यान्यासन्निमित्तानि महात्मनः ।
बहून्यद्भुतरूपाणि तानि मे गदतः शृणु ॥ ४
वायुर्वेगेन महता रथस्य पुरतो ववौ ।
कुर्वन्निःशर्करं मार्गं विरजस्कमकण्टकम् ॥ ५
ववर्ष वासवश्चापि तोयं शुचि सुगन्धि च ।
दिव्यानि चैव पुष्पाणि पुरतः शार्ङ्गधन्वनः ॥ ६
स प्रयातो महाबाहुः समेषु मरुधन्वसु ।
ददर्शाथ मुनिश्रेष्ठमुत्तङ्कममितौजसम् ॥ ७
स तं संपूज्य तेजस्वी मुनिं पृथुललोचनः ।
पूजितस्तेन च तदा पर्यपृच्छदनामयम् ॥ ८
स पृष्टः कुशलं तेन संपूज्य मधुसूदनम् ।

---

## 52

1 K2 श्रीकृष्ण ( for वैशंपायन ). —$^{a}$) S ( except G3 ) ततः ( for तथा ). D5. 6 M1. 2. 4 प्रयातं. K4 तथा प्रयाते वार्ष्णेये. — K3 om. ( hapl. ) 1$^{b}$–2$^{a}$. —$^{b}$) Ś1 K1. 2. 4. 5 D1. 3 भरतर्षभ. — K2 om. 1$^{cd}$. —$^{c}$) K1 व्य*र्तंत; K4 D5 निवर्तंत; D3. 6 न्यवर्तंते. —$^{d}$) K4 D5 परंतप. K1 D6 महायात्रा परंतप.

2 K3 om. 2$^{a}$ ( cf. v. l. 1 ). —$^{a}$) K2 om.; K5 तु ( for च ). —$^{b}$) K1. 5 Dn1 D2. 4. 6 पर्यस्वजत; K2 B2 T G1. 2 M1–3 परिष्वज्य च ( K2 °ज्यत; B2 M1–3 °जत ). Some MSS. फाल्गुनः; Ś1 K1. 3 फल्गुणः. —$^{c}$) K4 आचख्युर्; Dc1 अचक्षुर्. Ś1 विषयांश् ( for °याच् ). G3 om. च. K3 आ चक्षुर्विषयं चैतां; D6 आचख्युर्विषयांश्चैवं. —$^{d}$) K1. 3. 5 B5 D2–4 M ददर्श स; B3. 4 Dc1 D5. 6 स ददर्श ( for ददर्श च ). K2 om. one पुनः.

3 $^{a}$) D3 दुःखेन ( for कृच्छ्रेण ). Ś1 K1. 3 M1 च ( for [ए]व ). Ś1 K1–3 तदा; B1. 2. 4 Dn1 D5. 6 G3 तु तां; M4 स तां ( for च तां ). G3 प्रोक्तां ( for पार्थो ). —$^{b}$) K3 B2 T1 G3 M1. 2 गोविंद-. K2 विनिवेशिनं; Dc1 °शिता; D6 °शितं. —$^{c}$) D3. 6 स ( for सं- ). B1. 4 Dn1 D5. 6 ततो ( for तदा ). Dn1 D6 वृष्णि ( for दृष्टिं ). —$^{d}$) D2–4 [अ]पराजयः.

4 $^{a}$) G3 तत्र ( for तस्य ). B1 [अ]त्र ( for [आ]सन् ). G1. 2 M तस्य प्रयास्यतो ह्यासन् ( G1 वासं ). — K2 om. ( hapl. ) 4$^{d}$–6$^{c}$. —$^{d}$) K3 मां ( for मे ).

5 K2 om. 5 ( cf. v. l. 4 ). —$^{a}$) K1. 4 वायु- ( for वायुर् ). —$^{b}$) B3 G3 ययौ ( for ववौ ). —$^{d}$) S नीरजस्क( G3 °द्रु )म् ( for विरज° ).

6 K2 om. 6$^{abc}$ ( cf. v. l. 4 ). —$^{a}$) K4. 5 B D G3 [ए]व ( for [अ]पि ). —$^{c}$) K4 मम दिव्यानि पुष्पाणि. —$^{d}$) K2. 5 D6 T -धन्विनः ( for -धन्वनः ).

7 $^{a}$) K4. 5 T G2. 3 सं- ( for स ). K2. 4 D1 महेष्वासः ( for महाबाहुः ). —$^{b}$) Dc1 मरुधन्वना. —$^{c}$) K2. 4. 5 ददर्श च द्विजश्रे( K5 °जं श्रे )ष्ठम्. —$^{d}$) K3 B ( except B2 ) D2 उतंकम्; T2 उदंकम्. K2. 4. 5 D1 उत्तंकमृषिसत्तमं. — T1 G M subst. for 7$^{cd}$: T2 ins. after 7 :

103* आगच्छन्तमपश्यद्वै उदङ्कं नाम नामतः ।
[ G1 अगच्छंतम्. G3 तापसं ( for नामतः ). ]

S cont. :

104* महर्षिं सिद्धतपसं सर्वलोकान्तविश्रुतम् ।
[ G3 M1. 2 -लोकेषु ( for -लोकान्त- ). ]

8 $^{a}$) K2 च तं ( for तं सं- ). B1. 2 D2–4 मेधावी ( for तेजस्वी ). —$^{b}$) K2 मुनिः. K1 पृथुवि-; D3 सुपृथु-; G3 कमल- ( for पृथुल- ). —$^{c}$) K4 B1 D1–4 तु तदा; T1 G2 M च तथा; G1 तपसा ( for च तदा ).

9 $^{a}$) K4 Dc1 संपृष्टः ( Dc1 °ष्ट- ). B4 कुशलस्. —$^{b}$) Ś1 K1–3 मधुसूदनः. —$^{c}$) K3 B उतंको; S उदंको. —$^{d}$) K4 D1 प्रोवाच ( for पप्रच्छ ). K2 M2 माधवः. G3 पप्रच्छ मधुसूदनं.

उत्तङ्को ब्राह्मणश्रेष्ठस्ततः पप्रच्छ माधवम् ॥ ९
कच्चिच्छौरे त्वया गत्वा कुरुपाण्डवसद्म तत् ।
कृतं सौभ्रात्रमचलं तन्मे व्याख्यातुमर्हसि ॥ १०
अभिसंधाय तान्वीरानुपावृत्तोऽसि केशव ।
संबन्धिनः सुदयितान्सततं वृष्णिपुङ्गव ॥ ११
कच्चित्पाण्डुसुताः पञ्च धृतराष्ट्रस्य चात्मजाः ।
लोकेषु विहरिष्यन्ति त्वया सह परंतप ॥ १२
स्वराष्ट्रेषु च राजानः कच्चित्प्राप्स्यन्ति वै सुखम् ।
कौरवेषु प्रशान्तेषु त्वया नाथेन माधव ॥ १३
या मे संभावना तात त्वयि नित्यमवर्तत ।
अपि सा सफला कृष्ण कृता ते भरतान्प्रति ॥ १४

**वासुदेव उवाच ।**

कृतो यत्नो मया ब्रह्मन्सौभ्रात्रे कौरवान्प्रति ।
न चाशक्यन्त संधातुं तेऽधर्मरुचयो मया ॥ १५
ततस्ते निधनं प्राप्ताः सर्वे ससुतबान्धवाः ।
न दिष्टमभ्यतिक्रान्तुं शक्यं बुद्ध्या बलेन वा ।
महर्षे विदितं नूनं सर्वमेतत्तवानघ ॥ १६
तेऽत्यक्रामन्मतिं मह्यं भीष्मस्य विदुरस्य च ।
ततो यमक्षयं जग्मुः समासाद्येतरेतरम् ॥ १७
पञ्च वै पाण्डवाः शिष्टा हतमित्रा हतात्मजाः ।

C. 14. 1553
B. 14. 53. 18
K. 14. 53. 18

---

10 Before 10, M$_{1.2}$ ins. उदङ्कः. — $^{a}$) K$_{1}$ नोनौ ( sic ); K$_{4}$ D$_{1}$ सौरे ( for शौरे ). G$_{3}$ वीर ( for गत्वा ). — $^{b}$) K$_{2.4.5}$ D$_{1}$ -संसदं; D$_{5.6}$ -संगमं; M -संमतं ( for -सद्म तत् ). — $^{c}$) K$_{2.3}$ D$_{4}$ सौभ्रातृम्. B$_{1}$ D$_{2-4}$ T$_{2}$ M$_{4}$ अतुलं; G$_{2.3}$ अमलं ( for. अचलं ). K$_{5}$ कृतं सौभ्रातृवचनं.

11 $^{a}$) K$_{2.4.5}$ B D G$_{1.2}$ अपि ( for अभि- ). — $^{c}$) G$_{3}$ सुसंबंधिः ( sic ). K$_{5}$ T$_{2}$ G$_{2}$ M$_{1-3}$ सुदयिताः; B$_{2}$ Dn$_{1}$ D$_{2-4}$ स्वदयितान् ( for सु° ). — $^{d}$) K$_{3}$ कृष्ण- ( for वृष्णि- ). K$_{2}$ G$_{1}$ -पुंगवः; D$_{4}$ °धान्. K$_{5}$ सततं कृष्ण- ( also कुरु )पुंगवाः.

12 $^{a}$) D$_{6}$ राजन् ( for पञ्च ). — $^{b}$) K$_{1-3}$ Dc$_{1}$ D$_{3-6}$ चात्मजः. — B$_{3}$ om. 12$^{cd}$. — $^{c}$) T G$_{2}$ M विचरिष्यंति; G$_{3}$ विहरिष्यंते. — $^{d}$) K$_{3}$ G$_{2}$ परंतपाः.

13 $^{a}$) K$_{1}$ सु- ( for स्व- ). M$_{3}$ -राज्येषु; Bom. ed. -राष्ट्रे ते ( for -राष्ट्रेषु ). B$_{4}$ स्वराष्ट्रे चैव राजानः; G$_{3}$ स्वेषु देशेषु रा°. — $^{b}$) D$_{5.6}$ आप्स्यंति ( for प्रा° ). K$_{2}$ यः ( sic ); G$_{1}$ नः ( for वै ). — $^{d}$) B$_{4}$ Dn$_{1}$ D$_{5.6}$ केशव ( for माधव ).

14 $^{a}$) T G$_{1.2}$ सा ( for या ). K$_{2.4}$ D$_{1}$ कृष्ण ( for तात ). — $^{b}$) K$_{2}$ मने मे संप्रवर्तते ( sic ). — $^{c}$) M$_{1}$ ते ( for सा ). K$_{2}$ om.; Dn$_{1}$ D$_{5.6}$ तात ( for कृष्ण ). — $^{d}$) K$_{2}$ om. कृता. T$_{2}$ G भारतान्; M$_{1.2}$ सफलान् ( for भरतान् ). — After 14, Ś$_{1}$ K$_{1.3}$ ins. an addl. colophon [ *Adhy. no.:* Ś$_{1}$ 61 ].

15 G$_{1}$ om. ( hapl. ) 15$^{ab}$ with the ref. K$_{2.4.5}$ D$_{1}$ कृष्ण; Dn$_{1}$ D$_{5.6}$ श्रीभगवान् ( for वासुदेव ). — $^{a}$) K$_{3}$ महान् ( for मया ). B Dc$_{1}$ D$_{2-6}$ पूर्वं ( for ब्रह्मन् ). — $^{b}$) K$_{2}$ तत्र मे; K$_{4.5}$ D$_{1}$ प्रशमे; B Dc$_{1}$ D$_{3}$ सौसा( B$_{3}$ °षा )म्ये; Dn$_{1}$ D$_{2.4.6}$ G$_{3}$ M$_{4}$ ( *inf. lin.* ) सौ( D$_{4}$ G$_{3}$ सं )शाम्ये; T$_{1}$ सौकर्ये; T$_{2}$ सौजन्ये; G$_{2}$ सजाने; M$_{3}$ सुमहान्; M$_{4}$ सौषम्ये ( for सौभ्रात्रे ). K$_{3}$ भरतान् ( for कौरवान् ). — $^{c}$) T$_{1}$ G$_{2}$ M$_{1}$ शक्यं तु; T$_{2}$ G$_{3}$ M$_{2}$ [अ]शक्यं तु ( G$_{3}$ च ) ( sic ); M$_{3}$ शक्यास्तु ( for [अ]शक्यन्त ). Ś$_{1}$ K$_{1-3}$ संयंतुं; K$_{2.4}$ D$_{1}$ संस्थातुं ( for संधातुं ). — For 15$^{cd}$, B Dc$_{1}$ Dn$_{1}$ D$_{2-6}$ subst. :

105* नाशक्यन्त यदा साम्ये ते स्थापयितुमञ्जसा ।

[ D$_{2}$ नाशंकत. Dc$_{1}$ सोसे; D$_{6}$ शाम्ये ( for साम्ये ). ]

16 $^{b}$) G$_{1}$ कौरव्याः ( for सर्वे स- ). D$_{5}$ सहित-; D$_{6}$ मुदित- ( for ससुत- ). — $^{c}$) K$_{1}$ व्यति- ( submetric ); K$_{4}$ B$_{4.5}$ Dn$_{1}$ D$_{4}$ G$_{3}$ अप्यति-; B$_{3}$ D$_{2.3.6}$ अत्यति- ( for अभ्यति- ). Dc$_{1}$ D$_{5.6}$ -क्रांतं ( for -क्रान्तुं ). — $^{d}$) D$_{2-4}$ धनेन ( for बलेन ). K$_{4}$ D$_{1}$ च; G$_{3}$ ह ( for वा ). — $^{e}$) B$_{4.5}$ Dc$_{1}$ Dn$_{1}$ D$_{3.6}$ भूयः ( for नूनं ). — $^{f}$) D$_{2-4}$ सत्यम् ( for सर्वम् ). K$_{4}$ तत्र; K$_{5}$ चैतत्; D$_{1}$ तच्च ( for एतत् ). M$_{3}$ त्वया ( for तव ).

17 $^{a}$) D$_{4.6}$ corrupt. K$_{5}$ ये; D$_{5}$ G$_{2}$ न ( for ते ). Dc$_{1}$ ह्यक्रामन्; G$_{2}$ [अ]तिक्रामन्. M$_{1.2}$ मतं ( for मतिं ). G$_{3}$ अत्यक्रामन्वचो मह्यं. — After 17$^{b}$, D$_{1}$ ins.:

106* यथा तु मिलितं सर्वं मह्यं भीष्मस्य संगरम् ।

— $^{c}$) Dc$_{1}$ -क्षये; D$_{4}$ -गृहं ( for -क्षयं ). — $^{d}$) K$_{5}$ परस्परं ( for [इ]तरेतरम् ).

18 $^{a}$) K$_{2.4}$ B D G$_{1.3}$ [ए]व ( for वै ). D$_{6}$ चाद्य

C. 14. 1554
B. 14. 53. 19
K. 14. 53. 18

धार्तराष्ट्राश्च निहताः सर्वे ससुतबान्धवाः ॥ १८
इत्युक्तवचने कृष्णे भृशं क्रोधसमन्वितः ।
उत्तङ्कः प्रत्युवाचैनं रोषादुत्फाल्य लोचने ॥ १९
यस्माच्छक्तेन ते कृष्ण न त्राताः कुरुपाण्डवाः ।
संबन्धिनः प्रियास्तस्माच्छप्स्येऽहं त्वामसंशयम् ॥ २०
न च ते प्रसभं यस्मात्ते निगृह्य निवर्तिताः ।
तस्मान्मन्युपरीतस्त्वां शप्स्यामि मधुसूदन ॥ २१
त्वया हि शक्तेन सता मिथ्याचारेण माधव ।
उपचीर्णाः कुरुश्रेष्ठा यस्त्वेतान्समुपेक्षथाः ॥ २२

वासुदेव उवाच ।

शृणु मे विस्तरेणेदं यद्वक्ष्ये भृगुनन्दन ।
गृहाणानुनयं चापि तपस्वी ह्यसि भार्गव ॥ २३
श्रुत्वा त्वमेतदध्यात्मं मुञ्चेथाः शापमद्य वै ।
न च मां तपसाल्पेन शक्तोऽभिभवितुं पुमान् ॥ २४
न च ते तपसो नाशमिच्छामि जपतां वर ।
तपस्ते सुमहद्दीप्तं गुरवश्चापि तोषिताः ॥ २५

---

(sic) (for शिष्टा). —$^{b}$) $K_4$ $B_{2.3.5}$ $D_{n1}$ $D_{2-6}$ हतामित्रा; $M_3$ हतं मित्राः (sic) (for हतमित्रा). $B_5$ हतौजसः; T $G_1$ हतप्रजाः (for हतात्मजाः). —$^{c}$) Ś$_1$ $K_3$ तु निहताः; $D_1$ च नियताः; S (except $G_3$) हताः सर्वे (for च निहताः). —$^{d}$) $B_3$ -राक्षसाः (for -बान्धवाः). S (except $G_3$) सर्वैश्च सुत(T $G_2$ सह)बांधवैः.

19 $^{a}$) Ś$_1$ $K_{1.3}$ इत्युक्तवति कृष्णे तु; $T_1$ $G_1$ °क्तवचनं कृष्णं. — After 19$^{a}$, $D_{c1}$ reads 20$^{bc}$. —$^{b}$) $K_2$ स च (for भृशं). Ś$_1$ $K_1$ दुःख-; $K_{2.3}$ शोक-; $K_5$ $M_3$ कोप- (for क्रोध-). —$^{c}$) $K_1$ $B_{1.2}$ उतंकः; $K_2$ उत्तकः; T $G_{1.2}$ M उदंकः. $D_{c1}$ $D_{n1}$ $D_{4-6}$ इत्युवाच (for प्रत्यु°). $D_1$ T $G_{1.2}$ $M_{1.2}$ [इ]दं (for [ए]नं). $B_{3-5}$ उतंक इत्युवाचैनं. —$^{d}$) $K_1$ उत्पाल्य; $T_1$ उत्प्लुत्य; $G_{1.2}$ उद्वृत्य; $M_2$ उत्पाठ्य (for उत्फाल्य). $K_{2.4.5}$ B D रोषादुत्फुल्ललोचनः ($B_3$ °ने; $D_3$ °नं); $T_2$ $G_3$ °दुद्वृत्तलोचनः.

20 Before 20, Ś$_1$ K $B_2$ $D_{c1}$ $D_{n1}$ $D_{5.6}$ ins. उत्तंकः; $B_{3-5}$ उतंकः; T $G_{1.2}$ M उदंकः. $D_{c1}$ reads 20$^{bc}$ after 19$^{a}$. —$^{b}$) $K_1$ $D_{c1}$ $D_6$ त्राता. B $D_{c1}$ $D_{n1}$ $D_{2-4}$ -पुंगवाः (for -पाण्डवाः). —$^{c}$) $D_{5.6}$ सर्वे स्थिताः (for संबन्धिनः). —$^{d}$) $K_1$ $D_{c1}$ $D_3$ शप्ये; $K_3$ शपे (for शप्स्ये). $K_{2.4.5}$ $D_1$ $G_3$ शप्स्ये($K_2$ °स्ये)हं त्वां ($K_2$ त्वा) न संशयः; T $G_{1.2}$ M शप्स्ये त्वां ($M_{2-4}$ त्वा) नात्र संशयः.

21 $^{a}$) $G_1$ स (for न). $G_1$ सर्वे; $G_3$ $M_3$ च वै (for च ते). $D_1$ प्रशमं (for प्रसभं). $K_4$ $B_1$ $D_1$ तस्मात्. $T_1$ न सर्वत्र नवं यस्मात्. —$^{b}$) $M_1$ निगृह्य न (for ते निगृह्य). $K_5$ B D (except $D_1$) निवारिताः; $M_2$ न वर्तिताः (for निव°). $K_1$ तन्निगृह्य निवृत्तितः. —$^{c}$) $M_{2-4}$ त्वा (for त्वां).

22 $^{a}$) $D_{2-4}$ यस्मात् (for त्वया). $B_{1.2.4.5}$ D (except $D_1$) transp. हि and शक्तेन. $K_1$ $B_3$ त्वया शक्तेन महता; $G_3$ त्वया शक्तेन न त्राता. —$^{c}$) $D_{2-4}$ ते परीताः; T $G_1$ प्रमादेन; $G_3$ प्रमापिताः; $M_{1.2.4}$ प्रमादिना; $M_3$ प्रमाथिताः (for उपचीर्णाः). $G_2$ प्रमाथिनः कुरुश्रेष्ठो (sic). —$^{d}$) $K_{2.4}$ $D_1$ त्वं तान् (for त्वेतान्). $B_{1.2.4.5}$ $D_{c1}$ $D_{n1}$ $D_{2-6}$ नश्यंतः समु($D_{n1}$ स्म ह्यु-; $D_{5.6}$ स्म उ)पेक्षिताः; $B_3$ $G_3$ स्वायत्ताः ($G_3$ स त्वया) समुपेक्षिताः; T $G_{1.2}$ M यस्मात्सम्यगुपेक्षिताः.

23 $K_{2.4}$ $D_1$ श्री($K_4$ om. श्री)कृष्ण; $G_3$ श्रीभगवान् (for वासुदेव). —$^{b}$) Ś$_1$ $K_{1.3}$ यद्वक्ष्ये द्विजसत्तम. —$^{c}$) $D_6$ corrupt. $K_{1.3}$ [अ]नुशयं; $D_5$ °नये; $M_{1.2}$ °दयं (for °नयं). $G_3$ [ए]व (for [अ]पि). —$^{d}$) $D_1$ तपसि; $G_1$ तपन्वै (for तपस्वी).

24 $^{a}$) $B_4$ $D_5$ च; $D_{c1}$ om.; $D_{2-4}$ T $G_{1.2}$ तु (for त्वम्). $B_4$ $D_{c1}$ $D_{2-5}$ T $G_{1.2}$ मे तद् (for एतद्). $K_{2.4}$ $D_1$ श्रुत्वा ममेदमध्यात्मं; $K_5$ ममेदमध्यात्ममुचे (sic); $D_6$ अश्रुत्वा च मे तदध्यात्म्यं (hypermetric). —$^{b}$) T मुच्येथाः. $D_3$ सायम् (sic) (for शापम्). Ś$_1$ $K_{1-3}$ $B_3$ मे (for वै). —$^{c}$) $B_1$ $G_3$ M मा (for मां). $D_{c1}$ तपसो. $G_3$ तेन (for [अ]ल्पेन). —$^{d}$) $D_{c1}$ शक्यो (for शक्तो). T $G_{1.2}$ M शक्नोति शपितुं पुमान्; $G_3$ शक्तो हि भवितुं भवान्.

25 $^{a}$) $K_1$ $G_3$ मे (for ते). —$^{b}$) $K_{2.4}$ $B_{1.4.5}$ D (except $D_6$) T $G_1$ $M_4$ (*inf. lin.* as in text) तपतां; $B_2$ $G_2$ तपसां (for जपतां): $G_3$ गच्छेयं तपसां वर. —$^{c}$) $D_3$ ते तु; $D_6$ तेपे (for ते सु-). $K_5$ $B_{1.2.4.5}$ $D_{2.3}$ $T_2$ $G_{1.3}$ तप्तं (for दीप्तं). $K_2$ तपस्त्वया महत्तप्तं; $D_1$ तपस्ते तु समुद्दीप्तं. —$^{d}$) Ś$_1$ $K_{1.3}$ [ए]व; $K_5$ $B_{1.2.5}$ $D_{2-4}$ सु- (for [अ]पि).

26 $^{a}$) $M_4$ कौमार-. $K_3$ $D_4$ च (for ते). —$^{c}$) $K_{1.2}$ तपसा.

कौमारं ब्रह्मचर्यं ते जानामि द्विजसत्तम । दुःखार्जितस्य तपसस्तस्मान्नेच्छामि ते व्ययम् ॥ २६

इति श्रीमहाभारते आश्वमेधिकपर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

## ५३

उत्तङ्क उवाच ।
ब्रूहि केशव तत्त्वेन त्वमध्यात्ममनिन्दितम् ।
श्रुत्वा श्रेयोऽभिधास्यामि शापं वा ते जनार्दन ॥ १
वासुदेव उवाच ।
तमो रजश्च सत्त्वं च विद्धि भावान्मदाश्रयान् ।
तथा रुद्रान्वसूंश्चापि विद्धि मत्प्रभवान्द्विज ॥ २
मयि सर्वाणि भूतानि सर्वभूतेषु चाप्यहम् ।
स्थित इत्यभिजानीहि मा तेऽभूदत्र संशयः ॥ ३
तथा दैत्यगणान्सर्वान्यक्षराक्षसपन्नगान् ।
गन्धर्वाप्सरसश्चैव विद्धि मत्प्रभवान्द्विज ॥ ४
सदसच्चैव यत्प्राहुरव्यक्तं व्यक्तमेव च ।
अक्षरं च क्षरं चैव सर्वमेतन्मदात्मकम् ॥ ५
ये चाश्रमेषु वै धर्माश्चतुर्षु विहिता मुने ।
दैवानि चैव कर्माणि विद्धि सर्वं मदात्मकम् ॥ ६ C. 14. 1568 B. 14. 54. 6 K. 14. 54. 8

---

Colophon. — *Sub-parvan :* $K_{2.4.5}$ B D उत्तंकोपाख्यानं. — *Adhy. name :* $K_3$ उतंकविश्वरूपदर्शनं. — *Adhy. no.* (figures, words or both): $Ś_1$ 62; $B_{1.2.5}$ $G_3$ 52 (as in text); $Dn_1$ $M_4$ (*inf. lin.*) 53; $T_1$ 39; $T_2$ $G_{1.2}$ M 38. — *Śloka no.:* $Dn_1$ 26.

### 53

1 B उतंक; S उदंक (for उत्तङ्क). —$^{b}$) $G_2$ मम (for त्वम्). $Ś_1$ K (except $K_2$) $B_5$ $D_{1-4}$ अनिंदित (for °तम्). $G_3$ तन्मेध्यात्ममरिंदम. —$^{c}$) $B_5$ S (except $T_2$) वि- (for ऽभि-). —$^{d}$) $G_3$ न शापं (for शापं वा). $K_2$ चांते; $Dc_1$ वाथ; $D_{5.6}$ ते वा (by transp.); $T_1$ $G_{1.2}$ M वापि.

2 $K_{2.4.5}$ $D_1$ $G_2$ श्री($K_4$ $D_1$ om. श्री)कृष्ण; $G_3$ श्रीभगवान् (for वासुदेव). —$^{b}$) $K_2$ तद्वि- (for विद्धि). $K_5$ मदात्मकान् (for °श्रयान्). $D_6$ द्विभावादात्मदाश्रयात् (sic). — After $2^{b}$, T G $M_3$ ins.:

107* स्थितिसृष्टिलयाध्यक्षो विष्णुब्रह्मेशसंज्ञितः ।
कदाचित्तमसा रुद्रो विष्णुः सत्त्वगुणे स्थितः ।
रजस्यपि तथा ब्रह्मा गुणादन्यगुणानुगौ ।
प्रणवात्मा च शब्दादींस्त्रिगुणात्मा चराचरम् ।

[(L. 1) $G_2$ सृष्टिस्थिति-. $G_3$ ब्रह्मविष्ण्वीशसंशितः (for the post. half). — (L. 2) $M_3$ रौद्रा. $T_2$ $G_3$ कदाचित्तमसो रौद्रो (for the prior half). $G_3$ सर्व- (for सत्त्व-). — (L. 3) $G_3$ $M_3$ [अ]न्यः स्याद् (for ब्रह्मा). $T_1$ $G_1$ स्वान्गुणान($G_1$ °न्य)गुणानुभौ; $G_2$ स्याद्गुणादगुणानुगौ (for the post. half). — (L. 4) $G_3$ शब्दात्मा (for शब्दादींस्त्). ]

— $K_2$ om. $2^{cd}$. —$^{c}$) $B_1$ $Dn_1$ $D_{5.6}$ $T_2$ $G_3$ वापि; $B_{2.5}$ $D_{2.4}$ काले (for चापि).

3 $^{a}$) $Ś_1$ मत्तः; $K_2$ मया (for मयि). —$^{d}$) $D_6$ $G_3$ तत्र (for अत्र).

4 $D_4$ om. $4^{a}$–$5^{b}$. —$^{a}$) $D_3$ $T_1$ $G_1$ -गुणान् (for -ग°). —$^{b}$) $K_1$ -रक्षांसि (for -राक्षस-). —$^{c}$) S विबुधाप्सरसश्चैव. — For $4^{bc}$, B D (except $D_1$; $D_4$ om.) subst.:

108* यक्षगन्धर्वराक्षसान् ।
नागानप्सरसश्चैव.

—$^{d}$) $K_2$ ये चान्ये द्विजसत्तम.

5 $D_4$ om. $5^{ab}$ (cf. v. l. 4). —$^{c}$) $K_1$ चापरं; $K_2$ विक्षरं; $D_3$ $M_2$ चाक्षरं (for च क्षरं). —$^{d}$) $T_1$ सत्यम् (for सर्वम्). $G_3$ मदाश्रयं (for °त्मकम्). $K_3$ सर्वं मत्प्रभवं द्विज; $K_{4.5}$ $B_{1.2}$ $D_{1.3}$ सर्वं स्थावरजंगमं.

6 $K_{2.4}$ $D_1$ om. (hapl.) 6. —$^{a}$) $T_1$ यथा (for ये च). $B_{3.4}$ $Dc_1$ आश्रमेषु च ये धर्माश्च. —$^{b}$) $Dc_1$

C. 14. 1569
B. 14. 54. 7
K. 14. 54. 9

असच्च सदसच्चैव यद्विश्वं सदसतः परम् ।
ततः परं नास्ति चैव देवदेवात्सनातनात् ॥ ७
ओंकारप्रभवान्वेदान्विद्धि मां त्वं भृगूद्वह ।
यूपं सोमं तथैवेह त्रिदशाप्यायनं मखे ॥ ८
होतारमपि हव्यं च विद्धि मां भृगुनन्दन ।
अध्वर्युः कल्पकश्चापि हविः परमसंस्कृतम् ॥ ९
उद्गाता चापि मां स्तौति गीतघोषैर्महाध्वरे ।
प्रायश्चित्तेषु मां ब्रह्मञ्शान्तिमङ्गलवाचकाः ।
स्तुवन्ति विश्वकर्माणं सततं द्विजसत्तमाः ॥ १०
विद्धि मह्यं सुतं धर्ममग्रजं द्विजसत्तम ।
मानसं दयितं विप्र सर्वभूतदयात्मकम् ॥ ११
तत्राहं वर्तमानैश्च निवृत्तैश्चैव मानवैः ।
बह्वीः संसरमाणो वै योनीर्हि द्विजसत्तम ॥ १२
धर्मसंरक्षणार्थाय धर्मसंस्थापनाय च ।
तैस्तैर्वेषैश्च रूपैश्च त्रिषु लोकेषु भार्गव ॥ १३
अहं विष्णुरहं ब्रह्मा शक्रोऽथ प्रभवाप्ययः ।

---

चतस्रो; Dn1 D5. 6 चतुर्धा; G3 त्रिषु वै (for चतुर्षु). B D2–6 विदिता (for विहिता). — D4 om. $6^{c}$–$7^{b}$. —$^{c}$) K1 सर्वाणि (for कर्माणि). B Dc1 Dn1 D2. 3. 5. 6 वैदिकानि च सर्वा(D6 धर्मा)णि; S (except G3) दैवतानि च कर्माणि. —$^{d}$) K5 सर्वं विद्धि (by transp.). K3 सदात्मकं; B1. 2 मदाश्रयं; G3 गुणात्मकं (for मदा°). T G1. 2 M विद्धि सर्वान्गुणान्मम.

7 D4 om. $7^{ab}$ (cf. v l. 6). —$^{a}$) K2 om. असच्च. K1. 4 D1 T G1. 2 M असच्च सच्चैव च (G1 हि) यद्; G3 क्षसच्चैव तु सच्चैव. —$^{b}$) Hypermetric. K5 B Dc1 Dn1 D2. 3. 5. 6 T सदसत्; G3 सर्वतः (for सदसतः). K2 परंतपः (sic) (for परम्). —$^{c}$) K4 D1 मत्तः; G3 M4 क्षतः (for ततः). K3. 5 B Dc1 Dn1 D2–6 ततः (K3 B2 Dn1 D4–6 मत्तः) परतरं नास्ति. —$^{d}$) D2–4 परं देवात्; T1 चैवं वेदात्; T2 G1. 3 वेदवेदात् (for देवदेवात्).

8 $^{a}$) K2 B Dc1 Dn1 D5. 6 T1 G3 -प्रमुखान्; D2–4 -प्रथमान् (for -प्रभवान्). K2 G2 देवान् (for वेदान्). —$^{b}$) Ś1 K1. 3 मे त्वं; K2 मत्तो; M2 मा त्वं (for मां त्वं). —$^{c}$) K3. 5 सूर्यं; D3 यूप-; M1. 2 यूपः (for यूपं). B1. 2 D2 होमं (for सोमं). K2 तथैवाज्ये; B1. 2 D5. 6 चरुं सोमं; B3. 4 च होमं च; B5 Dc1 Dn1 D2–4 चरुं होमं (for तथैवेह). —$^{d}$) Ś1 K1 स वै; K2 मुखे; K3 च वै (for मखे). K5 त्रिदशाश्चापि ते मखे; M3 °शाप्ययनं मखे.

9 $^{a}$) K3 चापि (for अपि). K4. 5 D1 होतव्यं (for हव्यं च). —$^{b}$) M मा (for मां). K4 D1 त्वं भृगूद्वह (for भृगुनन्दन). —$^{c}$) K1. 3 Dn1 D6 अध्वर्युं-. Ś1 K1–4 D1 कल्पयामास; K5 °तंत्रं च; D6 °कश्चैव; G1 °नाश्चापि (for °कश्चापि). —$^{d}$) D3 हव्यं.

10 $^{a}$) K2 वा (for च). K1–3 M मा (for मां). K4 D1 विद्धि (for स्तौति). —$^{b}$) K2 महाध्वरैः. — D4 om. $10^{cdef}$. —$^{c}$) Ś1 K1. 3 प्रायश्चित्तेपि. K3 सा; M मा (for मां). K5 विद्धि; D6 ब्रह्म; G3 ब्रह्मा. —$^{d}$) K2 तथा (for शान्ति-). K1–3 -वाचकः. —$^{e}$) K2 स्तवंति. —$^{f}$) K1. 5 Dc1 Dn1 D5. 6 T G1 M1 द्विजसत्तम.

11 K2 om. (hapl.) $11^{ab}$. —$^{a}$) D1 विधिर् (for विद्धि). B1. 5 D2–4 मे स्व-; B2 G3 M3 मेद्य (for मह्यं). T2 G1 तु तद् (for सुतं). B3. 4 Dc1 विद्धि धर्मं मम सुतम्; Dn1 D5. 6 मम विद्धि सुतं धर्मम्; T1 विद्धि हव्यं तु तद्धर्मम्. —$^{b}$) Dc1 अग्रजं तपतां वर. — K4 D2–4 om. (hapl.) $11^{c}$–$12^{d}$. —$^{c}$) M2 दयितो. K5 विप्रं. —$^{d}$) Ś1 K1. 3 -भवात्मकं; K2 G M -गुणा° (for -दया°).

12 K4 D2–4 om. 12 (cf. v. l. 11). —$^{a}$) G3 अत्र (for तत्र). K1. 2 वर्तमानश्. — K2 om. (hapl.) $12^{b}$–$13^{c}$. —$^{b}$) D1 S [अ]पि (for [ए]व). K5 B3 मानसैः; B4 Dc1 विग्रहैः (for मानवैः). — D1 om. $12^{c}$–$13^{b}$. —$^{c}$) Ś1 K1. 3 संसरमानो; B1 संसारमाणो. T2 यो (for वै). G3 बहुधा प्रियमाणो वै. —$^{d}$) G3 वर्तेयं (for योनीर्हि). B Dc1 Dn1 D5. 6 G2 M योनीर्व- (B3. 4 °निर्व-; D6 °निर्वा-; G2 °र्निं व-; M3 °नी व)र्तामि सत्तम; T G1 निवृत्तो मुनिसत्तम.

13 K2 om. $13^{abc}$; D1 om. $13^{ab}$ (for both, cf. v. l. 12). —$^{a}$) T G1. 2 लोक- (for धर्म-). K4. 5 धर्मसंस्थापनार्थाय; G3 लोकसंरक्षणार्थं च; M3 धर्मस्यावेक्षणार्थाय. —$^{b}$) K4. 5 धर्मसंरक्षणाय च. —$^{c}$) Ś1 K3 B1. 3. 4 D5. 6 वेशैश्च (B3 °स्तु); K1 वंशैश्च; B2 वेषैः स्व-; D2 वेशैः स्व-; D3. 4 वंशैः स्व-; G3 विषय- (for वेषैश्च). K5 तैस्तै रूपैश्च वेषैश्च; Dn1 ततस्तैर्वैश्वरूपैश्च. —$^{d}$) Ś1 K1. 3–5 D1 संचरे (K3 °रन्); K2 भारत (for भार्गव).

भूतग्रामस्य सर्वस्य स्रष्टा संहार एव च ॥ १४
अधर्मे वर्तमानानां सर्वेषामहमप्युत ।
धर्मस्य सेतुं बध्नामि चलिते चलिते युगे ।
तास्ता योनीः प्रविश्याहं प्रजानां हितकाम्यया ॥ १५
यदा त्वहं देवयोनौ वर्तामि भृगुनन्दन ।
तदाहं देववत्सर्वमाचरामि न संशयः ॥ १६
यदा गन्धर्वयोनौ तु वर्तामि भृगुनन्दन ।
तदा गन्धर्ववच्चेष्टाः सर्वाश्चेष्टामि भार्गव ॥ १७
नागयोनौ यदा चैव तदा वर्तामि नागवत् ।
यक्षराक्षसयोनीश्च यथावद्विचराम्यहम् ॥ १८
मानुष्ये वर्तमाने तु कृपणं याचिता मया ।
न च ते जातसंमोहा वचो गृह्णन्ति मे हितम् ॥ १९
भयं च महदुद्दिश्य त्रासिताः कुरवो मया ।
क्रुद्धेव भूत्वा च पुनर्यथावदनुदर्शिताः ॥ २०
तेऽधर्मेणेह संयुक्ताः परीताः कालधर्मणा ।
धर्मेण निहता युद्धे गताः स्वर्गं न संशयः ॥ २१

C. 14. 1584
B. 14. 54. 22
K. 14. 54. 24

---

14 $^{a}$) K3 ब्रह्म. —$^{b}$) T G1. 2 M1. 3. 4 [ऽ]हं (for ऽथ). K2. 4 B3. 4 Dc1 Dn1 D1–4 प्रभवाऽव्ययः (D2. 3 °यं); G1 M °व्ययं; G2 °व्यहं. G3 शर्वः शक्रो भवाऽव्ययौ. —$^{c}$) B3 om. सर्वस्य. —$^{d}$) K4 सृष्टा.

15 D4 om. $15^{ab}$. —$^{a}$) K1 D3 अधर्म-; Dc1 स्वधर्मे. —$^{b}$) Ś1 K1. 3–5 B3. 5 D5. 6 G2 M1. 3 अच्युतः (K3. 5 B3 °त) (for अप्युत). K2 सर्वेषां मदनच्युताः (sic). —$^{c}$) B2 बध्नाति. K2. 4 D1 धर्मसेतुं निब(K2 च ब)ध्नामि. —$^{d}$) K2 च युगे; D4 (marg. *sec. m.*) चलितं (for the second चलिते). D1 चलितं चलितं युगे; G3 चरिते चरिते युगे. —$^{e}$) Ś1 तासु; B5 तथा (for तास्ता). Dc1 योनिं; D4 योनिः. K2. 4. 5 D1 G3 तां तां योनिं प्रविश्या(K4 D1 °वक्ष्या)हं; T1 G1 तस्माद्योनिं प्रविश्याहं. —$^{f}$) M4 प्राणिनां (for प्रजानां).

16 $^{a}$) T G1 पुनस् (for यदा). K2 यदा त्वं वेदयोनौ वा; B1. 2 (before corr.) D2–4 यदाहं देवयोनी(B2 [before corr.] D4 °नि)षु. —$^{b}$) D3 वक्ष्यामि (for वर्तामि). G3 वर्ते कुरुकुलोद्वह. — Ś1 K1. 3. 5 om. (hapl.) $16^{c}$-$17^{b}$. D1 repeats $16^{cd}$ after $17^{b}$. —$^{c}$) K4 D1 (both times) तदैव; B3 तदा त्वं; T G1 तदेहं (T °हे); G2 तदेव; M तदेह (for तदाहं). D3 दैववत्; G3 एव तत् (for देववत्). —$^{d}$) K2 भासयामि (for आचरामि). K4 (marg. *sec. m.*) D1 (both times) भृगू(K4 [orig.] रघू)द्वह (for न संशयः).

17 Ś1 K1. 3. 5 om. $17^{ab}$ (cf. v. l. 16). D4 om. (? hapl.) 17. —$^{a}$) G2 यथा (for यदा). K2 B1–4 Dc1 च; B5 Dn1 D5. 6 वा (for तु). —$^{b}$) G3 वर्तेहं (for वर्तामि). — After $17^{b}$, D1 repeats $16^{cd}$ and om. $17^{cd}$. —$^{c}$) K5 चेष्टां; B5 Dc1 D5. 6 सर्वम् (for चेष्टाः). B3 तदा गंधर्वचेष्टायाः; G3 यथा गंधर्ववद्वेषः. —$^{d}$) K4 चरामि भृगुनंदन; K5 सर्वां चेष्टामि सर्वशः; Dc1 D5. 6 आचरामि न संशयः.

18 $^{a}$) G1 यथा (for यदा). G3 वर्ते (for चैव). —$^{b}$) T1 तथा; M3 कदा (for तदा). D6 चेत्तामि (sic); G3 चेष्टा तु (for वर्तामि). — D4 om. $18^{cd}$. —$^{c}$) K2 -योनौ च; K4 Dc1 D1 T G -योनौ तु; B1. 2 -योनीषु; B3. 4 -योन्यां तु; B5 -योनीस्तु; Dn1 D5. 6 M -योन्योस्तु (for -योनीश्च). —$^{d}$) K1 यथाविद्; K2 तदा तद्; D6 तथा* (for यथावद्). K4 तथावृद्धि चराम्यहं; G3 तथावृत्तिश्चरा°.

19 K2 om. (? hapl.) $19^{a}$-$20^{b}$. —$^{a}$) Ś1 मानुषे; G3 मानुष्यं; M1. 2 °ष्या. K1. 3. 5 Dn1 D2–4 वर्तमानेन; B Dc1 M °ता ते तु; G1 बिभ्रता ते तु. K4 D1 मन्युना वर्तमानेपि. —$^{b}$) K1. 3 याचितं; K5 D5. 6 G2 याचता; M2 याचितो. B2 कृपणं यांति मायया. — K4 om. (hapl.) $19^{c}$–$20^{b}$. —$^{c}$) G3 वै (for ते). D4 T2 जातसंमोहो (T2 °हाद्); T1 G1. 2 जयसंमोहाद् (T1 °हा). —$^{d}$) B1. 3 Dc1 D1–3 [ऽ]गृह्णंत; B5 गृह्णंतु. K5 यद्धितं; B4 T G1. 2 मोहितं (for मे हितम्). B2 Dn1 D4–6 वचोगृह्णंत मोहिताः (B2 °तं).

20 K2. 4 om. $20^{ab}$ (cf. v. l. 19). —$^{a}$) B3 जयं (for भयं). T G1. 2 तु (for च). —$^{b}$) D4 यथा (for मया). —$^{c}$) G3 M1. 2 क्रुद्धे च (G3 तु). B1. 5 तु (for च). D5. 6 क्रुद्धेन वपुषा भूत्वा. —$^{d}$) T G1. 2 M उप- (for अनु-). Ś1 K1. 3. 5 D3 -दर्शितं (D3 °तः); K2. 4 D1 -पूर्वशः (for -दर्शिताः). G3 यथावदपि गर्हिताः.

21 $^{a}$) B1–3 Dc1 स्वेन धर्मेण; Dn1 ते स्वधर्मेण; D5. 6 ते तु पापेन; T2 G1 M4 ते धर्मेण ह (T2 हि); G3 तेनाधर्मेण (for तेऽधर्मेणेह). K3 संयुक्तः. —$^{b}$) T G1 पतिताः (for परीताः). K4 D1 -कर्मणा; B4 M2. 3

C. 14. 1563
B. 14. 54. 23
K. 14. 54. 25

लोकेषु पाण्डवाश्चैव गताः ख्यातिं द्विजोत्तम ।
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ २२

इति श्रीमहाभारते आश्वमेधिकपर्वणि त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

## ५४

उत्तङ्क उवाच ।

अभिजानामि जगतः कर्तारं त्वां जनार्दन ।
नूनं भवत्प्रसादोऽयमिति मे नास्ति संशयः ॥ १
चित्तं च सुप्रसन्नं मे त्वद्भावगतमच्युत ।
विनिवृत्तश्च मे कोप इति विद्धि परंतप ॥ २
यदि त्वनुग्रहं कंचित्त्वत्तोऽर्होऽहं जनार्दन ।
द्रष्टुमिच्छामि ते रूपमैश्वरं तन्निदर्शय ॥ ३

वैशंपायन उवाच ।

ततः स तस्मै प्रीतात्मा दर्शयामास तद्वपुः ।
शाश्वतं वैष्णवं धीमान्ददृशे यद्धनंजयः ॥ ४
स ददर्श महात्मानं विश्वरूपं महाभुजम् ।
विस्मयं च ययौ विप्रस्तद्दृष्ट्वा रूपमैश्वरम् ॥ ५

---

आश्वमेधिकपर्व समाप्तं ।

अतः परं व्यासाश्रमवासिकं पर्व भविष्यति । यस्यायमाद्यः श्लोकः ।

जनमेजय उवाच ।

प्राप्य राज्यं नरव्याघ्राः पाण्डवा मे पितामहाः ।
कथमासन्महाभाग धृतराष्ट्रे महात्मनि ॥

अस्मिन्पर्वणि वृत्तान्तानि । व्यासवाक्यं । संवर्तमारुतीयं । अनुगीता । वासुदेवगमनं । ब्राह्मणगीता । गुरुशिष्यसंवादः । उत्तङ्कोपाख्यानं । सुवर्णनयनं । अश्वपरीक्षा । हयरक्षणं । बभ्रुवाहनविजयः । अश्वमेधयज्ञः । नकुलोपाख्यानं । आश्वमेधिकं पर्व चतुर्दशमं प्रोक्तं ॥

अत्राध्यायशतं त्रिंशं त्रयोऽध्यायाश्च शब्दिताः ।
त्रीणि श्लोकसहस्राणि तावन्त्येव शतानि च ॥
विंशतिश्च तथा श्लोकाः संख्यातास्तत्त्वदर्शिभिः ।
त्रीण्याहुरतिदानानि गावः पृथिवी सरस्वती ॥

संवत् १७३६ वर्षे शाके १६०१ प्रवर्तमाने उत्तरायणगते श्रीसूर्ये वसंतऋतौ मासोत्तमवैसाषमासे कृष्णपक्षे १३ त्रयोदशीतिथौ सोमवासरे लिखितमिदं ॥ शुभं भवतु ॥ प्रत्यानुशारेण लिखितं दोषो न देयः ॥ श्री ॥

— After the last colophon, $K_3$ concludes with :

अस्यानु आश्रमवासिकं पर्व । यस्यायं प्रतिसंधिः ॥

जनमेजय उवाच ।

प्राप्य राज्यं नरव्याघ्राः पाण्डवा मे पितामहाः ।
कथमासन्महाभागे धृतराष्ट्रे महात्मनि ॥

अस्मिन्पर्वण्यमी वृत्तान्ताः । व्यासवाक्यं । संवर्तमरुत्तीयं । अनुगीता । वासुदेवागमनं । उतङ्कोपाख्यानं । द्वारकाप्रवेशः । युद्धवर्णनं । पाण्डवप्रयाणं । निध्युत्खननं । वासुदेवागमनं । परिक्षिज्जन्म । स्त्रीप्रलापः । रत्ननयनं । अश्वोत्सर्गः । मणिपूरगमनं । अर्जुनव्यामोहः । उलूपीवाक्यं । अश्वनिवर्तनं । यज्ञसमृद्धिः । यूपोच्छ्रायः । दक्षिणादानं । यज्ञसमाप्तिः । उंछवृत्युपाख्यानं । अगस्त्ययज्ञवर्णनं । नकुलोपाख्यानं ॥

इत्याश्वमेधिकं पर्व प्रोक्तमेतन्महाद्भुतम् ।
अत्राध्यायशतं त्रिंशं त्रयोऽध्यायाश्च संमताः ॥

— After the last colophon, $K_4$ concludes with : .

आश्वमेधिकपर्व समाप्तं ॥

अतः परं व्यासाश्रमवासिकं पर्व भविष्यति । तस्याद्यः श्लोकः ।

जनमेजय उवाच ।

प्राप्य राज्यं नरव्याघ्राः पाण्डवा मे पितामहाः ।
कथमासन्महाभाग धृतराष्ट्रे महात्मनि ॥

अस्मिन्पर्वणि वृत्तान्तानि । व्यासवाक्यं । संवर्तनरात्रीयं । अनुगीता । वासुदेवागमनं । ब्राह्मणगीता । गुरुशिष्यसंवादः । उतङ्कोपाख्यानं । द्वारकाप्रवेशः । पाण्डवप्रयाणं । निधिलाभः । परिक्षिज्जन्म । सुवर्णानयनं । अश्वपरीक्षा । हयरक्षणं । बभ्रुवाहनविजयः । अश्वमेधयज्ञः । नकुलोपाख्यानमिति । इति आश्वमेधिकं चतुर्दशमं प्रोक्तं ।

अत्राध्यायशतं त्रिंशत्त्रयोऽध्यायाश्च शब्दिताः ।
त्रीणि श्लोकसहस्राणि तावन्त्येव शतानि च ।
विंशतिश्च तथा प्रोक्ताः संख्यातास्तत्त्वदर्शिभिः ॥

रामाय नमः ॥

— After the last colophon, $K_5$ concludes with :

संपूर्णमाश्वमेधिकं पर्व ॥

श्रीमद्रामचन्द्राय नमः । करकृतमपराधं क्षन्तु....सन्तः । अतः परमाश्रमवासपर्व । तस्यायमाद्यः श्लोकः ।

जनमेजय उवाच ।

प्राप्य राज्यं महात्मानः पाण्डवा मे पितामहाः ।
कथमासन्महाराजे धृतराष्ट्रे महात्मनि ॥

— After the last colophon, $B_1$ concludes with :

श्रीः ॥ श्रीकृष्णाय नमस्तुभ्यं महाकालस्वरूपिणे । श्रीहरिः ।

— After the last colophon, $B_{3.4}$ conclude with :

आश्वमेधिकं पर्व ( $B_4$ om. पर्व ) समाप्तं ॥

— After the last colophon, $B_5$ concludes with :

समाप्तं चेदमाश्वमेधिकं पर्व ॥

— After the last colophon, $D_1$ concludes with :

समाप्तमाश्वमेधिकं पर्व ॥

संवत् १७९५ वर्षे कार्तिकशुक्लपक्षे १५ पूर्णमास्यां तिथौ बुधवासरे लिखितं पुस्तकं ।

— After the last colophon, $D_2$ concludes with :

आश्वमेधिकपर्व समाप्तं ।

— After 14. 95. 15, $D_3$ concludes with :

आश्वमेधिकपर्व समाप्तं ।

— After the last colophon, $D_4$ concludes with :

श्रीमदाश्वमेधिकपर्व समाप्तं ॥

रेणुका जयति । अस्यानु आश्रमवासिकं पर्व भविष्यति । तस्यायमाद्यः श्लोकः ।

जनमेजय उवाच ।

प्राप्य राज्यं महात्मानः पाण्डवा मे पितामहाः ।
कथमासन्महाराज धृतराष्ट्रे महात्मनि ॥
शाके ग्रहेष्टविशिखेन्दुचयेन युक्ते ( १५८९ )
संवत्सरेऽतिशुभदे प्लवगाभिधाख्ये ।
श्रीश्रावणे भृगुदिनेऽपि च शुक्लपक्षे
भूत्या समाप्तमभवच्छुभमाश्वमेधम् ॥
इत्याश्वमेधिकं पर्व प्रोक्तमेतन्महाद्भुतम् ।
अत्राध्यायाशितिः प्रोक्ता अष्टौ चात्र प्रकीर्तिताः ॥
त्रीणि श्लोकसहस्राणि तावन्त्येव शतानि च ।
विंशतिश्च तथा श्लोकाः संख्यातास्तत्त्वदर्शिना ॥

भवानिर्जयति । रेणुका जयति । संवत् १७२६ शके १५८९ प्लवंगसंवत्सरे श्रावणशु॰ १४ श्रीमत्कविकुलोत्पन्नेन कविना विश्वकेनाश्वमेधिकं पर्व लिखित्वा रेणुकाचरणेषु समर्पितं तेन श्रीभगवती प्रीयतां । संख्यावधी २००००० ।

— After the last colophon, $D_5$ concludes with :

आश्वमेधिकं पर्व समाप्तं ॥

संवत् १८३३ चैत्रसुदि २ गुरौ अश्विनीनक्षत्रे ऐन्द्रयोगे तुलालग्ने रात्रिसमये दीपसमीपे अमृतसरसि देशे स्वगृहे श्रीपरमकृपालुपूज्यपादारविंदश्रीकृष्णकौरात्मजदेवीसहायद्विजेन पुस्तकमिदमाश्विनेऽधिके लिखितं ॥ शुभं ॥

संवद्वह्यग्निसिद्धौ ( १८३३ ) मधुशुधि गुरुवारे तिथौ धातुरश्वे
ऐन्द्रे योगे तुलायाममृतसरसि नक्तं गृहे चोपदीपम् ।
पुस्त(कं) स्वार्थं परार्थं मधुरिपुकृपया सर्वशक्तिप्रदात्र्या
देवीसाहायकेन प्रलिखितमखिलं कृष्णकौरात्मजेन ॥

॥ श्रीरामायार्पितमस्तु ॥

— After the last colophon, $D_6$ concludes with :

आश्वमेधिकं पर्व समाप्तं ।

शुभमस्तु । श्रीरामाय नमः । गोविन्दाय नमः । माधवाय नमः ।

— After the colophon of App. I ( No. 4 ), $T_1$ concludes with :

श्रीलक्ष्मीनृसिंहार्पणमस्तु । हरिः ॐ ।

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥

सौम्यनामसंवत्सर आश्विजशुद्धपंचमी बुधवारं नाटिकि ( day ) आश्वमेधपर्वं संपूर्णं ।

अभ्रश्यामः पिङ्गजटाबद्धकलापः
प्रांशुर्दण्डी कृष्णमृगत्वक्परिधानः ।
साक्षाल्लोकान्पावयमानः कविमुख्यः
पाराशर्यः पर्वसु रूपं विवृणोतु ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः । रामार्पणमस्तु ।

— After the colophon of App. I ( No. 4 ), $T_2$ concludes with :

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः । श्रीकृष्णाय नमः ।

— After the colophon of App. I ( No. 4 ), $G_1$ concludes with :

श्रीवेदव्यासाय नमः । श्रीगोपालकृष्णाय नमः । आश्वमेधिकं पर्व समाप्तं । हरि ॐ ।

— After the colophon of App. I ( No. 4 ), $G_2$ concludes with :

श्रीकृष्णाय नमः । आश्वमेधिकं समाप्तं । हरिः ॐ । श्री-

गुरुभ्यो नमः । ॐ शुभमस्तु ॐ ।

बिन्दुदुर्लिपिविहस्तवीथिका
पङ्क्तिभेदपददूषणम् ।
हस्तवेगजमबुद्धिपूर्वकं
क्षन्तुमर्हथ समीक्ष्य सज्जनाः ।

— After the colophon of App. I ( No. 4 ), $G_3$ concludes with :

श्रीअश्वमेधपर्वसमाप्तिर्जाता । श्रीवासुदेवपरब्रह्मणे नमः ।

— After the last colophon, $M_2$ concludes with :

आश्वमेधिकं समाप्तं ।

तस्मान्न विस्मयः कार्यो धर्मेषु पुरुषैः शुभैः ।
एवं राजा महाबुद्धिरिष्ट्वा भूयोऽश्वमेधकैः ।
पञ्चभिः प्रददौ वित्तं धौम्याय बहुकोटिकम् ।
तदादाय मुनिर्दत्त्वा तपसे वनमाश्रितः ।
गतेष्वन्येषु मुनिषु वृष्णयो गन्तुमुद्यताः ।
एतान्संयुज्य पार्थास्ते वासुदेवमुपस्थिताः ।
तदनुग्रहसंभूतमादाय च परिक्षितम् ।
तानब्रवीद्वासुदेवः प्रीतात्मा धर्मतो हितम् ।
सत्त्वधर्मरता विप्रान्पालयध्वं दमान्विताः ।
तेषु तुष्टेषु तुष्टाः स्युः पितरो दैवतानि च ।
रतः प्रीतस्तेष्वहं च गोषु चैतान्नमस्कुरु ।
इत्युक्त्वा गन्तुमनसमब्रवीत्स युधिष्ठिरः ।
ये यजन्ति कृपार्थास्त्वा विप्रादिप्रतिमादिषु ।
स्मरन्ति मानवा नित्यं जपन्ति प्रणयन्ति च ।
त्वद्ध्यानदेत्युः पापौघगिरिवज्रैरिवाचलः ।
दर्शनात्सूर्य ते पुण्यं कारणाह्लादकारकान् ।
ज्ञातिक्षयमहादुःखं दर्शनात्तव शाम्यति ।
शिशोरस्याभिमन्योश्च तद्गतिर्नो भवाच्युत ।
इत्युक्तः पूजितः पार्थैः परिष्वक्तोऽभिवादितैः ।
दीर्घं चानुगतः स्नेहादनुनीय ययौ हरिः ।
बालाः पित्रोर्वियोगे वा सदारसुतबान्धवाः ।
पार्थाः कथंचित्स्वपुरं वीक्षिता वीक्ष्य चाययुः ।
कृष्णोऽपि पूजिते मार्गे वीक्षितो भुवि यद्गतैः ।
स्वजनेनार्चितो वेश्म प्रविश्य प्रीतिमानभूत् ।
पार्थश्च कृष्णसंदेशं पालयानो विचिन्त्य तम् ।
पितरं मातृभिः सार्धं पूजयानोऽवसत्सुखम् ।
इत्याश्वमेधिके एकाशीतितमोऽध्यायः ।
हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

— After the last colophon, $M_3$ concludes with :

श्रीगुरुभ्यो नमः । श्रीगुरवे नमः । कोल्लं ९९५ मासं तेति ( date ) एलुतिय ( written ) पुस्तकमिदं समाप्तम् । श्रीगुरुभ्यो नमः । शुभमस्तु । हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

— After the last colophon, $M_4$ concludes with :

आश्वमेधिकं समाप्तं ।

कर्मणा मनसा वाचा या चेष्टा मम नित्यशः ।
केशवाराधने सा स्याज्जन्मजन्मान्तरेष्वपि ।

॥ शुभमस्तु ॥ हरिः ॐ

— After the above, $M_{2-4}$ ins. a passage given in App. I ( No. 4 ).

# APPENDIX I

This Appendix comprises a series of additional passages found in different MSS., which were either too long to be included in the foregoing footnotes to the constituted text, or were not sufficiently connected with the main thread of the narration, or were otherwise deemed not important enough for being included in the main critical apparatus.

The variants cited below these Appendix passages are of the same order as those cited below the additional ( star ) passages in the footnotes to the constituted text, so that, in both of them, corrupt readings, discrepant readings of single MSS and minor variants are generally ignored, and obvious scribal errors silently corrected. Furthermore, the variants of the short prose formulaic references ( such as संजय उवाच ) have been uniformly ignored here

## 1

After 14. 14. 17, S ins.:

यथा मनुर्महाराज रामो दाशरथिर्यथा ।
तथा भरतसिंहोऽपि पालयामास मेदिनीम् ।
नाधर्म्यमभवत्तत्र सर्वो धर्मरुचिर्जनः ।
बभूव नरशार्दूल यथा कृतयुगं युगम् ।
कलिमासन्नमाविष्टं निवार्य नृपनन्दनः । [ 5 ]
भ्रातृभिः सहितो धीमान्बभौ धर्मबलोद्धृतः ।
ववर्ष भगवान्देवः काले देशे यथेप्सितम् ।
निरामयं जगदभूत्क्षुत्पिपासे न किंचन ।
आधिर्नास्ति मनुष्याणां व्यसने नाभवन्मतिः ।
ब्राह्मणप्रमुखा वर्णास्ते स्वधर्मोत्तराः शिवाः । [ 10 ]
धर्मः सत्यप्रधानश्च सत्यं सद्विषयान्वितम् ।
धर्मासनस्थः सद्भिः स स्त्रीबालातुरवृद्धकान् ।
वर्णक्रमात्पूर्वकृतान्नाकालो रक्षणोद्यतः ।
सुवृत्तिवृत्तिदानाद्यैर्यज्ञार्थैर्दापितैरपि ।
आमुष्मिकं भयं नास्ति ऐहिकं कृतमेव तु । [ 15 ]
स्वर्गलोकोपमो लोकस्तदा तस्मिन्प्रशासति ।
बभूव सुखमेवात्र तद्विशिष्टतरं परम् ।
नार्यः पतिव्रताः सर्वा रूपवत्यः स्वलंकृताः ।
यथोक्तवृत्ताः स्वगुणैर्बभूवुः प्रीतिहेतवः ।
पुमांसः पुण्यशीलाढ्याः स्वं स्वं धर्ममनुव्रताः । [ 20 ]
सुखिनः सूक्ष्ममप्येनो नाकुर्वन्त कदाचन ।
सर्वे नराश्च नार्यश्च सततं प्रियवादिनः ।
अजिह्ममनसः शुक्ला बभूवुः श्रमवर्जिताः ।
भूषिताः कुण्डलैर्हारैः कटकैः कटिसूत्रकैः ।
सुवाससः सुगन्धाढ्याः प्रायशः पृथिवीतले । [ 25 ]
सर्वे ब्रह्मविदः शान्ताः सर्वत्र परिनिष्ठिताः ।
वलीपलितहीनास्तु सुखिनो दीर्घदर्शिनः ।
इच्छा न जायतेऽन्यत्र वर्णेषु च न संकरः ।
मनुष्याणां महाराज मर्यादासु व्यवस्थिताः ।
तस्मिञ्शासति राजेन्द्र मृगव्यालसरीसृपाः । [ 30 ]
अन्योन्यमपि चान्येषु न बाधन्ते वयांसि च ।
गावश्च गुणभूयिष्ठाः सुवालधिमुखोदराः ।
अपीडिताः कर्षणाद्यैर्हृतव्याधितवत्सराः ।
अवध्यकाला मनुजाः पुरुषार्थेषु च क्रमात् ।
विषयेष्वनिषिद्धेषु वेदशास्त्रेषु चोद्यताः । [ 35 ]
सुवृत्ता वृषभाः पुष्टाः भारसाहाः सुखोदयाः ।
अतीव मधुरः शब्दः स्पर्शश्चातिसुखो रसः ।

---

1

( L. 1 ) $G_1$ महाराजो. — ( L. 2 ) $G_2$ भारत- ( for भ° ). — ( L. 3 ) $G_3$ [अ]धमश्च ; M [अ]धर्मम्. $M_4$ अवहत् ( for अभवत् ). T $G_3$ धर्मपरो ( for °रुचिर् ). — ( L 4 ) M नृप- ( for नर- ). $G_{1.3}$ यथा कृतयुगे तथा ( for the post. half ). — ( L. 5 ) Madras ed. निवास्य ( for °र्य ). $G_1$ नृपनंदन ; $G_3$ कुरुनंदनः. — ( L. 6 ) M धर्माद् ( for धीमान् ). $T_2$ यथा ( for बभौ ). $M_{1-3}$ -बलोद्धतः ( for °द्धृतः ). — ( L. 7 ) $M_{1-3}$ काले ( for देशे ). T $G_3$ यथाविधि ( for यथेप्सितम् ). — ( L. 9 ) $G_1$ व्याधिर् ( for आधिर् ). $M_{1.2}$ मनः ( for मतिः ). — M om. lines 10–14. — ( L. 10 ) $G_{1.3}$ शुभाः ( for शिवाः ). — ( L. 11 ) $G_3$ सद्विनयान्वितं ( for सद्विष° ). — ( L. 12 ) $G_3$ धर्मासनस्थैः सद्भिस्तु ( for the prior half ). $G_3$ -वृद्धकाः ( for °कान् ). — ( L. 13 ) $G_1$ वर्णक्रमान् ; Madras ed. वर्णाश्रमान्. $G_3$ वर्णाः क्रमात्पूर्वकृता ( for the prior half ). $G_1$ साकल्यान् ; Madras ed. सकलान् ( for नाकालो ). $G_3$ आशास्या रक्षणोद्यताः ( for the post. half ). — ( L. 14 ) G अवृत्ति- ( for सु° ). $G_1$ यज्ञाद्यैर् ( for °र्थैर् ). $T_2$ द्रावितैर् ; $G_1$ व्याधि° ; $G_3$ यात्रि° ( for दापि° ). — ( L. 15 ) $T_2$ M आमुत्रिकं ( for °ष्मिकं ). $G_3$ M कुत ( for कृतम् ). — ( L. 16 ) T स्वर्गोपमस्तदा लोकस् ( for the prior half ). $G_3$ $M_{1-3}$ तथा ( for तदा ). — ( L. 17 ) $G_1$ एवाग्रं ; $G_2$ एकाग्रं ( for एवात्र ). $G_2$ विशिष्टकरं ( for °तरं ). — ( L. 19 ) $G_1$ -वित्ताः ( for -वृत्ताः ). $G_1$ पति- ( for प्रीति- ). — ( L. 21 ) $G_3$ सुमुखाः ( for सुखिनः ). $G_1$ कुर्वंति ; $G_3$ [अ]कुर्वंत ( for °र्वन्त ). $M_{1.2}$ कथंचन ( for कदा° ). — ( L. 22 ) $M_{1.2}$ सततं प्रीतिहेतवः ( for the post. half ). — ( L. 24 ) $T_1$ partly damaged. — ( L. 26 ) $G_{1.2}$ विप्राः ; M संतः ( for शान्ताः ). — ( L. 27 ) $T_1$ $G_{1.3}$ -जीविनः ( for -दर्शिनः ). — ( L. 28 ) $G_2$ तत्र ( for ऽन्यत्र ). $M_{1-3}$ न च ( by transp. ). — ( L. 29 ) $M_1$ मानुषाणां. $T_2$ $M_3$ मर्यादा सुव्यवस्थिता ; $M_{1.2}$ °दासु स्थितास्थिताः ; $M_4$ °दा सुस्थितिस्थिता ( for the post. half ). — ( L. 30 ) $G_1$ $M_{3.4}$ राजेंद्रे. $M_4$ मृगव्यालाः. $T_1$ -सृपा. — ( L. 31 ) T नृमा( $T_2$ न मा )नुषान् ; $G_1$ कदाचन ; $G_2$ स जंतवः ; $G_3$ स मानवाः ( for वयांसि च ). — $G_2$ om. line 32. — ( L. 32 ) $G_1$ गावः सक्षीरभूयिष्ठाः ; M गावः पयः प्र° ( for the prior half ). $T_1$ सुवालाः सुसुखोदराः ; $T_2$ °लाधीमुखादराः ; $G_1$ °लाः सुमुखोदराः ; $M_3$ °लधिपयोधराः ( for the post. half ). — M om. lines 33–35. — ( L. 33 ) $G_{1.3}$ कर्षकाद्यैर् ( for °णाद्यैर् ). $T_2$ G -वत्सकाः ( for -वत्सराः ). — ( L. 34 ) Madras अवंध्य- ( for अवध्य- ). — ( L. 35 ) $G_3$ विविधेषु ( for विषयेषु ).

रूपं दृष्टिक्षमं रम्यं मनोज्ञं गन्धमुद्भभौ ।
धर्मार्थकामसंयुक्तं मोक्षाभ्युदयसाधनम् ।
प्रह्लादजननं पुण्यं संबभूवाथ मानसम् । [ 40 ]
स्थावरा बहुपुष्पाढ्याः फलच्छायावहास्तथा ।
सुस्पर्शा विषहीनाश्च सुपत्रत्वक्प्ररोहिणः ।
मनोनुकूलाः सर्वेषां चेष्टा भूत्वापवर्जिताः ।
तथाविधोऽपि राजर्षिस्तद्वृत्तमभवद्भुवि ।
सर्वलक्षणसंपन्नाः पाण्डवा धर्मचारिणः । [ 45 ]
ज्येष्ठानुवर्तिनः सर्वे बभूवुः प्रियदर्शनाः ।
सिंहोरस्का जितक्रोधास्तेजोबलसमन्विताः ।
आजानुबाहवः सर्वे दानशीला जितेन्द्रियाः ।
तेषु शासत्सु पृथिवीमृतवः स्वगुणैर्बभुः ।
सुखोदयाय वर्तन्ते ग्रहास्तारागणैः सह । [ 50 ]
मही सस्यप्रबहुला सर्वरत्नगुणोदया ।
कामधुग्धेनुवद्भोगान्फलति स्म सहस्रधा ।
मन्वादिभिः कृताः पूर्वं मर्यादा मानवेषु याः ।
अनतिक्रम्य ताः सर्वाः कुलेषु समयानि च ।
अन्वशासन्त ते नित्यं धर्मपुत्रप्रियंकराः । [ 55 ]
महाकुलानि धर्मिष्ठा वर्धयन्तो विशेषतः ।
मनुप्रणीतया वृत्त्या तेऽन्वशासन्वसुंधराम् ।
राजवृत्तिर्हि सा शश्वद्धर्मिष्ठाभून्महीतले ।
प्रायो लोकमतिस्तात राजवृत्तानुगामिनी ।
एवं भारतवर्षं स्वं राजा स्वर्गं सुरेन्द्रवत् । [ 60 ]
शशास विष्णुना सार्धं गुप्तो गाण्डीवधन्वना ।

Colophon.

## 2

After 14. 24. 20, $K_2$ ins.:

यावद्द्रव्यगुणस्तावत्प्रदीपः संप्रकाशयेत् ।
क्षीणे द्रव्यगुणे ज्योतिरन्तर्धानाय गच्छति ।
व्यक्तः सत्त्वगुणे ह्येष पुरुषो व्यक्तिरीशते ।
एतद्विप्र विजानीष्व हन्त भूयो ब्रवीमि ते ।
सहस्रेणापि दुर्मेधा बुद्धिमान्सुखमेधते । [ 5 ]
एवं धर्मस्य विज्ञेयं संसाधनमुपायतः ।
उपायज्ञो हि मेधावी सुखमत्यन्तमश्नुते ।
यथाध्वानमपाथेयः प्रपन्नो मानवः क्वचित् ।
क्लेशेन याति महता विनश्यत्यन्तरापि वा ।
तथा कर्मसु विज्ञेयं फलं भवति मानव । [ 10 ]
पुरुषस्यात्मनिःश्रेयः शुभाशुभनिदर्शनः ।
यथा च दीर्घमध्वानं पद्भ्यामेव प्रपद्यते ।
अदृष्टपूर्वं सहसा तत्त्वदर्शनवर्जितः ।
प्राप्नुवन्तो यथाध्वानं रथेनेहाशुगामिना ।
यायादश्वप्रयुक्तेन तथा बुद्धिमतां गतिः । [ 15 ]
उच्चपर्वतमारुह्य नन्ववेक्षेत भूगतम् ।
रथेन रथिनं पश्येच्चैतन्येन च चेतनम् ।
यावद्रथपथस्तावद्रथे समुपगच्छति ।
क्षीणे रथपथे प्राज्ञो रथमुत्सृज्य गच्छति ।
एवं गच्छति मेधावी तत्त्वयोगविधानवित् । [ 20 ]
समाज्ञाय महाबुद्धेरुत्तरादुत्तरोत्तरम् ।
यथा महार्णवं घोरमुप्लवः संप्रगाहते ।
बाहुभ्यामेव संमोहाद्वधं गच्छत्यसंशयम् ।

---

— ( L. 36 ) $T_1$ सुवालाः सु- ; $T_2$ $G_3$ सुस्वभावाः ; $G_1$ रसनाभाः ; $G_2$ हरिभावाः ( for भारसाहाः ). — ( L. 37 ) $T_1$ स्पर्शश्चा * सुखं रसं ; $T_2$ °श्चापि सुखं रसः ; $G_{1.3}$ °श्चातिसुखं समाः ( $G_3$ रसः ) ; $G_2$ °श्चार्तिसुखं सरं ( for the post. half ). — ( L. 38 ) $G_2$ राज्यं ( for रम्यं ). $G_1$ गंधवद्भभौ ( for °मुद्भभौ ). — ( L. 39 ) $G_1$ -दर्शनं ( for -साधनम् ). — ( L. 40 ) $T_1$ च ; $M_{1.2}$ [अ]ति- ( for [अ]-थ ). — ( L. 41 ) $G_2$ च सु- ( for बहु- ). $T_1$ फलच्छायवहास्तथा ; M °योपगास्तदा ( $M_4$ °था ) ( for the post. half ). — ( L. 42 ) M दुस्पर्श- ( for सुस्पर्शा ). — ( L. 43 ) $M_{1.2.4}$ मनोनुरूपाः ( for °कूलाः ). Madras ed. भूतापवर्जिताः. $G_3$ M चेष्टाभूत्पा( $G_3$ °त्ता )पवर्जिताः ( for the post. half ). — ( L. 44 ) $M_{1-3}$ हि ( for ऽपि ). $T_2$ तथैव सोपि राजर्षिस् ; $G_1$ तथा बभूव रा° ( for the prior half ). $T_1$ सद्वृत्तम् ( for त° ). — ( L. 46 ) M -वृत्तिनः ( for -वर्तिनः ). $T_1$ G प्रियदर्शिनः. — ( L. 47 ) $G_3$ तपोबल- ( for तेजो° ). — ( L. 48 ) M जितारयः ( for जितेन्द्रियाः ). — ( L. 49 ) $T_1$ शस्तेषु ( for शासत्सु ). $G_2$ $M_{1-3}$ धरणीम् ( for पृथिवीम् ). $T_1$ $G_1$ $M_4$ वहु ( for बभुः ). — ( L. 50 ) $T_1$ तारागुणैः ( for °गणैः ). — ( L. 51 ) $T_1$ $G_2$ च सस्य- ; $M_4$ ( *inf. lin.* as above ) तस्य प्र- ( for सस्यप्र- ). — ( L. 53 ) $M_{1-3}$ मानुषेषु ( for मानवेषु ). $M_{1.2}$ ये ( sic ) ( for याः ). — $T_2$ $G_3$ om. lines 54–57. — ( L. 54 ) $M_1$ तान्सर्वान् ( sic ) ( for ताः सर्वाः ). — ( L. 55 ) $G_1$ $M_{1.3.4}$ राजानो ( for ते नित्यं ). — ( L. 57 ) $G_2$ M दृष्ट्या ( for वृत्त्या ). — ( L. 58 ) M महीपतेः ( for °तले ). — ( L. 59 ) $G_3$ $M_{1-3}$ लोकगतिस् ( for °मतिस् ). $M_4$ लोक- ( for राज- ). — Colophon. — *Adhy. no.* : $T_1$ $G_3$ 15 ; $T_2$ $G_{1.2}$ M 14.

नावया च यथा प्राज्ञो विना प्रज्ञातरित्रया ।
अक्रान्तसलिलं गाहे क्लृप्तं संतरति स्वयम् । [ 25 ]
तीर्णो गच्छेत्परं पारं नावमुत्सृज्य निर्ममः ।
व्याख्यातं पूर्वकल्पेन यथा रथपदातिनाम् ।
मोहात्संमोहमापन्नो मा विनाशं यथा तथा ।
ममत्वेनाभिभूतस्य तत्रैव परिदेवने ।
नावं न शक्यमारुह्य स्थलेऽपि परिभावितुम् । [ 30 ]
तथैव स्थलमारुह्य नाप्सु यातुं विधीयते ।
एवं कर्म कृतं चित्तं विषमस्थं पृथक्पृथक् ।
यथा कर्म कृतं लोके तथा तदुपपद्यते ।
यत्रैव गन्धो न रसो न रूपस्पर्शशब्दवत् ।
मन्यतेऽथ मनो बुद्ध्या तत्प्रधानं प्रचक्षते । [ 35 ]
यत्तत्प्रधानमव्यक्तमव्यक्तस्य गुणो महान् ।
महतः प्रधानभूतस्य गुणाः * * * * स्मृताः ।
बीजधर्मि यथा व्यक्तं तथैव प्रसवात्मकम् ।
बीजधर्मा महानात्मा वसवश्चेति नः श्रुतम् ।
बीजधर्मात्त्वहंकारः प्रसवत्वे पुनः पुनः । [ 40 ]
बीजप्रसवधर्माणि महाभूतानि पञ्च वै ।
बीजधर्मिणमित्याहुः प्रसवं नैव कुर्वते ।
विशेषाः सर्वभूतानां तेषां चित्तं विशेषणम् ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ।

## 3

After 14. 35. 12, $K_5$ B D ( except $D_1$ ) $T_2$ ins. :

ज्ञानं त्वेव परं विद्मः संन्यासं तप उत्तमम् ।
यस्तु वेद निराबाधं ज्ञानतत्त्वं विनिश्चयात् ।
सर्वभूतस्थमात्मानं स सर्वगतिरिष्यते ।
यो विद्वान्सहवासं च विवासं चैव पश्यति ।
तथैवैकत्वनानात्वे स दुःखात्परिमुच्यते । [ 5 ]
यो न कामयते किंचिन्न किंचिदभिमन्यते ।
इहलोकस्थ एवैष ब्रह्मभूयाय कल्पते ।
प्रधानगुणतत्त्वज्ञः सर्वभूतविधानवित् ।
निर्ममो निरहंकारो मुच्यते नात्र संशयः ।
अव्यक्तबीजप्रभवो बुद्धिस्कन्धमयो महान् । [ 10 ]
महाहंकारविटप इन्द्रियाङ्कुरकोटरः ।
महाभूतविशेषश्च विशेषप्रतिशाखवान् ।
सदापर्णः सदापुष्पः सदाशुभफलोदयः ।
आजीवः सर्वभूतानां ब्रह्मबीजः सनातनः ।
एतज्ज्ञात्वा च तत्त्वेन ज्ञानेन परमासिना । [ 15 ]
छित्त्वा चामरतां प्राप्य जहाति मृत्युजन्मनी ।

## 4

T G ins. after 14. 96. 15 : $M_{2-4}$ after 14. 96 :

जनमेजयः ।

अश्वमेधे पुरा वृत्ते केशवं केशिसूदनम् ।
धर्मसंशयमुद्दिश्य किमपृच्छत्पितामहः ।

वैशंपायनः ।

पश्चिमेनाश्वमेधेन यदा स्नातो युधिष्ठिरः ।
तदा राजन्नमस्कृत्य केशवं पुनरब्रवीत् ।
भगवन्वैष्णवा धर्माः किंफलाः किंपरायणाः । [ 5 ]

---

3

Cf. 14. 47. $5^c$–$9^d$ and 47. $12^a$–$14^d$. — ( L. 1 ) $T_2$ चैव ( for त्वेव ). $D_{n1}$ $D_{2.3}$ विद्म ( for विद्मः ). $D_{c1}$ ज्ञानं ते परमं विद्म ( for the prior half ). $B_{1-4}$ $D_{c1}$ संन्यासस्. — ( L. 2 ) $B_{1.2}$ वेदं ( for वेद ). $B_2$ निराधारं ; $D_3$ °बंधं ( for °बाधं ). $D_4$ ज्ञानं तत्त्व- ; $D_{5.6}$ ज्ञानतत्त्व- ( for °तत्त्वं ). — ( L. 3 ) $D_{n1}$ $D_{2.3}$ धर्मगतिर् ( for सर्वगतिर् ). $B_{1.2}$ स सर्वगतिरि( $B_2$ °रु )च्यते ; $D_{5.6}$ स धर्मानतिरिच्यते ( for the post. half ). — ( L. 4 ) $D_{n1}$ $D_{2.5.6}$ सहसंवासं ( for °वासं च ). $T_2$ वै ( for च ). $D_4$ स वासं ; $D_{5.6}$ पृथक्त्वं ( for विवासं ). $T_2$ सद्भिः सह न पश्यति ( for the post. half ). — ( L. 6 ) $T_2$ यः कामं मनुते किंचिन् ( for the prior half ). $K_5$ अपि ( for अभि- ). $D_4$ -गम्यते ( for -मन्यते ). — ( L. 7 ) $T_2$ इहलोकांस्त्वनेनैष ( for the prior half ). — ( L. 9 ) $D_{c1}$ धर्मात्मा ( for निर्ममो ). — ( L. 10 ) $D_{c1}$ अत्यक्त- ( for अव्यक्त- ). $D_4$ ( marg. *sec. m.* as above ) -द्रव्य- ( for -बीज- ). — ( L. 11 ) $B_2$ मोहाहंकार- ( for महा° ). $D_{5.6}$ $T_2$ इंद्रियांतर( $T_2$ °याकुल )कोटरः ( for the post. half ). — ( L. 12 ) $D_3$ -शाखवत् ( for °वान् ). — ( L. 13 ) $K_5$ $B_5$ $D_{c1}$ $T_2$ शुभाशुभ- ; $D_4$ सदापुष्प- ( for °शुभ- ). — ( L. 14 ) $D_3$ आजीव- ; $D_{5.6}$ आजीव्यः. $D_{5.6}$ -वृक्षः ( for -बीजः ). — ( L. 15 ) $T_2$ यत्तज् ( for एतज् ). $B_{1.4}$ $T_2$ तत्त्वानि ; $B_2$ तत्त्वं हि ( for तत्त्वेन ). — ( L. 16 ) $D_3$ छित्वा ; $T_2$ स्थित्वा ( for छित्त्वा ). $B_3$ प्राप ( for प्राप्य ). $K_5$ जहीमे ( for जहाति ).

4

— ( L. 3 ) $T_2$ $G_{2.3}$ $M_{2.3}$ पंचमेन ( for पश्चि° ). — $G_3$ om. line 4. — ( L. 4 ) $M_3$ राजा ( for राजन् ). $G_1$

किं धर्ममधिकृत्याथ भवतोत्पादिताः पुरा ।
यदि तेऽहमनुग्राह्यः प्रियोऽस्मि मधुसूदन ।
श्रोतव्या यदि मे कृष्ण तन्मे कथय सुव्रत ।
पवित्राः किल ते धर्माः सर्वपापप्रणाशनाः ।
सर्वधर्मोत्तमाः पुण्या भगवंस्त्वन्मुखोद्गताः । [ 10 ]
याञ्श्रुत्वा ब्रह्महा गोघ्नो मातृहा गुरुतल्पगः ।
पाकभेदी कृतघ्नश्च सुरापो ब्रह्मविक्रयी ।
मित्रविश्वासघाती च वीरहा भ्रूणहा तथा ।
तपोविक्रयिणश्चैव दानविक्रयिणस्तथा ।
आत्मविक्रयिणो मूढा जीवेद्यश्च विकर्मभिः । [ 15 ]
पापाः शठा नैकृतिका डाम्भिका दूषकास्तथा ।
रसभेदकरा ये च ये च स्युर्ब्रह्मघातकाः ।
शूद्रप्रेष्यकराश्चोरा विप्रा ये च पुरोहिताः ।
निक्षेपहारिणः स्त्रीघ्नास्तथा ये पारदारिकाः ।
एते चान्ये च पापास्ते मुच्यन्ते तेऽपि किल्बिषात् । [ 20 ]
तानाचक्ष्व सुरश्रेष्ठ त्वद्भक्तस्य ममाच्युत ।
इत्येवं कथिते देवे धर्मपुत्रेण संसदि ।
वसिष्ठाद्यास्तपोयुक्ता मुनयस्तत्त्वदर्शिनः ।
श्रोतुकामाः परं गुह्यं वैष्णवं धर्ममुत्तमम् ।
तथा भागवताश्चैव ततस्तं पर्यवारयन् । [ 25 ]

युधिष्ठिरः ।

तत्त्वतस्तु भवानेव पादमूलमुपागतम् ।
यदि जानासि मां भक्तं स्निग्धं वा भक्तवत्सल ।
धर्मगुह्यानि सर्वाणि वेत्तुमिच्छामि तत्त्वतः ।
धर्मान्कथय देवेश यद्यनुग्रहभागहम् ।
श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथा । [ 30 ]
गार्गीया गौतमीयाश्च तथा गोपालकस्य च ।
पराशरकृताः पूर्वं मैत्रेयस्य च धीमतः ।
औमा माहेश्वराश्चैव नन्दिधर्माश्च पावनाः ।
ब्रह्मणा कथिता ये च कौमाराश्च श्रुता मया ।
धूम्रायणकृता धर्माः काण्डवैश्वानरा अपि । [ 35 ]
भार्गव्या याज्ञवल्क्याश्च मार्कण्डेयकृतास्तथा ।
भारद्वाजकृता ये च बृहस्पतिकृताश्च ये ।
कुणेश्च कुणिबाहोश्च विश्वामित्रकृताश्च ये ।
सुमन्तुजैमिनिकृताः शाकुनेयास्तथैव च ।
पुलस्त्यपुलहोद्गीताः पावकीयास्तथैव च । [ 40 ]
अगस्त्यगीता मौद्गल्याः शाण्डिल्याश्चैव पावनाः ।
वालखिल्यकृता ये च ये च सप्तर्षिभिः कृताः ।
आपस्तम्बकृता धर्माः शङ्खस्य लिखितस्य च ।

---

तदा राजा पुरस्कृत्य ( for the prior half ). T $M_{2.4}$ वाक्यम् ( for पुनर् ). — Before line 5, $T_1$ $G_{1.2}$ $M_{2-4}$ ins. युधिष्ठिरः. — ( L. 6 ) $G_3$ $M_4$ कं ( for किं ). — ( L. 7 ) $G_3$ मे ; $M_{2.4}$ वा ( for ऽसि ). — ( L. 8 ) $G_3$ $M_4$ तान् ( for तन् ). $G_3$ वै ( for मे ). — ( L. 9 ) $M_4$ सर्वे ( for सर्व- ). — ( L. 11 ) T $G_{1.3}$ यच्छ्रुत्वा. — ( L. 13 ) $G_3$ $M_{2.3}$ भ्रूणहा वीरहा ( by transp. ). — $M_4$ om. ( hapl. ) lines 14–16. — ( L. 14 ) $M_2$ च ये ( for तथा ). — ( L. 15 ) $G_3$ आत्मविक्रयणश्चैव ( for the prior half ). — ( L. 16 ) Madras ed. पापाचारा ( for पापाः शठा ). $T_1$ $M_3$ डांभीका. $M_2$ च ये ( for तथा ). — ( L. 17 ) $G_3$ चैव ( for the first ये च ). T $G_3$ $M_4$ -दूषकाः ( for -घातकाः ). — ( L. 18 ) $M_2$ -प्रेषणकाश् ( for -प्रेष्यकराश् ). — ( L. 19 ) $T_1$ परदारिकाः. — ( L. 20 ) $G_3$ $M_4$ बहवो ( for पापास्ते ). — Before line 22, $T_1$ $M_{2.4}$ ins. वैशंपायनः. — ( L. 24 ) $M_2$ om. गुह्यं and the post. half. $G_3$ $M_4$ भक्तिमंतो निरत्ययाः ( for the post. half ). — ( L. 25 ) $T_2$ $G_{1.2}$ ततः सं- ; $G_3$ व्रतस्थाः ( for ततस्तं ). — $G_3$ om. the ref. — ( L. 26 ) $G_3$ $M_{2.4}$ तत्त्वतस्तव भावे( $G_3$ बोधे )न ( for the prior half ). $M_2$ उपागतः. — ( L. 27 ) $G_3$ $M_4$ इति ( for यदि ). $T_2$ शक्तं स्निग्धं ; $G_3$ $M_4$ स्निग्धं भक्तं ( by transp. ). — ( L. 28 ) $G_3$ $M_4$ -युक्तानि ( for -गुह्यानि ). — ( L. 29 ) $T_1$ $G_{1.2}$ $M_3$ मे देव ( for देवेश ). — ( L. 31 ) $G_3$ गार्गीय-. $M_4$ धर्मा ( for तथा ). $T_1$ कापालिकस्य ; $G_3$ $M_4$ गोपालि°. — ( L. 32 ) $T_2$ पाराशरकृताः. $G_1$ $M_4$ पूर्वा ( for पूर्वं ). $G_3$ $M_4$ आत्रेयस्य ( for मै° ). $M_2$ तथैवात्रिमुखोद्गताः ( for the post. half ). — ( L. 33 ) T $G_{1.2}$ $M_3$ उमा ; $M_2$ तथा ( for औमा ). $T_1$ महेश्वराच् ; $T_2$ G $M_3$ महेश्वराश्. $M_2$ नंदी- ( for नन्दि- ). — ( L. 34 ) $T_1$ $G_3$ ब्राह्मणाः. — ( L. 35 ) $T_1$ धूमयान- ; $T_2$ $G_2$ $M_3$ धूम्रा( $M_3$ °मा )यन- ( for °यण- ). $G_{2.3}$ कांडा ; $M_{2.4}$ काण्वा ( for काण्ड- ). — ( L. 36 ) $G_1$ $M_3$ भार्गवा. $M_3$ याज्ञवल्काश्. $M_2$ -कृतस्. $G_2$ $M_4$ मांडव्याः ( $M_4$ °डेयाः ) काश्यपास्तथा ( for the post. half ). — ( L. 37 ) $G_3$ भरद्वाजकृताश्चैव ( for the prior half ). — ( L. 38 ) $T_1$ $G_{1.2}$ कणेशतृणबाह्वो( $T_1$ °ह्वे )श्च ; $T_2$ कण्वोश्च कुणिबाह्योश्च ; $G_3$ $M_3$ कुणेश्च कुणिबाह्यो( $M_3$ °वह्रो )श्च ( for the prior half ). — $G_1$ transp. lines 39 and 40. — ( L. 39 ) $G_1$ सुमंतुजैमिनीयाश्च ( for the prior half ). $G_2$ शकुनेयास् ; $G_3$ श्रुतसेनास्. — $M_3$ om. ( hapl. ) line 40. — ( L. 40 ) T $G_2$ पावनीयास् ; $M_2$ तावकीयास् ( for पाव° ). — ( L. 41 ) $M_2$ मोद्गल्याः. $G_3$ transp. मौद्गल्याः and शांडिल्याः. $G_3$ $M_4$ सौक्ष्मायि( $M_4$ °ग )नः ; $M_2$ सौक्ष्यभावनः ; Kumbh.

प्राजापत्यास्तथा याम्या माहेन्द्राश्च श्रुता मया ।
वैय्याघ्रा व्यासगीताश्च विभाण्डककृताश्च ये ।
नारदीयाः श्रुता धर्माः कापोताश्च श्रुता मया ।
तथा विदुरवाक्यानि भृगोरङ्गिरसस्तथा ।
क्रौञ्चा मृदङ्गगीताश्च सौर्या हारीतकाश्च ये ।
ये पिशङ्गकृताश्चापि कौतुपा हंसपालकाः ।
उद्दालककृता धर्मा औशनस्यास्तथैव च ।
वैशंपायनगीताश्च ये चान्येऽप्येवमादयः ।
एतेभ्यः सर्वधर्मेभ्यो देव त्वन्मुखनिःसृताः ।
पावनत्वात्पवित्रत्वाद्विशिष्टा इति मे मतिः ।
तस्माद्धि त्वां प्रपन्नस्य त्वद्भक्तस्य च भावतः ।
युष्मदीयान्वरान्धर्मान्पुण्यान्कथय मेऽच्युत ।

वैशंपायनः ।

एवं पृष्टस्तु धर्मज्ञो धर्मपुत्रेण केशवः ।
उवाच धर्मान्सूक्ष्मार्थान्धर्मपुत्रस्य हर्षितः ।
एवं ते यस्य कौन्तेय यत्नो धर्मेषु सुव्रत ।
त्वत्समो दुर्लभो लोके न कश्चिदिह विद्यते ।
धर्मः श्रुतो वा दृष्टो वा कथितो वा कृतोऽपि वा ।
अनुमोदितो वा राजेन्द्र पुनातीह नरं सदा ।
धर्मः पिता च माता च धर्मो नाथः सुहृत्तथा ।
धर्मो भ्राता सखा चैव धर्मः स्वामी परंतप ।
धर्मादर्थश्च कामश्च धर्माद्भोगाः सुखानि च ।
धर्मादैश्वर्यमेवाग्र्यं धर्मात्स्वर्गगतिः परा ।
धर्मो यः सेवितः शुद्धस्त्रायते महतो भयात् ।
धर्माद्द्विजत्वं देवत्वं धर्मः प्रापयते नरम् ।
यदा च क्षीयते पापं कालेन पुरुषस्य तु ।
तदा संजायते बुद्धिर्धर्मं कर्तुं युधिष्ठिर ।
जन्मान्तरसहस्रैस्तु मनुष्यत्वं हि दुर्लभम् ।
तद्गत्वापीह यो धर्मं न करोति स वञ्चितः ।
कुत्सिता ये दरिद्राश्च विरूपा व्याधितास्तथा ।
परप्रेष्याश्च मूर्खाश्च न तैर्धर्मः कृतः पुरा ।
ये च दीर्घायुषः शूराः पण्डिता भोगिनस्तथा ।
नीरोगा रूपसंपन्नास्तैर्धर्मः सुकृतः पुरा ।
एवं धर्मः कृतः शुद्धो नयते गतिमुत्तमाम् ।
अधर्मं सेवमानस्तु तिर्यग्योन्यां पतत्यसौ ।
इदं रहस्यं कौन्तेय शृणु धर्ममनुत्तमम् ।

---

and Madras eds. शलभायवाः ( for चैव पावनाः ). —( L. 42 ) M$_2$ वालखिल्य-. G$_3$ चैव ( for the first ये च ). T G$_1$ M$_3$ तथा ( for कृताः ). — ( L. 43 ) M$_2$ ये च ( for धर्माः ). — ( L. 44 ) M$_4$ यत् ( for च ). — ( L. 45 ) G$_3$ वैय्याघ्र-. T G$_1$ वैय्याघ्रा व्या( T$_1$ °घ्र्या व्या- ; G$_1$ °घ्रव्या )सकी- ( T$_2$ °गी )य्याश्च ; G$_2$ वैय्याघ्र्या व्यासिकीयाश्च ; M$_3$ वैय्याघ्रा व्यासकीयाश्च. T G$_{1.2}$ वैभीतक- ; MSS. विभंडक-. — ( L. 46 ) G$_3$ तथा ( for श्रुता ). G$_2$ कपोताश्च ; G$_3$ कापोतीयाः. — ( L. 47 ) G$_3$ -गीता च ( for -वाक्यानि ). T$_1$ G$_{2.3}$ अंगीरसस्. — ( L. 48 ) G$_3$ कौंच्यो ; M$_4$ क्रौंच्या. M$_{2.3}$ सौरा ( for सौर्या ). G$_3$ M$_4$ तथा ( for च ये ). — ( L. 49 ) G$_3$ M$_4$ पिंगवर्ण- ; M$_2$ पिशंगव- ( for ये पिशङ्ग- ). T$_2$ कौतमाहं सबालिकाः ; G$_1$ काठतापसपालकाः ; G$_2$ कातपासात्सपालकाः ; G$_3$ कौंतेयाः पांसुपालिकाः ; M$_2$ कांता वा पासलालकाः ; M$_3$ कांतालापासलालकाः ; M$_4$ क्रादपावत्सबालिकाः ; Kumbh. ed. कातपायाः सुवालकाः ; Madras ed. कौंतपाः पांसुवालकाः ( for the post. half ). —( L. 51 ) Kumbh. ed. आदितः ( for आदयः ). — ( L. 52 ) G$_1$ -मूलिकाः स्मृताः. — ( L. 53 ) T$_2$ G$_{1.2}$ पवित्रा ( for विशिष्टा ). — ( L. 54 ) M$_{2.3}$ त्वां तु ; M$_4$ हि त्वं ( for हि त्वां ). M$_2$ माधव ; Kumbh. ed. केशव ( for भावतः ). — ( L. 55 ) G$_3$ M$_{2.4}$ परान् ( for वरान् ). — G$_3$ om. the ref. — ( L. 56 ) G$_3$ M$_{2.4}$ उक्तस् ( for पृष्टस् ). G$_3$ M$_4$ माधवः ( for केशवः ). — ( L. 57 ) T$_1$ सूक्ष्मान् ( for धर्मान् ). G$_3$ M$_4$ धीमतः ( for हर्षितः ). — Before line 58, MSS. ins. श्रीभगवान्. — ( L. 59 ) G$_{1.2}$ M$_3$ तस्य ते ( M$_3$ मे ) ( for त्वत्समो ). M$_2$ न किंचिदुपपद्यते ( for the post. half ). — ( L. 61 ) G$_1$ [इ]व ( for [इ]ह ). G$_3$ M$_4$ सदा नरं ( by transp. ). Kumbh. ed. नयतींद्रपदं नरं ( for the post. half ). — ( L. 62 ) T G$_3$ M$_4$ धर्मोथ सुहृदस्तथा ( for the post. half ). — ( L. 63 ) T M$_2$ परंतपः. — ( L. 64 ) T धर्माधर्मश्च कामश्च ; G$_3$ धर्मादर्थं च कामं च ( for the prior half ). — ( L. 65 ) G$_3$ M$_4$ प्रभो ( for परा ). — ( L. 66 ) G$_3$ M$_4$ [ऽ]यं ( for यः ). G$_3$ तत्र ( for शुद्धस् ). — ( L. 67 ) G$_3$ M$_{2.4}$ द्विजत्वं देवतात्वं च ( for the prior half ). Kumbh. ed. पावयते ( for प्राप° ). T$_1$ परं ; T$_2$ G$_1$ नरः ( for नरम् ). — ( L. 68 ) G$_3$ M$_4$ यत् ( for च ). M$_4$ तत् ( for तु ). — ( L. 70 ) M$_{2.4}$ मानुषत्वं. M$_{2.3}$ ( *inf. lin.* ) लभ्यते ( for दुर्लभम् ). G$_3$ मानुष्यं त्वतिदुर्लभं ( for the post. half ). —( L. 71 ) G$_3$ M$_4$ लब्ध्वा ( for गत्वा ). Kumbh. ed. स्व- ( for स ). — ( L. 72 ) M$_4$ कुपिता ( for कुत्सिता ). T$_1$ च ( for ये ). G$_3$ M$_4$ च ये ( for तथा ). —( L. 73 ) Madras ed. -द्वेष्याश् ( for -प्रेष्याश् ). — ( L. 75 ) T$_1$ G$_1$ निरोग-. G$_3$ M$_4$ तैर्धर्माः सुकृताः पुरा ; M$_2$ तैश्च धर्मः कृतः पुरा ( for the post. half ). —( L. 76 ) T$_2$ G$_3$ M$_4$ सद्यो ( for शुद्धो ). — ( L. 77 ) M$_{2.4}$ अधर्मः. G$_3$ M$_{2.4}$ सेव्यमानस्. Kumbh. ed. अधर्मं सेवते यस्तु ( for the prior half ). G$_1$ तिर्यग्योनौ. G$_3$ M$_{2.4}$ तिर्यग्योनिं नयत्यसौ ( M$_4$ °मुं ) ( for the post. half ).

कथयिष्ये परं धर्मं मम भक्तस्य पाण्डव ।
इष्टस्त्वमसि मेऽत्यर्थं प्रपन्नश्चापि मां सदा । [ 80 ]
परमार्थमपि ब्रूमः किं पुनर्धर्मसंहिताम् ।
इदं मे मानुषं जन्म कृतमात्मनि मायया ।
धर्मसंस्थापनार्थाय दुष्टानां शासनाय च ।
मानुष्यं भावमापन्नं ये मां गृह्णन्त्यवज्ञया ।
संसरन्तीह ते मूढास्तिर्यग्योनिष्वनेकशः । [ 85 ]
ये च मां सर्वभूतस्थं पश्यन्ति ज्ञानचक्षुषा ।
मद्भक्तांस्तान्सदा युक्तान्मत्समीपं नयाम्यहम् ।
मद्भक्ता न विनश्यन्ति मद्भक्ता वीतकल्मषाः ।
मद्भक्तानां तु मानुष्ये सफलं जन्म पाण्डव ।
अपि पापेष्वभिरता मद्भक्ताः पाण्डुनन्दन । [ 90 ]
मुच्यन्ते पापकैः सर्वैः पद्मपत्रमिवाम्भसा ।
जन्मान्तरसहस्रेषु तपसा भावितात्मनाम् ।
भक्तिरुत्पद्यते तात मनुष्याणां न संशयः ।
यच्च रूपं परं गुह्यं कूटस्थमचलं ध्रुवम् ।
न दृश्यते तथा देवैर्मद्भक्तैर्दृश्यते यथा । [ 95 ]
अपरं यच्च मे रूपं प्रादुर्भावेषु दृश्यते ।
तदर्चयन्ति सर्वार्थैः सर्वभूतानि पाण्डव ।
कल्पकोटिसहस्रेषु व्यतीतेष्वागतेषु च ।
दर्शयामीह तद्रूपं तत्प्रपश्यन्ति मे सुराः ।
स्थित्युत्पत्तिव्ययकरं यो मां ज्ञात्वा प्रपद्यते । [ 100 ]
अनुगृह्णाम्यहं तं वै संसारान्मोचयामि च ।
अहमादिर्हि देवानां सृष्टा ब्रह्मादयो मया ।
प्रकृतिं स्वामवष्टभ्य जगत्सर्वं सृजाम्यहम् ।
तमोमूलोऽहमव्यक्तो रजो मध्ये प्रतिष्ठितः ।
ऊर्ध्वं सत्त्वविशालोऽहं ब्रह्मादिस्तम्बसंज्ञितः । [ 105 ]
मूर्धानं मे दिवं विद्धि चन्द्रादित्यौ च लोचने ।
देवाग्निर्ब्राह्मणा वक्त्रं मारुतः श्वसनश्च मे ।
दिशो मे बाहवश्चाष्टौ नक्षत्राणि च भूषणम् ।
अन्तरिक्षमुरो विद्धि सर्वभूतावकाशकम् ।
मार्गौ मेघानिलाभ्यां तु यन्ममोदरमव्ययम् । [ 110 ]
पृथिवीमण्डलं यद्वै द्वीपार्णवनगैर्युतम् ।
सर्वसंधारणोपेतं पादौ मम युधिष्ठिर ।
स्थितो ह्येकगुणः खेऽहं द्विगुणश्चास्मि मारुते ।
त्रिगुणोऽग्नौ स्थितोऽहं वै सलिले तु चतुर्गुणः ।
शब्दाद्या ये गुणाः पञ्च महाभूतेषु पञ्चसु । [ 115 ]
तन्मात्रसंस्थितः सोऽहं पृथिव्यां पञ्चधा स्थितः ।
अहं सहस्रशीर्षस्तु सहस्रवदनेक्षणः ।
सहस्रबाहूदरदृक् सहस्रोरुः सहस्रपात् ।
धृत्वोर्वीं सर्वतः सम्यगत्यतिष्ठद्दशाङ्गुलम् ।
सर्वभूतात्मभूतस्थः सर्वव्यापी ततो ह्यहम् । [ 120 ]

---

— ( L. 78 ) $G_3$ $M_{2.4}$ श्रूयतामिद( $M_2$ °तां धर्मं )मुत्तमं ( for the post. half ). — ( L. 79 ) $G_3$ $M_{2.4}$ गुह्यं ( for धर्मं ). $G_2$ $M_{2.3}$ तव ( for मम ). — ( L. 80 ) T हृष्टस् ( for इष्टस् ). $M_3$ अपि ( for असि ). $M_2$ मेत्येवं ( for मेऽत्यर्थं ). $G_{1.3}$ $M_4$ चासि ( for चापि ). — ( L. 81 ) $M_{2.4}$ ब्रूयां. — ( L. 83 ) $M_{2.4}$ धर्मसंस्थापनायैव. — ( L. 84 ) $G_3$ न मां गृह्णंति ये नराः ( for the post. half ). — ( L. 85 ) $T_2$ $G_2$ $M_2$ हि ( for [इ]ह ). Kumbh. ed. संसारान्तर्हि ते मूढास् ( for the prior half ). — ( L. 86 ) Madras ed. ज्ञानचक्षुषः. — ( L. 87 ) $M_4$ तु ( for तान् ). $G_3$ मुदा ; $M_2$ तदा ( for सदा ). — ( L. 91 ) Kumbh. and Madras eds. पातकैः ( for पापकैः ). $M_4$ मुंच्यंते सर्वपापेभ्यः. — ( L. 92 ) $M_4$ -सहस्रेस्तु ( for °स्रेषु ). $G_3$ भावितात्मनः. — ( L. 93 ) $G_3$ $M_4$ मद्भक्तिर्विंद्यते तात ( for the prior half ). $G_3$ $M_2$ मानुषाणां. — ( L. 97 ) $G_{1.2}$ सर्वार्थे. $G_3$ -भूताश्च ; $M_4$ -भूतैश्च- ( sic ) ( for -भूतानि ). — ( L. 98 ) $T_1$ $G_2$ [आ]गमेषु. — ( L. 99 ) $M_2$ [इ]ति ; $M_3$ च ; $M_4$ तु ( for [इ]ह ). T $G_{1.2}$ च ( for प्र- ). — ( L. 100 ) $G_3$ $M_4$ -प्लवकरं ( for -व्यय° ). $M_2$ सृष्टिस्थितिलये हेतुं ; Kumbh. ed. स्थित्युत्पत्यव्ययकरं ( for the prior half ). — ( L. 101 ) $T_1$ तद् ( sic ) ( for तं ). — ( L. 102 ) $T_1$ भूतानां ( for देवानां ). $T_2$ स्रष्टा. $G_1$ [ऽ]मराः ( for मया ). — ( L. 104 ) $G_1$ तमोमूर्खो ( sic ) ( for °मूलो ). $G_3$ अव्यक्तं. $G_3$ $M_4$ मध्यः ; $M_2$ मध्यात्. — ( L. 105 ) $M_4$ ऊर्ध्वं-. Kumbh. ed. ऊर्ध्वं सत्त्वं विना लोभं ( for the prior half ). $T_1$ $G_1$ $M_4$ -संज्ञितं ; Kumbh. ed. -पर्यंतः. — ( L. 107 ) T $G_{1.2}$ गावोग्निर् ; $M_2$ वेदाग्निर् ( for देवाग्निर् ). Kumbh. ed. ब्राह्मणो. $G_3$ $M_4$ मरुतः. $T_1$ $G_3$ $M_2$ श्वसनं. — ( L. 108 ) $G_3$ $M_{3.4}$ वि- ( for च ). — ( L. 109 ) $G_3$ $M_4$ सर्वभूतप्रकाशकं ( for the post. half ). — ( L. 111 ) $M_2$ चितं ( for युतम् ). — ( L. 112 ) $M_2$ सर्वसंधारणैर्युक्तं ( for the prior half ). — ( L. 114 ) $M_2$ ह ( for तु ). — ( L. 115 ) $M_2$ शब्दादयो ( for °द्या ये ). — ( L. 116 ) $M_2$ -संज्ञकः ( for -संस्थितः ). $G_1$ च ( for सो ). $T_1$ स्मृतः ( for स्थितः ). — ( L. 117 ) $G_3$ $M_4$ सहस्रचरणेक्षणः ( for the post. half ). — ( L. 118 ) $T_1$ -धृत् ; $M_2$ -वृत् ; $M_4$ -भृत् ; Kumbh. ed. -धृक् ( for -दृक् ). $G_3$ $M_4$ सहस्राक्षः ( for सहस्रोरुः ). — ( L. 119 ) $T_1$ $G_3$ धृतोर्वीं ; $G_1$ धृत्वाद्रिं ; $G_2$ धृत्वाद्रीन्. Kumbh. ed. अत्यतिष्ठं ( for अत्यतिष्ठद् ). — ( L. 120 ) $G_3$ नरो ( for ततो ). $T_1$ $G_{1.2}$ [ऽ]सि ( for हि ). — ( L. 121 ) $T_2$ संचिंत्यो ; $G_3$

अचिन्त्योऽहमनन्तोऽहमजरोऽहमजो ह्यहम् ।
अनद्योऽहमवध्योऽहमप्रमेयोऽहमव्ययः ।
निर्गुणोऽहमगूढात्मा निर्द्वंद्वो निर्ममो नृप ।
निष्कलो निर्विकारोऽहं निदानममृतस्य तु ।
सुधा चाहं स्वधा चाहं स्वाहा चाहं नराधिप । [ 125 ]
तेजसा तपसा चाहं भूतग्रामं चतुर्विधम् ।
स्नेहपाशगुणैर्बद्ध्वा धारयाम्यात्ममायया ।
चतुराश्रमधर्मोऽहं चातुर्होत्रफलाशनः ।
चतुर्मूर्तिश्चतुर्व्यूहश्चतुराश्रमभावनः ।
संहृत्याहं जगत्सर्वं कृत्वा वै गर्भमात्मनः । [ 130 ]
शयामि दिव्ययोगेन प्रलयेषु युधिष्ठिर ।
सहस्रयुगपर्यन्तां ब्राह्मीं रात्रिं महार्णवे ।
स्थित्वा सृजामि भूतानि जङ्गमानि स्थिराणि च ।
कल्पे कल्पे च भूतानि संहरामि सृजामि च ।
न च मां तानि जानन्ति मायया मोहितानि मे । [ 135 ]
मम चैवान्धकारस्य मार्गितव्यस्य नित्यशः ।
प्रशान्तस्येव दीपस्य गतिर्नैवोपलभ्यते ।
न तदस्ति क्वचिद्राजन्यत्राहं न प्रतिष्ठितः ।
न च तद्विद्यते भूतं मयि यन्न प्रतिष्ठितम् ।
यावन्मात्रं भवेद्भूतं स्थूलं सूक्ष्ममिदं जगत् । [ 140 ]
जीवभूतो ह्यहं तस्मिंस्तावन्मात्रं प्रतिष्ठितम् ।
किं चात्र बहुनोक्तेन सत्यमेव ब्रवीमि ते ।
यद्भूतं यद्भविष्यच्च तत्सर्वमहमेव तु ।
मया सृष्टानि भूतानि मन्मयानि च भारत ।
मामेव न विजानन्ति मायया मोहितानि मे । [ 145 ]
एवं सर्वं जगदिदं सदेवासुरमानुषम् ।
मत्तः प्रभवते राजन्मय्येव प्रविलीयते ।

Colophon.

वैशंपायन उवाच ।

एवमात्मोद्भवं सर्वं जगदुद्दिश्य केशवः ।
धर्मान्धर्मात्मजस्याथ पुण्यानकथयत्प्रभुः ।

भगवानुवाच ।

शृणु पाण्डव तत्त्वेन पवित्रं पापनाशनम् । [ 150 ]
कथ्यमानं मया पुण्यं धर्मशास्त्रफलं महत् ।
यः शृणोति शुचिर्भूत्वा एकचित्तस्तपोयुतः ।
स्वर्ग्यं यशस्यमायुष्यं धर्म्यं ज्ञेयं युधिष्ठिर ।
श्रद्दधानस्य तस्येह यत्पापं पूर्वसंचितम् ।
विनश्यत्याशु तत्सर्वं मद्भक्तस्य विशेषतः । [ 155 ]

वैशंपायन उवाच ।

एवं श्रुत्वा वचः पुण्यं सत्यं केशवभाषितम् ।

---

अनंतो (for अचिन्त्यो). $G_3$ अनाथो (for अनन्तो). T $G_3$ अचलो (for अजरो). $G_2$ [ऽ]स्मि (for हि). —(L. 122) Kumbh. and Madras eds. अनाद्यो (for अनद्यो). —(L. 123) $G_3$ $M_{2-4}$ निगूढात्मा (for अगू°). $G_3$ नित्योहं (for निर्द्वंद्वो). $G_3$ $M_4$ [ऽ]पि च (for नृप). —(L. 124) $G_3$ $M_{2.4}$ निर्द्वंद्वो (for निष्कलो). Some MSS. निधानम्. $G_3$ $M_4$ चामृतस्य च (for अमृतस्य तु). —(L. 125) $G_3$ $M_{2.4}$ transp. सुधा and स्वधा. $G_3$ गृहं (for the first चाहं). $G_3$ $M_4$ स्वाहाकारं ($M_4$ °रो) (for स्वाहा चाहं). —(L. 127) $T_1$ स्नेहपाशैर्; $T_2$ $G_1$ °पाशं. —(L. 128) Kumbh. and Madras eds. चातुराश्रम- (for च°). $T_1$ $G_3$ चतुर्होत्र-. $G_3$ -फलाशकः. —(L. 129) $M_{2.3}$ चतुर्बाहुश्; Kumbh. ed. °र्यज्ञश् (for °र्व्यूहश्). $M_{2.3}$ चातुराश्रम- (for च°). $T_2$ $G_3$ $M_4$ -भाजनं ($M_4$ °नः) (for -भावनः). —(L. 130) $G_3$ संस्कृत्याहं. $M_{2.3}$ (*inf. lin.*) गर्भस्थम् (for वै गर्भम्). —(L. 131) $G_1$ प्रमेयेषु (for प्रल°). —(L. 132) $G_3$ $M_2$ -पर्यंतं. $G_1$ रात्रीं; $M_3$ रात्रिर्. $G_3$ ब्राह्मी रात्रिर्महाह्वे (for the post. half). —(L. 133) $G_3$ स्थितः (for स्थित्वा). —(L. 135) $G_3$ हि; $M_4$ ह (for मे). —(L. 136) $G_3$ दैवांधकारस्य (for चैवान्ध°). —(L. 137) $M_3$ (*inf. lin.*) निर्वाणस्य (for प्रशान्तस्य). $M_2$ -लक्ष्यते (for -लभ्यते). —(L. 138) $G_3$ नाहं (for राजन्). $G_3$ यत्र राजन्; $M_4$ यत्र नाहं (for यत्राहं न). —(L 139) $G_3$ मया (for मयि). —(L. 140) Kumbh. ed. मित्रं (for मात्रं). $G_3$ शरीरं हि (for भवेद्भूतं). $G_3$ $M_4$ स्थूल-. $G_3$ कृतं; $M_4$ क्वचित् (for जगत्). —(L. 141) $G_2$ प्रतिष्ठितः. $M_4$ तावन्मात्रः प्रतिष्ठितः (for the post. half). —(L. 142) $G_3$ $M_{2.4}$ एतद् (for एव). —(L. 143) $G_3$ $M_4$ भविष्यं तु; $M_2$ °ष्यं वा (for °ष्यच्च). —(L. 144) $G_3$ $M_4$ पांडव (for भारत). — Colophon. — *Sub-parvan :* $M_2$ वैष्णवधर्मे. — *Adhy. name :* $T_2$ $G_{1.2}$ $M_3$ भगवत्तत्त्वकथनं. — *Adhy. no.:* $T_1$ $G_3$ $M_4$ 84; $T_2$ $G_{1.2}$ 83; $M_2$ 1; $M_4$ (*inf. lin.*) 99. —(L. 149) $T_2$ $G_3$ [ए]व; $M_{2.4}$ [इ]ह (for [अ]थ). $G_3$ $M_2$ स्वयं; $M_3$ (*sup. lin.*) स ह (for प्रभुः). —(L. 150) $M_2$ सत्येन (for तत्त्वेन). $M_2$ पवित्रं पावनं परं (for the post. half). —(L. 152) $M_{2.3}$ तपोमयः (for °युतः). —(L. 153) T धर्मज्ञेयं; $G_3$ धर्म्यं ज्ञानं; $M_{2.3}$ धर्मज्ञानं; Madras ed. धर्मे ज्ञेयं (for धर्म्यं ज्ञेयं). —(L. 154) $T_1$ सर्व- (for पूर्व-). — $G_3$ $M_4$ om. the ref. —(L. 156) $M_4$ तस्य (for पुण्यं). $M_4$ om. from the post. half up to the prior half

प्रहृष्टमनसो भूत्वा चिन्तयन्तोऽद्भुतं परम् ।
देवा ब्रह्मर्षयः सर्वे गन्धर्वाप्सरसस्तथा ।
भूता यक्षग्रहाश्चैव गुह्यका भुजगास्तथा ।
वालखिल्या महात्मानो योगिनस्तत्त्वदर्शिनः ।
तथा भागवताश्चापि पञ्चकालमुपासकाः ।
कौतूहलसमायुक्ताः प्रहृष्टेन्द्रियमानसाः ।
श्रोतुकामाः परं धर्मं वैष्णवं धर्मशासनात् ।
हृदि कर्तुं च तद्वाक्यं प्रणेमुः शिरसा नताः ।
ततस्ते वासुदेवेन दृष्टाः सौम्येन चक्षुषा ।
विमुक्तपापानालोक्य प्रणम्य शिरसा हरिम् ।
पप्रच्छ केशवं धर्मं धर्मपुत्रः प्रतापवान् ।
कीदृशी ब्राह्मणस्याथ क्षत्रियस्यापि कीदृशी ।
वैश्यस्य कीदृशी देव गतिः शूद्रस्य कीदृशी ।
कथं बध्येत पाशेन ब्राह्मणस्तु यमालये ।
क्षत्रियो वाथ वैश्यो वा शूद्रो वा बध्यते कथम् ।
एतत्कर्मफलं ब्रूहि लोकनाथ नमोऽस्तु ते ।

वैशंपायन उवाच ।

पृष्टोऽथ केशवो ह्येवं धर्मपुत्रेण धीमता ।
उवाच संसारगतिं चातुर्वर्ण्यस्य कर्मजाम् ।

भगवानुवाच ।

शृणु वर्णक्रमेणैव धर्मं धर्मभृतां वर ।
नास्ति किंचिन्नरश्रेष्ठ दुष्कृतं ब्राह्मणस्य तु ।
ये स्थिताः स्युः सदाध्यात्मे संध्यां ये चाप्युपासते ।
यैश्च पूर्णाहुतिः प्राप्ता विधिवज्जुह्वते च ये ।
वैश्वदेवं च ये कुर्युः पूजयन्त्यतिथींश्च ये ।
नित्यं स्वाध्यायशीलाश्च जपयज्ञपराश्च ये ।
सायंप्रातर्हुताशाश्च शूद्रभोजनवर्जिताः ।
डम्भानृतविमुक्ताश्च स्वदारनिरताश्च ये ।
पञ्चयज्ञरता ये च येऽग्निहोत्रमुपासते ।
दहन्ति दुष्कृतं येषां हूयमानाग्नयस्त्रयः ।
नष्टदुष्कृतकर्माणो ब्रह्मलोकं व्रजन्ति ते ।
ब्रह्मलोके पुनः कामं गन्धर्वैर्ब्रह्मगायकैः ।
उद्गीयमानाः प्रयतैः पूज्यमानाः स्वयंभुवा ।
ब्रह्मलोके प्रमोदन्ते यावदाभूतसंप्लवम् ।
क्षत्रियोऽपि स्थितो राज्ये स्वधर्मपरिपालकः ।
सम्यक्प्रजाः पालयिता षड्भागनिरतः सदा ।
यज्ञदानरतो धीरः स्वदारनिरतः सदा ।
शास्त्रानुसारी तत्त्वज्ञः प्रजाकार्यपरायणः ।
विप्रेभ्यः कामदो नित्यं भृत्यानां भरणे रतः ।

---

of line 159. $M_2$ पुण्यं ( for सत्यं ). — ( L. 158 ) $T_1$ देव- ( for देवा ). — ( L. 159 ) $G_1$ $M_{2.3}$ यक्षा. $G_3$ भूतयक्षग्रहगणा ( for the prior half ). — ( L. 160 ) $M_2$ बालखिल्या. — ( L. 161 ) $G_2$ यथा ( for तथा ). — ( L. 162 ) $G_3$ $M_4$ -समाविष्टाः. $G_3$ $M_4$ प्रहृष्टाः परमर्षयः ( for the post. half ). — ( L. 164 ) $G_3$ $M_4$ तदा ( for नताः ). — ( L. 165 ) $T_1$ $M_2$ तान् ( for ते ). T $M_2$ दृष्टान् ( for दृष्टाः ). Kumbh. ed. दिव्येन ( for सौम्येन ). — ( L. 166 ) $M_4$ विनष्ट- ( for विमुक्त- ). $G_3$ -पापाश्च ( for -पापान् ). $G_3$ $M_4$ प्रणेमुः ( for प्रणम्य ). — ( L. 167 ) $G_3$ $M_{2-4}$ धर्मान् ( for धर्मं ). — Before line 168, MSS. ins. युधिष्ठिर उवाच. — ( L. 168 ) $M_4$ [अ]पि ( for [अ]थ ). $G_3$ $M_4$ कीदृशी क्षत्रियस्य वै ( for the post. half ). — ( L. 169 ) $T_1$ सदृशी ( for the first कीदृशी ). — ( L. 170 ) $M_4$ बद्धस्तु ( for बध्येत ). $G_3$ $M_4$ पापेन ( for पाशेन ). — ( L. 171 ) $T_2$ $G_3$ विद्यते; $M_2$ बाध्यते ( for ब° ). — ( L. 172 ) $G_3$ $M_{2.4}$ एतत्कथय देवेश ( for the prior half ). — $G_3$ om. the ref. — ( L. 173 ) $G_3$ $M_4$ स पृष्टः केशवश्चैवं ( for the prior half ). — ( L. 174 ) $G_2$ $M_3$ संस्कार- ( for संसार- ). T G $M_3$ चातुर्वर्णस्य. — ( L. 175 ) $G_3$ सर्वाश्रमेण ( for वर्णक्र° ). $G_3$ $M_4$ [ए]वं. $M_{2.3}$ धर्मान् ( for धर्मं ). — ( L. 176 ) $G_3$ $M_{2.4}$ ब्राह्मणस्य तु दुष्कृतं ( for the prior half ). — After line 176, $M_2$ ins. :

पञ्चयज्ञरतस्याथ नित्यं संध्योपसेविनः ।

— ( L. 177 ) $M_2$ ध्याने ( for [अ]ध्यात्मे ). T $G_{1.2}$ $M_3$ नित्यय( $T_1$ नित्यं य- ; $G_1$ शिखाय )ज्ञोपवीतः ( $T_2$ $G_1$ °ती ) स्यात् ( for the prior half ). — ( L. 178 ) $G_2$ $M_4$ ये ( for यैश् ). T G पूर्णाहुतिं. $T_1$ $G_{1.3}$ प्राप्त- ; $M_4$ प्राप्तं. $T_1$ वै ( for ये ). — ( L. 179 ) $G_2$ चक्रुः ( for कुर्युः ). — ( L 180 ) $G_3$ $M_4$ पंच- ( for जप- ). $G_3$ $M_4$ -परायणाः ; $M_{2.3}$ -रताश्च ये ( for -पराश्च ये ). — ( L. 182 ) $T_1$ -वियुक्ताश्च ; $M_4$ -विनिर्मुक्ताः ( for -विमुक्ताश्च ). $G_3$ $M_{2.4}$ सदा ( for च ये ). — ( L 183 ) $G_2$ $M_4$ -परा ( for -रता ). $G_3$ $M_{2.4}$ चैव ( for ये च ). $M_2$ om. the second ये. — $G_3$ om. line 184. — ( L. 184 ) $M_2$ दहकं ( for दहन्ति ). $M_4$ तेषां ( for येषां ). $G_1$ हूयमानास्त्रयोग्नयः. — ( L. 186 ) $G_3$ $M_4$ ततः ; $M_2$ चिरं ( for पुनः ). $M_2$ कालं ( for कामं ). $M_4$ -गायनैः ( for °कैः ). — ( L. 187 ) $G_3$ $M_{2.4}$ उपगीयमानाः ( hypermetric ) ( for उद्गीय° ). — ( L. 189 ) T $G_1$ स्थिते. $G_3$ $M_4$ स्वधर्मं परिपालयन् ( for the post. half ). — ( L. 190 ) $G_3$ पालयति ; $M_4$ °यित्वा ( for °यिता ). $G_3$ $M_4$ स्वधर्म- ( for षड्भाग- ). — ( L. 192 ) $M_4$ शास्त्रानुकारी.

सत्यसंधः शुचिर्नित्यं लोभडम्भविवर्जितः ।
क्षत्रियोऽप्युत्तमां याति गतिं देवनिषेविताम् । [ 195 ]
तत्र दिव्याप्सरोभिस्तु गन्धर्वैश्च विशेषतः ।
सेव्यमानो महातेजाः क्रीडते शक्रपूजितः ।
चतुर्युगानि वै त्रिंशत्क्रीडित्वा तत्र देववत् ।
इह मानुषलोके तु चतुर्वेदी द्विजो भवेत् ।
कृषिगोपालनिरतो धर्मान्वेषणतत्परः । [ 200 ]
दानधर्मेऽपि निरतो विप्रशुश्रूषकस्तथा ।
सत्यसंधः शुचिर्नित्यं लोभडम्भविवर्जितः ।
ऋजुः स्वदारनिरतो हिंसाद्रोहविवर्जितः ।
वणिग्धर्माननुञ्जन्वै देवब्राह्मणपूजकः ।
वैश्यः स्वर्गतिमाप्नोति पूज्यमानोऽप्सरोगणैः । [ 205 ]
चतुर्युगानि वै त्रिंशत्क्रीडित्वा दश पञ्च च ।
इह मानुष्यलोके च राजा भवति वीर्यवान् ।
सुवर्णकोट्यः पञ्चाशद्रत्नानां च शतं तथा ।
हस्त्यश्वरथसंयुक्तान्महाभोगांश्च सेवते ।
त्रयाणामपि वर्णानां शुश्रूषानिरतः सदा । [ 210 ]
विशेषतस्तु विप्राणां दासवद्यस्तु तिष्ठति ।
अयाचितप्रदाता च सत्यशौचसमन्वितः ।
गुरुदेवार्चनरतः परदारविवर्जितः ।
परपीडामकृत्वैव भृत्यवर्गं बिभर्ति यः ।
शूद्रोऽपि स्वर्गमाप्नोति जीवानामभयप्रदः । [ 215 ]
स स्वर्गलोके क्रीडित्वा वर्षकोटिं महातपाः ।
इह मानुषलोके तु वैश्यो धनपतिर्भवेत् ।
एवं धर्मात्परं नास्ति महत्संसारमोक्षणम् ।
न च धर्मात्परं किंचित्पापकर्मव्यपोहनम् ।
तस्माद्धर्मः सदा कार्यो मानुष्यं प्राप्य दुर्लभम् । [ 220 ]
न हि धर्मानुरक्तानां लोके किंचिन्न दुर्लभम् ।
स्वयंभुविहितो धर्मो यो यस्येह नरेश्वर ।
स तेन क्षपयेत्पापं सम्यगाचरितेन च ।
सहजं यद्भवेत्कर्म न तत्त्याज्यं हि केनचित् ।
स एव तस्य धर्मो हि तेन सिद्धिं स गच्छति । [ 225 ]
विगुणोऽपि स्वधर्मस्तु पापकर्म व्यपोहति ।
एवमेव तु धर्मोऽपि क्षीयते पापवर्धनात् ।

युधिष्ठिर उवाच ।

भगवन्देवदेवेश श्रोतुं कौतूहलं हि मे ।
शुभस्याप्यशुभस्यापि क्षयवृद्धी यथाक्रमम् ।

भगवानुवाच ।

शृणु पार्थिव तत्सर्वं धर्मं सूक्ष्मं सनातनम् । [ 230 ]
दुर्विज्ञेयतमं नित्यमत्र भग्ना महाजनाः ।
यथैव शीतमुदकमुष्णेन बहुनावृतम् ।
भवेत्तु तत्क्षणादुष्णं शीतत्वं च विनश्यति ।
यथोष्णं वा भवेदल्पं शीतेन बहुनावृतम् ।
शीतलं तद्भवेत्सर्वमुष्णत्वं च विनश्यति । [ 235 ]
एवं तु यद्भवेद्भूरि सुकृतं वाथ दुष्कृतम् ।
तदल्पं क्षपयेच्छीघ्रं नात्र कार्या विचारणा ।

---

— ( L. 194 ) $T_1$ -दंभ- ( for -डम्भ ). — After line 194, $M_2$ ins. :

क्षत्रधर्मरतः शूरो देवब्राह्मणपूजकः ।

— ( L. 195 ) $T_1$ गतिं देवर्षिसेवितां ( for the post. half ). — ( L. 196 ) $M_2$ दिव्योप्सरोभिस्. $M_4$ च ( for तु ). — ( L. 198 ) $M_4$ दिवि ( for तत्र ). — ( L. 199 ) T $G_2$ $M_3$ मानुष्य- ( for °ष- ). $G_3$ इह मानुष्यके लोके ( for the prior half ). $G_3$ चतुर्वेदविदो भवेत् ( for the post. half ). — ( L. 200 ) $M_2$ कृषिर्वणिज्या गोपाल्यं ( for the prior half ) $G_3$ $M_{2.4}$ स्वधर्मान्वेषणे रतः ( for the post. half ). — ( L. 201 ) $G_3$ $M_{2.4}$ दानधर्मेष्वभिरतो ( for the prior half ). $G_2$ $M_2$ -शुश्रूपणस्; $G_3$ °णे. $G_3$ रतः ( for तथा ). — ( L. 202 ) $G_3$ डंभलोभ-. — $G_3$ om. ( hapl. ) line 203. — ( L. 203 ) $M_4$ हिंस्रो ( sic ) ( for हिंसा- ). — ( L. 204 ) $G_3$ $M_2$ वणिग्धर्मम्. — ( L. 205 ) $G_3$ $M_2$ वणिक्स्व( $M_2$ वैश्यः स्व )र्गमवाप्नोति ; $M_4$ वणिक्च स्वर्गमा° ( for the prior half ). — ( L. 207 ) $G_3$ $M_{2.4}$ इह मानुष्यके लोके ( $M_4$ राजन् ). — $G_3$ $M_4$ om. lines 208–209. — ( L. 208 ) $G_{1.2}$ $M_{2.3}$ सुवर्णकोट्याः. — ( L. 211 ) $G_3$ $M_{2.4}$ विशेषेण ( for °षतस् ). $M_4$ [इ]त्र ( for तु ). — ( L. 212 ) $G_3$ नित्यं ( for सत्य- ). — ( L. 213 ) $M_4$ -रतिः ( for -रतः ). — ( L. 216 ) $G_1$ $M_{2.4}$ वर्षकोटीर्. — ( L. 217 ) $G_3$ $M_{2.4}$ इह मानुष्यके लोके ( for the prior half ). — ( L. 218 ) $G_3$ कर्म ( for महत् ). — $G_3$ om. ( hapl. ) line 221. — ( L. 222 ) $G_3$ हि ( for [इ]ह ). — ( L. 223 ) $G_3$ हि ; $M_2$ ह ( for च ). — ( L. 224 ) $M_2$ च ( for तत् ). — ( L. 226 ) T निर्गुणो ( for विगुणो ). — $G_3$ om. line 227. — ( L. 227 ) $T_1$ धर्मेण ( for धर्मोऽपि ). $T_1$ $G_2$ -कर्मणः ; $T_2$ -सेवनात् ( for -वर्धनात् ). — ( L. 228 ) T परं ( for श्रोतुं ). — ( L. 229 ) $T_2$ G $M_2$ -वृद्धिर्. — ( L. 230 ) $M_{2.4}$ पांडव ( for पार्थिव ). — ( L. 231 ) $T_2$ अप्रभग्ना ; $G_3$ इति भग्ना ; $M_4$ मतिभिन्ना ( for अत्र भग्ना ). $T_1$ मम भक्तैर्महात्मभिः ( for the post. half ). — ( L. 234 ) T $G_1$ यदोष्णं. — ( L. 235 ) $G_3$ $M_4$ शीतत्वं ( for °लं ). $G_3$ न ; $M_2$ तु ; $M_4$ च ( for तद् ). — ( L. 237 ) $G_3$

समत्वे सति राजेन्द्र तयोः सुकृतपापयोः ।
गूहितस्य भवेद्वृद्धिः कीर्तितस्य भवेत्क्षयः ।
ख्यापनेनानुतापेन प्रायः पापं विनश्यति । [ 240 ]
तथा कृतस्तु राजेन्द्र धर्मो नश्यति मानद ।
तावुभौ गूहितौ सम्यग्वृद्धिं यातौ न संशयः ।
तस्मात्सर्वप्रयत्नेन न पापं गूहयेद्बुधः ।
तस्मादेतत्प्रयत्नेन कीर्तयेत्क्षयकारणात् ।
तस्मात्संकीर्तयेत्पापं सत्यं धर्मं च गूहयेत् । [ 245 ]

### Colophon.

वैशंपायन उवाच ।

एवं श्रुत्वा वचस्तस्य धर्मपुत्रोऽच्युतस्य तु ।
पप्रच्छ पुनरप्यन्यान्धर्मान्धर्मात्मजो हरिम् ।

युधिष्ठिर उवाच ।

वृथा च कति जन्मानि वृथा दानानि यानि च ।
वृथा च जीवितं केषां नराणां पुरुषोत्तम ।
कीदृशासु व्यवस्थासु दानं दत्तं जनार्दन । [ 250 ]
इह लोकेऽनुभवति पुरुषः पुरुषोत्तम ।
गर्भस्थे किं समश्नाति किं बाल्ये वापि केशव ।
यौवनस्थेऽपि किं कृष्ण वार्धके वापि किं भवेत् ।
सात्त्विकं कीदृशं दानं राजसं कीदृशं भवेत् ।
तामसं कीदृशं देव तर्पयिष्यति किं प्रभो । [ 255 ]
उत्तमं कीदृशं दानं मध्यमं कीदृशं भवेत् ।
अधमं कीदृशं दानं तेषां वा वद किं फलम् ।
किं दानं नयति ह्यूर्ध्वं किं गतिं मध्यमां भवेत् ।
गतिं जघन्यामथ वा देवदेव ब्रवीहि मे ।
एतदिच्छामि विज्ञातुं परं कौतूहलं हि मे । [ 260 ]
त्वदीयं वचनं सत्यं पुण्यं च मधुसूदन ।

वैशंपायन उवाच ।

एवं धर्मं प्रयत्नेन पृष्टः पाण्डुसुतेन वै ।
उवाच वासुदेवोऽथ धर्मान्धर्मात्मजस्य च ।
शृणु राजन्यथान्यायं वचनं तथ्यमुत्तमम् ।
कथ्यमानं मया पुण्यं सर्वपापव्यपोहनम् । [ 265 ]
वृथा च दश जन्मानि चत्वारि च नराधिप ।
वृथा दानानि पञ्चाशत्पञ्चैव च यथाक्रमम् ।
वृथा च जीवितं येषां ते च षट् परिकीर्तिताः ।
अनुक्रमेण सर्वाणि तानि वक्ष्यामि पार्थिव ।
धर्मघ्नानां वृथा जन्म लुब्धानां पापिनां तथा । [ 270 ]
वृथा पाकं च येऽश्नन्ति परदाररताश्च ये ।
पाकभेदकरा ये च ये च स्युः सत्यवर्जिताः ।
मृष्टमश्नाति यश्चैको दृश्यमानस्तु बान्धवैः ।
पितरं मातरं चैव उपाध्यायं गुरुं तथा ।
मातुलं मातुलानीं च यो निहन्याच्छपेत वा । [ 275 ]

---

क्षायते ( for क्षपयेत् ). — ( L. 238 ) $G_3$ स च ( for सति ). — ( L. 239 ) $M_4$ गृहीतस्य ( for गूहि° ). — ( L. 241 ) $G_3$ $M_4$ भारत ; $M_2$ मानव ( for °द ). — ( L. 244 ) $M_2$ यस्मादेनं ( for तस्मादेतत् ). $G_3$ $M_4$ कीर्तनं क्षयकारकं ; $M_2$ कीर्तिता क्षयकारिणः ( for the post. half ). — ( L. 245 ) $G_3$ $M_4$ नित्यं ( for सत्यं ). $T_1$ सम्यग्धर्मं निगूहयेत् ( for the post. half ). — Colophon. — *Sub-parvan :* T $G_1$ $M_{2-4}$ वैष्णवधर्म. — *Adhy. name :* T $G_1$ $M_{2.3}$ चातुर्वर्ण्य( $M_2$ °र्ण )विधिः. — *Adhy. no. :* $T_1$ 85 ; $T_2$ $G_{1.2}$ 84 ; $G_3$ 96 ; $M_2$ 2 ; $M_3$ 83 ; $M_4$ 95 ; $M_4$ ( *inf. lin.* ) 100 . — ( L. 247 ) $M_2$ [अ]न्यं ( for [अ]न्यान् ). $G_3$ $M_4$ नृपः ( $M_4$ °प ) ( for हरिम् ). — ( L. 248 ) $G_3$ $M_{2-4}$ वा कति ( for यानि च ). — ( L. 249 ) $M_4$ जीवनं ( for जीवितं ). $G_3$ $M_4$ येषां ( for केषां ). — ( L. 250 ) $M_4$ ( *inf. lin.* ) [अ]व्यवस्थासु ; Kumbh. ed. ह्यव°. $G_3$ corrupt for the prior half. — ( L. 251 ) $G_3$ $M_4$ च ; $M_2$ न ( for ऽनु- ). $G_3$ पुरुषोत्तमः. — ( L. 252 ) $T_1$ गर्भस्थः. $G_3$ $M_4$ गर्भस्थे कर्म चायाति ; $M_2$ °स्थे किमुपायाति ( for the prior half ). $G_{2.3}$ $M_{2.4}$ च ( for वा ). — ( L. 253 ) $G_3$ यद्वने च ; $M_4$ यौवने च ( for °नस्थे ). $G_3$ $M_{2.4}$ वृद्धत्वे च ( $M_2$ °त्वेपि ) ( for वार्धके वा ). $M_2$ च ( for [अ]पि ). — $M_4$ om. ( hapl. ) line 254. — ( L. 255 ) $G_1$ अधमं ( for तामसं ). $T_1$ $G_1$ दानं ; $M_2$ देवांस् ( for देव ). $M_{2.3}$ कं ( for किं ). $T_1$ $G_1$ तेषां वा किं फलं भवेत् ( for the post. half ). — $T_1$ $G_1$ om. lines 256–257. — ( L. 257 ) $T_2$ $G_2$ $M_2$ किं फलं भवेत् ; $M_3$ किं भवेत्फलं ( for वद किं फलम् ). $M_4$ तेषां यादव किं फलं. — ( L. 258 ) $G_{2.3}$ $M_{2.3}$ ह्यूर्ध्वां. $G_3$ $M_{2.3}$ गतिं किं ( by transp. ). — ( L. 259 ) $T_1$ ते ( for मे ). — ( L. 262 ) $G_2$ $M_{2.4}$ धर्मः. — ( L. 263 ) $G_3$ $M_{2.4}$ सः ( for च ). — Before line 264, MSS. ins. भगवानुवाच. — ( L. 264 ) $M_3$ यथा न्याय्यं. — ( L. 268 ) $G_3$ चेज् ( for the first च ). — ( L. 269 ) $G_3$ $M_{2.4}$ पांडव ( for पार्थिव ). — ( L. 270 ) $G_3$ $M_4$ तथा ( for वृथा ). — ( L. 271 ) $T_1$ चान्नं ( for पाकं ). $G_2$ -पाक- ( for -दार- ). — $G_3$ reads line 273 after line 276. — ( L. 273 ) T $G_1$ क्लिश्यमान- ( $T_1$ °नै )स् ( for दृश्य° ). — ( L. 274 ) $M_2$ गुरुस्

ब्राह्मणश्चैव यो भूत्वा संध्योपासनवर्जितः ।
निर्ब्रह्मो निःस्वधश्चैव शूद्राणामन्नभुग्द्विजः ।
मम वा शंकरस्यापि ब्रह्मणो वा युधिष्ठिर ।
अथ वा ब्राह्मणानां तु ये न भक्ता नराधमाः ।
वृथा जन्मान्यथैतेषां पापिनां विद्धि पाण्डव । [ 280 ]
अश्रद्धया च यद्दत्तमवमानेन वापि यत् ।
डम्भार्थमपि यद्दत्तं यत्पाषण्डिहृतं नृप ।
शूद्राचाराय यद्दत्तं यद्दत्वा चानुकीर्तितम् ।
रोषयुक्तं तु यद्दत्तं यद्दत्तमनुशोचितम् ।
डम्भार्जितं च यद्दत्तं यच्च वाप्यनृतार्जितम् । [ 285 ]
ब्राह्मणस्वं च यद्दत्तं चौर्येणाप्यार्जितं च यत् ।
अभिशस्ताहृतं यत्तु यद्दत्तं पतिते द्विजे ।
निर्ब्रह्माभिहृतं यत्तु यद्धृतं सर्वयाचकैः ।
व्रात्यैस्तु यद्धृतं दानमारूढपतितैश्च यत् ।
यद्दत्तं स्वैरिणीभर्तुः श्वशुराननुवर्तिने । [ 290 ]
यद्ग्रामयाचकहृतं यत्कृतघ्नहृतं तथा ।
उपपातकिने दत्तं वेदविक्रयिणे च यत् ।
स्त्रीजिताय च यद्दत्तं व्यालग्राहिहृतं च यत् ।
पुरोहिताय यद्दत्तं चिकित्सकहृतं च यत् ।
यद्वणिक्कर्मिणे दत्तं क्षुद्रमन्त्रोपजीविने । [ 295 ]
यच्छूद्रजीविने दत्तं यच्च देवलकाय च ।
देवद्रव्याशिने यच्च यद्दत्तं चित्रकर्मिणे ।
रङ्गोपजीविने दत्तं यच्च मांसोपजीविने ।
सेवकाय च यद्दत्तं यद्दत्तं ब्राह्मणब्रुवे ।
अग्निहीने च यद्दत्तं दत्तं वार्धुषिकाय च । [ 300 ]
यदनाचारिणे दत्तं यत्तु दत्तमनग्नये ।
असंध्योपासिने दत्तं यच्छूद्रग्रामवासिने ।
यन्मिथ्यालिङ्गिने दत्तं दत्तं सर्वाशिने च यत् ।
नास्तिकाय च यद्दत्तं धर्मविक्रयिणे च यत् ।
चारकाय च यद्दत्तं यद्दत्तं कूटसाक्षिणे । [ 305 ]
ग्रामकूटाय यद्दत्तं दानं पार्थिवपुंगव ।
वृथा भवति तत्सर्वं नात्र कार्या विचारणा ।
विप्रनामधरा ह्येते लोलुपा ब्राह्मणाधमाः ।
नात्मानं तारयन्त्येते न दातारं युधिष्ठिर ।
एतेभ्यो दत्तमात्राणि दानानि च बहून्यपि । [ 310 ]
वृथा भवन्ति राजेन्द्र भस्मन्याज्याहुतिर्यथा ।
एतेषु यत्फलं किंचिद्भविष्यति कथंचन ।
राक्षसाश्च पिशाचाश्च तद्विलुम्पन्ति हर्षिताः ।

---

(sic). —( L. 275 ) M$_2$ मातुलानींश्. M$_4$ विहन्यात् ( for नि° ). — ( L. 276 ) M$_{2.4}$ ब्राह्मणाश्. M$_4$ ये ( for यो ). G$_3$ ब्राह्मणांश्चैव ये हित्वा ( for the prior half ). M$_2$ संध्योपायन-. G$_3$ M$_4$ -वर्जिताः. — ( L 277 ) T G$_3$ निःस्वाहो ( for निर्ब्रह्मो ). G$_3$ M$_{2.4}$ यश्च शूद्रान्नभुग्द्विजः. — ( L. 278 ) G$_1$ [ अ ]थ ( for [ अ ]पि ). — ( L. 279 ) M$_2$ च ( for तु ). G$_3$ यो न भक्तो ( for ये न भक्ता ). G$_3$ M$_4$ नराधिप ( for °धमाः ). — ( L. 280 ) G$_3$ M$_4$ पापानां. — G$_3$ M$_4$ om. ( hapl. ) from the post. half of line 281 up to the prior half of line 286. —( L. 283 ) M$_2$ शूद्राचारा तु यद्दत्ता ( for the prior half ). — ( L. 284 ) T M$_2$ दोषयुक्तं; M$_3$ योषा° ( for रोष° ). T$_2$ -शोचति ( for -शोचितम् ). — ( L. 285 ) M$_2$ [अ]नृतस्थितं ( for °तार्जितम् ). — ( L 286 ) G$_3$ शौर्येण ( for चौ° ). M$_4$ [उ]पार्जितं ( for [अ]प्या° ). — ( L. 287 ) T$_1$ अशस्तापहृतं; G$_1$ प्रदिशस्ताहृतं ( sic ); M$_4$ अभिशस्तहृ( *inf. lin.* °हु )तं. T$_1$ G$_{1.2}$ om. ( hapl. ) the post. half with the prior half of line 288. — ( L. 288 ) M$_4$ -वृतं ( for -हृतं ). G$_3$ M$_4$ दत्तं ( for धृतं ). —( L. 289 ) G$_3$ M$_4$ व्रात्ये तु यत्कृतं दानम् ( for the prior half ). — G$_3$ M$_4$ om. line 290. — ( L. 291 ) G$_3$ M$_4$ -याजकहृ( M$_4$ °हु )तं. M$_2$ यथो मया वृकहृतं ( for the prior half ). M$_2$ -गतस्; M$_4$ -हुतं ( for -हृतं ). — ( L. 293 ) T$_1$ -जीविताय ( for -जिताय च ). — After the prior half, T$_1$ G$_3$ M$_4$ ins. :

यद्दत्तं राजसेविने ।
गणकाय च यद्दत्तं यच्चाकारणिकाय च ।
वृषलीपतये दत्तं यद्दत्तं शस्त्रजीविने ।
भृतकाय च यद्दत्तं.

[ ( L. 2 ) G$_3$ M$_4$ गणिकाय. G$_3$ M$_4$ यच्च कारणिकाय च ( for the post. half ). ]

— T$_1$ G$_3$ M$_4$ om. from the post. half of line 293 up to the prior half of line 296. — ( L. 297 ) G$_3$ M$_4$ दत्तं ( for यच्च ). T$_2$ G$_3$ M$_4$ चित्रकर्मणे. — ( L. 300 ) G$_{2.3}$ M$_4$ आदेशिने; Kumbh. and Madras ed. अदेशिने ( for अग्निहीने ). M$_2$ corrupt for the prior half. M$_2$ वार्धक्किकाय ( for वार्धुषि° ). —( L. 301 ) M$_2$ अनाप्रमिणे ( sic ) ( for °चारिणे ). G$_3$ M$_4$ च ( for तु ). T$_2$ अतः परं ( for अनग्नये ). — ( L. 302 ) T$_1$ G$_1$ असंध्योपासने. — T$_2$ om. ( hapl. ) the post. half of line 304 and the prior half of line 305. — ( L. 305 ) G$_1$ M$_{2.3}$ वराकाय ( for चार° ). G$_3$ M$_4$ दत्तं यद ( for the second यद्दत्तं ). — ( L. 307 ) G$_3$ च ( for [अ]त्र ). — ( L. 308 ) T$_2$ G$_{1.2}$ M$_3$ विप्राणामथ वा ह्येते ( for the prior half ). — ( L. 309 ) M$_2$ corrupt. — ( L. 310 ) M$_{2.4}$ सु- ( for च ). G$_3$ [अ]थ ( for

वृथा ह्येतानि दत्तानि कथितानि समासतः ।
जीवितं तु वृथा येषां तच्छृणुष्व युधिष्ठिर । [ 315 ]
ये मां न प्रतिपद्यन्ते शंकरं वा नराधमाः ।
ब्राह्मणान्वा महीदेवान्वृथा जीवन्ति ते नराः ।
हेतुशास्त्रेषु ये सक्ताः कुदृष्टिपथमाश्रिताः ।
वेदान्निन्दन्त्यनाचारा वृथा जीवन्ति ते नराः ।
कुशलैः कृतशास्त्राणि पठित्वा ये नराधमाः । [ 320 ]
विप्रान्निन्दन्ति यज्ञांश्च वृथा जीवन्ति ते नराः ।
ये च दुर्गां कुमारं वा वायुमग्निं जलं रविम् ।
पितरं मातरं चैव गुरुमिन्द्रं निशाकरम् ।
मूढा निन्दन्त्यनाचारा वृथा जीवन्ति ते नराः ।
विद्यमाने धने यस्तु दानधर्मविवर्जितः । [ 325 ]
मृष्टमश्नाति यश्चैको वृथा जीवति सोऽपि च ।
वृथा जीवितमाख्यातं दानकालं ब्रवीमि ते ।
तमोनिविष्टचित्तेन दत्तं दानं तु यद्भवेत् ।
स तस्य फलमश्नाति नरो गर्भगतो नृप ।
ईर्ष्यामात्सर्यसंयुक्तो डम्भार्थं चार्थकारणात् । [ 330 ]
ददाति दानं यो मर्त्यो बालभावे तदश्नुते ।
भोक्तुं भोगं न शक्तस्तु व्याधिभिः पीडितो भृशम् ।
ददाति दानं यो मर्त्यो वृद्धभावे तदश्नुते ।
श्रद्धायुक्तः शुचिः स्नातः प्रसन्नेन्द्रियमानसः ।
ददाति दानं यो मर्त्यो यौवने स तदश्नुते । [ 335 ]
स्वयं नीत्वा तु यद्दानं भक्त्या पात्रे प्रदीयते ।
तत्सार्वकालिकं विद्धि दानमामरणान्तिकम् ।
सात्त्विकं राजसं चैव तामसं च युधिष्ठिर ।
दानं दानफलं चैव गतिं च त्रिविधां शृणु ।
दानं दातव्यमित्येव मतिं कृत्वा द्विजाय वै । [ 340 ]
उपकारवियुक्ताय यद्दत्तं तद्धि सात्त्विकम् ।
श्रोत्रियाय दरिद्राय बहुभृत्याय पाण्डव ।
दीयते यत्प्रहृष्टेन तत्सात्त्विकमुदाहृतम् ।
वेदाक्षरविहीनाय यत्तु पूर्वोपकारिणे ।
समृद्धाय च यद्दत्तं तद्दानं राजसं स्मृतम् । [ 345 ]
संबन्धिने च यद्दत्तं प्रमत्ताय च पाण्डव ।
फलार्थिभिरपात्राय तद्दानं राजसं स्मृतम् ।
वैश्वदेवविहीनाय दानमश्रोत्रियाय च ।
दीयते तस्करायापि तद्दानं तामसं स्मृतम् ।
सरोषमवधूतं च क्लेशयुक्तमवज्ञया । [ 350 ]
सेवकाय च यद्दत्तं तत्तामसमुदाहृतम् ।
देवाः पितृगणाश्चैव मुनयश्चाग्नयस्तथा ।
सात्त्विकं दानमश्नन्ति तुष्यन्ति च नरेश्वर ।
दानवा दैत्यसंघाश्च ग्रहा यक्षाः सराक्षसाः ।
राजसं दानमश्नन्ति वर्जितं पितृदैवतैः । [ 355 ]
पिशाचाः प्रेतसंघाश्च कश्मला ये मलीमसाः ।
तामसं दानमश्नन्ति गतिं च त्रिविधां शृणु ।

---

[अ]पि ). —( L. 313 ) M$_2$ corrupt. —( L. 314 ) M$_{2.4}$ दानानि ( for दत्तानि ). —( L. 315 ) T$_1$ G$_2$ ताञ् ( for तत् ). —( L. 316 ) M$_2$ corrupt. G$_3$ M$_4$ ये च मां न प्रपद्यंते ( for the prior half ). —( L. 317 ) T$_1$ G$_1$ ब्राह्मणं ; T$_2$ G$_3$ M$_4$ ब्रह्माणं. T$_1$ द्विजान् ( for मही- ). M$_2$ ब्राह्मणा वा महीं देवान्. —After line 317, G$_3$ M$_{2-4}$ ins. :

ये च निन्दन्ति मां मूढाः शंकरं वा नराधमाः ।
ब्रह्माणं वा द्विजान्देवान्वृथा जीवन्ति ते नराः ।

[ ( L. 1 ) G$_3$ repeats line 1 after line 319. —( L. 2 ) M$_3$ ब्राह्मणं. M$_4$ वेदान् ( for देवान् ). ]

—( L. 318 ) G$_3$ M$_4$ दुष्टाः ( for सक्ताः ). —( L. 320 ) T$_2$ G$_1$ M$_{2.3}$ कुशीलैः ( G$_1$ °लः ) ( for कुशलैः ). —( L. 322 ) T$_1$ G$_{1.2}$ M$_3$ ये दुर्गां वा कुमारीं ( M$_3$ °रं ) वा ( for the prior half ). G$_3$ M$_4$ रविं जलं ( by transp. ). —( L 323 ) M$_{2.3}$ [अ]पि ( for [ए]व ). T$_2$ G$_3$ गुरूनग्निं( G$_3$ °रुं निं )दंति शंकरं ; M$_4$ गुरूनित्यं निशाकरं ( for the post. half ). —( L. 325 ) T$_2$ G$_3$ विद्यमानधनो. —( L. 326 ) M$_4$ [उ]त ( for च ). —( L. 327 ) M$_2$ वदामि ( for ब्रवीमि ). —( L. 330 ) Kumbh. ed. -मत्सर- ( for -मात्सर्य- ). G$_1$ [अ]त्र ( for [अ]र्थं ). —After line 331, T reads lines 334–335. —( L. 332 ) M$_{2.3}$ भोगी. —( L. 335 ) T$_1$ दानं ददाति ( by transp. ). —( L. 336 ) M$_4$ नित्यं ( for नीत्वा ). —G$_3$ om. ( hapl. ) from च युधिष्ठिर in line 338 up to गतिं च in line 339. —( L. 341 ) G$_3$ दत्तं यत् ( by transp. ). —( L. 342 ) G$_3$ M$_4$ -पुत्राय ( for -भृत्याय ). —( L. 344 ) T$_2$ प्रत्युपकारिणे ( for पूर्वोप° ). —( L. 345 ) T$_2$ G$_3$ M$_2$ दानं ( for दत्तं ). —( L. 346 ) T$_2$ G$_3$ M$_2$ अव्रताय ; M$_4$ अवृद्धाय ( for प्रमत्ताय ). —( L. 347 ) T$_2$ M$_4$ ला( M$_4$ लो )भादिभिर् ; G$_3$ डंभादि° ( for फलार्थि° ). —( L. 348 ) G$_3$ M$_4$ यत् ( for च ). —( L. 349 ) M$_4$ तर्जनाय ( for तस्कराय ). —( L. 350 ) G$_2$ अवधूमं. G$_3$ क्रोध- ; M$_4$ कोप- ( for क्लेश- ). —( L. 351 ) M$_2$ दानं ( for दत्तं ). G$_3$ M$_{2.4}$ तद्दानं तामसं स्मृतं ( for the post. half ). —( L. 352 ) M$_4$ पितरश् ( for मुनयश् ). —( L. 354 ) G$_2$ ग्रह- ( for ग्रहा ). G$_3$ M$_{2.4}$ च ( for स- ). —( L. 355 ) G$_1$ M$_3$ पितृदेवतैः. —( L. 356 ) M$_2$ कल्मषा ( for कश्मला ). —( L. 357 ) G$_{1.2}$ M$_3$

सात्त्विकानां तु दानानामुत्तमं फलमुच्यते ।
मध्यमं राजसानां तु तामसानां तु पश्चिमम् ।
अभिगम्योपनीतानां दानानामुत्तमं फलम् । [ 360 ]
मध्यमं तु समाहूय जघन्यं याचते फलम् ।
अयाचितप्रदाता यः स याति गतिमुत्तमाम् ।
समाहूय तु यो दद्यान्मध्यमां स गतिं व्रजेत् ।
याचितो यश्च वै दद्याज्जघन्यां स गतिं व्रजेत् ।
उत्तमा दैविका ज्ञेया मध्यमा मानुषी गतिः । [ 365 ]
गतिं जघन्यां तिर्यक्षु गतिरेषा त्रिधा स्मृता ।
पात्रभूतेषु विप्रेषु सुस्थितेष्वाहिताग्निषु ।
यत्तु निक्षिप्यते दानमक्षय्यं संप्रकीर्तितम् ।
श्रोत्रियाणां दरिद्राणां भरणं कुरु पार्थिव ।
समृद्धानां द्विजातीनां कुर्यात्तेषां च रक्षणम् । [ 370 ]
दरिद्रान्वृत्तिहीनांश्च प्रदानैः सुष्ठु पूजय ।
आतुरस्यौषधैः कार्यं नीरुजस्य किमौषधैः ।
पापं प्रतिग्रहीतारं प्रदातुरुपगच्छति ।
प्रतिग्रहीतुर्यत्पुण्यं प्रदातारमुपैति तत् ।
तस्माद्दानं सदा कार्यं परत्र हितमिच्छता । [ 375 ]
वेदविद्यावदातेषु सदा शूद्रान्नवर्जिषु ।
प्रयत्नेन विधातव्यो महादानमयो निधिः ।
येषां दाराः प्रतीक्षन्ते सहस्रस्येव लम्भनम् ।
भुक्तशेषस्य भक्तस्य तान्निमन्त्र्य पाण्डव ।
आमन्त्र्य तु निराशानि न कर्तव्यानि भारत । [ 380 ]
कुलानि सुदरिद्राणां तेषामाशा हता भवेत् ।
मद्भक्ता ये नरश्रेष्ठ मद्गता मत्परायणाः ।
मद्याजिनो मन्नियमास्तान्प्रयत्नेन पूजयेत् ।
तेषां तु पावनायाहं नित्यमेव युधिष्ठिर ।
उभे संध्येऽपि तिष्ठामि ह्यस्कन्नं तद्व्रतं मम । [ 385 ]
तस्मादष्टाक्षरं मन्त्रं मद्भक्तैर्वीतकल्मषैः ।
संध्याकालेषु जप्तव्यं सततं चात्मशुद्धये ।
अन्येषामपि विप्राणां किल्बिषं हि प्रणश्यति ।
उभे संध्येऽप्युपासीत तस्माद्विप्रो विशुद्धये ।
दैवे श्राद्धे च विप्रः स नियोक्तव्योऽजुगुप्सया । [ 390 ]
जुगुप्सितस्तु यः श्राद्धं दहत्यग्निरिवेन्धनम् ।
भारतं मानवो धर्मो वेदाः साङ्गाश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ।
न ब्राह्मणान्परीक्षेत दैवे कर्मणि धर्मवित् ।
महान्भवेत्परीवादो ब्राह्मणानां परीक्षणे । [ 395 ]
ब्राह्मणानां परीवादं यः कुर्यात्पुरुषाधमः ।
रासभानां शुनां योनिं गच्छेत्पुरुषदूषकः ।
श्वत्वं प्राप्नोति निन्दित्वा परीवादात्खरो भवेत् ।
कृमिर्भवत्यभिभवात्कीटो भवति मत्सरी ।

---

विविधां ( for त्रि° ). —( L. 358 ) $M_4$ च ( for तु ). $G_3$ ईड्यते ; $M_{2.4}$ इष्यते ; Kumbh. ed. अश्नुते ( for उच्यते ). —( L. 360 ) $G_3$ $M_4$ फलमुत्तमं ( by transp. ). —( L. 361 ) $G_3$ $M_4$ समानीय ( for °हूय ). —( L. 362 ) $M_2$ -प्रदांतो ( sic ). $G_3$ $M_4$ वै ; $M_2$ [ऽ]यं ( for यः ). —( L. 363 ) $G_3$ $M_4$ वै ( for यो ). --( L. 365 ) $G_3$ $M_4$ दैविकी ; $M_2$ दैवकी. $M_2$ मध्यमां मानुषां गतिं. —( L. 366 ) $G_3$ जघन्यां चैव तिर्यक्षु ; $M_2$ गतिर्जघन्या तिं° ; $M_4$ जघन्यां तिर्यक्षु गतिर् ( for the prior half ). $M_2$ सा त्रिविधा ( for एषा त्रिधा ). $G_3$ $M_4$ मता ( for स्मृता ). —( L. 367 ) $M_2$ पात्रीभूतेषु. —( L. 368 ) $G_3$ प्रकल्प्यते ; $M_3$ विक्षिप्यते ; $M_4$ प्रक्षि°. $M_2$ अक्षयं. $G_3$ $M_2$ संप्रकीर्त्यते ; $M_4$ सफलं भवेत् ( for संप्रकीर्तितम् ). —( L. 370 ) $G_1$ कुर्यास्. $G_3$ $M_{2-4}$ कार्यं तत्प( $M_{2.4}$ ते प )रिरक्षणं ( for the post. half ). —( L. 371 ) $G_1$ $M_3$ वित्त- ( for वृत्ति- ). T तु सु- ; $G_3$ $M_4$ त्वं सु- ( for सुष्ठु ). —( L. 372 ) $M_4$ [औ]षधं. —( L. 373 ) $M_2$ पापः. —( L. 376 ) $G_3$ वेदविद्याप्रदानेषु ( for the prior half ). $T_1$ $G_3$ तथा ; $T_2$ $G_2$ तदा ( for सदा ). —( L. 377 ) $T_1$ हि दातव्यो ; $M_{2.3}$ निधातव्यो. —( L. 378 ) $M_4$ तेषां दाता ( for येषां दाराः ). $G_3$ $M_4$ प्रतीक्षेत ( for °क्षन्ते ). $G_1$ [उ]प- ; $M_2$ [ए]व ( for [इ]व ). —( L. 379 ) $G_3$ $M_4$ भारत ( for पाण्डव ). —( L. 380 ) $M_2$ आमंत्रय ( for आमन्त्र्य तु ). $G_3$ $M_{2.4}$ पांडव ( for भारत ). —( L. 381 ) $M_2$ तु ( for सु- ). T $G_3$ च मे ; $M_4$ हरेत् ( for भवेत् ). —( L. 382 ) $G_3$ -श्रेष्ठा. $G_{1.2}$ मद्भक्ता ( for मद्गता ). —( L. 385 ) $G_{1.2}$ $M_{2.3}$ वि- ; $G_3$ [ऽ]भि- ( for ऽपि ). $G_3$ corrupt ; $M_2$ अस्कन्नं. T $G_2$ $M_3$ मतं ( for व्रतं ). —( L. 388 ) Kumbh. ed. विनश्यति ( for प्रण° ). —( L. 389 ) $M_2$ हि ( for ऽपि ). $G_1$ विप्रा. $G_3$ विशुद्धया. —( L. 390 ) $T_1$ $G_2$ स न योक्तव्यो ; $T_2$ तु नियो° ; $G_3$ corrupt ; $M_4$ सन्विधियुक्तो ( for स नियोक्तव्यो ). $G_3$ $M_{2.4}$ [ऽ]जुगुप्सितः ( for °प्सया ). —( L. 391 ) $M_{2.4}$ तत् ( for यः ). $G_3$ जुगुप्सितं न च श्राद्धं ( for the prior half ). —( L. 392 ) $G_3$ पुराणं ( for भारतं ). $G_3$ $M_4$ सांगा वे( $M_4$ °गवे )दाश् ; $M_2$ सांगो वेदश्. $G_2$ चिकित्सिताः. —( L. 397 ) $G_3$ $M_4$ सहसैव ( for रासभानां ). $G_{2.3}$ $M_{2.4}$ स गच्छेद्ब्रह्मदूषकः ( for the post. half ). —( L. 398 ) $G_3$ शुद्धं ( sic ) ( for श्वत्वं ). $M_4$ निंदत्वात्. T $G_1$ $M_{3.4}$ परिवादात्. —( L. 399 ) T $G_{1.2}$ क्रिमिर् ( $G_1$ °भी ) ( for कृमिर् ). $G_3$ $M_4$ परिभूय क्रिमिर्भवति ( hypermetric ) ( for the prior half ). Kumbh. ed. मत्सरात् ( for

दुर्वृत्ता वा सुवृत्ता वा प्राकृता वा सुसंस्कृताः । [ 400 ]
ब्राह्मणा नावमन्तव्या भस्मच्छन्ना इवाग्नयः ।
क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम् ।
नावमन्येत मेधावी कृशानपि कदाचन ।
एतत्त्रयं हि पुरुषं निर्दहेदवमानितम् ।
तस्मादेतत्प्रयत्नेन नावमन्येत बुद्धिमान् । [ 405 ]
यथा सर्वास्ववस्थासु पावको दैवतं महत् ।
तथा सर्वास्ववस्थासु ब्राह्मणो दैवतं महत् ।
व्यङ्गाः काणाश्च कुब्जाश्च वामनाङ्गास्तथैव च ।
सर्वे दैवे नियोक्तव्या व्यामिश्रा वेदपारगैः ।
मन्युं नोत्पादयेत्तेषां न चारिष्टान्समाचरेत् । [ 410 ]
मन्युप्रहरणा विप्रा न विप्राः शस्त्रपाणयः ।
मन्युना घ्नन्ति ते शत्रून्वज्रेणेन्द्र इवासुरान् ।
ब्राह्मणो हि महद्दैवं जातिमात्रेण जायते ।
ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ।
किं पुनर्ये च कौन्तेय संध्यां नित्यमुपासते । [ 415 ]
यस्यास्येन समश्नन्ति हव्यानि त्रिदिवौकसः ।
कव्यानि चैव पितरः किं भूतमधिकं तथा ।
उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती ।
स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ।
स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च । [ 420 ]
आनृशंस्याद्ब्राह्मणस्य भुञ्जते हीतरे जनाः ।
तस्मात्ते नावमन्तव्या मद्भक्ता हि द्विजाः सदा ।
आरण्यकोपनिषदि ये तु पश्यन्ति मां द्विजाः ।
निगूढं निष्कलावस्थं तान्प्रयत्नेन पूजय ।
स्वगृहे वा प्रवासे वा दिवारात्रमथापि वा । [ 425 ]
श्रद्धया ब्राह्मणाः पूज्या मद्भक्ता ये च पाण्डव ।
नास्ति विप्रसमं दैवं नास्ति विप्रसमो गुरुः ।
नास्ति विप्रात्परो बन्धुर्नास्ति विप्रात्परो निधिः ।
नास्ति विप्रात्परं तीर्थं न पुण्यं ब्राह्मणात्परम् ।
न पवित्रं परं विप्रान्न द्विजात्पावनं परम् । [ 430 ]
नास्ति विप्रात्परो धर्मो नास्ति विप्रात्परा गतिः ।
पापकर्मसमाक्षिप्तं पतन्तं नरके नरम् ।
त्रायते दानमप्येकं पात्रभूते कृतं द्विजे ।
बालाहिताग्नयो ये च शान्ताः शूद्रान्नवर्जिताः ।
मामर्चयन्ति मद्भक्तास्तेभ्यो दत्तमिहाक्षयम् । [ 435 ]
प्रदानैः पूजितो विप्रो वन्दितो वापि संस्तुतः ।
संभाषितो वा दृष्टो वा मद्भक्तो दिवमुन्नयेत् ।
ये पठन्ति नमस्यन्ति ध्यायन्ति पुरुषोत्तमम् ।
तान्स्पृष्ट्वा वाथ वा दृष्ट्वा नरः पापैः प्रमुच्यते ।
मद्भक्ता मद्गतप्राणा मद्गता मत्परायणाः । [ 440 ]
बीजयोनिविशुद्धा ये श्रोत्रियाः संयतेन्द्रियाः ।
शूद्रान्नविरता नित्यं ते पुनन्तीह दर्शनात् ।
स्वयं नीत्वा विशेषेण दानं तेषां गृहेष्वथ ।

---

°री ). — ( L. 402 ) $T_1$ वैश्यं ( for सर्पं ). — ( L. 404 ) $G_3$ पुरुषान् ( for °षं ). — ( L. 408 ) $G_3$ $M_4$ व्यंगान्काणांश्च कुब्जांश्च ( for the prior half ). $G_3$ वामनांगांस्; $M_4$ °नानांश्च. — ( L. 409 ) $T_1$ $G_2$ देवे. $G_3$ विभोक्तव्या ( for नियो° ). — ( L. 410 ) T $G_1$ मन्युना ( for मन्युं न ). $G_3$ $M_4$ [अ]रिष्टं ; $M_2$ [अ]निष्टं ( for [अ]-रिष्टान् ). Kumbh. ed. सदाचरेत् ( for समा° ). — ( L. 412 ) $M_2$ वै ( for ते ). — ( L. 413 ) $G_3$ ब्राह्मणा. $G_3$ $M_2$ महा- ( for महद् ). $G_3$ $M_3$ जात- ( for जाति- ). — ( L. 414 ) Kumbh. ed. ब्राह्मणः ( for ईश्वरः ). $G_1$ -कोशानां ( for -भूतानां ). $M_4$ -कामस्य ( for -कोशस्य ). — ( L. 415 ) $G_3$ $M_{2-4}$ संध्ये. — ( L. 416 ) $G_3$ $M_{2.4}$ सदाश्नंति ( for सम° ). $T_1$ हवींषि ( for हव्यानि ). — ( L. 417 ) $G_{1.3}$ $M_{2.4}$ ततः ( for तथा ). — ( L. 419 ) $M_4$ बहिर् ( for स हि ). — After line 419, $M_2$ ins. :

सर्वस्वं ब्राह्मणस्येदं यत्किंचिज्जगतीगतम् ।
श्रेष्ठे नाभिजने नेदं सर्वं वै ब्राह्मणोऽर्हति ।

— ( L. 420 ) $G_3$ दत्ते ( for वस्ते ). — ( L. 421 ) $G_3$ $M_{2.4}$ तु ( for हि ). — ( L. 422 ) $M_2$ ये ( for हि ). — ( L. 423 ) $M_3$ [ऽ]ति- ( for तु ). — ( L. 424 ) $M_3$ निरूढं ( for निगूढं ). $M_4$ निष्कलावस्थान्. $G_3$ तत्र ; $M_4$ विप्रान् ( for तान्प्र- ). $G_3$ $M_4$ पूजयेत् ( for °य ). — ( L. 425 ) $G_3$ $M_{2.4}$ दिवारात्रौ तथैव च ( $M_2$ °थापि वा ) ( for the post. half ). — ( L. 426 ) $G_3$ श्रद्धया ब्राह्मणः पूज्यो ( for the prior half ). — ( L. 427 ) $M_4$ ( *sup. lin.* ) द्रव्यं ( for दैवं ). — ( L. 428 ) $M_4$ विप्रसमो ( for the both विप्रात्परो ). — ( L. 429 ) $M_{2.4}$ विप्रसमं ( for विप्रात्परं ). — ( L. 430 ) $G_3$ $M_4$ विप्रात् ( for द्विजात् ). — ( L. 432 ) $G_1$ नरः. — ( L. 433 ) $G_1$ त्रायतो. Kumbh. ed. पात्रम् ( for दानम् ). $M_2$ द्विजे कृतं ( by transp. ); Kumbh. ed. तु तद्विजे. $M_4$ ( *sup. lin.* ) पात्रभूतकृते द्विजे. — ( L. 435 ) $M_2$ महत्फलं ; $M_4$ तदक्षयं ( for इहा° ). — ( L. 436 ) $G_1$ सत्कृतः ; $G_3$ $M_4$ कृत्स्नशः ; Kumbh. ed. संस्कृतः ( for संस्तुतः ). — ( L. 437 ) $T_1$ lacuna ; $G_3$ $M_4$ विप्रो वै ( for दृष्टो वा ). — ( L. 438 ) $T_1$ पुरुषान्मम ; $G_3$ $M_4$ °पास्तु मां ; $M_2$ °षं तु मां ( for °षोत्तमम् ). — ( L. 439 ) $T_2$ सं- ; $G_2$ तं ( for तान् ). $M_3$ दृष्ट्वा ( for स्पृष्ट्वा ). $G_3$ $M_{2.4}$ दृष्ट्वा वा ( by transp. ). — ( L. 440 ) $T_1$ $G_1$ $M_3$ मद्गीता ; $T_2$ मद्भक्ता ( for मद्गता ). — ( L. 441 )

निवापयेत्तु यद्भक्त्या तद्दानं कोटिसंमितम् ।
जाग्रतः स्वपतो वापि प्रवासेषु गृहेष्वथ । [ 445 ]
हृदये न प्रणश्यामि यस्य विप्रस्य भावतः ।
संपूजितो वा दृष्टो वा स्पृष्टो वापि द्विजोत्तमः ।
संभाषितो वा राजेन्द्र पुनात्येव नरं सदा ।
एवं सर्वास्ववस्थासु सर्वदानानि पाण्डव ।
मद्भक्तेभ्यः प्रदत्तानि स्वर्गमार्गप्रदानि वै । [ 450 ]

Colophon.

वैशंपायन उवाच ।

श्रुत्वैव सात्त्विकं दानं राजसं तामसं तथा ।
पृथक्पृथक्त्वेव गतिं फलं चापि पृथक्पृथक् ।
अवितृप्तः प्रहृष्टात्मा पुण्यं धर्मामृतं पुनः ।
युधिष्ठिरो धर्मरतः केशवं पुनरब्रवीत् ।
बीजयोनिविशुद्धानां लक्षणानि वदस्व मे । [ 455 ]
बीजदोषेण लोकेश जायन्ते च कथं नराः ।
आचारदोषं देवेश वक्तुमर्हस्यशेषतः ।
ब्राह्मणानां विशेषं च गुणदोषौ च केशव ।
चातुर्वर्णस्य कृत्स्नस्य वर्तमानाः प्रतिग्रहे ।
केन विप्रा विशेषेण तरन्ते तारयन्ति च । [ 460 ]
एतान्कथय देवेश त्वद्भक्तस्य नमोऽस्तु ते ।

भगवानुवाच ।

शृणु राजन्यथावृत्तं बीजयोनिशुभाशुभम् ।
येन तिष्ठति लोकोऽयं विनश्यति च पाण्डव ।
अविप्लुतब्रह्मचर्यो यस्तु विप्रो यथाविधि ।
सुबीजं नाम विज्ञेयं तस्य बीजं शुभं भवेत् । [ 465 ]
कन्या चाक्षतयोनिः स्यात्कुलीना पितृमातृतः ।
ब्राह्मादिषु विवाहेषु परिणीता यथाविधि ।
सा प्रशस्ता वरारोहा तस्या योनिः प्रशस्यते ।
मनसा कर्मणा वाचा या भवेत्स्वैरचारिणी ।
सा कुलघ्नीति विज्ञेया तस्यां जातः श्वपाचकः । [ 470 ]
दैवे पित्र्ये तथा दाने भोजने सहभाषणे ।
शयने सहसंबन्धे न योग्या दुष्टयोनिजाः ।
न तस्माद्दुष्टयोन्यां तु गर्भमुत्पादयेद्बुधः ।
मोहेन कुरुते यस्तु कुलं हन्ति त्रिपूरुषम् ।

---

$G_1$ द्विजा ; $M_2$ विज- ( for बीज- ). — ( L. 442 ) $T_2$ $G_3$ शूद्रान्न'हिता ; $M_2$ °न्नाद्विरता. — ( L. 444 ) $G_3$ $M_{2-4}$ निधापयेत् ( for निवा° ). $T_2$ $G_3$ $M_{2-4}$ मद्भक्त्या ( $M_4$ °क्तस् ) ( for यद्भक्त्या ). — ( L. 445 ) $G_3$ विवासे स्वगृहेपि वा ; $M_2$ विप्रवासे गृहेपि वा ; $M_4$ प्रवासे स्वगृहेथ वा ( for the post. half ). — ( L. 446 ) $G_3$ $M_4$ भारत ; $M_3$ भावितः ( for भावतः ). — ( L. 447 ) $G_3$ $M_{2.4}$ स ( for सं- ). $G_3$ $M_4$ स्पृष्टो ( for दृष्टो ). $M_4$ दृष्टो ( for स्पृष्टो ). — ( L. 448 ) T हि ( for वा ). $G_3$ $M_4$ [इ]ह ( for [ए]व ). — ( L. 450 ) $G_3$ $M_4$ तानि स्वर्ग- ( for स्वर्गमार्ग- ). — Colophon. — *Sub-parvan :* T $G_3$ $M_{2.4}$ वैष्णवधर्म. — *Adhy name :* T $G_{1.2}$ $M_{2.3}$ ब्राह्मणप्रशंसा ( $M_2$ °शंसनं ). — *Adhy. no. :* $T_1$ 86 ; $T_2$ $G_{1.2}$ 85 ; $G_3$ 97 ; $M_2$ 3 ; $M_3$ 84 ; $M_4$ 96. — ( L. 451 ) $T_1$ $M_3$ [इ]व ; $M_2$ तु ( for [ए]व ). $M_2$ तामसं राजसं ( by transp. ). — ( L. 452 ) $G_1$ पृथक्त्वे च ( for °क्त्वेव ). $G_3$ $M_{2.4}$ पृथक्पृथक्फलं चैव ( for the prior half ). $G_3$ $M_{2.4}$ गतिं ( for फलं ). $G_3$ [ए]व ( for [अ]पि ). — ( L 453 ) $M_2$ प्रसन्नात्मा ( for प्रहृष्टा° ). $M_4$ धर्मभृतं ( for धर्मामृतं ). — ( L 454 ) $G_3$ $M_4$ -नित्यः ( for -रतः ). — Before line 455, MSS. ins. युधिष्ठिर उवाच. — ( L. 456 ) $M_4$ लोके च ( for लोकेश ). — ( L. 457 ) $T_2$ $G_3$ $M_{2.4}$ -दोषान् ( for -दोषं ). — ( L. 458 ) $M_2$ विशेषेण ( for °षं च ). — ( L. 459 ) $M_{2-4}$ चातुर्वर्ण्यस्य. $M_4$ लोकस्य ( for कृत्स्नस्य ). T $G_2$ वर्तमानान् ; $G_1$ °नात् ( for °नाः ). T परि- ( for प्रति- ). — ( L. 461 ) T $G_3$ $M_{2.4}$ एतत् ( for एतान् ). — ( L. 462 ) $G_{1.3}$ $M_{2.3}$ ( *inf. lin.* )$_{.4}$ यथातथ्यं ; Madras ed. °तत्त्वं ( for °वृत्तं ). — $G_2$ reads line 463 twice. — ( L. 463 ) $G_1$ यो नि- ; $M_3$ यो न ( for येन ). $T_2$ $G_{1.2}$ ( second time ) योगाय ( for लोकोऽयं ). — ( L. 464 ) $M_4$ -ब्रह्मचर्ये. — ( L. 465 ) $G_1$ सुबीजा ; $G_3$ $M_4$ सबीज- ; $M_{2.3}$ सुबीजो ; Kumbh. ed. स बीजं ; Madras ed. स बीजी ( for सुबीजं ). $G_3$ $M_{2-4}$ विज्ञेयस्. — ( L. 466 ) $M_2$ या ( for स्यात् ). — ( L. 467 ) $T_2$ ब्राह्म्यादिषु. $M_{2.3}$ परिणीय. — ( L. 468 ) $G_3$ प्रशांता ( for प्रशस्ता ). $G_3$ $M_4$ शुद्ध- ( for तस्या ). — After line 468, T $G_2$ ins. :

मनसा कर्मणा वाचा या गच्छेत्परपूरुषम् ।
योनिरस्या नरश्रेष्ठ गर्भाधानं न चार्हति ।
स्वैरिण्यां यस्तु पापात्मा सन्तानार्थमिहेच्छति ।
स कुलान्पातयत्याशु दश पूर्वान्दशापरान् ।
दुष्टयोनौ तु यो मोहाद्रेतः सिञ्चति मूढधीः । [ 5 ]
तद्रेतसा समुत्पन्नः षडङ्गविदपि द्विजः ।
साधुभिः स बहिष्कार्यः श्वपाक इव पार्थिव ।

[ ( L. 1 ) $T_2$ कर्मणा मनसा वाचा. — ( L. 2 ) $T_2$ $G_2$ योनिस्तस्या. — ( L. 7 ) $G_2$ इति ( for इव ). ]

— $G_3$ $M_4$ om. lines 469–474. — ( L. 470 ) $T_1$ $G_2$ तस्या. — ( L. 472 ) $M_2$ corrupt. — ( L. 475 ) $G_3$

कानीनश्च सहोढश्च तथोभौ कुण्डगोलकौ । [ 475 ]
आरूढपतिताज्जातः पतितस्यापि यः सुतः ।
षडेते विश्वचण्डाला निकृष्टाः श्वपचादपि ।
यो यत्र तत्र वा रेतः सिक्त्वा शूद्रासु वा चरेत् ।
कामचारी स पापात्मा बीजं तस्याशुभं भवेत् ।
अशुभं तद्भवेद्बीजं शुद्धां योनिं न चार्हति । [ 480 ]
दूषयत्यपि तां योनिं शुना लीढं हविर्यथा ।
शूद्रयोनौ पतेद्बीजं हाहाशब्दं द्विजन्मनः ।
कुर्यात्पुरीषगर्तेषु पतितोऽस्मीति दुःखितः ।
मामधः पातयत्येष पापात्मा काममोहितः ।
अधोगतिं व्रजेत्क्षिप्रमिति शङ्कया पतेत्तु तत् । [ 485 ]
आत्मा हि शुक्रमुद्दिष्टं दैवतं परमं महत् ।
तस्मात्सर्वप्रयत्नेन निरुन्ध्याच्छुक्रमात्मनः ।
आयुस्तेजो बलं वीर्यं प्रज्ञा श्रीश्च महद्यशः ।
पुण्यं च मत्प्रियत्वं च लभते ब्रह्मचर्यया ।
अविप्लुतब्रह्मचर्यैर्गृहस्थाश्रममाश्रितैः । [ 490 ]
पञ्चयज्ञपरैर्धर्मः स्थाप्यते पृथिवीतले ।
सायं प्रातस्तु ये संध्यां सम्यङ्नित्यमुपासते ।
नावं वेदमयीं कृत्वा तरन्ते तारयन्ति च ।
यो जपेत्पावनीं देवीं गायत्रीं वेदमातरम् ।
न सीदेत्प्रतिगृह्णानः पृथिवीं च ससागराम् । [ 495 ]
ये चास्य दुःस्थिताः केचिद्ग्रहाः सूर्यादयो दिवि ।
ते चास्य सौम्या जायन्ते शिवाः शुभकरास्तथा ।
यत्र यत्र स्थिताश्चैव दारुणाः पिशिताशनाः ।
घोररूपा महाकाया धर्षयन्ति न तं द्विजम् ।
पुनन्तीह पृथिव्यां च चीर्णवेदव्रता नराः । [ 500 ]
चतुर्णामपि वेदानां सा च राजन्गरीयसी ।
अचीर्णव्रतवेदा ये विकर्मपथमाश्रिताः ।
ब्राह्मणा नाममात्रेण तेऽपि पूज्या युधिष्ठिर ।
किं पुनर्यस्तु संध्ये द्वे नित्यमेवोपतिष्ठति ।
शीलमध्ययनं दानं शौचं मार्दवमार्जवम् । [ 505 ]
तस्माद्वेदाद्विशिष्टानि मनुराह प्रजापतिः ।
भूर्भुवः स्वरिति ब्रह्म यो वेदपरमं द्विजः ।
स्वदारनिरतो दान्तः स विद्वान्स च भूसुरः ।
संध्यामुपासते विप्रा नित्यमेव द्विजोत्तमाः ।
ते यान्ति नरशार्दूल ब्रह्मलोकं न संशयः । [ 510 ]
सावित्रीमात्रसारोऽपि वरो विप्रः सुयन्त्रितः ।
नायन्त्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी ।
सावित्रीं चैव वेदांश्च तुलयातोलयन्पुरा ।
सदेवर्षिगणाश्चैव सर्वे ब्रह्मपुरःसराः ।
चतुर्णामपि वेदानां सा हि राजन्गरीयसी । [ 515 ]
यथा विकसिते पुष्पे मधु गृह्णति षट्पदाः ।
समुत्सृज्य रसं सर्वं निरर्थकमसारवत् ।
एवं गृहीता सावित्री सर्ववेदे च पाण्डव ।

---

कामुकश्च ( for कानीनश्च ). $G_3$ $M_4$ तावुभौ ( for तथोभौ ). — ( L. 476 ) $M_4$ आरूढपतितो ज्ञातः. — ( L. 477 ) $G_3$ $M_4$ निषिद्धाः ( for निकृष्टाः ). $G_1$ श्वापदाद् ( for श्वपचाद् ). — ( L. 478 ) $M_2$ सिक्त्वा शूद्रामुपाचरेत्. — ( L. 480 ) $G_3$ $M_4$ शुद्ध- ( for शुद्धां ). — ( L. 481 ) $M_2$ [ए]व तद् ( for [अ]पि तां ). $G_3$ $M_4$ दूषयत्येव तं वह्निः ; Madras ed. शुद्धां हविर्भुजो ज्वालां ( for the prior half ). — ( L. 482 ) $G_3$ तु तद् ; $M_2$ च तद् ; $M_{3.4}$ पतद् ( for पतेद् ). — ( L. 484 ) $G_2$ माधवः ( sic ) ( for मामधः ). $G_2$ पातयेन्नैष ( for °यत्येष ). — ( L. 485 ) $M_4$ व्रजेः ( for व्रजेत् ). $G_3$ पतेत ( for °तेत्तु ). — ( L. 486 ) $M_2$ अमृतं दैवतं परं ( for the post. half ). — ( L. 488 ) $M_4$ महायशः. — ( L. 489 ) $M_2$ पुण्यत्वं ( for पुण्यं च ). $G_2$ $M_2$ लभ्यते. $M_4$ ब्रह्मचर्यवान् ( for °र्यया ). — ( L. 491 ) $T_2$ -धरैर् ; $M_2$ -रतैर् ( for -परैर् ). $T_2$ $M_4$ पृथिवीपते ( for °तले ). — ( L. 492 ) $G_3$ एवं ( for सायं ). — ( L. 493 ) $M_2$ स्नानं ( for नावं ). $G_3$ वेदमयां. $G_3$ $M_4$ तारयंति तरंति च. — ( L. 495 ) $G_2$ नासीदेत्. — ( L. 496 ) $G_3$ $M_{3\,4}$ च स्युर् ( for चास्य ). T $G_2$ सूर्योदयो. $G_3$ ग्रहाः सूर्योदयादिव. — ( L. 497 ) $G_3$ ग्रहाः ; $M_3$ शिल्पाः ( for शिवाः ). $G_3$ स्मृताः ( for तथा ). — ( L. 498 ) $G_3$ ये च ( for चैव ). — ( L. 499 ) $G_3$ दर्पयंति ( for धर्ष° ). — ( L. 500 ) $G_3$ $M_2$ हि ( for [इ]ह ). $G_3$ $M_4$ हि ; $M_2$ वै ( for च ). $G_1$ -देव- ( for -वेद- ). $G_2$ $M_2$ द्विजाः ( for नराः ). — $G_3$ $M_{2-4}$ om. line 501. — ( L. 501 ) $G_{1.2}$ हि ( for च ). — ( L. 502 ) $M_2$ अचीर्णवेदव्रता ये. T $G_1$ -फलम् ( for -पथम् ). — ( L. 503 ) $M_4$ नराधिप ( for युधिष्ठिर ). — ( L. 504 ) $G_3$ $M_4$ च ( for तु ). T $M_3$ [अ]वतिष्ठति ( $T_1$ °ते ); $M_4$ [उ]पतिष्ठते. — ( L. 506 ) T वेदान् ; $G_3$ वेद- ; $M_4$ एतान् ( for वेदाद् ). T $G_3$ $M_4$ विशिष्टान्वै ( for °ष्टानि ). — ( L. 507 ) T $G_1$ -निरतं ( $T_1$ °तो ) ( for -परमं ). — ( L. 509 ) $G_1$ उपासिता. $G_2$ ये वै ; $M_2$ चैव ( for विप्रा ). $M_4$ नियमेन ( for नित्यमेव ). — ( L. 511 ) $G_3$ स- ( for सु- ). — ( L. 513 ) $G_3$ $M_{2-4}$ [अ]तुलयन्. — ( L. 514 ) $M_{2.4}$ देवा ऋषि- ( for स देवर्षि- ). — ( L. 515 ) $M_2$ जाता ( for राजन् ). — $T_1$ $G_{1.2}$ om. line 517. — ( L. 518 ) $M_2$ देवैर्वेदेषु पांडव ( for the post. half ). — ( L. 519 ) $G_3$ $M_4$ एवं हि ( for तस्मात्तु ). $G_2$ सार ( for प्राण ). — ( L. 520 ) $T_2$ $G_2$ $M_2$ निर्जिता.

तस्मात्तु सर्ववेदानां सावित्री प्राण उच्यते ।
निर्जीवा हीतरे वेदा विना सावित्रिया नृप । [ 520 ]
नायन्त्रितश्चतुर्वेदी शीलभ्रष्टः स कुत्सितः ।
शीलवृत्तसमायुक्तः सावित्रीपाठको वरः ।
सहस्रपरमां देवीं शतमध्यां दशावराम् ।
सावित्रीं जप कौन्तेय सर्वपापप्रणाशिनीम् ।

युधिष्ठिर उवाच ।

त्रैलोक्यनाथ हे कृष्ण सर्वभूतात्मको ह्यसि । [ 525 ]
नानायोगपर श्रेष्ठ तुष्यसे केन कर्मणा ।

भगवानुवाच ।

यदि भारसहस्रं तु गुग्गुल्वादि प्रधूपयेत् ।
करोति चेन्नमस्कारमुपहारं च कारयेत् ।
स्तौति यः स्तुतिभिर्मां च ऋग्यजुःसामभिः सदा ।
न तोषयति चेद्विप्रान्नाहं तुष्यामि भारत । [ 530 ]
ब्राह्मणे पूजिते नित्यं पूजितोऽस्मि न संशयः ।
आकुष्टे चाहमाकुष्टो भवामि भरतर्षभ ।
परा मयि गतिस्तेषां पूजयन्ति च मां हि ते ।
यदहं द्विजरूपेण वसामि वसुधातले ।
यस्तान्पूजयति प्राज्ञो मद्गतेनान्तरात्मना । [ 535 ]
तमहं स्वेन रूपेण पश्यामि नरपुंगव ।
कुब्जाः काणा वामनाश्च दरिद्रा व्याधितास्तथा ।
नावमान्या द्विजाः प्राज्ञैर्मम रूपा हि ते द्विजाः ।
ये केचित्सागरान्तायां पृथिव्यां द्विजसत्तमाः ।
मम रूपं हि तेष्वेवमर्चितेष्वर्चितोऽस्म्यहम् । [ 540 ]
बहवस्तु न जानन्ति नरा ज्ञानबहिष्कृताः ।
यथाहं द्विजरूपेण वसामि वसुधातले ।
अवमन्यन्ति ये विप्रान्स्वधर्मात्पातयन्ति ते ।
प्रेषणैः प्रेषयन्ते च शुश्रूषां कारयन्ति च ।
मृताश्चात्र परत्रेमान्यमदूता महाबलाः । [ 545 ]
निकृन्तन्ति यथाकामं सूत्रमार्गेण शिल्पिनः ।
आक्रोशपरिवादाभ्यां ये रमन्ते द्विजातिषु ।
तान्मृतान्यमलोकस्थान्निपात्य पृथिवीतले ।
आक्रम्योरसि पादेन क्रूरः संरक्तलोचनः ।
अग्निवर्णैस्तु संदंशैर्यमो जिह्वां समुद्धरेत् । [ 550 ]
ये च विप्रान्निरीक्षन्ते पापाः पापेन चक्षुषा ।
अब्रह्मण्याः श्रुतेर्बाह्या नित्यं ब्रह्मद्विषो नराः ।
तेषां घोरा महाकाया वक्रतुण्डा महाबलाः ।
उद्धरन्ति मुहूर्तेन खगाश्चक्षुर्यमाज्ञया ।
यः प्रहारं द्विजेन्द्राय दद्यात्कुर्याच्च शोणितम् । [ 555 ]
अस्थिभङ्गं च यः कुर्यात्प्राणैर्वा विप्रयोजयेत् ।
सोऽनुपूर्व्येण यातीमान्नरकानेकविंशतिम् ।

---

$M_2$ वा ( for हि ). $G_3$ $M_4$ सावित्र्य( $M_4$ °त्र्या )या. — ( L. 521 ) $G_2$ यो ( for न ). $G_3$ $M_{2.4}$ एवं हि यश्चतुर्वेदी ( $G_3$ °दैः ) ( for the prior half ). $M_2$ कुंडितः ( for कुत्सितः ). — ( L. 522 ) $G_3$ -पारगो ( for -पाठको ). $T_1$ नरः ( for वरः ). — ( L. 523 ) $G_3$ शतांबरां ( for दशावराम् ). — ( L. 524 ) $M_4$ -प्रणाशनीं. — ( L. 525 ) $T_1$ वार्ष्णेय; $G_3$ $M_{2.4}$ भो कृष्ण. — ( L. 526 ) $G_3$ $M_{2.4}$ -योगधर ( for °पर ). $G_3$ श्रेष्ठस्. $G_3$ $M_4$ येन ( for केन ). — ( L. 527 ) $G_2$ गुग्गुलादि; $G_3$ °ल्वापि; $M_{2.3}$ °ल्यापि. $G_1$ प्रदीपयेत् ( for प्रधू° ). — ( L. 528 ) $G_3$ $M_{2.4}$ च ( for चेन् ). $G_3$ $M_4$ उपकारांश्; $M_2$ °हारांश्. — ( L. 529 ) $G_3$ पूजयन्; $M_{2.4}$ पूजयेत् ( for स्तौति यः ). $M_2$ चैव ( for मां च ). $G_3$ $M_{2.4}$ तथा ( for सदा ). — ( L. 532 ) $M_4$ आक्रुष्टे चाहमाक्रुश्टो. — ( L. 533 ) $G_{1.2}$ परा गतिर्मयि तेषां; $M_2$ परा मयि कृता पूजा. $G_3$ $M_4$ हि ( for च ). $G_3$ च ( for हि ). $M_2$ च तान्सकृत्; Kumbh. ed. द्विजं हि ये ( for च मां हि ते ). — ( L. 534 ) T यदा; $M_2$ यथा ( for यद् ). $G_1$ $M_2$ चरामि ( for वसामि ). — ( L. 535 ) $G_3$ यस्मात् ( for यस्तान् ). $G_3$ भक्तेन ( for गतेन ). — ( L. 537 ) $G_3$ $M_{2.4}$ काणाः कुब्जा ( by transp. ). T $G_{1.2}$ दरिद्र-. — ( L. 538 ) T $G_{1.3}$ नावमन्या. $T_1$ $M_{2.4}$ रूपं. — ( L. 540 ) $G_3$ $M_4$ रूपेषु ( for रूपं हि ). $G_3$ $M_4$ [ऽ]भवं ( for ऽस्म्यहम् ). — ( L. 541 ) $M_4$ नराज्ञानतिमिरेण ( for न जानन्ति नरा ज्ञान- ). — ( L. 542 ) $G_3$ $M_4$ यथा हि; Kumbh. ed. यदहं ( for यथाहं ). — ( L. 543 ) $G_3$ $M_4$ विकर्मा पादयंति च; $M_{2.3}$ ( *inf. lin.* ) विकर्मोत्पादयंति च ( for the post. half ). — ( L. 544 ) $G_3$ $M_4$ प्रेषयंते च सततं ( for the prior half ). $T_2$ $G_1$ $M_3$ शुश्रूषाः. — ( L. 545 ) $T_2$ $G_3$ $M_4$ मृतास्तान्करपत्रेण ( for the prior half ). — ( L. 546 ) $M_{2.3}$ ( *inf. lin.* ) यथाकाष्ठं ( for °कामं ). $G_2$ $M_{2-4}$ सूत्रमात्रेण. — ( L. 548 ) T दूतान् ( for मृतान् ). $G_3$ $M_4$ धरणीतले ( for पृथिवी° ). — ( L. 549 ) $T_2$ क्रूराः; $G_3$ $M_{2.4}$ क्रुद्धाः ( for क्रूरः ). $T_2$ $M_{2.4}$ -लोचनाः. — $M_4$ om. lines 550–553. — ( L. 550 ) T $G_{1.2}$ संदश्यैर्; $M_3$ संदर्शैर्. $G_2$ समुच्चरेत्. — ( L. 552 ) $G_3$ च ते ( for श्रुतेर् ). — ( L. 553 ) $G_3$ $M_{2.3}$ ( *inf. lin.* ) वज्रतुंडा ( for वक्र° ). — ( L. 554 ) $M_2$ काकाश् ( for खगाश् ). — ( L. 556 ) $G_3$ आज्ञाभंगं. T $G_1$ [अ]पि ( for वि- ). — ( L. 557 ) $T_1$ -पूर्वेण ( for -पूर्व्येण ). $M_2$ यांत्येव; $M_3$ यात्येव ( for यातीमान् ). — ( L. 558 ) T $G_2$ शूलमारोप्यते पश्चाज्; $G_1$ शूला

शूलमारोपितो गत्वा ज्वलने परिपच्यते ।
बहुवर्षसहस्राणि पच्यमानस्त्ववाक्शिराः ।
नावमुच्येत दुर्मेधा न तस्य क्षीयते गतिः । [ 560 ]
ब्राह्मणायाविचार्यैवं व्रजन्वै वधकाङ्क्षया ।
शतवर्षसहस्राणि तामिस्रे परिपच्यते ।
उत्पाद्य शोणितं गात्रात्संरम्भान्मतिपूर्वकम् ।
स पर्यायेण यातीमान्नरकानेकविंशतिम् ।
तस्मान्नाकुशलं ब्रूयान्न शुष्कां गिरमीरयेत् । [ 565 ]
न ब्रूयात्परुषां वाणीं न चैवैताननतिक्रमेत् ।
ये विप्राञ्श्रद्धया वाचा पूजयन्ति नरोत्तमाः ।
अर्चितश्च ततश्चैव तैर्भवामि न संशयः ।
तर्जयन्ति च ये विप्रान्क्रोशयन्ति च भारत ।
आक्रुष्टस्तर्जितश्चाहं तैर्भवामि न संशयः । [ 570 ]
यश्चन्दनैश्चागरुधूपदीपै-
रभ्यर्चयेत्काष्ठमयीं ममार्चाम् ।
तेनार्चितो नैव भवामि सम्य-
ग्विप्रार्चनादस्मि समर्चितोऽहम् ।
विप्रप्रसादाद्धरणीधरोऽहं [ 575 ]
विप्रप्रसादादसुराञ्जयामि ।
विप्रप्रसादाच्च सदक्षिणोऽहं
विप्रप्रसादादजितोऽहमस्मि ।

Colophon.

युधिष्ठिर उवाच ।

देवदेवेश दैत्यघ्न परं कौतूहलं हि मे ।
एतत्कथय सर्वज्ञ त्वद्भक्तस्य च केशव । [ 580 ]
मानुषस्य च लोकस्य धर्मलोकस्य चान्तरम् ।
कीदृशं किंप्रमाणं वा किमधिष्ठानमेव च ।
तरन्ति मानुषा देव केनोपायेन माधव ।
त्वगस्थिमांसनिर्मुक्ते पञ्चभूतविवर्जिते ।
कथयस्व महादेव सुखदुःखमशेषतः । [ 585 ]
जीवस्य कर्मलोकेषु कर्मभिस्तु शुभाशुभैः ।
अनुबद्धस्य तैः पाशैर्नीयमानस्य दारुणैः ।
मृत्युदूतैर्दुराधर्षैर्घोरैर्घोरपराक्रमैः ।
वध्यस्याक्षिप्यमाणस्य विद्रुतस्य यमाज्ञया ।
पुण्यपापकृतं तिष्ठेत्सुखदुःखमशेषतः । [ 590 ]
यमदूतैर्दुराधर्षैर्नीयते वा कथं पुनः ।
किं वा तत्र गता देव कर्म कुर्वन्ति मानवाः ।
कथं धर्मपरा यान्ति देवताद्विजपूजकाः ।
कथं वा पापकर्माणो यान्ति प्रेतपुरं नराः ।

---

दानेपि ये पश्चाज् ( for the prior half ). $G_3$ $M_4$ ज्वलनेनापि दह्यते ; $M_{2.3}$ ज्वा( $M_3$ [ *inf. lin.* ] जा )लेन तु निचर्च्यते. — ( L. 559 ) $M_4$ पश्यमानस् ( for पच्य° ). $M_2$ चर्च्यमानं त्ववाक्शिरः. — ( L. 560 ) $G_1$ च मुच्यंति ; $G_3$ $M_4$ [अ]वमुंचति ; $M_{2.3}$ [अ]वमुच्यति ( for °च्येत ). $T_1$ क्रियते ; $G_2$ [आ]क्षीयते ( for क्षी° ). $T_1$ $G_2$ $M_3$ मतिः ( for गतिः ). — ( L. 561 ) $G_1$ विचार्यैव ; $G_3$ [अ]ाकुरुते ; $M_2$ पशुर्यैव ; $M_3$ [अ]वगूर्यैव ; $M_4$ [अ]पकार्यैव ( for [अ]विचार्यैवं ). $G_3$ पुरुषो ; $M_{2.3}$ संरंभाद् ; $M_4$ व्रजति ( for व्रजन्वै ). — ( L. 562 ) $M_{2.3}$ शतं ( for शत- ). $G_1$ -तप्यते ( for -पच्यते ). — ( L. 564 ) $M_{2.3}$ यात्येव ( for यातीमान् ). — ( L. 565 ) $T_1$ ईरयेद्गिरं ( by transp. ); $G_1$ ईरयेत्कचित्. — ( L 566 ) T $G_2$ $M_3$ [ए]नान् ( for [ए]तान् ). — ( L. 567 ) $G_2$ $M_4$ शुद्धया ; Kumbh. ed. श्लक्ष्णया ( for श्रद्धया ). $M_2$ पूरयंति ( for पूज° ). $G_3$ नरोत्तम. — ( L. 568 ) $M_{2.4}$ स्तुतश् ( for ततश् ). $G_3$ $M_{2.4}$ युधिष्ठिर ( for न संशयः ). — ( L. 569 ) $G_3$ न पूजयंति ये विप्रान्. $T_1$ $G_1$ क्रोधयंति ( for क्रोश° ). — ( L. 571 ) $M_4$ सागरु- ( for चागरु- ). — ( L. 572 ) $G_1$ काष्ठमयां ; $M_2$ लोहमयीं. $T_2$ महार्चां. — ( L. 573 ) $G_3$ सत्यं ( for सम्यग् ). — ( L. 574 ) $M_3$ corrupt. $G_3$ $M_4$ विप्रार्चनादर्चितोहं भवामि. — ( L. 577 ) $G_1$ सु- ( for स- ). — ( L. 578 ) $G_3$ दयितो ( for अजितो ). — Colophon. — *Sub-parvan* : T $G_{1.2}$ $M_{2-4}$ वैष्णवधर्म. — *Adhy. name* : $M_2$ कृत्याकृत्यविधिः. — *Adhy. no.* : $T_1$ 87 ; $T_2$ $G_{1.2}$ 86 ; $G_3$ 98 ; $M_2$ 4 ; $M_3$ 85 ; $M_4$ 97 . — ( L. 579 ) T $G_2$ कौतुहलं. — ( L. 580 ) $G_3$ $M_{2.4}$ जनार्दन ( for च केशव ). — $M_4$ om. lines 581-583. — ( L. 581 ) $G_3$ $M_2$ मनुष्यस्य. — ( L. 582 ) T वै ; $M_2$ च ( for वा ). $G_3$ वा ( for च ). — ( L. 583 ) $G_3$ केन वा ( for मानुषा ). — ( L. 584 ) $M_2$ -निर्मुक्तैः. $M_4$ मानुष्ये च विनिर्मुक्ते ( for the prior half ). — ( L. 586 ) $T_2$ $G_3$ $M_{2.3}$ जीवस्य स( $G_3$ य )मलोके तु ( $M_3$ °केषु ) ( for the prior half ). $G_3$ च ( for तु ). — $M_4$ om. lines 587-590. — ( L. 587 ) $G_2$ -बद्धस्तु ; $G_3$ -रूपस्य ( for -बद्धस्य ). $G_2$ नीयमानस्तु. — $G_1$ om. ( hapl. ) from the post. half of line 588 up to the prior half of line 591. — ( L. 589 ) $T_1$ $G_2$ बद्धस्याप्यप्रमाणस्य ( for the prior half ). $T_2$ $M_2$ विधूतस्य ( for विद्रु° ). — ( L. 590 ) $G_2$ -कृता ; $G_3$ -कृतस् ( for -कृतं ). $M_2$ पुण्यपापैः कथं तिष्ठेत् ; Kumbh. ed. °पापकृदातिष्ठेत् ( for the prior half ). — ( L. 592 ) $M_2$ गता देवाः ; $M_4$ महादेव. — ( L. 593 ) $G_3$ $M_{2.4}$ धर्मरता

किं रूपं किं प्रमाणं वा वर्णः को वास्य केशव ।
जीवस्य गच्छतो नित्यं यमलोकं ब्रवीहि मे ।

भगवानुवाच ।

शृणु राजन्यथावृत्तं यन्मां त्वं परिपृच्छसि ।
तत्तेऽहं कथयिष्यामि मद्भक्तस्य नरेश्वर ।
षडशीतिसहस्राणि योजनानां युधिष्ठिर ।
मानुष्यस्य च लोकस्य यमलोकस्य चान्तरम् ।
न तत्र वृक्षच्छाया वा न तटाकं सरोऽपि वा ।
न वाप्यो दीर्घिका वापि न कूपो वा युधिष्ठिर ।
न मण्टपं सभा वापि न प्रपा न निकेतनम् ।
न पर्वतो नदी वापि न भूमेर्विवरं क्वचित् ।
न ग्रामो वाश्रमो वापि नोद्यानं वा वनानि च ।
न किंचिदाश्रयस्थानं पथि तस्मिन्युधिष्ठिर ।
जन्तोर्हि प्राप्तकालस्य वेदनार्तस्य वै भृशम् ।
करणैस्त्यक्तदेहस्य प्राणैः कण्ठगतैः पुनः ।
शरीराच्चाल्यते जीवो ह्यवशो मातरिश्वना ।
निर्गतो वायुभूतस्तु षट्कोशात्तु कलेवरात् ।
शरीरमन्यत्तद्रूपं तद्वर्णं तत्प्रमाणकम् ।
अदृश्यं तत्प्रविष्टस्तु सोऽप्यदृष्टेन केनचित् ।
सोऽन्तरात्मा देहवतामष्टाङ्गो यस्तु संचरेत् ।
छेदनाद्भेदनाद्दाहात्ताडनाद्वा न नश्यति ।
नानारूपधरैर्घोरैः प्रचण्डैश्चण्डसाधनैः ।
नीयमानो दुराधर्षैर्यमदूतैर्यमाज्ञया ।
पुत्रदारमयैः पाशैः संनिरुद्धोऽवशो बलात् ।
स्वकर्मभिश्चानुगतः कृतैः सुकृतदुष्कृतैः ।
आक्रन्दमानः करुणं बन्धुभिर्दुःखपीडितैः ।
त्यक्त्वा बन्धुजनं सर्वं निरपेक्षस्तु गच्छति ।
मातृभिः पितृभिश्चापि भ्रातृभिर्मातुलैस्तथा ।
दारैः पुत्रैर्वयस्यैश्च रुदद्भिस्त्यज्यते पुनः ।
अदृश्यमानस्तैर्दीनैरश्रुपूर्णमुखेक्षणैः ।
स्वशरीरं परित्यज्य वायुभूतस्तु गच्छति ।
अन्धकारमपारं तं महाघोरं तमोवृतम् ।
दुःखान्तं दुष्प्रतारं च दुर्गमं पापकर्मणाम् ।
दुःसहायं दुरन्तं च दुर्निरीक्ष्यं दुरासदम् ।
दुरापमतिदुःखं च पापिष्ठानां नरोत्तम ।
ऋषिभिः कथ्यमानं तत्पारंपर्येण पार्थिव ।

---

( for °परा ). $G_3$ $M_{2.4}$ दैवत- ( for देवता- ). — ( L. 594 ) $G_3$ $M_4$ प्रेत- ( for पाप- ). — ( L. 595 ) $G_2$ वै ( for the first वा ). — ( L. 596 ) $M_2$ यमलोके. — After line 596, $M_4$ ins. :

वैशंपायन उवाच ।

एवमुक्तः सुरश्रेष्ठः पाण्डवेन महात्मना ।
प्रत्युवाच नरश्रेष्ठं धर्मराजं जनार्दनः ।

— ( L. 597 ) $G_3$ $M_{2-4}$ -तत्त्वं ( for -वृत्तं ). $M_{2.4}$ मा ( for मां ). — ( L. 598 ) $G_3$ न संशयः ( for नरेश्वर ). — ( L. 599 ) $G_3$ $M_2$ -सहस्राणां. $M_2$ योजनानि. $G_3$ $M_4$ शतानि च ( for युधिष्ठिर ). — ( L. 600 ) T $M_2$ मानुषस्य. — ( L. 601 ) $G_3$ तस्य ( for तत्र ). $M_4$ च ( for the first वा ). — ( L. 602 ) $G_1$ च कूपो; $G_3$ कूपं वा; $M_4$ कूपा वा ( for कूपो वा ). — ( L. 603 ) $G_{1.2}$ वा ( for the second न ). $G_3$ $M_4$ निवेशनं ( for निकेतनम् ). — ( L. 605 ) $T_2$ वाश्रितो; $M_{2-4}$ नाश्रमो. $G_3$ नोद्यानानि वनानि च; $M_{2.4}$ नोद्यानं काननानि वा ( for the post. half ). — ( L. 606 ) $T_1$ $G_3$ विश्रम-; $M_2$ विक्रम-; $M_4$ आश्रम- ( for °य- ). $M_4$ किंचिद् ( for तस्मिन् ). — ( L. 607 ) $G_3$ $M_{2.4}$ सं- ( for हि ). — ( L. 608 ) $M_4$ कारणैस्. $G_1$ $M_3$ तस्य ( for त्यक्त- ). — ( L. 609 ) $T_1$ चोद्यते; $G_2$ याप्यते; $M_{2.4}$ च्याव्यते ( for चाल्यते ). — ( L. 610 ) $G_3$ $M_4$ षट्कोशिक- ( for षट्कोशात्तु ). — After line 610, $G_3$ ins. :

त्वगस्थिस्नायुमज्जानि स्वमांसरुधिराणि च ।

— ( L. 611 ) T तत्प्रमाणवत्; $G_{1.2}$ °णतः. — ( L. 612 ) $G_2$ अदृश्यस्. T $G_1$ तं; $G_3$ $M_{2-4}$ सं- ( for तत् ). T G $M_4$ [अ]दृष्टो न ( for °ष्टेन ). — ( L. 614 ) $G_3$ $M_3$ छेदनाद्दहनाद्भेदात्; $M_2$ स देहच्छेदनाद्दाहात् ( for the prior half ). $G_3$ $M_4$ वि- ( for न ). — ( L. 615 ) $G_3$ दुष्टशासनैः; $M_4$ चंडविक्रमैः ( for °साधनैः ). — ( L. 616 ) $G_3$ $M_{2.4}$ ह्री( $M_4$ ह्रि )यमाणो ( for नीयमानो ). — ( L. 617 ) $M_{3.4}$ स ( for सं- ). $G_3$ $M_4$ [ऽ]वशाद् ( for ऽवशो ). — ( L. 618 ) $T_2$ [अ]प्यगुणः; $M_4$ [अ]नुगतैः. $G_3$ $M_2$ कर्मभिश्चाप्यनुगतः ( for the prior half ). $M_2$ स्वकैः ( for कृतैः ). — ( L. 619 ) $G_{2\ 3}$ आक्रंद्यमानः. — ( L. 620 ) $M_4$ निरपेक्षं. — ( L. 621 ) $G_3$ $M_{2.4}$ [ए]व ( for [अ]पि ). — ( L 622 ) $G_3$ पुत्रैर्वयस्यैर्दारैश्च. T $G_1$ त्यजते. — ( L. 623 ) T दारैर् ( for दीनैर् ). — ( L. 625 ) $G_2$ $M_3$ महाघोर-. — ( L. 626 ) $G_3$ $M_3$ दुःखार्तं. $M_4$ दुष्प्रकारं. $M_{2.3}$ -कर्मिणः. Madras ed. दुष्प्रकारं च दुर्गमं ( for the post. half ). — ( L. 627 ) $G_3$ $M_4$ दुःसहं यद् ( for दुःसहायं ). — ( L. 628 ) $G_1$ अपि ( for अति- ). $G_{2.3}$ $M_{2.4}$ -दुर्गं ( for -दुःखं ). — ( L. 629 ) $T_2$ $G_{1.2}$ $M_3$ तं ( for तत् ). — ( L. 630 ) $G_1$ $M_3$ श्रूयमानं; $G_3$ $M_4$

त्रासं जनयति प्रायः श्रूयमाणं कथास्वपि । [ 630 ]
अवश्यं चैव गन्तव्यं तदध्वानं युधिष्ठिर ।
प्राप्तकालेन संत्यज्य बन्धून्भोगान्धनानि च ।
जरायुजैरण्डजैश्च स्वेदजैरुद्भिज्जैस्तथा ।
जङ्गमैः स्थिरजैश्चैव गन्तव्यं यमसादनम् ।
देवासुरैर्मनुष्याद्यैर्वैवस्वतवशानुगैः । [ 635 ]
स्त्रीपुंनपुंसकैश्चापि पृथिव्यां जीवसंज्ञितैः ।
मध्यमैर्युवभिर्वापि बालैर्वृद्धैस्तथैव च ।
जातमात्रैश्च गर्भस्थैर्गन्तव्यः स महापथः ।
पूर्वाह्णे वापराह्णे वा संध्याकालेऽथ वा पुनः ।
प्रदोषे वार्धरात्रे वा प्रत्यूषे वाप्युपस्थिते । [ 640 ]
प्रवासस्थैर्वनस्थैर्वा पर्वतस्थैर्जलस्थितैः ।
क्षेत्रस्थैर्वा नभःस्थैर्वा गृहमध्यगतैरपि ।
भुञ्जद्भिर्वा पिबद्भिर्वा खादद्भिर्वा नरोत्तम ।
आसीनैर्वा स्थितैर्वापि शयनीयगतैरपि ।
जाग्रद्भिर्वा प्रसुप्तैर्वा गन्तव्यस्तु महापथः । [ 645 ]
मृत्युदूतैर्दुराधर्षैः प्रचण्डैश्चण्डशासनैः ।
आक्षिप्यमाणा ह्यवशाः प्रयान्ति यमसादनम् ।
क्वचिद्भीतैः क्वचित्त्रस्तैः प्रस्खलद्भिः क्वचित्क्वचित् ।
क्रन्दद्भिर्वेदनार्तैस्तु गन्तव्यं यमसादनम् ।
निर्भर्त्स्यमानैरुद्विग्नैर्विधूतैर्भयविह्वलैः । [ 650 ]
तुद्यमानशरीरैश्च गन्तव्यं तर्जनैः सदा ।
कण्टकाकीर्णमार्गेण तप्तवालुकपांसुना ।
दह्यमानैस्तु गन्तव्यं नरैर्दानविवर्जितैः ।
काष्ठोपलशिलाघातैर्दण्डोल्मुककशाङ्कुशैः ।
हन्यमानैर्यमपुरं गन्तव्यं धर्मवर्जितैः । [ 655 ]
मेदःशोणितपूयार्द्रैर्वक्त्रैर्गात्रैश्च सव्रणैः ।
दग्धक्षतजकीर्णैश्च गन्तव्यं जीवघातकैः ।
क्रन्दद्भिश्च रुदद्भिश्च क्रोशद्भिश्चापि विस्वनम् ।
वेदनार्तैश्च कूजद्भिर्विक्रोशद्भिश्च विस्वरम् ।
वेदनार्तैः पतद्भिश्च गन्तव्यं जीवघातकैः । [ 660 ]
भग्नपादोरुहस्ताङ्गैर्भग्नदन्तशिरोधरैः ।
छिन्नकण्ठोष्ठनासैश्च गन्तव्यं जीवघातकैः ।
शक्तिभिर्भिण्डिपालैश्च शङ्कुतोमरसायकैः ।
तुद्यमानैस्तु शूलाग्रैर्गन्तव्यं जीवघातकैः ।
श्वभिर्व्याघ्रैर्वृकैः काकैर्भक्ष्यमाणाः समन्ततः । [ 665 ]
तुद्यमानाश्च गच्छन्ति राक्षसैर्मांसखादिभिः ।
महिषैश्च मृगैश्चापि सूकरैः पृषतैस्तथा ।

---

°माणः. — ( L. 631 ) $M_4$ गंतव्यस्. $T_1$ $G_2$ तथाध्वानं; $G_3$ $M_4$ तदध्वा तु. — ( L. 632 ) $T_2$ भोगं. — ( L. 633 ) $G_1$ अंडजैश्चैव ( hypermetric ); $G_3$ $M_2$ चांडजैश्च. $G_2$ $M_3$ उद्भिदैस्. $G_3$ अपि ( for तथा ). — ( L. 634 ) $G_1$ $M_3$ जंगम-. $G_3$ $M_4$ -संज्ञैश्च ( for -जैश्चैव ). $G_3$ $M_{2.3}$ गंतव्यं हि यमालयं. — $G_1$ repeats line 635 after line 649. — ( L. 635 ) $M_2$ देवासुर-. — ( L. 636 ) $T_2$ $G_{1.2}$ -संस्थितैः ( for -संज्ञितैः ). — ( L. 637 ) $G_1$ $M_{2.3}$ यौवनैर्; $G_2$ याचनैर् ( for युवभिर् ). $G_3$ $M_4$ बालै( $G_3$ °ल्यै )र्वृद्धैर्वापि ( by transp. ). $M_2$ [अ]पि ( for [ए]व ). — ( L. 638 ) $T_1$ सु- ( for स ). $M_2$ -पथं ( for -पथः ). — ( L. 639 ) $M_2$ च ( for the first वा ). $G_3$ संधिकाले. $G_1$ यथा ( for ऽथ वा ). — ( L. 640 ) $M_2$ च ( for the first वा ). — ( L. 641 ) $G_3$ वन- ( for जल- ). — ( L. 642 ) $T_2$ $G_1$ $M_3$ स्थलस्थैर्; $G_3$ ग्रह°; $M_4$ कुल° ( for नभः° ). Some MSS. ग्रहमध्य-. — ( L. 643 ) $G_3$ $M_4$ लिखद्भिर् ( for पिब° ). $M_2$ नराधिप ( for नरोत्तम ). — ( L. 644 ) $G_3$ गतैर् ( for स्थितैर् ). — ( L. 645 ) $G_3$ सु-; $M_{2.4}$ स ( for तु ). — ( L. 646 ) $G_3$ प्रसिद्धैश् ( for प्रचण्डैश् ). $G_3$ $M_4$ -विक्रमैः ( for -शासनैः ). — ( L 647 ) $M_4$ विवशा; Madras ed. विवशं ( for ह्यवशाः ). $G_3$ आक्षिप्यमाणो ह्यवशः ( for the prior half ). $M_{2.4}$ यांति शीघ्रं यमालयं. — ( L. 648 ) T $G_{1.2}$ स्थितैः ( for भीतैः ). — ( L. 650 ) $G_3$ $M_{2.4}$ विद्रुतैर्; Madras ed. विधृतैर् ( for विधूतैर् ). — ( L. 651 ) $G_3$ $M_4$ कल्प्यमान- ( for तुद्य° ). $G_3$ $M_{2.4}$ तु ( for च ). $G_3$ $M_{2-4}$ स्त्रीजितैः; Kumbh. ed. तर्जितैस् ( for तर्जनैः ). T $G_{1.2}$ तथा ( for सदा ). — ( L. 653 ) $G_3$ $M_4$ मंतव्यो ( for गन्तव्यं ). — ( L. 654 ) T G दग्धोल्मुक- ( for दण्डो° ). — ( L. 655 ) T $G_1$ $M_{2.3}$ दह्यमानैर् ( $T_1$ °नं ) ( for हन्य° ). — ( L. 656 ) $M_2$ वक्त्र- ( for वक्त्रैर् ). $G_3$ $M_4$ भूषणैः ( for सव्रणैः ). — ( L. 657 ) $T_2$ दंत- ( for दग्ध- ). $G_{2.3}$ $M_{2.4}$ दग्ध( $G_3$ दंड )क्षतव्रणा( $M_2$ °जा )-कीर्णैर् ( for the prior half ). — $G_{1.2}$ om. line 658. — ( L. 658 ) $T_1$ निक्रुद्भिश् ( for क्रन्द° ). $M_2$ आक्रंदनैश्च कूजद्भिर् ( for the prior half ). $T_1$ $M_{3.4}$ विस्वरं. $M_2$ विक्रोशद्भिश्च विस्वनं. — After line 658, $T_2$ reads line 660, repeating it in its proper place. $G_3$ $M_{2.4}$ om. ( hapl. ) line 659. — ( L. 659 ) $M_3$ वेदनार्थैश्. $G_1$ क्रोशद्भिश्चैव विस्वरं ( for the post. half ). — $G_3$ om. ( hapl. ) lines 661–664. — ( L. 661 ) $M_{2.3}$ -हस्ताग्रैर्. Kumbh. ed. -जंघा- ( for -दन्त- ). — ( L. 662 ) $G_1$ -कंठोरु- ( for -कण्ठोष्ठ- ). $G_2$ $M_2$ छि( $M_2$ भि )न्नकर्णोष्ठनासैश्च. — ( L. 663 ) $G_2$ शक्ति- ( for शङ्कु- ). — ( L. 664 ) $T_1$ $G_1$ $M_4$ तुद्यमानस्तु. — ( L. 665 ) $G_3$ कंकैर् ( for काकैर् ). — ( L. 666 ) $M_2$ तु

भक्ष्यमाणैस्तदध्वानं गन्तव्यं मांसखादिभिः ।
सूचीसुतीक्ष्णतुण्डाभिर्मक्षिकाभिः समन्ततः ।
तुद्यमानैस्तु गन्तव्यं पापिष्ठैर्बालघातकैः । [ 670 ]
विस्रब्धं स्वामिनं मित्रं स्त्रियं वा घ्नन्ति ये नराः ।
शस्त्रैर्निर्भिद्यमानैस्तैर्गन्तव्यं यमसादनम् ।
घातयन्ति च ये जीवान्दुःखमापादयन्ति च ।
राक्षसैश्च श्वभिश्चैव भक्ष्यमाणा व्रजन्ति ते ।
ये हरन्ति च वस्त्राणि शय्याः प्रावरणानि च । [ 675 ]
ते यान्ति विद्रुता नग्नाः पिशाचा इव तत्पथम् ।
गाश्च धान्यं हिरण्यं च बलात्क्षेत्रगृहं तथा ।
ये हरन्ति दुरात्मानः परस्वं पापकारिणः ।
पाषाणैरुल्मुकैर्दण्डैः काष्ठघातैश्च झर्झरैः ।
हन्यमानैः क्षताकीर्णैर्गन्तव्यं तैर्यमालयम् । [ 680 ]
ब्रह्मस्वं ये हरन्तीह नरा नरकनिर्भयाः ।
आक्रोशन्तीह वा नित्यं प्रहरन्ति च ये द्विजान् ।
शुष्ककण्ठा निबद्धास्ते छिन्नजिह्वाक्षिनासिकाः ।
पूयशोणितदुर्गन्धा भक्ष्यन्ते काकजम्बुकैः ।
चण्डालैर्भीषणैश्चण्डैस्तुद्यमानाः समन्ततः । [ 685 ]
क्रोशन्तः करुणं घोरं गच्छन्ति यमसादनम् ।
तत्र चापि गताः पापा विष्ठाकूपेष्वनेकशः ।
जीवन्तो वर्षकोटीस्तु क्लिश्यन्ते वेदनार्दिताः ।
ततश्च मुक्ताः कालेन लोके चास्मिन्नराधमाः ।
विष्ठाक्रिमित्वं गच्छन्ति जन्मकोटिशतं नृप । [ 690 ]
विद्यमानधनैर्यस्तु लोभडम्भानृतान्वितैः ।
श्रोत्रियेभ्यो न दत्तानि दानानि कुरुपुंगव ।
ग्रीवापाशनिबद्धास्ते हन्यमानाश्च राक्षसैः ।
क्षुत्पिपासाश्रमार्तास्तु यान्ति प्रेतपुरं नराः ।
अदत्तदाना गच्छन्ति शुष्ककण्ठास्यतालुकाः । [ 695 ]
अन्नं पानीयसहितं प्रार्थयन्तः पुनः पुनः ।
स्वामिन्बुभुक्षातृष्णार्ता गन्तुं नैवाद्य शक्नुमः ।
ममान्नं दीयतां स्वामिन्पानीयं दीयतां मम ।
इति ब्रुवन्तस्तैर्दूतैर्यापयन्ति यमालयम् ।

वैशंपायन उवाच ।

तच्छ्रुत्वा वचनं विष्णोः पपात भुवि पाण्डवः । [ 700 ]
निःसंज्ञोऽपि भयत्रस्तो मूर्छया समभिप्लुतः ।

---

अष्टाढकतिलैः कृत्वा तिलधेनुं नराधिप ।
द्वात्रिंशन्निष्कसंयुक्तं विषुवे यः प्रयच्छति ।
मद्भक्त्या मद्गतात्मा वै तस्य पुण्यफलं शृणु ।
कन्यादानसहस्रस्य विधिदत्तस्य यत्फलम् ।
तत्पुण्यं समनुप्राप्तो मम लोके महीयते । [ 1170 ]
मम लोकावतीर्णश्च सोऽस्मिँल्लोकेऽभिजायते ।
ऋग्यजुःसामवेदानां पारगो ब्राह्मणर्षभः ।
गां तु यस्तु दरिद्राय श्रोत्रियाय प्रयच्छति ।
प्रसन्नां क्षीरिणीं पुण्यां सवत्सां कांस्यदोहिनीम् ।
यत्किंचिद्दुष्कृतं कर्म तस्य पूर्वकृतं नृप । [ 1175 ]
तत्सर्वं तत्क्षणादेव विनश्यति न संशयः ।
यानं च वृषसंयुक्तं दीप्यमानं स्वलंकृतम् ।
आरूढः कामगं दिव्यं गोलोकमधिगच्छति ।
यावन्ति चैव रोमाणि तस्या गोस्तु नराधिप ।
तावद्वर्षसहस्राणि गवां लोके महीयते । [ 1180 ]
गोलोकादवतीर्णस्तु लोकेऽस्मिन्ब्राह्मणो भवेत् ।
सत्रयाजी वदान्यश्च सर्वराजभिरर्चितः ।
तिलं गावः सुवर्णं चाप्यन्नं कन्या वसुंधरा ।
तारयन्तीह दत्तानि ब्राह्मणेभ्यो महाभुज ।
ब्राह्मणं वृत्तसंपन्नमाहिताग्निमलोलुपम् । [ 1185 ]
तर्पयेद्विधिवद्राजन्स निधिः पारलौकिकः ।
आहिताग्निं दरिद्रं च श्रोत्रियं च जितेन्द्रियम् ।
शूद्रान्नवर्जितं चैव द्विजं यत्नेन पूजयेत् ।
आहिताग्निः सदा पात्रमग्निहोत्रश्च वेदवित् ।
पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे । [ 1190 ]
यच्च वेदमयं पात्रं यच्च पात्रं तपोमयम् ।
असंकीर्णं च यत्पात्रं तत्पात्रं तारयिष्यति ।
नित्यं स्वाध्यायनिरतास्त्वप्रकीर्णेन्द्रियाश्च ये ।
पञ्चयज्ञरता नित्यं पूजितास्तारयन्ति ते ।
ये क्षान्तिदान्ताः श्रुतिपूर्णकर्णा [ 1195 ]
जितेन्द्रिया प्राणिवधे निवृत्ताः ।
प्रतिग्रहे संकुचिता गृहस्था-
स्ते ब्राह्मणास्तारयितुं समर्थाः ।
नित्योदकी नित्ययज्ञोपवीती
नित्यस्वाध्यायी वृषलान्नवर्जी । [ 1200 ]
ऋतौ गच्छन्विधिवच्चापि जुह्व-
न्स ब्राह्मणस्तारयितुं समर्थः ।
ब्राह्मणो यस्तु मद्भक्तो मद्याजी मत्परायणः ।
मयि संन्यस्तकर्मा च स विप्रस्तारयेद्ध्रुवम् ।

---

°दाता ) च ( for the prior half ). — ( L. 1157 ) $G_3$ दिव्यं विमानमारूढः ( for the prior half ). $M_2$ पितृलोकं स गच्छति ( for the post. half ). — ( L. 1158 ) $T_2$ $G_1$ ( first time ) $M_{2.3}$ पष्टिं; $G_3$ पष्टिर् ( for पष्टि- ). $M_2$ -तपाः ( for -यशाः ). — ( L. 1161 ) $G_3$ तस्यापि शृणु यत्फलं. — ( L. 1162 ) $G_3$ गोसहस्रस्य दानस्य (for the prior half ). $T_1$ lacuna for the post. half. —( L. 1163 ) $T_1$ यत्पुण्य-; $T_2$ तत्पुण्यं. $G_3$ तिलधेनुप्रदानतः ( for the post. half ). — ( L. 1166 ) $G_3$ अष्टादश-; $M_2$ °ढकैस्. — ( L. 1168 ) $M_{2.4}$ मद्भक्तो. $G_1$ मद्भक्ताय महात्मा वै ( for the prior half ). — ( L. 1169 ) $T_1$ विधिवत्तस्य. — ( L. 1171 ) $G_3$ लोकेवतीर्णश्. $G_3$ सोग्निहोत्रो ( for सोऽस्मिँल्लोके ). — ( L. 1172 ) $M_2$ ब्राह्मणो भवेत् ( for °णर्षभः ). — ( L. 1173 ) $M_2$ च ( for the first तु ). $G_3$ $M_{2.4}$ ब्राह्मणाय ( for श्रोत्रियाय ). —( L. 1174 ) $G_3$ $M_{2-4}$ -दोहनां ( for -दोहिनीम् ). — ( L. 1175 ) $M_4$ दुष्करं ( for दुष्कृतं ). —( L. 1179 ) $G_3$ तस्या ( for चैव ) and संति ( for तस्या ). — ( L. 1182 ) $G_3$ $M_{2.4}$ शतायुश्च ( for वदान्यश्च ). —( L. 1183 ) $G_3$ $M_4$ तिलं गां वस्त्रमन्नं च ( for the prior half ). $M_4$ स्वर्णं ( for [अ]प्यन्नं ). $G_3$ स्वर्णं कन्यां वसुंधरां ( for the post. half ). — ( L. 1185 ) T $M_3$ व्रत- ( for वृत्त- ). — ( L. 1188 ) $G_3$ $M_4$ -विरतं ( for -वर्जितं ). $M_2$ शूद्रान्नाद्विरतं चैव ( for the prior half ). — ( L. 1189 ) $G_{1.2}$ अग्निहोत्री ( $G_2$ °त्रं ); $G_3$ $M_4$ साग्निहोत्रश्; $M_{2.3}$ ( *inf. lin.* ) सदा पात्रश् ( for अग्निहोत्रश् ). — ( L. 1190 ) $G_3$ उत्तमं ( for अपि तत् ). — ( L. 1193 ) $M_{2.4}$ गूढं; Kumbh. ed. and Madras ed. नित्य- ( for नित्यं ). $M_2$. -नियमास् ( for -निरतास् ). Madras ed [अ]संकीर्णेंद्रियाश्. — ( L. 1194 ) $G_3$ $M_4$ -परा ( for -रता ). — ( L. 1195 ) $G_3$ क्षांतदांताः; $M_4$ क्षांता ** ( for क्षान्तिदान्ताः ). $M_2$ ये क्षांतिदांतां श्रुतिकर्णपूर्णा. — ( L. 1197 ) $G_{2.3}$ $M_4$ ग्रहस्थास् ( sic ). —( L. 1199 ) $G_3$ $M_4$ नित्योदको. —( L. 1201 ) $M_4$ श्रुण्वन् ( for जुह्वन् ). $M_2$ ऋतौ च गच्छन्विधिवच्च जुह्वन्. — ( L. 1203 ) T $G_1$ मद्रागी ( for मद्याजी ).

द्वादशाक्षरतत्त्वज्ञश्चतुर्व्यूहविभागवित् । [ 1205 ]
अच्छिद्रपञ्चकालज्ञः स विप्रस्तारयिष्यति ।

Colophon.

वैशंपायन उवाच ।

वासुदेवेन दानेषु कथितेषु यथाक्रमम् ।
अवितृप्तस्तु धर्मेषु केशवं पुनरब्रवीत् ।
देव धर्मामृतमिदं शृण्वतोऽपि परंतप ।
न विद्यते सुरश्रेष्ठ मम तृप्तिर्हि माधव । [ 1210 ]
अनडुत्संप्रदानस्य यत्फलं तु विधीयते ।
तत्फलं कथयस्वेह तव भक्तस्य मेऽच्युत ।
यानि चान्यानि दानानि त्वया नोक्तानि कानिचित् ।
तान्याचक्ष्व सुरश्रेष्ठ तेषां चानुक्रमात्फलम् ।

भगवानुवाच ।

पवित्रत्वात्सुपुण्यत्वात्पावनत्वात्तथैव च । [ 1215 ]
शृणु धर्मामृतं श्रेष्ठं दत्तस्यानडुहः फलम् ।
दशधेनुसमोऽनड्वानेकोऽपि कुरुपुंगव ।
मेदोमांसविपुष्टाङ्गो नीरोगः कोपवर्जितः ।
युवा भद्रः सुशीलश्च सर्वदोषविवर्जितः ।
धुरं धारयते क्षिप्रं दत्तो विप्राय पाण्डव । [ 1220 ]
स तेन पुण्यदानेन वर्षकोटिं युधिष्ठिर ।
यथाकामं महातेजा गवां लोके महीयते ।
यश्च दद्यादनडुहौ द्वौ युक्तौ च धुरंधरौ ।
सुवृत्ताय दरिद्राय श्रोत्रियाय विशेषतः ।
तस्य यत्पुण्यमाख्यातं तच्छृणुष्व युधिष्ठिर । [ 1225 ]
सहस्रगोप्रदानेन यत्प्रोक्तं फलमुत्तमम् ।
तत्पुण्यफलमाप्नोति याति लोकान्स मामकान् ।
यावन्ति चैव रोमाणि तयोरनडुहोर्नृप ।
तावद्वर्षसहस्राणि मम लोके महीयते ।
दरिद्रायैव दातव्यं न समृद्धाय पाण्डव । [ 1230 ]
वर्षाणां हि तटाकेषु फलं नैव पयोधिषु ।
यस्तु दद्यादनडुहं दरिद्राय द्विजातये ।
स तेन पुण्यदानेन पूतात्मा कुरुपुंगव ।
विमानं दिव्यमारूढो दिव्यरूपी यथासुखम् ।
मम लोकेषु रमते यावदाभूतसंप्लवम् । [ 1235 ]
गृहं दीपप्रभायुक्तं शय्यासनविभूषितम् ।
भाजनोपस्करैर्युक्तं धान्यपूर्णमलंकृतम् ।
दासीगोभूमिसंयुक्तं सफलं सर्वसाधनैः ।
ब्राह्मणाय दरिद्राय श्रोत्रियाय युधिष्ठिर ।
दद्यात्सदक्षिणं यस्तु तस्य पुण्यफलं शृणु । [ 1240 ]
देवाः पितृगणाश्चैव अग्नयो ऋषयस्तथा ।
प्रयच्छन्ति प्रहृष्टा वै यानमादित्यसंनिभम् ।
तेन गच्छेच्छ्रिया युक्तो ब्रह्मलोकमनुत्तमम् ।

---

— ( L. 1204 ) $G_1$ $M_{2-4}$ सन्यस्तकर्मा. $G_3$ $M_{2-4}$ तारयिष्यति ( for °येद्भुवम् ). — ( L. 1205 ) $M_{2.3}$ ( *inf. lin.* ) चतुर्वेद- ( for °र्व्यूह- ). — ( L. 1206 ) $G_3$ $M_4$ अच्छिद्रः. — Colophon. — *Sub-parvan :* T $G_{1.2}$ $M_{2-4}$ वैष्णवधर्म. — *Adhy. name :* T $G_{1.3}$ $M_{2-4}$ सर्वदानसमुच्चयः. — *Adhy. no. :* T $G_2$ 90 ; $G_1$ 89 ; $G_3$ 100 ; $M_2$ 6 ; $M_3$ 80 ; $M_4$ 99. — ( L. 1208 ) $M_2$ स ( for तु ). $G_{2.3}$ $M_{2.4}$ राजा केशवमब्रवीत् ( for the post. half ). — ( L. 1212 ) $G_2$ $M_2$ मम ( for तव ). — ( L. 1213 ) $G_3$ मम च ( for त्वया न ). $G_2$ यानि च ( for कानिचित् ). -- $G_3$ $M_{2.4}$ transp. lines 1215 and 1216. — ( L. 1216 ) $G_3$ $M_2$ शृणु धर्मं नृप( $M_2$ °र्मविदां )श्रेष्ठ ( for the prior half ). $M_2$ [अ]नडुहं. — ( L. 1217 ) $M_4$ वै ( for ऽपि ). — ( L. 1218 ) $G_1$ $M_2$ निरोगः. — $M_4$ om. ( hapl. ) line 1219. — ( L. 1219 ) $M_2$ सुशीलं वा ( for °लश्च ). $T_2$ -रोष- ( for -दोष- ). — ( L. 1220 ) $M_3$ धारयति. $G_3$ $M_4$ धुरं धरति योनड्वान् ; $M_2$ धुरंधरस्तारयति ( for the prior half ). — ( L. 1222 ) $G_2$ यथाक्रमं ; $G_3$ °कालं ( for °कामं ). — ( L. 1223 ) $T_2$ यतो ; $G_3$ $M_4$ यस्तु ( for यश्च ). $G_3$ $M_{2.4}$ अनड्वाहौ. — ( L. 1224 ) $M_4$ सुव्रताय. — ( L. 1226 ) $M_2$ गोसहस्र- ( for सहस्रगो- ). — ( L. 1227 ) $G_3$ पुण्यं ( for पुण्य- ). $T_2$ $G_3$ $M_{2.4}$ आसाद्य ( for आप्नोति ). $M_4$ सनातनान् ( for स मामकान् ). — $M_4$ om. lines 1231–1233. — ( L. 1231 ) $M_2$ वर्षस्य ( for वर्षाणां ). — ( L. 1232 ) $G_3$ $M_{2.3}$ यस्तु ( $M_2$ °त्तु ) नैवेशिकं दद्याद् ( for the prior half ). $M_{2.3}$ द्विजाय वै ( for द्विजातये ). — ( L. 1233 ) $G_3$ -पाकेन प्रीतात्मा ( for -दानेन पू° ). — ( L. 1234 ) $G_3$ दिव्यं विमानमारूढो. — ( L. 1237 ) $T_1$ धनपूर्णम् ; Kumbh. ed. धनधान्यैर् ( for धान्यपूर्णम् ). — ( L. 1238 ) $M_4$ दासीभिर् ( *sup. lin.* °भ्यो ) ( for दासीगो- ). $G_3$ अन्येषां ; $M_{2.3}$ ( *inf. lin.* ) युक्तं वा ; $M_4$ अन्यूनं ( for सफलं ). — $M_4$ om. lines 1239–1247. — ( L. 1241 ) $G_3$ $M_2$ मुनयस्त्वृषयस्तथा ( for the post. half ). — ( L. 1242 ) $M_2$ -वर्चसं ( for -संनिभम् ). — ( L. 1244 ) Kumbh. ed. रम्ये ( for दिव्ये ). $G_3$ स्त्रीसहस्रवृतो नित्यं ( for the prior half ). — ( L. 1246 )

स्त्रीसहस्रावृते दिव्ये भवने तत्र काञ्चने ।
मोदते ब्रह्मलोकस्थो यावदाभूतसंप्लवम् । [ 1245 ]
शय्यां प्रस्तरणोपेतां यः प्रयच्छति पाण्डव ।
अर्चयित्वा द्विजं भक्त्या वस्त्रमाल्यानुलेपनैः ।
भोजयित्वा विचित्रान्नं तस्य पुण्यफलं शृणु ।
धेनुदानस्य यत्पुण्यं विधिदत्तस्य पाण्डव ।
तत्पुण्यं तमनुप्राप्य पितृलोके महीयते । [ 1250 ]
शिल्पमध्ययनं वापि विद्यामन्त्रौषधानि च ।
यः प्रयच्छति विप्राय तस्य पुण्यफलं शृणु ।
आहिताग्निसहस्रस्य पूजितस्यैव यत्फलम् ।
तत्पुण्यफलमाप्नोति यस्तु विद्यां प्रयच्छति ।
छन्दोभिः संप्रयुक्तेन विमानेन विराजता । [ 1255 ]
सप्तर्षिलोकान्व्रजति पूज्यते ब्रह्मवादिभिः ।
चतुर्युगानि वै त्रिंशत्क्रीडित्वा तत्र देववत् ।
इह मानुष्यके लोके विप्रो भवति वेदवित् ।
विश्रामयति यो विप्रं श्रान्तमध्वनि कर्शितम् ।
विनश्यति तदा पापं तस्य वर्षकृतं नृप । [ 1260 ]
अथ प्रक्षालयेत्पादौ तस्य तोयेन भक्तिमान् ।
दशवर्षकृतं पापं व्यपोहति न संशयः ।
घृतेन वाथ तैलेन पादौ तस्य तु पूजयेत् ।
तद्द्वादशसमारूढं पापमाशु व्यपोहति ।
धेनुकाञ्चनदत्तस्य यच्च पुण्यमुदाहृतम् । [ 1265 ]
तत्पुण्यफलमाप्नोति यस्त्वेवं विप्रमर्चयेत् ।
स्वागतेन च यो विप्रं पूजयेदासनेन च ।
प्रत्युत्थानेन वा राजन्स देवानां प्रियो भवेत् ।
स्वागतेनाग्नयो राजन्नासनेन शतक्रतुः ।
प्रत्युत्थानेन पितरः प्रीतिं यान्त्यतिथिप्रियाः [ 1270 ]
अग्निशक्रपितॄणां च तेषां प्रीत्या नराधिप ।
संवत्सरकृतं पापं तस्य सद्यो विनश्यति ।
यः प्रयच्छति विप्राय आसनं माल्यभूषितम् ।
स याति मणिचित्रेण रथेनेन्द्रनिकेतनम् ।
पुरंदरपुरे तत्र दिव्यनारीविभूषितः । [ 1275 ]
षष्टिं वर्षसहस्राणि क्रीडत्यप्सरसां गणैः ।
वाहनं यः प्रयच्छेत ब्राह्मणाय युधिष्ठिर ।
स याति रत्नचित्रेण वाहनेन सुरालयम् ।
स तत्र कामं क्रीडित्वा सेव्यमानोऽप्सरोगणैः ।
इह राजा भवेद्राजन्नात्र कार्या विचारणा । [ 1280 ]
पादपं पल्लवाकीर्णं पुष्पितं फलितं तथा ।
गन्धमाल्यैरथाभ्यर्च्य वस्त्राभरणभूषितम् ।
यः प्रयच्छति विप्राय श्रोत्रियाय सदक्षिणम् ।
भोजयित्वा यथाकामं तस्य पुण्यफलं शृणु ।
जाम्बूनदविचित्रेण विमानेन विराजता । [ 1285 ]
पुरंदरपुरं याति जयशब्दरवैर्युतः ।
ततः शक्रपुरे रम्ये तस्य कल्पकपादपः ।
ददाति चेप्सितं सर्वं मनसा यद्यदिच्छति ।
यावन्ति तस्य पत्राणि पुष्पाणि च फलानि च ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते । [ 1290 ]
शक्रलोकावतीर्णश्च मानुष्यं लोकमागतः ।

---

$M_2$ प्रावरणोपेतां ( for प्रस्तर° ). — ( L. 1247 ) $G_3$ गंध- ( for वस्त्र- ). — ( L. 1250 ) $M_2$ तत्पुण्यं समनुप्राप्तः ( for the prior half ). $T_1$ ब्रह्म- ( for पितृ- ). — ( L. 1251 ) $M_4$ स्वल्पम् ( for शिल्पम् ). — ( L. 1253 ) $G_3$ $M_{2.4}$ तार्पे( $M_2$ कल्पि )तस्येह यत्फलं ( for the post. half ). — ( L. 1254 ) T $G_{1.2}$ शय्यां ( for विद्यां ). — ( L. 1259 ) $M_{2.4}$ अध्ववि- ( for अध्वनि ). — ( L. 1260 ) $M_4$ तस्य पुण्यफलं शृणु ( for the post. half ). — ( L. 1261 ) $M_2$ ततः ( for अथ ). — ( L. 1263 ) $M_4$ पादं. $M_2$ यस्तस्य ( for तस्य तु ). — ( L. 1264 ) $M_2$ स ( for तद् ). — ( L. 1265 ) $G_3$ $M_{2.3}$ ( *inf. lin.* )$_{.4}$ -द्रानस्य ( for -काञ्चन- ). $G_3$ तु; $M_4$ तत् ( for च ). — ( L. 1266 ) $M_3$ यस्त्वैवं; Madras ed. यस्त्वेनं ( for यस्त्वेवं ). — ( L. 1268 ) $M_3$ वै ( for वा ). $M_2$ भवेत्प्रियः ( by transp. ). — ( L. 1270 ) $M_2$ प्रीणयंति ( for प्रीतिं यान्ति ). — $M_4$ om. lines 1271–1273. — ( L. 1271 ) $M_2$ अग्नि शक्रं ( for अग्निशक्र- ). — ( L. 1273 ) $G_{2.3}$ $M_2$ यानं माल्यविभूषितं ( for the post. half ). — ( L. 1274 ) $G_3$ $M_4$ -युक्तेन ( for -चित्रेण ). $G_1$ [इं]दु- ( for [इ]न्द्र- ). — ( L. 1275 ) Kumbh. ed. and Madras ed. पुरंदरासने तत्र ( for the prior half ). $G_3$ $M_{2-4}$ -भूषण- ( for -नारीवि- ). $M_2$ -भूषितं. — ( L. 1276 ) $G_3$ $M_3$ षष्टिर्; $M_4$ षष्टि-. — After line 1276, $T_2$ $G_3$ $M_{2.3}$ ins. :

इह लोके तु धनवाञ्चतुर्वेदी द्विजो भवेत् ।

— ( L. 1281 ) $M_{2.4}$ सफलं ( for फलितं ). — ( L. 1282 ) T अर्चयित्वा ( for अथाभ्यर्च्य ). $G_3$ $M_{2.4}$ गंधमाल्यार्चितं कृत्वा ( for the prior half ). $M_4$ वस्त्रभूषणभूषितं. — ( L. 1287 ) $G_3$ $M_{2.4}$ तत्र ( for ततः ). $M_2$ कल्पस्य ( for कल्पक- ). — $G_2$ om. lines 1289–1292. — ( L. 1289 ) $G_3$ पर्णानि ( for पत्राणि ). — ( L. 1290 ) $G_3$ $M_{2.4}$ शक्र- ( for स्वर्ग- ). — ( L. 1291 ) $M_2$ मानुषं. — ( L. 1292 ) $G_3$ $M_4$ गजाश्वरथसंपूर्णं ( $G_3$ °र्णः ) ( for the

रथाश्वगजसंपूर्णं पुरं राज्यं च रक्षति ।
स्थापयित्वा तु मद्भक्त्या यो मत्प्रतिकृतिं नरः ।
आलयं विधिवत्कृत्वा पूजाकर्म च कारयेत् ।
स्वयं वा पूजयेद्भक्त्या तस्य पुण्यफलं शृणु । [ 1295 ]
अश्वमेधसहस्रस्य यत्पुण्यं समुदाहृतम् ।
तत्फलं समवाप्नोति मत्सालोक्यं प्रपद्यते ।
न जाने निर्गमं तस्य मम लोकाद्युधिष्ठिर ।
देवालये विप्रगृहे गोवाटे चत्वरेऽपि वा ।
प्रज्वालयति यो दीपं तस्य पुण्यफलं शृणु । [ 1300 ]
आरुह्य काञ्चनं यानं द्योतयन्सर्वतोदिशम् ।
गच्छेदादित्यलोकं स सेव्यमानः सुरोत्तमैः ।
तत्र प्रकामं क्रीडित्वा वर्षकोटिं महातपाः ।
इह लोके भवेद्विप्रो वेदवेदाङ्गपारगः ।
देवालयेषु वा राजन्ब्राह्मणावसथेषु वा । [ 1305 ]
चत्वरे वा चतुष्के वा रात्रौ वा यदि वा दिवा ।
नानागन्धर्ववाद्यानि धर्मश्रावणिकानि च ।
यस्तु कारयते भक्त्या मद्गतेनान्तरात्मना ।
तस्य देवा नरश्रेष्ठ पितरश्चापि हर्षिताः ।
सुप्रीताः संप्रयच्छन्ति विमानं कामगं शुभम् । [ 1310 ]
स च तेन विमानेन याति देवपुरं नरः ।
तत्र दिव्याप्सरोभिस्तु सेव्यमानः प्रमोदते ।
देवलोकावतीर्णस्तु सोऽस्मिँल्लोके नराधिप ।
वेदवेदाङ्गतत्त्वज्ञो भोगवान्ब्राह्मणो भवेत् ।
चत्वरे वा सभायां वा विस्तीर्णे वा सभाङ्गणे । [ 1315 ]
कृत्वाग्निकुण्डं विपुलं स्थण्डिलं वा युधिष्ठिर ।
तत्राग्निं चतुरो मासाञ्ज्वलयेद्यस्तु भक्तिमान् ।
समाप्तेषु च मासेषु पौष्यादिषु ततो द्विजान् ।
भोजयेत्पायसं मृष्टं मद्गतेनान्तरात्मना ।
दक्षिणां च यथाशक्ति ब्राह्मणेभ्यो निवेदयेत् । [ 1320 ]
एवमग्निं तु यः कुर्यान्नित्यमेवार्चयंस्तु माम् ।
तस्य पुण्यफलं यद्वै तन्निबोध युधिष्ठिर ।
तेनाहं शंकरश्चैव पितरो ह्यग्नयस्तथा ।
यास्यामः परमां प्रीतिं नात्र कार्या विचारणा ।
षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च । [ 1325 ]
सोऽस्मत्प्रीतिकरः श्रीमान्मम लोके महीयते ।
मम लोकावतीर्णश्च सोऽस्मिँल्लोके महायशाः ।
वेदवेदाङ्गविद्विप्रो जायते राजपूजितः ।
यः करोति नरश्रेष्ठ भरणं ब्राह्मणस्य तु ।
श्रोत्रियस्याभिजातस्य दरिद्रस्य विशेषतः । [ 1330 ]
तस्य पुण्यफलं यद्वै तन्निबोध युधिष्ठिर ।
गवां कोटिप्रदानेन यत्पुण्यं समुदाहृतम् ।
तत्पुण्यफलमाप्नोति वर्षेणैकेन पाण्डव ।
काञ्चनेन विचित्रेण यानेनाम्बरशोभिना ।
स याति मामकं लोकं दिव्यस्त्रीगणसेवितः । [ 1335 ]
गीयमानो वरस्त्रीभिर्वर्षाणां कोटिविंशतिम् ।
क्रीडित्वा मामके लोके तत्र देवैरभिष्टुतः ।

---

prior half ). T $G_{1.3}$ $M_4$ परं ( for पुरं ). $T_2$ $G_1$ $M_3$
ऋच्छति ; Kumbh. ed. वक्ष्यति ( for रक्षति ). — ( L.
1293 ) $G_3$ $M_4$ स्नापयित्वा ( for स्थाप° ). $M_2$ -कृतिर् ;
$M_4$ -कृतं. $G_{1.2}$ यो मद्भक्तिरतं नरं ( for the post. half ).
— ( L. 1294 ) $M_2$ भक्त्या ( for कृत्वा ). $G_3$ $M_{2.4}$
-कर्माणि ( for -कर्म च ). — ( L. 1297 ) $M_{2.4}$ समनु-
प्राप्तो ( for °वाप्नोति ). — ( L. 1298 ) $G_3$ ब्रह्म-
( for मम ). — ( L. 1299 ) $T_1$ $G_{1.3}$ च ( for वा ).
— ( L. 1301 ) $T_2$ $G_2$ $M_4$ द्योतयत्. $M_2$ द्योतयंतो दिशो
दश ( for the post. half ). — ( L. 1302 ) $M_4$ -लोके
( for -लोकं ). $M_2$ गच्छेदादित्यकं लोकं ( for the prior
half ). $G_3$ द्विजोत्तमैः ; $M_{2.4}$ [ऽ]प्सरोगणैः ( for सुरोत्तमैः ).
— ( L. 1303 ) $G_1$ प्रकाशं ( for °मं ). $G_3$ $M_{2.4}$ -यशाः
( for -तपाः ). — ( L. 1307 ) $G_3$ -गांधर्व-. $G_3$ $M_4$ वा
( for च ). — ( L. 1309 ) $G_3$ तोषिताः ( for हर्षिताः ).
— ( L. 1310 ) $M_4$ संप्रीताः. Kumbh. ed. सुखं ( for
शुभम् ). — ( L. 1311 ) $G_3$ देव- ( for तेन ). — ( L.
1312 ) $G_3$ हि ; $M_4$ [ऽ]भि- ( for प्र- ). — ( L. 1313 )
$G_3$ $M_{2.4}$ च लोकेस्मिन् ( for सोऽस्मिँल्लोके ). — ( L.
1314 ) $G_3$ भगवान् ( for भोग° ). — ( L. 1315 )
$G_{1.2}$ $M_3$ च ( for the third वा ). $G_{2.3}$ $M_{3.4}$
सभांकणे ; $M_2$ गृहांकणे ( for सभाङ्गणे ). — ( L.
1317 ) $M_2$ [अ]ग्निश्. $G_{2.3}$ $M_{2-4}$ ज्वालयेद्. — ( L.
1318 ) $G_2$ $M_{2.4}$ तु ( for च ). — ( L. 1319 ) $T_1$ $M_2$
स घृतं मद्गतात्मना ( for the post. half ). — ( L. 1321 )
$G_3$ $M_{2.4}$ [अ]र्चयेत् ( for °यंस् ). — ( L. 1323 ) $M_2$
[अ]पि ( for [ए]व ). — ( L. 1325 ) $G_3$ षष्टिर् ( for
the first षष्टिं ). $T_1$ $M_3$ षष्टि- ; $G_3$ षष्टिर् ( for the
second षष्टिं ). — ( L. 1326 ) $G_2$ $M_{2.3}$ [ऽ]स्मिन् ( for
ऽस्मत् ). — ( L. 1329 ) $G_3$ तारणं ( for भ° ). — ( L.
1330 ) $G_3$ -दांतस्य ( for -जातस्य ). — ( L. 1333 )
Kumbh. ed. सर्व- ( for पुण्य- ). — ( L. 1334 ) $G_3$ $M_4$
विमानेन ( for विचित्रेण ). $G_3$ $M_4$ चित्रेण ( for यानेन ).
T $G_2$ [ अं ]बुध- ; $G_1$ $M_3$ [ अं ]बुद- ( for [ अ ]म्बर- ).
Kumbh. ed. विमानेनार्कशोभिना ( for the post. half ).
— ( L. 1335 ) $M_4$ स याति मामके लोके. $M_2$ -सेवितं.
— ( L. 1336 ) $T_1$ $M_2$ -विंशतिः. — ( L. 1338 )

मानुष्यमवतीर्णस्तु वेदविद्ब्राह्मणो भवेत् ।
करकं कुण्डिकां वापि महद्वा जलभाजनम् ।
यः प्रयच्छति विप्राय तस्य पुण्यफलं शृणु । [ 1340 ]
ब्रह्मकूर्चेन यत्पीते फलं प्रोक्तं यथाविधि ।
तत्पुण्यफलमाप्नोति जलभाजनदो नरः ।
सुतृप्तः सुप्रभः सौम्यः प्रहृष्टेन्द्रियमानसः ।
हंससारसयुक्तेन विमानेन विराजता ।
स याति वारुणं लोकं दिव्यगन्धर्वसेवितः । [ 1345 ]
पानीयं यः प्रयच्छेद्वै जीवानां जीवनं परम् ।
ग्रीष्मकेषु च मासेषु तस्य पुण्यफलं शृणु ।
कपिलाकोटिदानस्य यत्पुण्यं तु विधीयते ।
तत्पुण्यफलमाप्नोति पानीयं यः प्रयच्छति ।
पूर्णचन्द्रप्रकाशेन विमानेन विराजता । [ 1350 ]
स गच्छेच्चेन्द्रसदनं सेव्यमानोऽप्सरोगणैः ।
त्रिंशत्कोटियुगं तत्र दिव्यगन्धर्वसेवितः ।
क्रीडित्वा मानुषे लोके चतुर्वेदी द्विजो भवेत् ।
शिरोऽभ्यङ्गप्रदानेन तेजस्वी प्रियदर्शनः ।
सुभगो रूपवाञ्शूरः पण्डितश्च भवेद्द्विजः । [ 1355 ]
वस्त्रदायी तु तेजस्वी सर्वत्र प्रियदर्शनः ।
सुखभोगपतिः श्रीमान्स्त्रीणां नित्यं मनोरमः ।
उपानहौ च छत्रं च यो ददाति नरोत्तमः ।
स याति नरमुख्येन काञ्चनेन विराजता ।
शक्रलोकं महातेजाः सेव्यमानोऽप्सरोगणैः । [ 1360 ]
काष्ठपादुकदो याति विमानैर्वृषनिर्मितैः ।
धर्मराजपुरं रम्यं सेव्यमानोऽप्सरोत्तमैः ।
दन्तकाष्ठप्रदानेन प्रियवाक्यो भवेन्नरः ।
सुगन्धवदनः श्रीमान्मेधासौभाग्यसंयुतः ।
क्षीरं दधि घृतं वापि गुडं मधुरसं तथा । [ 1365 ]
ये प्रयच्छन्ति विप्रेभ्यः परां भक्तिं गता नराः ।
ते वृषैरश्वयानैश्च श्वेतस्रग्दामभूषिताः ।
उपगीयमाना गन्धर्वैर्यान्तीश्वरपुरं नराः ।
तत्र दिव्याप्सरोभिस्तु सेव्यमाना यथासुखम् ।
षष्टिं वर्षसहस्राणि मोदन्ते देवसंनिभाः । [ 1370 ]
ततः कालावतीर्णाश्च जायन्ते त्विह मानवाः ।
प्रभूतधनधान्याश्च भोगवन्तो नरोत्तमाः ।
वैशाखे मासि वैशाखे दिवसे पाण्डुनन्दन ।
वैवस्वतं समुद्दिश्य परां भक्तिमुपागताः ।
अभ्यर्च्य विधिवद्विप्रांस्तिलान्गुडसमायुतान् । [ 1375 ]
ये प्रयच्छन्ति विप्रेभ्यस्तेषां पुण्यफलं शृणु ।
गोप्रदानेन यत्पुण्यं विधिवत्पाण्डुनन्दन ।
तत्पुण्यं समनुप्राप्तो यमलोके महीयते ।
ततश्चापि च्युतः कालादिह राजा भविष्यति ।

---

$M_2$ अवतीर्ण. —(L. 1339) $M_{2.3}$ कुंठिकां (for कुण्डिकां). Kumbh. ed. करकां कर्णिकां वापि. — (L. 1341) $G_3$ -कूर्चे च (for -कूर्चेन). $T_1$ ब्रह्मकूर्चे स यत्प्रीते; $M_4$ °र्चे पयःपीते. Madras ed. युधिष्ठिर (for यथाविधि). —(L. 1343) $G_3$ सुप्रियः; $M_2$ सुव्रतः (for सुप्रभः). $G_{1.2}$ $M_3$ स तृप्तः सप्रभः सौम्यः; Kumbh. ed. सुतृप्तः सर्वसौगंधः. — (L. 1345) $T_1$ $G_1$ $M_3$ देव- (for दिव्य-). $G_1$ -सेवितं. — $T_1$ om. (hapl.) lines 1346–1352; the same portion is damaged in $T_2$. —(L. 1346) $M_3$ (*sup. lin.*) जीवितं (for जीवनं). —(L. 1347) $M_4$ ग्रैष्मकेषु. $G_1$ $M_3$ ग्रीष्मे चतुर्षु मासेषु; Kumbh. ed. ग्रीष्मे च त्रिषु मासेषु. —(L. 1352) $M_2$ -समास्; $M_4$ -शतं (for -युगं). — $M_2$ reads from सुभगो (in line 1355) up to सुखभोगपतिः (in line 1357) after line 1358, repeating the prior half of line 1355. — (L. 1355) $G_3$ $M_{3.4}$ चैव (for शूरः). $M_2$ (first time) भवेच्च सुभगः श्रीमान्, (second time) स याति रूपवांश्चैव (for the prior half). — (L. 1356) $G_3$ $M_4$ पुरुषस् (for तेजस्वी). T वस्त्रदो याति तेजस्वी (for the prior half). $G_3$ $M_4$ तेजस्वी (for सर्वत्र). — (L. 1357) $M_2$ om. श्रीमान्. $G_3$ $M_4$ सुभगो भवति श्रीमान् (for the prior half). $G_3$ $M_2$ मनोहरः ($M_2$ °हराः) (for °रमः). — (L. 1358) $G_1$ नरेश्वर; $G_3$ द्विजोत्तमः; $M_{2.4}$ नरोत्तम. — (L. 1359) $M_2$ कांचनच्छत्रशोभि वा (for the post. half). — (L. 1361) T $G_{1.2}$ $M_{2.3}$ काष्ठपादुकदा यांति. T -संयुतैः; $G_1$ $M_3$ -सेवितैः; $M_2$ -योजितैः (for -निर्मितैः). — (L. 1362) $G_3$ द्विजोत्तमैः (for ऽप्सरो°). $M_{2-4}$ सेव्यमानाः सुरोत्तमैः. — (L. 1363) $G_3$ $M_2$ मृष्ट- (for प्रिय-). — (L. 1364) $G_3$ मेधावी भाग्यसंयुतः (for the post. half). — (L. 1365) $M_3$ दधिद्रुतं. $G_1$ $M_{2.4}$ गुळं (for गुडं). — (L. 1366) $M_2$ उपागताः (for गता नराः). — (L. 1367) $M_2$ तैर् (for ते). $G_3$ वृक्षैर् (for वृषैर्). $G_3$ एतैः; $M_4$ श्वेतैः (for श्वेत-). $T_1$ $G_2$ $M_3$ -धामभूषिताः; $G_3$ $M_{2.4}$ -दामभूषितैः. — (L. 1368) $M_2$ नीयमानाश्च गंधर्वैर् (for the prior half which is hypermetric). $G_3$ स्वर्ग-; $M_2$ शक्र- (for [ई]श्वर-). —(L. 1369) $G_1$ च (for तु). T $G_{1.2}$ $M_3$ सेव्यमानो. — (L. 1370) $G_3$ षष्टिर्; Kumbh. and Madras eds. षष्टि-. $M_2$ सर्वदेवतैः (for देवसंनिभाः). — (L. 1371) T $G_{1.2}$ $M_3$ नराः (for ततः). —(L. 1373) $T_1$ वैशाखे माघमासे वा (for the prior half). —(L. 1375) $T_1$ $G_1$ वीरांस् (for विप्रांस्). $M_{2.4}$ गुळ- (for गुड-).

तस्मिन्नेव दिने विप्रान्भोजयित्वा सदक्षिणम् । [ 1380 ]
तोयपूर्णानि दिव्यानि भाजनानि दिशन्ति ये ।
ते यान्त्यादित्यवर्णाभैर्विमानैर्वरुणालयम् ।
तत्र दिव्याङ्गनाभिस्तु रमन्ते कामकामिनः ।
ततोऽवतीर्णाः कालेन ते चास्मिन्मानुषे पुनः ।
भोगवन्तो द्विजश्रेष्ठा भविष्यन्ति न संशयः । [ 1385 ]
अनन्तराशी यश्चापि वर्तते व्रतवत्सदा ।
सत्यवाक्क्रोधरहितः शुचिः स्नानरतः सदा ।
स विमानेन दिव्येन याति शक्रपुरं नरः ।
तत्र दिव्याप्सरोभिस्तु वर्षकोटिं महातपाः ।
क्रीडित्वा मानुषे लोके जायते वेदविद्द्विजः । [ 1390 ]
एकभुक्तेन यश्चापि वर्षमेकं तु वर्तते ।
ब्रह्मचारी जितक्रोधः सत्यशौचसमन्वितः ।
स विमानेन दिव्येन याति शक्रपुरं नरः ।
दशकोटिसहस्राणि क्रीडित्वाप्सरसां गणैः ।
इह मानुष्यके लोके ब्राह्मणो वेदविद्भवेत् । [ 1395 ]
चतुर्थकालं यो भुङ्क्ते ब्रह्मचारी जितेन्द्रियः ।
वर्तते चैकवर्षं तु तस्य पुण्यफलं शृणु ।
चित्रबर्हिणयुक्तेन विचित्रध्वजशोभिना ।
याति यानेन दिव्येन स महेन्द्रपुरं नरः ।
अकृशाभिर्वरस्त्रीभिः सेव्यमानो यथासुखम् । [ 1400 ]
ततो द्वादशकोटिं स समाः सम्यक्प्रमोदते ।
शक्रलोकावतीर्णश्च लोके चास्मिन्नराधिप ।
भवेद्वै ब्राह्मणो विद्वान्क्षमावान्वेदपारगः ।
षष्ठकाले तु योऽश्नाति वर्षमेकमकल्मषः ।
ब्रह्मचर्यव्रतैर्युक्तः शुचिः क्रोधविवर्जितः । [ 1405 ]
तपोयुक्तस्य तस्याथ शृणुष्व फलमुत्तमम् ।
अत्यादित्यप्रकाशेन विमानेनार्कसंनिभः ।
स याति मम लोकान्वै दिव्यनारीनिषेवितः ।
तत्र साध्यैर्मरुद्भिश्च पूज्यमानो यथासुखम् ।
पश्यन्नेव सदा मां तु क्रीडत्यप्सरसां गणैः । [ 1410 ]
पक्षोपवासं यश्चापि कुरुते मद्गतात्मना ।
समाप्ते तु व्रते तस्मिंस्तर्पयेच्छ्रोत्रियान्द्विजान् ।
सोऽपि गच्छति दिव्येन विमानेन महातपाः ।
द्योतयन्प्रभया व्योम मम लोकं प्रपद्यते ।
स तत्र मोदते कामं कामरूपी यथासुखम् । [ 1415 ]
त्रिंशत्कोटिसमा राजन्क्रीडित्वा तत्र देववत् ।
इह मानुष्यके लोके पूजनीयो द्विजो भवेत् ।
त्रयाणामपि वेदानां साङ्गानां पारगो भवेत् ।
यश्च मासोपवासं वै कुरुते मद्गतात्मना ।
जितेन्द्रियो जितक्रोधो जितधीः स्नानतत्परः । [ 1420 ]
समाप्ते नियमे तत्र भोजयित्वा द्विजोत्तमान् ।
दक्षिणां च ततो दद्यात्प्रहृष्टेनान्तरात्मना ।
स गच्छति महातेजा ब्रह्मलोकमनुत्तमम् ।
सिंहयुक्तेन यानेन दिव्यस्त्रीगणसेवितः ।
स तत्र ब्रह्मणो लोके दिव्यर्षिगणसेवितः । [ 1425 ]
शतकोटिसमा राजन्यथाकामं प्रमोदते ।
ततः कालावतीर्णश्च सोऽस्मिँल्लोके द्विजो भवेत् ।
षडङ्गविच्चतुर्वेदी त्रिंशज्जन्मान्यरोगवान् ।
यस्त्यक्त्वा सर्वकर्माणि शुचिः क्रोधविवर्जितः ।
महाप्रस्थानमेकाग्रो याति मद्गतमानसः । [ 1430 ]
स गच्छेदिन्द्रसदनं विमानेन महातपाः ।
महामणिविचित्रेण सौवर्णेन विराजता ।
शतकोटिसमास्तत्र सुराधिपतिपूजितः ।

---

$T_1$ $M_3$ -समावृतान् ; $T_2$ $G_{1.2}$ °प्लुतान् ; $M_2$ -समन्वितान्. — ( L. 1377 ) $M_2$ -दाने च ( for -दानेन ). — ( L. 1380 ) $G_3$ सदक्षिणैः ; Kumbh. ed. सुदक्षिणं. — ( L. 1381 ) $G_3$ $M_4$ नव्यानि ; $M_2$ रम्याणि ( for दिव्यानि ). — ( L. 1383 ) $T_1$ काल- ; $M_4$ सर्व- ( for काम- ). — ( L. 1384 ) T $G_2$ [ऽ]वतीर्णः. $G_1$ पुरः ( for पुनः ). — $M_2$ om. lines 1386–1437. — ( L. 1386 ) $M_3$ -राशयश् ( for -राशी यश् ). $M_3$ वर्तेत. $G_2$ व्रतवान् ( for °वत् ). — ( L. 1387 ) $G_{1,2}$ स्नानरतिः. — ( L. 1388 ) $M_4$ विमानेन स दिव्येन. — $T_2$ $G_3$ $M_4$ om. ( hapl. ) lines 1389–1393. — ( L. 1394 ) $G_3$ $M_4$ -समास्तत्र ( for -सहस्राणि ). — ( L. 1396 ) $T_1$ -काले ( for -कालं ). — ( L. 1397 ) $G_3$ $M_4$ वर्तते वर्षमेकं यस् ( for the prior half ). — ( L. 1400 ) $M_3$ अप्सरोभिर् ( for अकृशा° ). — ( L. 1401 ) $G_3$ $M_4$ तत्र ( for ततो ). — ( L. 1402 ) $G_1$ तु ( for the first च ). — ( L. 1404 ) $G_3$ षष्ठं कालं ; $M_4$ षष्ठकालं. — ( L. 1406 ) $G_3$ ततो ( for तपो- ). $G_3$ $M_4$ [अ]पि ( for [अ]थ ). — ( L. 1408 ) $G_3$ $M_4$ -नरै( $M_4$ -जनै )र्वृतः ( for -निषेवितः ). — ( L. 1412 ) $G_3$ $M_4$ शुचीन् ( for द्विजान् ). — ( L. 1416 ) $G_3$ transp. the prior half and the post. half. $G_3$ नृप ( for राजन् ) and देववत्तत्र ( by transp. ). — ( L. 1417 ) $G_3$ $M_4$ द्विजोत्तमैः ( for द्विजो भवेत् ). — $G_{1,2}$ om. ( hapl. ) lines 1420–1422. — ( L. 1422 ) $M_4$ दक्षिणाश्च. — $G_3$ $M_4$ om. ( hapl. ) line 1425. — ( L. 1429 ) $G_3$ $M_4$ -कार्याणि ( for -कर्माणि ). — ( L. 1430 ) $T_1$ $G_2$ $M_3$ मम ( for मद्ग- ). — ( L. 1431 ) $M_4$ विराजता ( for महा-

नाकपृष्ठे निवसति दिव्यस्त्रीगणसेवितः ।
शक्रलोकावतीर्णश्च मानुषेषूपजायते । [1435]
राज्ञां राजा महातेजाः सर्वलोकार्चितः प्रभुः ।
प्रायोपवेशं यश्चापि कुरुते मद्गतात्मना ।
नमो ब्रह्मण्यदेवायेत्युक्त्वा मन्त्रं समाहितः ।
अन्तःस्वस्थो जितक्रोधस्तस्य पुण्यफलं शृणु ।
कामगः कामरूपी च बालसूर्यसमप्रभः । [1440]
स विमानेन दिव्येन याति लोकाननामयान् ।
स्वर्गात्स्वर्गं महातेजा गत्वा चैव यथासुखम् ।
मम लोकेषु रमते यावदाभूतसंप्लवम् ।
अग्निप्रवेशं यश्चापि कुरुते मद्गतात्मना ।
सोऽपि यानेन दिव्येन मम लोकं प्रपद्यते । [1445]
ततः सर्वगुणोपेतः पश्यन्नपि स मां सदा ।
त्रिंशत्कोटिसमा राजन्मोदते मम संनिधौ ।
ततोऽवतीर्णः कालेन वेदविद्ब्राह्मणो भवेत् ।
कर्षणं साधयन्यस्तु मां प्रसन्नः शुचिव्रतः ।
नमो ब्रह्मण्यदेवायेत्येतं मन्त्रमुदाहरन् । [1450]
बालसूर्यप्रकाशेन विमानेन विराजता ।
मम लोकं समासाद्य षट्कोटिं तु प्रमोदते ।
मम लोकावतीर्णश्च सोऽस्मिँल्लोके नृपो भवेत् ।
निवेशयति मन्मूर्त्यां आत्मानं मद्गतः शुचिः ।
रुद्रदक्षिणमूर्त्यां वा चतुर्दश्यां विशेषतः । [1455]
सिद्धैर्ब्रह्मर्षिभिश्चैव देवलोकैश्च पूजितः ।
गन्धर्वैर्भूतसंघैश्च गीयमानो महातपाः ।
प्रविशेत्स महातेजा मां वा शंकरमेव वा ।
तस्यापुनर्भवं (sic) राजन्नात्र कार्या विचारणा ।
गोकृते स्त्रीकृते चैव गुरुविप्रकृतेऽपि वा । [1460]
हन्यन्ते ये तु राजेन्द्र शक्रलोकं व्रजन्ति ते ।
तत्र जाम्बूनदमये विमाने कामगामिनि ।
मन्वन्तरं प्रमोदन्ते दिव्यनारीनिषेविताः ।
आश्रुतस्याप्रदानेन दत्तस्य हरणेन च ।
जन्मप्रभृति यद्दत्तं सर्वं नश्यति भारत । [1465]

नागोप्रदास्तत्र पयः पिबन्ति
नाभूमिदा भूमिमथाश्नुवन्ति ।
यान्यान्कामान्ब्राह्मणेभ्यो ददाति
तांस्तान्कामान्स्वर्गलोके च भुङ्क्ते ।

यद्यदिष्टतमं द्रव्यं न्यायेनोपार्जितं च यत् । [1470]
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ।
अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अदत्त्वा काञ्चनं गां च दरिद्रो नाम जायते ।
दानं यत्तत्फलं नैति श्रोत्रियाय न दीयते ।
श्रोत्रिया यत्र नाश्नन्ति न देवास्तत्र भुञ्जते । [1475]
श्रोत्रियेभ्यः परं नास्ति परमं दैवतं महत् ।
निधानं चापि राजेन्द्र तस्माच्छ्रोत्रियभोजनात् ।

Colophon.

---

तपाः ). — ( L. 1434 ) $G_1$ -सेवितैः ( for °तः ). — ( L. 1435 ) $M_4$ मानुष्येषु. — ( L. 1437 ) $G_3$ $M_4$ कुर्यान् ( for चापि ) and मद्गतेनांतरात्मना ( for the post. half ). — ( L. 1441 ) $M_2$ याति लोकांस्तु मामकान् ( for the post. half ). — ( L. 1442 ) $G_2$ स्वर्गाद्गम- ( sic ) ( for °त्स्वर्गं ). — $G_3$ om. lines 1444–1465. — ( L. 1445 ) $M_4$ मम लोके महीयते ( for the post. half ). — ( L. 1446 ) $M_4$ तत्र ( for ततः ). $M_{2.4}$ एव ( for अपि ). $T_1$ मा ( for मां ). — ( L. 1449 ) $M_{2.3}$ ( *inf. lin.* ) कारीषं ( for कर्षणं ). $G_2$ $M_3$ ( *inf. lin.* ) साधयेद् ; $M_2$ सेवयेद् ; $M_4$ कारयन् ( for साध° ). $M_4$ तं ( for तु ). $M_{2-4}$ प्रपन्नः ( for प्रसन्नः ). — ( L. 1450 ) Madras ed. उदीरयन् ( for उदाहरन् ). — ( L. 1452 ) $G_1$ $M_{2.3}$ वर्षकोटिं ( for षट्कोटिं तु ). $M_2$ स ( for प्र- ). — ( L. 1453 ) T $M_4$ लोकेस्मिन्क्षत्रियो भवेत् ( for the post. half ). — ( L. 1454 ) $M_2$ निवेदयति तन्मूर्तिम् ( for the prior half ). — ( L. 1455 ) $G_1$ -दाक्षिण-. $M_3$ रुद्रं दाक्षिणमूर्तिं वा. — ( L. 1456 ) $T_1$ ब्रह्मर्षयश्. $M_3$ om. चैव. $G_1$ सिद्धैश्च ब्रह्मर्षिभिर् ( submetric ); $M_4$ सिद्धैर्ब्रह्मर्षिसंघैश्च ( for the prior half ). $M_2$ वेदैः सर्वैश् ( for देवलोकैश् ). — ( L. 1457 ) $M_2$ गंधर्व- ( for गन्धर्वैर् ). $M_4$ महायशाः ( for °तपाः ). — ( L. 1459 ) $G_1$ न स्यात् ( for तस्य ). — ( L. 1460 ) $M_{2.4}$ वापि ( for चैव ). T $G_2$ च ( for वा ). — ( L. 1464 ) $T_1$ भृत्य * ( for दत्तस्य ). $T_2$ भृत्यस्याभरणेन च ( for the post. half ). — ( L. 1466 ) $G_{2.3}$ न गोप्रदास् ( for नागो° ). — ( L. 1467 ) $T_1$ $G_{2.3}$ अथाप्नुवंति ; $T_2$ अवाप्नु° ( for अथाश्नु° ). — ( L. 1470 ) $M_2$ दिव्यं ( for द्रव्यं ). $T_1$ तद्धर्मोपार्जितं च यत् ( for the post. half ). — ( L. 1471 ) $G_3$ [अ]क्षय्यम्. — ( L. 1472 ) $M_4$ तीर्थान्यनुपगम्य तु ( for the post. half ). — ( L. 1474 ) T यद्यत् ; $M_{2.3}$ च यत् ( for यत्तत् ). $G_1$ चैव ; $G_2$ नैव ; $M_{2.3}$ नैतत् ( for नैति ). $G_3$ हीयते ( for दी° ). — ( L. 1475 ) $G_3$ भुज्यते ( sic ). — ( L. 1476 ) T $G_3$ $M_{2.4}$ दैवतं परमं ( $G_3$ $M_4$ °तं तारणं ; $M_2$ °तांस्तारणं )

युधिष्ठिर उवाच ।

विप्रयोगे शरीरस्य सेन्द्रियस्य विशेषतः ।
अन्तरा वर्तमानस्य गतिः प्राणस्य कीदृशी ।

भगवानुवाच ।

शुभाशुभकृतं सर्वं प्राप्नोतीह फलं नरः । [ 1480 ]
न तु सर्वस्य भूतस्य पञ्चत्वं वापि विद्यते ।
पञ्चत्वं पाण्डवश्रेष्ठ भूरिभूतिकरं नृणाम् ।
तेषां पञ्च महायज्ञान्ये कुर्वन्ति द्विजोत्तमाः ।
पञ्चत्वं पञ्चभिर्भूतैर्वियोगं संप्रचक्षते ।
न जायते न म्रियते पुरुषः शाश्वतः सदा । [ 1485 ]
प्रायेण मरणं नाम पापिनामेव पाण्डव ।
येषां तु न गतिः पुण्या तेषां मरणमुच्यते ।
प्रायेणाकृतकृत्यास्तु मृत्योरुद्विजते जनः ।
कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम् ।

युधिष्ठिर उवाच ।

पञ्च यज्ञाः कथं देव क्रियन्तेऽत्र द्विजातिभिः । [1490]
तेषां नाम च देवेश वक्तुमर्हस्यशेषतः ।

भगवानुवाच ।

शृणु पञ्च महायज्ञान्कीर्त्यमानान्युधिष्ठिर ।
यैरेव ब्रह्मसालोक्यं लभ्यते गृहमेधिना ।
ऋषियज्ञं ब्रह्मयज्ञं भूतयज्ञं च पार्थिव ।
नृयज्ञं पितृयज्ञं च पञ्च यज्ञान्प्रचक्षते । [ 1495 ]
तर्पणं ऋषियज्ञं स्यात्स्वाध्यायो ब्रह्मयज्ञकः ।
भूतयज्ञो बलिर्यज्ञो नृयज्ञोऽतिथिपूजनम् ।
पितॄनुद्दिश्य यत्कर्म पितृयज्ञः प्रकीर्तितः ।
हुतं चाप्यहुतं चैव तथा प्रहुतमेव च ।
प्राशितं बलिदानं च पाकयज्ञान्प्रचक्षते । [ 1500 ]
वैश्वदेवादयो होमा हुतमित्युच्यते बुधैः ।
अहुतं च भवेद्दत्तं प्रहुतं ब्राह्मणाशितम् ।
प्राणाग्निहोत्रहोमं च प्राशितं विधिवद्विदुः ।
बलिकर्म च राजेन्द्र पाकयज्ञाः प्रकीर्तिताः ।
केचित्पञ्च महायज्ञान्पाकयज्ञान्प्रचक्षते । [ 1505 ]
अपरे ब्रह्मयज्ञादीन्महायज्ञविदो विदुः ।
सर्व एते महायज्ञाः सर्वथा परिकीर्तिताः ।
बुभुक्षितान्ब्राह्मणांस्तु यथाशक्ति न हापयेत् ।
अहन्यहनि ये त्वेतानकृत्वा भुञ्जते स्वयम् ।
केवलं मलमश्नन्ति ते नरा न च संशयः । [ 1510 ]
तस्मात्स्नात्वा द्विजो विद्वान्कुर्यादेतान्दिने दिने ।
अतोऽन्यथा तु भुञ्जन्वै प्रायश्चित्तीयते द्विजः ।

---

महत् ( for the post. half ). — ( L. 1477 ) T $G_{2.3}$ निदानं. $T_1$ $M_4$ नास्मात्; $M_2$ नान्यत् ( for तस्मात् ). — Colophon. — *Sub-parvan* : $T_1$ G $M_{2-4}$ वैष्णवधर्मे. — *Adhy. name* : $M_2$ नानादानविधिः. — *Adhy. no.* : $T_1$ $G_3$ 91; $T_2$ $M_4$ 100; $G_{1.2}$ 90; $M_2$ 7; $M_3$ 89. — ( L. 1480 ) T $G_1$ शुभाशुभं. $G_3$ -फलं ( for -कृतं ). $G_3$ $M_4$ दिव्यं ( for सर्वं ). — ( L. 1481 ) $G_3$ $M_2$ स ( for न ). $T_1$ अपि; $M_2$ नाम ( for वापि ). $G_3$ पद्यते ( for वि° ). $G_{1.2}$ $M_3$ पंचत्वं विद्यते नृप ( for the post. half ). — ( L. 1482 ) $G_3$ $M_{2.4}$ परं ( for नृणाम् ). — $G_1$ om. ( ? hapl. ) lines 1483–1486. — ( L. 1483 ) $M_4$ नरोत्तम ( for द्विजोत्तमाः ). — ( L. 1484 ) $T_2$ $G_3$ $M_3$ वियोगः. $M_{2.3}$ -प्रवक्ष्यते ( for -प्रचक्षते ). — ( L. 1486 ) $G_2$ भारत ( for पाण्डव ). — ( L. 1487 ) $G_3$ रतिः पुण्ये ( for गतिः पुण्या ). $T_2$ इष्यते ( for उच्यते ). — ( L. 1488 ) $M_2$ -कृत्यत्वान्; $M_3$ -कृत्यस्तु; $M_4$ -कृतयश्च ( for -कृत्यास्तु ). T $G_3$ $M_4$ नराः ( for जनः ). — ( L. 1490 ) $G_1$ कृतं ( for कथं ). $M_2$ ये; $M_3$ तद् ( for ऽत्र ). — ( L. 1491 ) $G_3$ $M_4$ एतेषां नाम देवेश. — ( L. 1493 ) $G_3$ स्वैरेव ( for यैरेव ). $G_3$ $M_{2.4}$ लभंते. $T_1$ $M_{2.4}$ गृहमेधिनः ( $T_1$ °नां ). — ( L. 1494 ) T देव-; $M_3$ त्वृषि-; $M_4$ ऋभु- ( for ऋषि- ). $G_3$ $M_4$ भूत- ( for ब्रह्म- ). $G_3$ देव-; $M_4$ ब्रह्म- ( for भूत- ). $G_{1.2}$ $M_3$ पांडव ( for पार्थिव ). — ( L. 1495 ) $G_3$ ब्रह्मयज्ञं ( for पितृ° ). — $T_2$ om. lines 1496–1497. — ( L. 1496 ) $T_1$ देवयज्ञं; $G_2$ $M_4$ ऋभु° ( for ऋषि° ). $M_2$ स्वाध्यायं. $T_1$ $M_{2.4}$ ब्रह्मयज्ञकं. — ( L. 1497 ) $G_3$ च स्यान्; $M_{2.4}$ ज्ञेयो ( for यज्ञो ). — ( L. 1498 ) $M_2$ पितृयज्ञं प्रकीर्तितं. — $T_2$ om. line 1500. — ( L. 1500 ) $T_1$ $M_2$ पाकयज्ञाः; $G_3$ $M_4$ पंचयज्ञान् ( for पाक° ). $T_1$ प्रकीर्तिताः ( for प्रचक्षते ). — ( L. 1502 ) $M_2$ तु ( for च ). T $G_3$ प्रहुतं ब्राह्मणे हुतं ( for the post. half ). — $G_1$ om. ( hapl. ) lines 1504–1506. $M_{2.3}$ read line 1504 after line 1507. — ( L. 1504 ) T पाकयज्ञः प्रकीर्तितः. — ( L. 1506 ) $M_2$ ऋषि-; $M_4$ त्वृभु- ( for ब्रह्म- ). $M_4$ यज्ञान् ( for महा- ). — ( L. 1507 ) $M_2$ महायज्ञान्. $T_2$ $G_3$ सर्वदा; $M_4$ ऋषिभिः ( for सर्वथा ). T संप्र- ( for परि- ). — ( L. 1508 ) $M_2$ corrupt for the prior half. — ( L. 1509 ) $G_3$ यस् ( for ये ). $M_3$ [ऽ]पि ( for तु ). — ( L. 1510 ) T $G_3$ $M_2$ ते नित्यं ब्राह्मणाधमाः ( for the post. half ). — ( L. 1512 ) $G_{1.2}$ प्रायश्चिती भवे-

युधिष्ठिर उवाच ।

देवदेव नमस्तेऽस्तु त्वद्भक्तस्य जनार्दन ।
वक्तुमर्हसि देवेश स्नानस्य च विधिं मम ।

भगवानुवाच ।

शृणु पाण्डव तत्सर्वं पवित्रं पापनाशनम् ।
स्नात्वा येन विधानेन मुच्यन्ते किल्बिषाद्विजाः ।
मृदं च गोमयं चैव तिलान्दर्भांस्तथैव च ।
पुष्पाण्यपि यथान्यायमादाय तु जलं व्रजेत् ।
नद्यां सत्यां न च स्नायादन्यत्र द्विजसत्तम ।
सति प्रभूते पयसि नाल्पे स्नायात्कदाचन ।
गत्वोदकसमीपं तु शुचौ देशे मनोहरे ।
ततो मृद्गोमयादीनि तत्र प्रोक्ष्य विनिक्षिपेत् ।
बहिः प्रक्षाल्य पादौ च द्विराचम्य प्रयत्नतः ।
प्रदक्षिणं समावृत्य नमस्कुर्यात्तु तज्जलम् ।
न च प्रक्षालयेत्तीर्थमद्भिर्विद्वान्कदाचन ।
न च पादेन वा हन्याद्धस्तेनान्येन तज्जलम् ।
सर्वदेवमया ह्यापो मन्मयाः पाण्डुनन्दन ।
तस्मात्तास्तु न हन्तव्यास्त्वद्भिः प्रक्षालयेत्स्थलम् ।
केवलं प्रथमं मज्जेन्नाङ्गानि विमृजेद्बुधः ।
तत्तु तीर्थं समासाद्य कुर्यादाचमनं पुनः ।
गोकर्णाकृतिवत्कृत्वा करं त्रिः प्रपिबेज्जलम् ।
द्विस्तत्परिमृजेद्वक्त्रं पादावभ्युक्ष्य चात्मनः ।
शीर्षण्यांस्तु ततः प्राणान्सकृदेव तु संस्पृशेत् ।
बाहू द्वौ च ततः स्पृष्ट्वा हृदयं नाभिमेव च ।
प्रत्यङ्गमुदकं स्पृष्ट्वा मूर्धानं तु पुनः स्पृशेत् ।
आपः पुनन्त्वित्युक्त्वा च पुनराचमनं चरेत् ।
सोंकारा व्याहृतीर्वापि सदसस्पतिमित्यृचम् ।
आचम्य मृत्तिकाः पश्चात्त्रिधा कृत्वा समालभेत् ।
ऋचेदं विष्णुरित्यङ्गमुत्तमाधममध्यमम् ।
आलभ्य वारुणैः सूक्तैर्नमस्कृत्य जलं ततः ।
स्रवन्ती चेत्प्रतिस्रोतः प्रत्यर्कं चान्यवारिषु ।
मज्जेदोमित्युदाहृत्य न च प्रक्षोभयेज्जलम् ।
गोमयं च त्रिधा कृत्वा जले पूर्वं समालभेत् ।
सव्याहृतिं सप्रणवां गायत्रीं च जपेत्पुनः ।
पुनराचमनं कृत्वा मद्गतेनान्तरात्मना ।
आपो हि ष्ठेति तिसृभिर्दर्भपूतेन वारिणा ।
तथा तरत्समन्दीभिः सिञ्चेच्चतसृभिः क्रमात् ।
गोसूक्तेनाश्वसूक्तेन शुद्धवर्गेण चाप्यथ ।
वैष्णवैर्वारुणैः सूक्तैः सावित्रैरिन्द्रदेवतैः ।
वामदेवेन चात्मानमन्यैर्मन्मयसामभिः ।
स्थित्वान्तःसलिले सूक्तं जपेद्वाचाघमर्षणम् ।
सव्याहृतिं सप्रणवां गायत्रीं वा ततो जपेत् ।
आ श्वासमोक्षात्प्रणवं जपेद्वा मामनुस्मरन् ।

---

द्विजः. — ( L. 1513 ) G1. 2 M3 देवदेवेश दैत्यघ्न ( for the prior half ). — ( L. 1514 ) M2 तु ( for च ). T2 M3 विधिर्. —( L. 1515 ) M2 तत्त्वेन ( for तत्सर्वं ). — ( L. 1516 ) M2 किल्बिषान्. — ( L. 1517 ) G3 M4 चापि ( for चैव ). G1. 2 M3 तिलं. —( L. 1519 ) Kumbh. ed. स्नात्वा ( for सत्यां ). T G3 न तु; M2 तु न ( for न च ). — ( L. 1520 ) G3 कथंचन; M2 कदा न च ( for कदाचन ). —(L. 1521 ) G3 -समीपे. G3 मनोरमे ( for °हरे ). — ( L. 1522 ) G2 विप्रो; M2. 3 [अ]भ्युक्ष्य ( for प्रोक्ष्य ). — ( L. 1523 ) MSS. प्रक्षाळ्य. — ( L. 1524 ) T च ( for तु ). — ( L. 1525 ) M2 तीरम् ( for तीर्थम् ). G3 तीर्थे मृद्भिर्विद्वान्; Kumbh. ed. विद्वांस्तीर्थमद्भिः ( by transp. ). —( L. 1526 ) G3 M2 वा ( for तद् ). — M4 om. ( hapl. ) lines 1527-1531. — ( L. 1529 ) T G मज्जन् ( for मज्जेन् ). T G2 अंगानि. T2 न मृजेद्; G2 M3 विमृशेद् ( for °जेद् ). — ( L. 1530 ) T G3 तत्तीर्थं स ( for तत्तु तीर्थं ). G3 द्विजः; M2 बुधः ( for पुनः ). — ( L. 1531 ) T गोकर्णवत्करं कृत्वा; G1. 2 श्वपुच्छाकृतिवत्कृत्वा ( for the prior half ). T ब्राह्मणस्त्रिः पिबेज्जलं. — ( L. 1532 ) M2 धीस्तत्; M4 ततः ( for द्विस्तत् ). — ( L. 1535 ) M2-4 ततः ( for पुनः ). — ( L. 1537 ) G2. 3 सों- ( G2 ओं )कारव्याहृतिर्वापि. — ( L. 1538 ) M2. 4 मृत्तिकां. G3 M3 कृत्य ( for कृत्वा ). —( L. 1541 ) T G3 स्रवंत्यश्; G1 °ति; M2. 3 ( *sup. lin.* ). 4 स्रव- ( M4 °वं )त्यां. M2. 3 प्रतिस्रोतं. G3 corrupt for the post. half. — ( L. 1542 ) T तु ( for च ). G1. 2 M3 विक्षोभयेज् ( for प्रक्षो° ). — M2 om. ( hapl. ) from the post. half of line 1543 up to the prior half of line 1545. — ( L. 1544 ) G1. 2 M3. 4 सव्याहृती( G2 M4 °ति )कं ( hypermetric ). T2 पुनर्जलं; G3 M4 पुनर्जपेत् ( by transp. ). — ( L. 1545 ) M4 तत ( for पुनर् ). — ( L. 1546 ) T1 G1. 2 अद्भिः ( for दर्भ- ). — ( L. 1547 ) M2 ततस् ( for तथा ). T2 G3 M4 तथा तरत्समं( T2 °म )दिति ( for the prior half ). —( L. 1548 ) G1. 2 चात्मनः; M2 वात्मनः ( for चाप्यथ ). — ( L. 1549 ) G3 M4 वैष्णवैर् ( for सावित्रैर् ). M2 ऐंद्रदेवतैः. — ( L. 1550 ) M2-4 वामदेव्येन; Kumbh. ed. and Madras ed. °दैव्येन. T2 अन्यैर्मन्मथसादिभिः; G3 अन्यैर्ऋग्भिः शुभैः क्रमात् ( for the post. half ). — M2

उत्प्लुत्य तीर्थमासाद्य धौते शुक्ले च वाससी ।
शुद्धे चाच्छादयेत्कक्षे न कुर्यात्परिपाशके ।
पाशे निबद्धकक्ष्यो यत्कुरुते कर्म वैदिकम् ।
राक्षसा दानवा दैत्यास्तद्विलुम्पन्ति हर्षिताः ।
तस्मात्सर्वप्रयत्नेन कक्ष्यां पाशे न धारयेत् ।
ततः प्रक्षाल्य पादौ च हस्तौ चैव मृदा शनैः ।
आचम्य पुनराचामेत्ततः सावित्रिया द्विजः ।
जले जलगतः शुद्धः स्थल एव स्थले स्थितः ।
उभयत्र स्थितस्तस्मादाचामेदात्मशुद्धये ।
दर्भेषु दर्भपाणिः सन्प्राङ्मुखः सुसमाहितः ।
प्राणायामांस्ततः कुर्यान्मद्गतेनान्तरात्मना ।
सहस्रकृत्वः सावित्रीं शतकृत्वस्तु वा जपेत् ।
समाप्ते तु जपे तस्मिन्सावित्र्या चाभिमन्त्र्य च ।
मन्देहानां विनाशाय रक्षसां विक्षिपेज्जलम् ।
उद्वर्गोऽसीत्यथाचान्तः प्रायश्चित्तजलं क्षिपेत् ।
अथादाय सपुष्पाणि तोयान्यञ्जलिना द्विजः ।
प्रक्षिप्य प्रतिसूर्यं च व्योममुद्रां प्रकल्पयेत् ।
ततो द्वादशकृत्वस्तु सूर्यस्यैकाक्षरं जपेत् ।
ततः षडक्षरादीनि षट्कृत्वः परिवर्तयेत् ।
प्रदक्षिणं परामृश्य मुद्रया स्वमुखं तया ।
ऊर्ध्वबाहुस्ततो भूत्वा सूर्यमीक्षेत्समाहितः ।
तन्मण्डलस्थं मां ध्यायेत्तेजोमूर्तिं चतुर्भुजम् ।
उदु त्यं च जपेन्मन्त्रं चित्रं तच्चक्षुरित्यपि ।
सावित्रीं च यथाशक्ति जप्त्वा सूक्तं च मामकम् ।
मन्मयानि च सामानि पुरुषव्रतमेव च ।
ततश्चालोकयेदर्कं हंसः शुचिषदित्यृचा ।
प्रदक्षिणं समावृत्य नमस्कृत्य दिवाकरम् ।
ततस्तु तर्पयेदद्भिः ब्रह्माणं मां च शंकरम् ।
प्रजापतिं च देवांश्च तथा देवमुनीनपि ।
साङ्गानपि तथा वेदानितिहासान्क्रतूंस्तथा ।
पुराणानि च दिव्यानि कुलान्यप्सरसां तथा ।
ऋतून्संवत्सरांश्चैव कलाकाष्ठान्तकं तथा ।
भूतग्रामांश्च भूतानि सरितः सागरांस्तथा ।
शैलाञ्शैलस्थितान्देवानोषधीः सवनस्पतीः ।
तर्पयेदुपवीती तु प्रत्येकं तृप्यतामिति ।
अन्वारभ्य च सव्येन पाणिना दक्षिणेन तु ।

---

om. lines 1551–1552. — ( L. 1552 ) $G_{1.2}$ $M_{3.4}$ सव्याहृती( $G_2$ °ति )कां ( hypermetric ). — After line 1553, $M_{2.3}$ ins. :

त्रिपदं वा जपेन्मन्त्रमष्टाक्षरमथापि वा ।

— ( L 1554 ) $G_3$ उद्धृत्य ( for उत्प्लुत्य ). $T_2$ $G_3$ $M_4$ तीरम् ( for तीर्थम् ). — ( L. 1555 ) $M_4$ ( *inf. lin.* ) शुक्ले ( for शुद्धे ). $G_3$ $M_4$ ( *inf. lin.* as above ) वा ( for च ). $T_2$ कच्छे; $G_2$ $M_4$ कक्ष्ये; $M_{2.3}$ कुक्ष्यां ( for कक्षे ). $M_{2.3}$ ( *inf. lin.* ) क( $M_3$ कु )टिपाशके ( for परि° ). — (L. 1556) $G_2$ पाने; $G_3$ पाशा ( for पाशे ). $T_2$ -कच्छो ( for -कक्ष्यो ). $M_2$ यः ( for यत् ). $M_3$ पाशेन बद्धकक्ष्यो यत्; $M_4$ पाशेन बद्धे यः कुर्यात्; Kumbh. ed. and Madras ed. पाशेन बद्धा कक्षे यत्. — ( L. 1558 ) $T_2$ $M_4$ कच्छं; $G_{1.2}$ कक्ष्या ( $G_2$ °क्षा ). $G_{1.2}$ पाशं. — ( L. 1559 ) $G_3$ चैवं. — ( L. 1560 ) $G_2$ $M_3$ पुनः ( for ततः ). T ततः सा( $T_2$ °त्ततसा )वित्र्या द्विजः ( submetric ); $G_3$ सावित्र्या च पुनः पुनः; $M_4$ तच्च सावित्रिया पुनः. — After line 1560, $G_2$ Kumbh. ed. and Madras ed. ins. :

प्राङ्मुखोदङ्मुखो वापि ध्यायन्वेदान्समाहितः ।

[ $G_2$ प्रांग्मुखोदर्भमु*पि. ]

— ( L. 1561 ) $G_1$ स्थलस्थितः. — ( L. 1562 ) $G_3$ चात्मशुद्धये. — ( L. 1563 ) $G_3$ $M_4$ तु ( for सु- ). — ( L. 1564 ) $M_{2.4}$ प्राणायामं. $M_4$ कृत्वा ( for कुर्यान् ). — ( L. 1566 ) $G_2$ $M_3$ ( *sup. lin.* ) समाहितो जपेत्तस्मात् ( for the prior half ). $M_4$ वाभिमंत्र्य. — (L. 1567) $G_3$ रक्षार्थं निक्षिपेज्जलं ( for the post. half ). — ( L. 1568 ) $G_3$ उद्वयो ( for °र्गो ). — ( L. 1569 ) Kumbh. ed. तोयं. $M_2$ ततः ( for द्विजः ). — ( L. 1571 ) $G_3$ [इ]वाक्षरं ( for [ए]का° ). — ( L. 1572 ) $G_3$ $M_4$ त्रिःकृत्वः; $M_2$ corrupt ( for षट्कृत्वः ). — ( L. 1573 ) $M_4$ परामृज्य. $G_{1.2}$ स्वमुखांतरे; $G_3$ $M_2$ स्वमुखं तथा. — ( L. 1575 ) $M_2$ मा ( for मां ). — ( L. 1576 ) $M_4$ नित्यं ( for मन्त्रं ). — ( L. 1578 ) T मामकानि ( for मन्मयानि ). $G_3$ नामानि ( for सा° ). $G_{1.2}$ तु; $M_2$ वा ( for च ). — (L. 1579) $M_4$ [आ]लोकयन्. $T_1$ [अ]पि; $G_{1.2}$ $M_3$ [अ]थ ( for [ऋ]चा ). $M_2$ corrupt. — ( L. 1580 ) $G_{1.2}$ $M_3$ नमस्कृत्वा. — ( L. 1581 ) $T_2$ मां ब्रह्माणं ( by transp. ). — ( L. 1583 ) $M_2$ यथा ( for the first तथा ). $G_{1.2}$ $M_3$ अपि ( for the second तथा ). — $M_2$ om. ( hapl. ) lines 1584–1586. — ( L. 1584 ) $G_{1.2}$ $M_3$ सर्वाणि ( for दिव्यानि ). — ( L. 1585 ) $G_{1.2}$ $M_4$ संवत्सरं. T कालान्कालांतकं तथा; $G_3$ $M_4$ कलाका( $M_4$ कालं का )लात्मकं तथा ( for the post. half ). — ( L. 1587 ) T सर्वान् ( for देवान् ). T $M_2$ सवनस्पतीन्. —( L. 1588 ) $G_{1.2}$

निवीती तर्पयेत्पश्चादृषीन्मन्त्रकृतस्तथा ।
मरीच्यादीनृषींश्चैव नारदान्तान्समाहितः ।
प्राचीनावीत्यथैतांस्तु तर्पयेद्देवताः पितॄन् ।
ततस्तु कव्यवाडग्निं सोमं वैवस्वतं तथा ।
ततश्चार्यमणं चापि अग्निष्वात्तांस्तथैव च ।
सोमपांश्चैव दर्भैस्तु सतिलैरेव वारिभिः ।
तृप्यध्वमिति पश्चात्तु स्वपितॄंस्तर्पयेत्ततः ।
पितॄन्पितामहांश्चैव तथैव प्रपितामहान् ।
पितामहीं तथा चापि तथैव प्रपितामहीम् ।
तथा पितृष्वसॄश्चैव मातृष्वसॄस्तथैव च ।
मातरं चात्मनश्चैव तथा मातामहीमपि ।
मातुर्मातामहीं चैव गुरुमाचार्यमेव च ।
उपाध्यायान्सखीन्बन्धूञ्शिष्यर्त्विग्ज्ञातिपुत्रकान् ।
प्रमीतानानृशंस्यार्थं तर्पयेत्तानमत्सरः ।
तर्पयित्वा तथाचम्य स्नानवस्त्रं प्रपीडयेत् ।
वृद्धिं भृत्यजनस्याहुः स्नातकानां च तद्विदः ।
अतर्पयित्वा तान्पूर्वं स्नानवस्त्रं न पीडयेत् ।
पीडयेच्चेत्पुरा मोहाद्देवाः सर्षिगणास्तथा ।
पितरस्तु निराशाश्च शप्त्वा यान्ति यथागतम् ।
प्रक्षाल्य तु मृदा पादावाचम्य प्रयतः पुनः ।
दर्भेषु दर्भपाणिः सन्स्वाध्यायं तु समारभेत् ।
वेदमादौ समारभ्य ततोपरि पदक्रमान् ।
यदधीते स्वयं शक्त्या तत्स्वाध्यायं प्रचक्षते ।
ऋचं वाथ यजुर्वापि सामगाथामथापि वा ।
इतिहासपुराणानि यथाशक्ति न हापयेत् ।
उत्थाय च नमस्कृत्वा दिशो दिग्देवता अपि ।
ब्रह्माणं च ततश्चाग्निं पृथिवीमोषधीस्तथा ।
वाचं वाचस्पतिं चैव मां चैव सरितस्तथा ।
नमस्कृत्वा तथाद्भिस्तु प्रणवादि च पूजयेत् ।
ततो नमोऽद्भ्य इत्युक्त्वा नमस्कुर्यात्तु तज्जलम् ।

---

M3 च ( for तु ). M2 तर्पयामीति प्रत्येकं तृप्यतामिति वाच्य च. — ( L. 1589 ) M4 तु ( for च ). — ( L. 1590 ) G1. 2 M3 विद्वान् ( for पश्चाद् ). M4 सदा ( for तथा ). — ( L. 1591 ) T मुनींश्; G3 मनूंश् ( for ऋषींश् ). M4 मरीच्यत्रीन्मनूंश्चैव. T नारदादीन्; G1. 2 °दाद्यान् ( for °दान्तान् ). — ( L. 1593 ) G3 कव्यवाटग्निं; M2 °वाळग्निं. — ( L. 1594 ) M4 वा ( for च ). M2 चाग्निषु; Kumbh. ed. ह्य° ( for अ° ). G1 निषादांस्तांस्तथैव च ( for the post. half ). — ( L. 1595 ) G1. 2 M3 दर्भेषु ( for दर्भैस्तु ). M2 सोमपांस्तु संदर्भैस्तु. — ( L. 1596 ) G1. 2 M3 तृप्यताम् ( for °ध्वम् ). G1 तर्पितस्; G3 स पितॄंस्. — ( L. 1598 ) G1. 2 M4 corrupt. G1 om. ( hapl. ) from the post. half up to the prior half of line 1601. M4 प्रपितामहीः. — G2 and Kumbh. ed. om. line 1599. — ( L. 1599 ) T तथा पितृष्वसॄं ( T2 °स्र )श्चैव; G3 M3 तथा पितृष्वसां चैव; M2 मातृष्वसां तथा चापि ( for the prior half ). T2 मातृष्वस्रूस्तथैव च; G3 M3 मातृस्व( M3 °ष्व )सारं तथैव च ( hypermetric ); M2 तथैव च पितृष्वसां ( for the post. half ). — ( L. 1600 ) Om. in M3. G2 तत्र ( for चैव ). M2 मातामहं चात्मनश्च ( for the prior half ). — G2 ins. after the prior half of line 1600 : Kumbh. ed. after line 1601 :

पितृमातृष्वसारं च तथा मातामहीमपि ।

[ Kumbh. ed. पितृमातृष्वसारौ च. ]

— G2 om. the post. half and the prior half of line 1601. — ( L. 1601 ) M2 [अ]पि ( for [ए]व ). M2 गुरून् ( for गुरुम् ). — ( L. 1602 ) M2 चापि ( for बन्धूञ् ). G1 M3 शिष्यांश्च; M2 बंधून्स- ( for शिष्यर्त्विग्- ). — ( L. 1603 ) G2 प्रज्ञातान्; M2 प्रमि° ( for प्रमी° ). T2 G1. 2 M2. 3 आनृशंसार्थं. — ( L. 1604 ) M4 त्वथ ( for तथा ). G1 -मंत्रं ( for -वस्त्रं ). — T2 G1. 3 M4 om. ( hapl. ) lines 1605–1606. M3 om. line 1605. — ( L. 1605 ) M2 corruptfor the prior half. Kumbh. ed. वृत्तिं ( for वृद्धिं ). G2 M2 स्नानपा( M2 °नं पा )नं ( for स्नातकानां ). M2 तद्विदुः ( for °दः ). — ( L. 1606 ) M3 तत् ( for तान् ). M2. 3 प्र- ( for न ). — ( L. 1607 ) G3 M4 चन ( M4 चेन्न ) तन्; M2 यदि तन् ( for चेत्पुरा ). G2 पीडयेन्न तु मोहाद्दै ( for the prior half ). G1 सऋषि- ( for सर्षि- ). — ( L. 1608 ) G2 M2. 4 च ( for तु ). G1. 2 M3 ते; M4 तु ( for च ). — ( L. 1609 ) MSS. प्रक्षाळ्य. G3 M4 च ( for तु ). G3 M4 पादम् ( for पादाव् ). — ( L. 1611 ) M2 समाराध्य ( for °रभ्य ). G1. 2 M3 ततोपरि परिक्रमान् ( M3 °त् ); M2 ततः पत्युपरि°; M4 तथोपर्यपरिक्रमान् ( *sup. lin.* °त् ) ( for the post. half ). — M4 om. lines 1612–1613. — ( L. 1612 ) G1. 2 तु विंशत्या; G3 त्वयं शक्त्या; M2. 3 [ऽ]न्वहं शक्त्या ( for स्वयं शक्त्या ). T1 तत्स्वाध्यायः; G2 यत्स्वाध्यायं; G3 स्वाध्यायं तत् ( by transp. ). — ( L. 1613 ) G1. 2 ऋचो ( for ऋचं ). G3 [अ]थ ( for [अ]पि ). — ( L. 1614 ) T2 G3 -पुराणान्वा; M2 °णं वा ( for °णानि ). G2 निगापयेत् ( for न हाप° ). — ( L. 1615 ) G2 M2–4 तु ( for च ). — ( L. 1616 ) T2 G3 M4 ब्राह्मणांश्च ( G3 °णानां ) ( for ब्रह्माणं च ) M2 ओषधीं. — ( L. 1617 ) T सागरान् ( for मां चैव ). — ( L. 1618 ) T [अ]द्भ्यस्तु. M2 नमस्कारांतमद्भिस्तु ( for

घृणिः सूर्यस्तथादित्यस्तान्प्रणम्य स्वमूर्धनि । [ 1620 ]
ततस्त्वालोकयन्नर्कं प्रणवेन समाहितः ।
ततो मामर्चयेत्पुष्पैर्मत्प्रियैरेव नित्यशः ।

युधिष्ठिर उवाच ।

त्वत्प्रियाणि प्रसूनानि त्वदधिष्ठानि माधव ।
सर्वाण्याचक्ष्व देवेश त्वद्भक्तस्य ममाच्युत ।

भगवानुवाच ।

शृणुष्वावहितो राजन्पुष्पाणि प्रीतिकृन्ति मे । [ 1625 ]
कुमुदं करवीरं च चणकं चम्पकं तथा ।
मल्लिकाजातिपुष्पं च नन्द्यावर्तं च नन्दिकम् ।
पलाशपुष्पपत्राणि दूर्वा भृङ्गकमेव च ।
वनमाला च राजेन्द्र मत्प्रियाणि विशेषतः ।
सर्वेषामपि पुष्पाणां सहस्रगुणमुत्पलम् । [ 1630 ]
तस्मात्पद्मं तथा राजन्पद्मात्तु शतपत्रकम् ।
तस्मात्सहस्रपत्रं तु पुण्डरीकं ततः परम् ।
पुण्डरीकसहस्रात्तु तुलसी गुणतोऽधिका ।
बकपुष्पं ततस्तस्मात्सौवर्णं तु ततोऽधिकम् ।
सौवर्णात्तु प्रसूनाच्च मत्प्रियं नास्ति पाण्डव । [ 1635 ]
पुष्पालाभे तुलस्यास्तु पत्रैर्मामर्चयेद्बुधः ।
पत्रालाभे तु शाखाभिः शाखालाभे शिफाफलैः ।
शिफालाभे मृदा तत्र भक्तिमानर्चयेद्बुधः ।
वर्जनीयानि पुष्पाणि शृणु राजन्समाहितः ।
किङ्किणी मुनिपुष्पं च दुत्तूरं पाटलं तथा । [ 1640 ]
तथातिमुक्तकं चैव पुंनागं नक्तमालिका ।
यौधिकं क्षीरिकापुष्पं निर्गुण्डी लाङ्गली जपा ।
कर्णिकारं तथाशोकं शल्मलीपुष्पमेव च ।
ककुभाः कोविदाराश्च वैभीतकमथापि वा ।
कुरण्टकप्रसूनां च तिल्वकं लाङ्गली तथा । [ 1645 ]
अङ्कोलं गिरिकर्णी च नीलान्येव च सर्वशः ।
एकवर्णानि चान्यानि सर्वाण्येव विवर्जयेत् ।
अर्कपुष्पाणि वर्ज्यानि चार्कपत्रस्थितानि च ।
व्याघातपिचुमन्दानि सर्वाण्येव विवर्जयेत् ।
अन्यैस्तु शुक्लपत्रैस्तु गन्धवद्भिर्नराधिप । [ 1650 ]

---

the prior half ). $G_1$ $M_3$ पूर्ववत् ( for पूजयेत् ). T $G_2$ प्रणम्य च सुपूजयेत् ( for the post. half ). — ( L. 1619 ) $M_2$ तु ( for ऽद्भ्य ). T च ( for तु ). — ( L. 1620 ) $T_1$ घृर्णि सूर्यं ; $T_2$ घृणीन्सूर्यास्. $T_1$ तत् ( for तान् ). $T_2$ $G_3$ $M_4$ तर्पयेत्तत्र ( for तान्प्रणम्य ). — ( L. 1621 ) T $G_3$ $M_{2.3}$ ( *inf. lin.* ).$_4$ सिक्त्वा( $T_2$ $G_3$ स्थित्वा )वलोकयन्नर्कं ( for the prior half ). — ( L. 1622 ) $T_2$ नित्यधा ( for °शः ). — ( L. 1623 ) $M_2$ त्वदनिष्टानि ( for त्वदधिष्ठानि ). — ( L. 1625 ) T प्रीणयंति ; $M_{2.3}$ प्रीनिकानि ( for °कृन्ति ). — ( L. 1627 ) $T_2$ निष्टिकं ( for नन्दिकम् ). — ( L. 1628 ) $M_{3.4}$ वा ( for च ). — ( L. 1629 ) $T_1$ $M_{2.3}$ नवमाला. $M_2$ शमी चेति ( for च राजेन्द्र ). — $G_3$ om. the post. half of line 1631 and the prior half line 1632. — ( L. 1633 ) $M_4$ -सहस्रं. $M_2$ om. from the post. half of line 1633 up to the post. half of line 1635. — ( L. 1634 ) $M_4$ बिल्वपुष्पं ( for बक° ). $G_3$ $M_4$ तु स्यात् ( for तस्मात् ). — ( L. 1635 ) $T_1$ सुवर्णाच्. T $G_3$ च ( for तु ). — ( L. 1636 ) $T_1$ $G_{1.2}$ $M_3$ पुष्पाभावे. — $G_1$ om. ( hapl. ) lines 1637–1638. — ( L. 1637 ) $G_2$ पत्राभावे. $T_1$ शाखाभावे ( for °लाभे ). T त्वचापि वा ; $G_2$ $M_2$ शिफालवैः ( for °फलैः ). — ( L. 1638 ) T त्वगभावे ; $G_2$ शिफाभावे ; $M_4$ शिखालाभे. $T_1$ शक्तिमान् ( for भ° ). $G_2$ $M_2$ अर्चयेत ( $M_2$ °त्तु ) मां ( for °येद्बुधः ). — After line 1638, T ins. :

येन केन प्रकारेण तुलसीदलपूर्वकैः ।
पुष्पैः फलैर्वाप्यन्नाद्यैर्मदाराधनमुत्तमम् ।

— ( L. 1639 ) $G_2$ $M_4$ समंततः ( for समाहितः ). — ( L. 1640 ) $M_2$ किनिभिर् ( for किङ्किणी ). $G_{1.2}$ $M_3$ मुखपुष्पं ; $G_3$ मणिमुक्तं ( for मुनिपुष्पं ). $G_1$ धूर्धूरं ; $G_2$ $M_4$ धुद्धू( $M_4$ °द्धु )रं ; $G_3$ दुत्तुरं ; $M_{2.3}$ धुर्द्धूरं. — ( L. 1641 ) T नक्त( $T_2$ °व )मल्लिकं ; $G_3$ $M_4$ नवमालिका ; Kumbh. ed. and Madras ed. नक्तमालिकं. — ( L. 1642 ) $T_1$ यौधिका ; $T_2$ $G_3$ यूथिकं ; $M_2$ योद्धितः ( for यौधिकं ). $T_1$ $M_2$ क्षीरका- ; $G_2$ क्षीरिकं. $T_2$ निर्गंडी. $M_{2.3}$ जांगली ; Kumbh. ed. and Madras ed. लांगुली. — ( L. 1643 ) $T_1$ पुष्पं ( for [अ]शोकं ). $G_3$ शाल्मली- ; $M_2$ शन्यली-. — ( L. 1644 ) T $M_4$ कुसुंभं ( $M_4$ °भः ) ; $G_3$ ककुभं ( for ककुभाः ). T $G_3$ कोविदारं ; $M_4$ °रश्. $M_2$ काकुस्थाः कोविदाश्चैव ( for the prior half ). $T_2$ वैभीतिकम्. $G_2$ $M_4$ अथापि च ; $G_3$ अथाफली ( for °पि वा ). — ( L. 1645 ) $T_2$ $G_2$ $M_{2-4}$ कुरंडक-. $G_1$ कल्पकं ; $G_2$ $M_4$ तल्पकं ; $M_{2.3}$ तिलकं ( for तिल्वकं ). T लांगलिं ; $G_1$ $M_3$ लांगलं ; $M_2$ घातकी ; $M_3$ ( *inf. lin.* ) घातकं ( for लाङ्गली ). — ( L. 1646 ) $G_1$ $M_3$ अंकोलहिं- ( $M_3$ °लं हि )किणीश्चैव ; $M_2$ अंगोल गिरिकर्णी च. $G_3$ तिलानि ( for नी° ). — ( L. 1647 ) $T_1$ $G_2$ एकपर्णानि. — $G_3$ om. ( hapl. ) lines 1648-1649. — ( L 1648 ) $G_2$ $M_{2.3}$ अर्क- ( for चार्क- ). $G_1$ $M_3$ वा ( for च ). — After line 1648, $M_2$ ins. :

अवर्ज्यैस्तैर्यथालाभं मद्भक्तो मां समर्चयेत् ।

युधिष्ठिर उवाच ।

कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशास्तु ते ।
वैखानसाः कथं ब्रूयुः कथं वा पाञ्चरात्रिकाः ।

भगवानुवाच ।

शृणु पाण्डव तत्सर्वमर्चनाक्रममात्मनः ।
स्थण्डिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकम् । [ 1655 ]
अष्टाक्षरविधानेन ह्यथ वा द्वादशाक्षरैः ।
वैदिकैरथ वा मन्त्रैर्मम सूक्तेन वा पुनः ।
स्थापितं मां ततस्तस्मिन्नर्चयित्वा विचक्षणः ।
पुरुषं च ततः सत्यमच्युतं च युधिष्ठिर ।
अनिरुद्धं च मां प्राहुर्वैखानसविदो जनाः । [ 1660 ]
अन्ये त्वेवं विजानन्ति मां राजन्पाञ्चरात्रिकाः ।
वासुदेवं च राजेन्द्र संकर्षणमथापि वा ।
प्रद्युम्नं चानिरुद्धं च चतुर्मूर्तिं प्रचक्षते ।
एताश्चान्याश्च राजेन्द्र संज्ञाभेदेन मूर्तयः ।
विद्ध्यनर्थान्तरा एव मामेवं चार्चयेद्बुधः । [ 1665 ]

युधिष्ठिर उवाच ।

त्वद्भक्ताः कीदृशा देव कानि तेषां व्रतानि च ।
एतत्कथय देवेश त्वद्भक्तस्य ममाच्युत ।

भगवानुवाच ।

अनन्यदेवताभक्ता ये मद्भक्तजनप्रियाः ।
मामेव शरणं प्राप्तास्ते मद्भक्ताः प्रकीर्तिताः ।
स्वर्ग्याण्यपि यशस्यानि मत्प्रियाणि विशेषतः । [ 1670 ]
मद्भक्तः पाण्डवश्रेष्ठ व्रतानीमानि धारयेत् ।
नान्यदाच्छादयेद्वस्त्रं मद्भक्तो जलतारणे ।
स्वस्थस्तु न दिवा स्वप्यान्मधुमांसानि वर्जयेत् ।
प्रदक्षिणं व्रजेद्विप्रान्गामश्वत्थं हुताशनम् ।
न धावेत्पतिते वर्षे नाग्रभिक्षां च लोपयेत् । [ 1675 ]
प्रत्यक्षलवणं नाद्यात्सौभञ्जनकगृञ्जनौ ।
ग्रासमुष्टिं गवे दद्याद्धान्याम्लं चैव वर्जयेत् ।
तथा पर्युषितं चापि पक्वं परिगृहागतम् ।
अनिवेदितं च यद्द्रव्यं तत्प्रयत्नेन वर्जयेत् ।
विभीतककरञ्जानां छायां दूरं विवर्जयेत् । [ 1680 ]
विप्रदेवपरीवादं न वदेत्पीडितोऽपि सन् ।
सात्त्विका राजसाश्चापि तामसाश्चापि पाण्डव ।
मामर्चयन्ति मद्भक्तास्तेषामीदृग्विधा गतिः ।
तामसास्तिमिरं यान्ति राजसा रज एव तत् ।

---

रक्तं कुमुदपुष्पं च शूलपुष्पं च वर्जयेत् ।

— ( L. 1649 ) $G_1$ $M_3$ व्याघ्राताः ; $G_2$ व्याघाताः ; $M_2$ ज्याघात- ( for व्या° ). $T_1$ च ( for वि- ). $M_2$ गंधीनि पितृमेव च ( for the post. half ). — After line 1649, $M_2$ ins. :

राजवृक्षप्रसूनानि यत्नादेव विवर्जयेत् ।

— ( L. 1650 ) T सु- ( for the first तु ). $G_3$ $M_4$ -पत्रैश्च ; $M_2$ -पुष्पैस्तु. — ( L. 1651 ) $M_2$ अवर्जितैर् ( for °र्ज्यैस्तैर् ) and सदार्चयेत् ( for सम° ). — ( L. 1654 ) $M_2$ उत्तमं ; $M_4$ एव ह ( for आत्मनः ). — ( L. 1655 ) $M_2$ स्थंडिलं. — ( L. 1656 ) T $M_4$ अथ ; $G_3$ यथा ; $M_2$ [अ]प्यथ ( for ह्यथ ). — ( L. 1657 ) $G_{1.2}$ मंत्रैश्च ( for वा मन्त्रैर् ). — ( L. 1658 ) $T_2$ अतस् ( for ततस् ). $G_3$ $M_4$ पुनः पुनः ( for विचक्षणः ). $M_2$ अर्चयीत समाहितः ( for the post. half ). — ( L. 1662 ) $M_2$ तथा राजन् ( for च राजेन्द्र ). $T_2$ $M_2$ च ( for वा ). — ( L. 1663 ) $G_3$ $M_4$ अनिरुद्धं ( for चानि° ). — ( L. 1664 ) $G_{1.2}$ एतत्त्वा( $G_2$ °च्चा )न्यच्च राजेंद्र ( for the prior half ). $T_1$ -भेदाः स- ; $M_2$ -भेदाश्च ( for -भेदेन ). — ( L. 1665 ) $G_2$ $M_3$ एव ( for एवं ). — After line 1665, $T_1$ and Madras ed. ins. :

अत्यन्तभेदरहितं गुणपूर्वं सदैव हि ।

[ Madras ed. गुणपूर्णं. ]

— ( L. 1668 ) $M_2$ मम ( for ये मद्- ). $G_3$ -भक्ता मम ( for -भक्तजन- ). — ( L. 1669 ) $G_{1.2}$ मद्भक्ताश्च ; $M_3$ मद्भक्तास्ते ( by transp. ). — ( L. 1670 ) T $G_{1.3}$ $M_{1-3}$ स्वर्गाणि ; $G_2$ शुद्धानि ( for स्वर्ग्याणि ). — ( L. 1671 ) $M_2$ एतस्मात् ( for मद्भक्तः ). — ( L. 1672 ) $M_4$ जन- ( for जल- ). $G_1$ -धारणे ( for -तारणे ). — ( L. 1673 ) $G_1$ स्वप्स्येन् ; $G_2$ स्वप्यो ; $G_3$ स्वापेन् ; $M_2$ स्वप्नं ; $M_4$ स्वापं ( for स्वप्यान् ). — ( L. 1675 ) $G_3$ नोपयेत् ( for लोप° ). — ( L. 1676 ) T $G_{1.2}$ प्रत्यक्षं. T $G_{2.3}$ सौभांजनकसृं( $G_3$ °गृं )जनान् ( $G_2$ °जनौ ) ; $G_1$ सौभेजनककुंजनौ ( for the post. half ). — ( L. 1677 ) $G_2$ $M_3$ ( *inf. lin.* ) corrupt. — $T_1$ $M_2$ om. ( hapl. ) lines 1678–1679. — ( L. 1678 ) $G_3$ पाकं ( for पक्वं ). — ( L. 1679 ) Prior half, hypermetric. $G_1$ निवेदितं ( for अनिवे° ). — ( L. 1680 ) T $M_{2.4}$ दूरात्तु ( $M_2$ °द्वि- ) ; $G_3$ दूरेण ( for दूरं वि- ). — ( L. 1681 ) T $G_{1.2}$ -वेद- ( for -देव- ). $T_1$ -परिवादं ; $G_1$ $M_3$ -परीवादान्. — ( L. 1682 ) $G_1$ [ए]व ( for the second [अ]पि ). — ( L. 1683 ) $G_2$ मम ( for माम् ). $M_{2.4}$ -भावास् ( for -भक्तास् ). — After line 1683, $M_2$ ins. :

सात्त्विकाः सत्त्वसंपन्नाः सत्त्वमेव प्रयान्ति ते । [1685]
ये सिद्धाः सन्ति सांख्येन योगसत्त्वबलेन च ।
नभसादित्यचन्द्राभ्यां पश्यन्ति पदविस्तरम् ।
एकस्तम्भे नवद्वारे त्रिस्थूणे पञ्चधातुके ।
एतस्मिन्देहनगरे राजसस्तु सदा भवेत् ।
उदिते सवितर्यस्य क्रियायुक्तस्य धीमतः । [1690]
चतुर्वेदविदश्चापि देहे षड्वृषलाः स्मृताः ।
क्षत्रियाः सप्त विज्ञेया वैश्यास्त्वष्टौ प्रकीर्तिताः ।
नियताः पाण्डवश्रेष्ठ शूद्राणामेकविंशतिः ।
कामः क्रोधश्च लोभश्च मोहश्च मद एव च ।
महामोहश्च इत्येते देहे षड्वृषलाः स्मृताः । [1695]
गर्वः स्तम्भो ह्यहंकार ईर्ष्या च द्रोह एव च ।
पारुष्यं क्रूरता चेति सप्तैते क्षत्रियाः स्मृताः ।
तीक्ष्णता निकृतिर्माया शाठ्यं डम्भो ह्यनार्जवम् ।
पैशुन्यमनृतं चैव वैश्यास्त्वष्टौ प्रकीर्तिताः ।
तृष्णा बुभुक्षा निद्रा च आलस्यं चाघृणादया । [1700]
आधिश्चापि विवादश्च प्रमादो हीनसत्त्वता ।
भयं विक्लवता जाड्यं पापकं मन्युरेव च ।
आशा चाश्रद्दधानत्वमनवस्थाप्ययन्त्रणम् ।
आशौचं मलिनत्वं च शूद्रा ह्येते प्रकीर्तिताः ।
यस्मिन्नेते न दृश्यन्ते स वै ब्राह्मण उच्यते । [1705]
येषु येषु हि भावेषु यत्कालं वर्तते द्विजः ।
तत्तत्कालं स विज्ञेयः ब्राह्मणो ज्ञानदुर्बलः ।
प्राणानायम्य यत्कालं येन मां चापि चिन्तयेत् ।
तत्काले वै द्विजो ज्ञेयः शेषकालो ह्यथेतरः ।
तस्मात्तु सात्त्विको भूत्वा शुचिः क्रोधविवर्जितः । [1710]
मामर्चयेत्तु सततं मत्प्रियत्वं यदिच्छति ।
 अलोलजिह्वः समुपस्थितो धृति-
  र्निधाय चक्षुर्युगमात्रमेव च ।
 मनश्च वाचं च निगृह्य चञ्चलं
  भयान्निवृत्तो मम भक्त उच्यते । [1715]
ईदृशाध्यात्मिनो ये तु ब्राह्मणा नियतेन्द्रियाः ।
तेषां श्राद्धेषु तृप्यन्ति तेन तृप्ताः पितामहाः ।
धर्मो जयति नाधर्मः सत्यं जयति नानृतम् ।

---

तिर्यङ्मानुषदेवेन तामसा भुञ्जते फलम् ।
नागयक्षा गृहस्थाने राजसा भुञ्जते फलम् ।

— $M_2$ om. line 1684. — ( L. 1685 ) $M_2$ मत्पादा यांति मानवाः ( for the post. half ). — ( L. 1686 ) $M_4$ सर्व- ( for सन्ति ). $G_{1,2}$ $M_3$ -तत्त्व-; $G_3$ -सिद्धि- ( for -सत्त्व- ). — After line 1687, $M_4$ ins. :

युधिष्ठिरः ।

कथं मानुषदेहेषु गुरुस्त्रीगुणसंभवा ।
***स्तदनुविद्धा भवन्ति मधुसूदन ।

भगवान् ।

— ( L. 1689 ) $G_2$ एकस्मिन्. $M_4$ [आ]चरेत् ( for भवेत् ). $M_2$ अस्मिंस्तु देहे नगरे ये वसंतीति तच्छृणु. — ( L. 1690 ) $G_1$ सवितुर्याप्य; $G_2$ °तुर्यापि; $M_3$ °तुर्यस्य; $M_4$ °तर्यापि ( for °तर्यस्य ). $M_2$ उदितादित्यविप्रस्य ( for the prior half ). — ( L. 1691 ) $M_2$ चतुर्वेदे. $M_4$ तथा ( for स्मृताः ). — ( L. 1692 ) $T_2$ वैश्यास्त्वष्ट; $M_2$ वैश्ये त्वष्टौ. —( L. 1693 ) $G_3$ वियताः बांधवश्रेष्ठाः. —( L. 1695 ) $M_2$ तथा ( for च ). — ( L. 1696 ) $M_2$ दर्पः ( for गर्वः ). $M_2$ [अ]हंकारम्. — ( L. 1697 ) $G_{1,2}$ $M_3$ [ए]व ( for [इ]ति ). — ( L. 1698 ) $M_4$ तीक्ष्णा च ( for तीक्ष्णता ). $T_2$ दंभो; $G_{1,2}$ स्तंभो ( for डम्भो ). $G_2$ [ऽ]पि ( for हि ). $M_2$ शाठ्यडंभोप्यनार्जवं; $M_{3,4}$ शाठ्यस्तंभोप्य( $M_4$ °भो ह्य )नार्जवं. — ( L. 1699 ) $M_{2,3}$ पैशून्यम्. —( L. 1700 ) $M_4$ तीक्ष्णा बुभुक्षुता निद्रा ( for the prior half ). $M_3$ ह्यालस्यं; $M_4$ [अ]प्यालस्यं ( for आ° ). $G_3$ घृणादयः. — ( L. 1701 ) $M_2$ अवृत्तिश्च ( for आधिश्चापि ). $G_{1,2}$ $M_3$ विषादश्. — ( L. 1702 ) $G_3$ भय- ( for भयं ). $G_2$ $M_{2,4}$ जाल्यं ( for जाड्यं ). $M_2$ om. from the post. half up to the prior half of line 1705. $T_2$ $G_3$ प्रमादो; $M_4$ पापका ( for °कं ). — ( L. 1703 ) $T_1$ आहूय; $T_2$ असूया; $G_3$ अशौचा ( for आशा च ). $G_{1,2}$ $M_3$ [अ]मंत्रणं; $G_3$ [अ]यंत्रिणं. — ( L. 1704 ) $G_2$ अशौचं. $G_3$ ह्येताः ( for ह्येते ). — ( L. 1705 ) T $G_3$ प्र- ( for न ). $G_3$ $M_4$ वर्तंते ( for दृश्यन्ते ). $T_1$ न ( for स ). — ( L. 1706 ) $G_{2,3}$ $M_3$ ये( $G_2$ ए )ष्वेतेषु ( for येषु येषु ). T $M_4$ च ( for हि ). — ( L. 1707 ) $G_{1,2}$ $M_{2,3}$ कालं वै ( for तत्कालं ). $G_3$ $M_3$ -दुर्लभः ( for -दुर्बलः ). — ( L. 1708 ) T $G_3$ $M_4$ प्राणायामं च यः का( $G_3$ यत्का )ले यो मां चापि विचिंतयेत्. — ( L. 1709 ) $G_{1,2}$ $M_{2,3}$ सकालो; $G_3$ तत्कालो. $T_1$ $M_4$ शेषकाले; $G_3$ शेषः कालो. $G_{1,2}$ $M_3$ [ऽ]पि ( for हि ). $M_2$ शेषकालमथेतरः ( for the post. half ). — ( L. 1710 ) T $G_{1,3}$ अस्मात् ( for त° ). $M_3$ हि ( for तु ). — ( L. 1711 ) $M_2$ यदि ( for यद् ). T $G_{1,3}$ इच्छसि ( for °ति ). — ( L. 1712 ) T $M_3$ धृतौ; $G_3$ ऋतौ; $M_2$ धृतो; $M_4$ धृति ( for धृतिर् ). — ( L. 1713 ) T om. च. — ( L. 1714 ) $M_{2,4}$ केवलं ( for चञ्चलं ). — ( L. 1715 )

क्षमा जयति न क्रोधः क्षमावान्ब्राह्मणो भवेत् ।

Colophon.

वैशंपायन उवाच ।

दानपुण्यफलं श्रुत्वा तपः पुण्यफलानि च । [ 1720 ]
धर्मपुत्रः प्रहृष्टात्मा केशवं पुनरब्रवीत् ।
या चैषा कपिला देव पूर्वमुत्पादिता विभो ।
होमधेनुः सदा पुण्या चतुर्वक्त्रेण माधव ।
सा कथं ब्राह्मणेभ्यो हि देया कस्मिन्दिनेऽपि वा ।
कीदृशाय च विप्राय दातव्या पुण्यलक्षणा । [ 1725 ]
कति वा कपिलाः प्रोक्ताः स्वयमेव स्वयंभुवा ।
कैर्वा देयाश्च ता देव श्रोतुमिच्छामि तत्त्वतः ।
एवमुक्तो हृषीकेशो धर्मपुत्रेण संसदि ।
अब्रवीत्कपिलासंख्यां तासां माहात्म्यमेव च ।
शृणु पाण्डव तत्त्वेन पवित्रं पावनं परम् । [ 1730 ]
यच्छ्रुत्वा पापकर्मापि नरः पापैः प्रमुच्यते ।
अग्निमध्योद्भवां दिव्यामग्निज्वालासमप्रभाम् ।
अग्निज्वालोज्ज्वलच्छृङ्गीं प्रदीप्ताङ्गारलोचनाम् ।
अग्निपुच्छामग्निखुरामग्निरोमप्रभान्विताम् ।
तामाग्नेयीमग्निजिह्वामग्निग्रीवां ज्वलत्प्रभाम् । [ 1735 ]
भुञ्जते कपिलां ये तु शूद्रा लोभेन मोहिताः ।
पतितांस्तान्विजानीयाच्चण्डालसदृशा हि ते ।
न तेषां ब्राह्मणः कश्चिद्गृहे कुर्यात्प्रतिग्रहम् ।
दूराच्च परिहर्तव्या महापातकिनोऽपि ते ।
सर्वकालं हि ते सर्वैर्वर्जिताः पितृदैवतैः । [ 1740 ]
ते सदा ह्यप्रतिग्राह्या ह्यसंभाष्याश्च पापिनः ।
पिबन्ति कपिलां यावत्तावत्तेषां पितामहाः ।
अमेध्यमुपभुञ्जन्ति भूम्यां वै श्वसृगालवत् ।
कपिलाया घृतं क्षीरं दधि तक्रमथापि वा ।
ये शूद्रा उपभुञ्जन्ति तेषां गतिमिमां शृणु । [ 1745 ]
कपिलोपजीवी शूद्रस्तु मृतो गच्छति रौरवम् ।
क्लिश्यते रौरवे घोरे वर्षकोटिशतं वसन् ।
रौरवाच्च परिभ्रष्टो विष्ठायां जायते क्रिमिः ।
विष्ठागर्तेषु संविष्टो दुर्गन्धेषु सहस्रशः ।
तत्रैव जायमानोऽसौ नोत्तारं तत्र विन्दति । [ 1750 ]
ब्राह्मणश्चैव यस्तेषां गृहे कुर्यात्प्रतिग्रहम् ।

---

$M_3$ ( *sup. lin.* as above ) भोगान् ( for भयान् ). $M_2$ भोगान्निवृत्तो भगवान्स चोच्यते. — ( L. 1716 ) T $G_{1.3}$ ज्ञा- ( $G_1$ ध्या )निनो ; $M_4$ ध्यायिनो ( for [अ]ध्यात्मिनो ). — ( L. 1717 ) T $G_3$ $M_2$ येषां ; $M_4$ एषां ( for तेषां ). $G_3$ तृप्यंते ; $M_2$ भोज्यंति. $M_2$ तेषां ( for तेन ). — Colophon. — *Sub-parvan :* T $M_{2,4}$ वैष्णवधर्म. — *Adhy. name :* $M_2$ गृहस्थधर्मविधिः. — *Adhy. no. :* $T_1$ 92 ; $T_2$ $G_{1,2}$ 91 ; $G_3$ 102 ; $M_2$ 8 ; $M_3$ 90 ; $M_4$ 101 . — ( L. 1720 ) $M_2$ -धर्म- ( for -पुण्य- ). $G_1$ ततः ( for तपः ). — Before line 1722, MSS. ins. युधिष्ठिर उवाच. $G_1$ om. lines 1724–1726. — ( L. 1724 ) $G_3$ $M_2$ वै ( for हि ). — ( L. 1726 ) Kumbh. ed. कथिताः ( for कति वा ). — ( L. 1727;) $M_2$ ज्ञातुम ( for श्रोतुम् ). $G_3$ $M_4$ माधव ( for तत्त्वतः ). — Before line 1730, MSS. ins. भगवानुवाच. — ( L. 1730 ) $G_3$ तत्त्वज्ञ ( for तत्त्वेन ). $M_4$ पवित्रं पापनाशनं. — ( L. 1731 ) $G_2$ तत्कृत्वा ; $M_2$ तच्छ्रुत्वा. $G_{1,2}$ $M_3$ पापात् ( for पापैः ). — ( L. 1733 ) $M_2$ -ज्वालोज्ज्वलां. T प्रदीप्तां गौरलोचनां ( for the post. half ). — ( L. 1734 ) $T_1$ $G_{1,2}$ -प्रभाम् ( for -पुच्छाम् ). — ( L. 1735 ) $G_{1,2}$ $M_3$ -वर्णाम् ( for -जिह्वाम् ). — ( L. 1736 ) $M_2$ om. from the post. half up to the prior half of line 1738. $G_1$ $M_3$ श्रद्धा- ( sic ) ( for शूद्रा ). — ( L. 1737 ) $G_1$ -समशो ( for -सदृशा ). — ( L. 1738 ) T किंचिद् ( for कश्चिद् ). — ( L. 1740 ) $T_1$ $G_2$ $M_{2,3}$ सार्व- ( for सर्व- ). $M_2$ -देवतैः ( for -दै° ). — ( L. 1741 ) $G_{2,3}$ $M_3$ om. the second हि. — ( L. 1744 ) $M_4$ स्नुतं ( for घृतं ). T $M_2$ च ( for वा ). — ( L. 1745 ) $G_1$ $M_3$ अपि ( for उप- ). — After line 1747, $G_{1,2}$ $M_3$ ins. :

ततश्चापि च्युतः कालाच्छ्वानयोनिं स गच्छति ।

while $M_2$ ins. :

ततश्च मुक्तः कालेन शूनां योनिशतं व्रजेत् ।

— ( L. 1748 ) $G_1$ $M_{2-4}$ श्वयोन्याश् ( for रौरवात् ). — ( L. 1749 ) $G_{1,2}$ $M_{2,3}$ विष्ठाकूपे( $M_2$ °वर्गे )षु पापिष्ठो ( for the prior half ). — ( L. 1750 ) $G_{1,2}$ $M_{2,3}$ तत्र तत्रैव जायेत ; $M_4$ तत्रैव जायते तच्च ; Kumbh. ed. and Madras ed. तत्र तत्रोपजायेत ( for the prior half ). T नोत्कर्षं ( for नोत्तारं ). — ( L. 1751 ) $M_2$ चापि ( for चैव ). — ( L. 1753 ) $T_1$ $G_{1,2}$

ततः प्रभृति तस्यापि पितरः स्युरमेध्यपाः ।
न तेन सार्धं संभाषेन्न चाप्येकासनं व्रजेत् ।
स नित्यं वर्जनीयो हि दूरात्तु ब्राह्मणाधमः ।
यस्तेन सह संभाषेदेकशय्यां व्रजेत वा । [ 1755 ]
प्राजापत्यं चरेत्कृच्छ्रं स च तेनैव शुध्यति ।
कपिलोपजीविनः शूद्राद्यः करोति प्रतिग्रहम् ।
प्रायश्चित्तं भवेत्तस्य विप्रस्यैतन्न संशयः ।
ब्रह्मकूर्चं तु कुर्वीत चान्द्रायणमथापि वा ।
मुच्यते किल्बिषात्तस्मादेतेन ब्राह्मणो हि सः । [ 1760 ]
कपिला ह्यग्निहोत्रार्थे यज्ञार्थे च स्वयंभुवा ।
सर्वतस्तेज उद्धृत्य ब्रह्मणा निर्मिता पुरा ।
पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम् ।
पुण्यानां परमं पुण्यं कपिला पाण्डुनन्दन ।
तपसां तप एवाग्र्यं व्रतानां व्रतमुत्तमम् । [ 1765 ]
दानानां परमं दानं निदानं ह्येतदक्षयम् ।
पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
पवित्राणि च रम्याणि सर्वलोकेषु पाण्डव ।
तेभ्यस्तेजः समुद्धृत्य ब्रह्मणा लोककर्तृणा ।
लोकनिस्तारणायैव निर्मिताः कपिलाः स्वयम् । [ 1770 ]
सर्वतेजोमयी ह्येषा कपिला पाण्डुनन्दन ।
सदामृतमयी मेध्या शुचिः पावनमुत्तमम् ।
क्षीरेण कपिलायास्तु दध्ना वै सघृतेन वा ।
होतव्यान्यग्निहोत्राणि सायं प्रातर्द्विजातिभिः ।
कपिलाया घृतेनापि दध्ना क्षीरेण वा पुनः । [ 1775 ]
जुह्वते येऽग्निहोत्राणि ब्राह्मणा विधिवत्प्रभो ।
पूजयन्त्यतिथींश्चैव परां भक्तिमुपागताः ।
शूद्रान्नाद्विरता नित्यं दम्भानृतविवर्जिताः ।
ते यान्त्यादित्यसंकाशैर्विमानैर्द्विजसत्तमाः ।
सूर्यमण्डलमध्येन ब्रह्मलोकमनुत्तमम् । [ 1780 ]
ब्रह्मणो भवने दिव्ये कामगाः कामरूपिणः ।
ब्रह्मणा पूज्यमानास्तु मोदन्ते कल्पमक्षयम् ।
एवं हि कपिला राजन्पुण्या मन्त्रामृततारणिः ।
आदावेवाग्निमध्यात्तु मैत्रेयी ब्रह्मनिर्मिता ।
शृङ्गाग्रे कपिलायास्तु सर्वतीर्थानि पाण्डव । [ 1785 ]
ब्रह्मणो हि नियोगेन निवसन्ति दिने दिने ।
प्रातरुत्थाय यो मर्त्यः कपिलाशृङ्गमस्तकात् ।
च्युता आपस्तु शीर्षेण प्रयतो धारयेच्छुचिः ।
स तेन पुण्यतीर्थेन सहसा दग्धकिल्बिषः ।
वर्षत्रयकृतं पापं प्रदहत्यग्निवत्तृणम् । [ 1790 ]
मूत्रेण कपिलायास्तु यस्तु प्रातरुपस्पृशेत् ।

---

संभाष्येन्. $M_2$ om. ( hapl. ) from the post. half up to the prior half of line 1755. — ( L. 1755 ) $T_1$ $G_{1.2}$ $M_3$ संभाष्येद्. $T_1$ व्रजेत्ततः ( for °त वा ). — ( L. 1756 ) T विवर्जितः ( $T_2$ °र्जयेत् ); $G_3$ $M_4$ विशुध्यति ( for [ए]व शु° ). — ( L. 1757 ) Prior half, hypermetric. $T_1$ कपिलाजीविनः शूद्राद् ( for the prior half ). — ( L. 1758 ) $G_{1.2}$ $M_3$ ( *sup. lin.* ) चरेत् ( for भवेत् ). $G_{1.2}$ $M_3$ [इ]ति; $M_2$ [इ]दं ( for [ए]तन् ). — ( L. 1759 ) $G_{1.2}$ $M_{3.4}$ स ( for तु ). $M_2$ षड्ब्रह्मकूर्चं कुर्वीत. $G_1$ अथो ( for अथ ). — ( L. 1760 ) T $G_3$ अस्माद् ( for त° ). $M_2$ तेन स्याद् ( for एतेन ). — ( L. 1761 ) T अग्निहोत्रार्थं. $G_{1.2}$ $M_2$ विप्रार्थे ( for यज्ञार्थे ). $T_1$ $G_{1.2}$ $M_3$ वा ( for च ). — ( L. 1762 ) $G_3$ सर्वं तत् ( for सर्वतस् ). $G_{1.2}$ $M_3$ सर्वं तेजः समुद्धृत्य ( for the prior half ). — ( L. 1765 ) $G_{1.2}$ $M_{2.3}$ निर्मिता ब्रह्मणा पुरा. — ( L. 1766 ) $G_{1.2}$ $M_3$ उत्तमं व्रतं ( by transp. ). — ( L. 1766 ) $G_1$ $M_{2-4}$ निधानं ( for निदानं ). $T_2$ $G_3$ न दा( $G_3$ निदा )नं वा तदुत्तमं ( for the post. half ). — ( L. 1769 ) Kumbh. ed. एभ्यस् ( for तेभ्यस् ). $G_1$ तेभ्यः ( for तेजः ). — ( L. 1770 ) $T_2$ $G_3$ -निस्तरणाय; $G_1$ -विस्तार°. $M_2$ [इ]व ( for [ए]व ). — ( L. 1771 ) T $G_3$ $M_4$ ह्येवं ( $M_4$ °व ) ( for ह्येषा ). — ( L. 1772 ) T सदामृतमहामेध्या; $G_3$ °भवा मेध्या; $M_4$ °वहा मेध्या. — ( L. 1773 ) $M_{2.3}$ ( *sup. lin.* as above ) चैव ( for वै स- ). — ( 1774 ) $G_3$ $M_4$ भोक्तव्यानि ( for सायं प्रातर् ). — ( L. 1775 ) $G_2$ $M_2$ नृप ( for पुनः ). — ( L. 1776 ) $M_2$ जुह्वंते. $M_2$ सदा ( for प्रभो ). — ( L. 1777 ) $G_3$ $M_4$ उपाश्रितः ( for °गताः ). — ( L. 1778 ) T $M_4$ शूद्रान्न- ( for °न्नाद् ). T डंभलोभ- ( for दम्भानृत- ). — ( L. 1779 ) $G_3$ $M_{2.4}$ -कल्पैस्तु ( for -संकाशैर् ). — ( L. 1783 ) $G_3$ $M_4$ पुण्यामृतवितारिणी; $M_2$ श्रेयामतवितारणिः ( sic ) ( for the post. half ). — ( L. 1784 ) $G_3$ देवाग्नि- ( for एवाग्नि- ). $G_1$ -मध्ये; $M_{2.3}$ ( *inf. lin.* ) -होत्रात् ( for -मध्यात् ). $G_3$ मैत्रेय-. $M_2$ मंत्रैर्ब्रह्मादिनिर्मिता. — ( L. 1787 ) $M_{2.3}$ -मस्तकं ( for °कात् ). — ( L. 1788 ) $G_{1.2}$ $M_2$ यश्च्युतामंबुधारां वै ( for the prior half ). T धारयेत्प्रयतः ( by transp. ); $G_{1.2}$ $M_2$ शिरसा प्रयतः. — ( L. 1789 ) $M_3$ -स्नानेन ( for -तीर्थेन ). T न हि( $T_2$ सहि )तो; $M_2$ तत्क्षणाद् ( for सहसा ). — ( L. 1790 ) $T_2$ $G_{1.2}$ $M_3$ जन्म- ( for वर्ष- ). $M_2$ -कृतः ( sic ) ( for -कृतं ). T कर्म ( for

स्नानेन तेन पुण्येन नष्टपापः स मानवः ।
त्रिंशद्वर्षकृतात्पापान्मुच्यते नात्र संशयः ।
प्रातरुत्थाय यो भक्त्या प्रयच्छेत्तृणमुष्टिकम् ।
तस्य नश्यति तत्पापं त्रिंशद्रात्रिकृतं नृप । [ 1795 ]
प्रातरुत्थाय मद्भक्त्या कुर्याद्यस्तां प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन पृथिवी नात्र संशयः ।
प्रदक्षिणेन चैकेन श्रद्धायुक्तस्य पाण्डव ।
दशरात्रकृतं पापं तस्य तन्नश्यति ध्रुवम् ।
कपिलापञ्चगव्येन यः स्नायात्तु शुचिर्नरः । [ 1800 ]
स गङ्गाद्येषु तीर्थेषु स्नातो भवति पाण्डव ।
तेन स्नानेन तस्यापि श्रद्धायुक्तस्य पाण्डव ।
दशरात्रकृतं पापं तत्क्षणादेव नश्यति ।
दृष्ट्वा तु कपिलां भक्त्या श्रुत्वा हुम्भारवं तथा ।
व्यपोहति नरः पापमहोरात्रकृतं नृप । [ 1805 ]
यत्र वा तत्र वा चाङ्गे कपिलां यः स्पृशेच्छुचिः ।
संवत्सरकृतं पापं विनाशयति पाण्डव ।
गोसहस्रं च यो दद्यादेकां च कपिलां नरः ।
समं तस्य फलं प्राह ब्रह्मलोके पितामहः ।
यस्त्वेकां कपिलां हन्यान्नरः किंचित्प्रमादतः । [ 1810 ]
गोसहस्रं हतं तेन भवेन्नात्र विचारणा ।
यश्चैकां कपिलां दद्याच्छ्रोत्रियायाहिताग्नये ।
गवां शतसहस्रं तु दत्तं भवति पाण्डव ।
दशैव कपिलाः प्रोक्ताः स्वयमेव स्वयंभुवा ।
यो दद्याच्छ्रोत्रियेभ्यो वै स्वर्गं गच्छति तच्छृणु । [ 1815 ]
प्रथमा स्वर्णकपिला द्वितीया गौरपिङ्गला ।
तृतीया रक्तपिङ्गाक्षी चतुर्थी गलपिङ्गला ।
पञ्चमी बभ्रुवर्णाभा षष्ठी च श्वेतपिङ्गला ।
सप्तमी रक्तपिङ्गाक्षी अष्टमी खुरपिङ्गला ।
नवमी पाटला ज्ञेया दशमी पुच्छपिङ्गला । [ 1820 ]
दशैताः कपिलाः प्रोक्तास्तारयन्ति नरान्सदा ।
मङ्गल्याश्च पवित्राश्च सर्वपापप्रणाशनाः ।
एवमेव ह्यनड्वाहो दश प्रोक्ता नरेश्वर ।
ब्राह्मणो वाहयेत्तांस्तु नान्यो वर्णः कथंचन ।
न घातयेत्तु दण्डेन क्षेत्रे वाध्वनि वा द्विजः । [ 1825 ]
वाहयेद्धुंकृतेनैव शाखया वा सपत्रया ।
न दण्डेन न यष्ट्या वा न पाशेन च वा पुनः ।

---

पापं ). $G_{1.2}$ प्रहरति ( for प्रदहति ). $M_2$ दहत्याग्निरिवेंधनं ( for the post. half ). — ( L. 1791 ) $G_{1.2}$ $M_{2.3}$ च ( for the second तु ). $G_1$ $M_3$ ( *sup. lin.* ) प्राणान् ( for प्रातर् ). — ( L. 1793 ) $M_2$ पूयते ( for मुच्यते ). —( L. 1794 ) T मर्त्यः ( for भक्त्या ). $M_2$ om. ( hapl. ) from the post. half up to the prior half of line 1796. —( L. 1795 ) $G_1$ त्रिंशद्वर्ष- ; Kumbh. ed. and Madras ed. °द्रात्र- ( for °द्रात्रि- ). — ( L. 1796 ) T यो ( for मद्- ). T आसां ; $G_1$ यस्मात् ; $G_2$ यस्तत् ; $M_3$ यस्तु ( for यस्तां ). — ( L. 1798 ) $G_{1.2}$ $M_3$ -युक्तेन ( for -युक्तस्य ). — ( L. 1799 ) $G_2$ $M_3$ दशरात्रि-. $G_3$ तत्क्षणादेव नश्यति ; $M_2$ तस्य सद्यो विनश्यति ( for the post. half ). — $G_3$ om. lines 1800–1801. —( L. 1800 ) $T_1$ स्नात्वा ( for स्नायात् ). — ( L. 1801 ) $T_1$ गंगादिपुण्यतीर्थेषु ( for the prior half ). — T om. lines 1802–1803. — ( L. 1802 ) $M_2$ तस्याशु. Kumbh. ed. पार्थिव ( for पाण्डव ). —( L. 1803 ) $M_2$ यावज्जीव- ; $M_4$ दशरात्रि- ( for °रात्र- ). —( L. 1804 ) T प्रातरुत्थाय यो भक्त्या ( for the prior half ). $G_{1.2}$ $M_3$ श्रुत्वा हुंकारनिस्वनं ( for the post. half ). —( L. 1805 ) T $G_3$ नरः ( for नृप ). — ( L. 1806 ) $G_1$ $M_4$ कपिलायाः ( for °लां यः ). — ( L. 1807 ) T $G_3$ $M_4$ स ( for वि- ). — ( L. 1808 ) $M_2$ च यः ( for नरः ). — After line 1808, $M_4$ ins. :

यस्त्वेकां कापिलां दद्यात्स तस्मात्तु विशिष्यते ।

— $G_3$ om. lines 1809–1811. $M_4$ om. line 1809. — ( L. 1809 ) $G_2$ $M_{2.3}$ ब्रह्मा लोक- ( for ब्रह्मलोके ). —( L. 1810 ) $G_1$ $M_{2.3}$ [ए]वं ( for [ए]कां ). $M_{2.3}$ कश्चित्. — ( L. 1811 ) T $G_2$ नात्र कार्या ( for भवेन्नात्र ). — ( L. 1812 ) T $M_4$ तु ( for च ). $M_2$ श्रोत्रियायाग्निहोत्रिणे ( for the post. half ). — ( L. 1813 ) $M_2$ ते (sic) ( for तु ). —( L. 1814 ) $G_{1.2}$ $M_3$ वै ; $M_2$ [इ]ह ( for the first [ए]व ). — ( L. 1815 ) $G_3$ या दद्यात् ; $M_2$ या दद्यां ( sic ) ; $M_4$ या दत्त्वा ( for यो दद्यात् ). $T_2$ $G_3$ ताः ( for तत् ). — ( L. 1816 ) $M_2$ सुबर्ण- ( hypermetric ) ( for स्वर्ण- ). Some MSS. -पिंगळा. — ( L. 1817 ) $T_2$ $M_3$ रत्न- ( for रक्त- ). Some MSS. गळपिंगळा. — ( L. 1818 ) $G_3$ च सुवर्णाभा ; $M_2$ बभ्रुपिंगा स्यात् ; $M_4$ °वर्णाभ्रा. — ( L. 1819 ) $G_2$ रत्न- ; $M_2$ कृष्ण- ( for रक्त- ). $T_1$ सप्तमी पिंगलाक्षी च ( for the prior half ). $G_1$ $M_3$ त्वष्टमी. $T_1$ मुख- ( for खुर- ). — ( L. 1820 ) $M_2$ चैव ( for ज्ञेया ). — ( L. 1821 ) T $G_3$ नरं ( for नरान् ). $M_2$ तु याः ( for सदा ). — ( L. 1822 ) T मंगल्यश्. $G_3$ विचित्राश् ; $M_4$ विचित्रं ( for पवित्राश् ). — ( L. 1823 ) $M_2$ एवं ( for एव ). $T_1$ $M_2$ ह्यनड्वाहा. T नराधिप ; $M_2$ मनीषिभिः ( for नरेश्वर ). — ( L. 1824 ) T $G_3$ कदाचन ( for कथंचन ). —( L. 1825 ) $M_4$ च ( for तु ). $G_{1.2}$ न वाहयेच्च

न क्षुत्तृष्णाश्रमश्रान्तान्वाहयेद्विकलेन्द्रियान् ।
अतृप्तेषु न भुञ्जीयात्पिबेत्पीतेषु चोदकम् ।
शुश्रूषोर्मातरश्चैताः पितरस्ते प्रकीर्तिताः । [ 1830 ]
अह्नां पूर्वे त्रिभागे तु धुर्याणां वाहनं स्मृतम् ।
विश्रामेन्मध्यमे भागे भागे चान्ते यथासुखम् ।
यत्र वा त्वरया कृत्यं संशयो यत्र वाध्वनि ।
वाहयेत्तत्र धुर्यांस्तु न स पापेन लिप्यते ।
अन्यथा वाहयन्राजन्निरयं याति रौरवम् । [ 1835 ]
रुधिरं पातयेत्तेषां यस्तु मोहान्नराधिप ।
ब्रह्महत्यासमं पापं तस्य स्यात्पाण्डुनन्दन ।
तेन पापेन पापात्मा निरयं यात्यसंशयम् ।
नरकेषु च सर्वेषु समास्थित्वा शतं शतम् ।
इह मानुष्यके लोके बलीवर्दो भविष्यति । [ 1840 ]
तस्मात्तु मुक्तिमन्विच्छन्दद्यात्तु कपिलां नरः ।
कपिलां वाहयेद्यस्तु वृषलो लोभमोहितः ।
तेन देवास्त्रयस्त्रिंशत्पितरश्चापि वाहिताः ।
स देवैः पितृभिर्नित्यं वध्यमानः सुदुर्मतिः ।
नरकान्नरकं घोरं गच्छेदाप्रलयं नृप । [ 1845 ]

ब्रह्मा रुद्रस्तथाग्निश्च कपिलानां गतिं गताः ।
तस्मात्ते तु न हन्तव्याः पूज्यास्ते तु विशेषतः ।
निःश्वसन्ति यदा श्रान्तास्तदा हन्युश्च तत्कुलम् ।
यावन्ति तेषां रोमाणि तावद्वर्षशतं नृप ।
नरके परिपच्यन्ते तत्र तद्वाहका नराः । [ 1850 ]
कपिला सर्वयज्ञेषु दक्षिणार्थं विधीयते ।
तस्मात्ता दक्षिणा देया यज्ञेष्वेव द्विजातिभिः ।
होमार्थं चाग्निहोत्रस्य यां प्रयच्छेत्प्रयत्नतः ।
श्रोत्रियाय दरिद्राय श्रान्तायामिततेजसे ।
तेन दानेन पूतात्मा सोऽग्निलोके महीयते । [ 1855 ]
यावन्ति चैव रोमाणि कपिलाङ्गे युधिष्ठिर ।
तावद्वर्षसहस्राणि नरः स्वर्गे च वर्तते ।
सुवर्णखुरशृङ्गीं च कपिलां यः प्रयच्छति ।
विषुवे चायने वापि सोऽश्वमेधफलं लभेत् ।
तेनाश्वमेधतुल्येन मम लोकं स गच्छति । [ 1860 ]
स्वर्णशृङ्गीं रूप्यखुरां सवत्सां कांस्यदोहिनीम् ।
वस्त्रैरलंकृतां पुष्टां गन्धैर्माल्यैश्च शोभिताम् ।
पवित्रं हि पवित्राणां सुवर्णमिति मे मतिः ।

---

कपिलां ( for the prior half ). — ( L. 1826 ) $M_2$
ध्वंकृतेन. $M_3$ शाखाया. $G_2$ परि-; $M_2$ च स- ( for
वा स- ). — ( L. 1827 ) $M_4$ तु ( for च ). $M_2$
न पाषाणेन वा पुनः ( for the post. half ). — ( L.
1828 ) $T_1$ $G_1$ -श्रमाशांतान्; $T_2$ $M_{2.3}$ -श्रमाश्रांतान्;
$M_4$ -श्रमश्रांतं. T $G_2$ व्याकुलेंद्रियान्; $M_4$ विकलेंद्रियं.
— ( L. 1829 ) T $G_3$ $M_{2.4}$ सुतृप्तेषु. $T_1$ $G_3$ च;
$M_2$ सु-; $M_4$ तु ( for न ). $T_2$ वा ( for च ).
— ( L. 1830 ) $G_3$ गुरवो; $M_{2.4}$ शुश्रूषेत्. $M_2$ पापतश्
( for मातरश् ). $G_3$ ताः ( for ते ). — ( L. 1831 )
T पूर्वत्र ( for पूर्वे त्रि- ). $G_{1.2}$ $M_3$ अह्नां पूर्वत्रि( $G_2$ °र्वे
त्रि )भागेन; $M_2$ अन्नं पूर्वे त्रिभागेषु ( for the prior
half ). — ( L. 1832 ) T विश्रमेन्; $G_1$ $M_{2.3}$ विश्रा-
( $M_2$ °श्र )मो. — ( L. 1833 ) T $G_1$ च ( for वा ).
— ( L. 1834 ) $G_2$ यत्र ( for तत्र ). — After line
1834, $G_1$ reads line 1837. — ( L. 1835 ) $M_2$ वाह-
येद् ( for °यन् ). $G_3$ निरयं यांति कौरव ( for the post.
half ). — ( L. 1836 ) $G_3$ $M_4$ वाहयेत् ( for पात° ).
T $G_1$ $M_4$ नराधमः ( for °धिप ). — ( L. 1837 ) $G_1$
$M_{2.4}$ भ्रूण- ( for ब्रह्म- ). — ( L. 1838 ) $G_{1.2}$ $M_3$
नरकं; $M_2$ नरकान ( for निरयं ). $T_1$ G $M_4$ [अ]संशयः;
$M_2$ सर्वशः. — ( L. 1839 ) $M_2$ स ( for च ). — ( L.
1843 ) $T_2$ त्वितरे ( for पितरश् ). T तापिताः ( for
वाहिताः ). — ( L. 1844 ) $M_2$ अवध्यातः ( for वध्य-
मानः ). $G_{1.2}$ $M_3$ तु ( for सु- ). — ( L. 1845 )

$G_3$ वाप्रलयं. T $G_3$ नरः ( for नृप ). $M_4$ गच्छे-
दाप्रलयांतरं ( for the post. half ). — ( L. 1847 )
$G_{1.2}$ तेन; $M_2$ तु ते ( by transp. ). $M_2$ चैव ( for
the second ते तु ). $G_{1.2}$ $M_3$ पूज्याश्चैव न संशयः ( for
the post. half ). — ( L. 1748 ) $T_1$ $G_{2.3}$ यथा ( for
यदा ). $T_1$ शांतास् ( for श्रान्तास् ). — ( L. 1850 ) $M_4$
तत्र ( for परि° ). $G_1$ $M_3$ नरकेषूपपच्यंते ( for the post.
half ). $M_2$ वाहना ( for °का ). — ( L. 1852 ) $G_3$ तु
( for ता ). $M_2$ ज्ञेया ( for देया ). — ( L. 1853 ) $G_2$
सोमार्थं; $M_2$ होमार्थे. $G_3$ [अ]पि यज्ञस्य ( for [अ]ग्निहोत्रस्य ).
$M_2$ यः प्रयच्छेत तां नरः ( for the post. half ). — ( L.
1854 ) T श्रांताय नियतात्मने; $G_3$ $M_4$ शांताय च यतात्मने;
$M_2$ प्रशांताय यतात्मने ( for the post. half ). — ( L.
1855 ) $G_{1.2}$ $M_3$ मम ( for सोऽग्नि- ). — ( L. 1856 )
$M_2$ कपिलाया ( for °लाङ्गे ). T $G_3$ $M_4$ कपिलाया ( T °यां )
नरेश्वर ( for the post. half ). — ( L. 1857 ) $G_{1.2}$ $M_3$
सुखं स्वर्गे; Kumbh. ed. स्वर्गलोके ( for नरः स्वर्गे ). $G_{1.2}$
$M_{3.4}$ महीयते ( for च वर्तते ). $M_2$ दाता स्वर्गे युधिष्ठिर ( for
the post. half ). — ( L. 1858 ) T $M_2$ यः ( for च )
and तु ( for यः ). — ( L. 1859 ) $T_1$ विष्णवे ( for विषुवे ).
$M_2$ वा ( for च ). $M_3$ च ( for वा ). $G_2$ भवेत् ( for
लभेत् ). — ( L. 1861 ) $M_2$ सुवर्ण- ( hypermetric ) ( for
स्वर्ण- ). $G_3$ $M_2$ रौप्यखुरां. T $M_{2-4}$ कांस्यदोहनां ( $M_2$
°नीं ). — ( L. 1862 ) T $G_3$ $M_4$ गंध-; $M_2$ पुष्पैर् ( for

तस्मात्सुवर्णाभरणा दातव्या चाग्निहोत्रिणे ।
एवं दत्त्वा तु राजेन्द्र सप्तपूर्वान्परानपि । [ 1865 ]
तारयिष्यति राजेन्द्र नात्र कार्या विचारणा ।
अग्निष्टोमसहस्रस्य वाजपेयसमं भवेत् ।
वाजपेयसहस्रस्य अश्वमेधं च तत्समम् ।
अश्वमेधसहस्रं च राजसूयं च तत्समम् ।
कपिलानां सहस्रेण विधिदत्तेन पाण्डव । [ 1870 ]
राजसूयफलं प्राप्य मम लोके महीयते ।
न तस्य पुनरावृत्तिर्विद्यते कुरुपुंगव ।
प्रयच्छते यः कपिलां सवत्सां कांस्यदोहिनीम् ।
तैस्तैर्गुणैः कामदुघा च भूत्वा
नरं प्रदातारमुपैति सा गौः । [ 1875 ]
स्वकर्मभिश्चाप्यनुबध्यमानं
तीव्रान्धकारे नरके पतन्तम् ।
महार्णवे नौरिव वायुनीता
दत्ता हि गौस्तारयते मनुष्यम् ।
पुत्रांश्च पौत्रांश्च कुलं च सर्व- [ 1880 ]
मासप्तमं तारयते परत्र ।
यावन्मनुष्यान्पृथिवीं बिभर्ति
तावत्प्रदातारमितोऽपरत्र ।
यथौषधं मन्त्रकृतं नरस्य
प्रयुक्तमात्रं विनिहन्ति रोगान् । [ 1885 ]
तथैव दत्ता कपिला सुपात्रे
पापं नरस्याशु निहन्ति सर्वम् ।
यथैव दृष्ट्वा भुजगाः सुपर्णं
नश्यन्ति दूराद्विवशा भयार्ताः ।
तथैव दृष्ट्वा कपिलाप्रदानं [ 1890 ]
नश्यन्ति पापानि नरस्य शीघ्रम् ।
यथा त्वचं स्वां भुजगो विहाय
पुनर्नवं रूपमुपैति पुण्यम् ।
तथैव मुक्तः पुरुषः स्वपापै-
र्विराजते वै कपिलाप्रदानात् । [ 1895 ]
यथान्धकारं भवने विलग्नं
दीप्तो हि निर्यातयति प्रदीपः ।
तथा नरः पापमपि प्रलीनं
निष्कामयेद्वै कपिलाप्रदानम् ।
यावन्ति रोमाणि भवन्ति तस्या [ 1900 ]
वत्सान्वितायाश्च शरीरजानि ।
तावत्प्रदाता युगवर्षकोटिं
स ब्रह्मलोके रमते मनुष्यः ।
यस्याहिताग्नेरतिथिप्रियस्य

---

गन्धैर् ). $M_2$ पूजिताः ( for शोभिताम् ). — ( L. 1864 ) $G_{1.2}$ $M_3$ साग्नि- ; $M_2$ ह्याग्नि- ( for चाग्नि- ). — ( L. 1867 ) T -सहस्रं च ; $M_2$ °स्रं तु ( for °स्रस्य ). $G_3$ om. ( hapl. ) the post. half and the prior half of line 1868. $M_2$ वाजपेयं च तत्समं. — ( L. 1868 ) $T_1$ $G_{1.2}$ $M_3$ -सहस्रं च ( for °स्रस्य ). $T_1$ राजसूयं ; $T_2$ ह्यश्वमेधं ; $M_2$ [अ]प्यश्वमेधश् ( for अश्वमेधं ). — $T_1$ om. lines 1869–1870, and $G_2$ reads the same after line 1871. — ( L. 1869 ) $G_3$ $M_4$ -सहस्रस्य ( for °स्रं च ). — ( L. 1873 ) T सचेलां कांस्यदोहनां. — For line 1873, $G_3$ $M_{2.4}$ subst. :

प्रयच्छते यः कपिलां सवत्सां
कांस्योपदोहां कनकाग्रशृङ्गीम् ।

[ ( L. 1 ) $G_3$ प्रयच्छति. — ( L. 2 ) $M_4$ सकांस्यदोहां ( for कांस्योप° ). ]

while after line 1873, $G_{1.2}$ $M_2$ ins. :

सुवर्णखुरशृङ्गाङ्गीं सर्वालंकारशोभिताम् ।

— ( L. 1874 ) $G_2$ कामदुहा ( for °दुघा ). T $M_4$ हि ; $G_3$ [अ]भि- ( for च ). — ( L. 1876 ) $M_2$ यत् ( for स्व- ). $M_4$ [अ]थ ( for [अ]नु- ). — ( L. 1877 ) T $G_1$ महांधकारे ( for तीव्रान्ध° ). $G_1$ नरकं. — ( L. 1881 ) $G_1$ $M_4$ आ सप्तमात्. Kumbh. ed. and Madras ed. मनुष्यं ( for परत्र ). — ( L. 1883 ) $G_3$ $M_{2.4}$ प्रदातारमते ( for °मितो ). $G_{1.2}$ तावत्प्रदातारमृतं परत्र. — ( L. 1884 ) $T_2$ $G_3$ मात्रकृतं ( for मन्त्र° ). — ( L. 1885 ) $G_3$ विनिहत्य. $M_2$ रोगं. — ( L. 1886 ) $G_3$ दाने ( for दत्ता ). — ( L. 1887 ) $G_{1.3}$ निरस्य ( for न° ). $G_3$ [अ]पि ( for [आ]शु ). $M_2$ विहत्य सर्वा ( sic ); $M_4$ विहंति सर्वं. — ( L. 1890 ) $G_1$ कपिलाप्रदानान्. — ( L. 1892 ) $G_1$ $M_3$ वै ( for स्वां ). — ( L. 1894 ) $G_2$ स ( for स्व- ). — ( L. 1895 ) $T_1$ विराजिते ; $G_1$ विरज्यते ; $G_2$ विमुच्यते. $M_2$ -प्रतांतान् ( sic ) ( for -प्रदानात् ). — ( L. 1896 ) $G_1$ $M_2$ यदा ( for यथा ). T $G_3$ $M_4$ नयनेषु म( $G_3$ $M_4$ ल )ग्नं. — ( L. 1897 ) T $G_3$ $M_{2.4}$ दीपो. $G_{1.2}$ $M_3$ निर्यासयति ; $M_2$ विवासयितुं ( for निर्यातयति ). $T_1$ प्रदीप्त्या ; $G_3$ प्रदीप्तः ; $M_2$ समर्थः ( for प्रदीपः ). — ( L. 1898 ) T $G_3$ $M_{2.4}$ नरे ( for नरः ). — ( L. 1899 ) T $G_3$ $M_4$ निर्यातयेद् ; $M_2$ निर्वासयद् ( for निष्कामयेद् ). $M_2$ -प्रदानात्. — ( L. 1901 ) $M_2$ वर्णान्वितायाश् ( for वत्सा° ). — ( L. 1902 ) $G_3$ $M_{3.4}$

शूद्रान्नदूरस्य जितेन्द्रियस्य । [ 1905 ]
सत्यव्रतस्याध्ययनान्वितस्य
दत्ता हि गौस्तारयते परत्र ।

### Colophon.

वैशंपायन उवाच ।

एवं श्रुत्वा परं पुण्यं कपिलादानमुत्तमम् ।
धर्मपुत्रः प्रहृष्टात्मा केशवं पुनरब्रवीत् ।
देवदेवेश कपिला यदा विप्राय दीयते । [ 1910 ]
कथं सर्वेषु चाङ्गेषु तस्यास्तिष्ठन्ति देवताः ।
याश्चैताः कपिलाः प्रोक्ता दश चैव त्वया मम ।
तासां कति सुरश्रेष्ठ कपिलाः पुण्यलक्षणाः ।
कथं वानुगृहीतास्ताः सुरैः पितृगणैरपि ।
केन युक्ताश्च वर्णेन श्रोतुं कौतूहलं हि मे । [ 1915 ]
युधिष्ठिरेणैवमुक्तः केशवः सत्यवाक्तदा ।
गुह्यानां परमं गुह्यं वक्तुमेवोपचक्रमे ।
शृणु राजन्पवित्रं वै रहस्यं धर्ममुत्तमम् ।
ग्रहणीयं सत्यमिदं न श्राव्यं हेतुवादिनाम् ।
यदा वत्सस्य पादौ द्वौ प्रसवे शिरसा सह । [ 1920 ]
दृश्येते दानकालं तमाहुः कालविदो जनाः ।
अन्तरिक्षगतो वत्सो यावद्भूमिं न यास्यति ।
गौस्तावत्पृथिवी ज्ञेया तस्माद्देया तु तादृशी ।
यावन्ति धेन्वा रोमाणि सवत्साया युधिष्ठिर ।
यावन्त्यः सिकताश्चापि गर्भोदकपरिप्लुताः । [ 1925 ]
तावद्वर्षसहस्राणि दाता स्वर्गे महीयते ।
सुवर्णाभरणां कृत्वा सवत्सां कपिलां तिलैः ।
प्रच्छाद्य तां तु दद्याद्वै सर्वरत्नैरलंकृताम् ।
ससमुद्रा मही तेन सशैलवनकानना ।
चतुरन्ता भवेद्दत्ता नात्र कार्या विचारणा । [ 1930 ]
पृथिवीदानतुल्येन तेन दानेन मानवः ।
संसारसागरात्तीर्णो याति लोकं प्रजापतेः ।
ब्रह्महा यदि वा गोघ्नो भ्रूणहा गुरुतल्पगः ।
महापातकयुक्तोऽपि दानेनानेन शुध्यति ।
इदं पठति यः पुण्यं कपिलादानमुत्तमम् । [ 1935 ]
प्रातरुत्थाय मद्भक्त्या तस्य पुण्यफलं शृणु ।
मनसा कर्मणा वाचा मतिपूर्वं युधिष्ठिर ।
पापं रात्रिकृतं हन्यादस्याध्यायस्य पाठकः ।
इदमावर्तमानस्तु श्राद्धे यस्तर्पयेद्द्विजान् ।
तस्याप्यमृतमश्नन्ति पितरोऽत्यन्तहर्षिताः । [ 1940 ]
यश्चेदं शृणुयाद्भक्त्या मद्गतेनान्तरात्मना ।

---

युत- ( for युग- ). $M_2$ -वीर- ( for -वर्ष- ). $G_3$ $M_4$ -कोटीः
( for -कोटिं ). —( L. 1904 ) $M_2$ यदि ( for यस्य ).
—( L. 1905 ) $G_1$ $M_3$ ( *sup. lin.* ) श्राद्धान्न- ( for
शूद्रान्न- ). — Colophon. — *Sub-parvan* : T $M_{2.4}$
वैष्णवधर्म. — *Adhy. name* : $G_{1.2}$ $M_3$ कपिलाप्रशंसा ; $M_2$
कपिलादानशास्त्रे कपिलाप्रशंसा. — *Adhy. no.* : $T_1$ 93 ;
$T_2$ $M_4$ 102 ; $G_{1.2}$ 92 ; $G_3$ 103 ; $M_2$ 9 ; $M_3$
91. —( L. 1909 ) $M_2$ वाक्यम् ( for पुनर् ). —( L.
1910 ) $T_1$ $G_1$ यथा ( for यदा ). —( L. 1911 ) $T_2$
$M_4$ ( *sup. lin.* ) तथा ; $G_3$ $M_4$ तदा ( for कथं ). —( L.
1912 ) $M_2$ या ( for च ). $T_2$ $G_3$ $M_4$ देव ; $M_2$ नाम
( for चैव ). —( L. 1913 ) $T_2$ $G_3$ तत्र ; $M_4$ गार्ति (sic)
( for कति ). —( L. 1914 ) $G_1$ $M_{2.3}$ तु ; $M_4$ च
( for ताः ). —( L. 1915 ) $M_2$ [अ]पि ( for च ).
— Before line 1917, MSS. ins. भगवानुवाच. —( L.
1917 ) T तद्वक्तुं च ( for वक्तुमेव ). —( L. 1918 ) T
$G_3$ प्रवक्ष्यामि ( for पवित्रं वै ). T पवित्रं ( for रहस्यं ).
$G_3$ $M_4$ गुह्यम् ( for धर्मम् ). —( L. 1919 ) $G_3$ गोपनीयं
सत्यविदा ( for the prior half ). $G_{1.2}$ $M_3$ -वादिभिः
( for -वादिनाम् ). —( L. 1920 ) T $M_4$ यथा ( for
यदा ). —( L. 1921 ) T G $M_4$ दृश्यते. $M_2$ दान- ( for
काल- ). $G_{1,2}$ $M_3$ तमाहुर्मुनिसत्तमाः ( for the post. half ).
—( L. 1922 ) $M_2$ अंतरिक्षे. —( L. 1923 ) $T_2$ $G_3$ तत्पुण्यं
चापि तादृशं ( for the post. half ). —( L. 1924 ) T
तस्यां ; $G_3$ तानि ; $M_{2-4}$ धेनु- ( $M_4$ °नो ) ( for धेन्वा ).
$T_1$ सवत्सायां ; $M_2$ °त्सं वा ( for °त्साया ). —( L. 1927 )
$T_1$ $G_1$ $M_2$ सुवर्णाभरणं. $G_3$ सद्गुणां ( for कपिलां ). $G_3$
$M_{2.4}$ तु यः ( for तिलैः ). —( L. 1928 ) T $G_3$ प्रच्छाद्य
( $G_3$ कपिलां ) यदि तां दद्यात् ; $M_{2.4}$ तिलैः प्रच्छाद्य तां ( $M_2$
तिलप्रच्छादितां ) दद्यात ( for the prior half ). T वस्त्र-
( for सर्व- ). $M_2$ सर्वरत्नविभूषितां ( for the post.
half ). —( L. 1929 ) $G_{1.2}$ $M_{2.3}$ नदी ( for मही ).
T $G_3$ $M_2$ सशैलद्वीपपत्तना ( $G_3$ °ट्टणा ) ( for the post.
half ). —( L. 1930 ) $M_2$ चतुरंतां. $M_2$ पृथिवीं नात्र
संशयः ( for the post. half ). —( L. 1931 ) $M_2$
माधव ( sic ) ( for मानवः ). —( L. 1932 ) T $G_3$
संसारसागरं तीर्त्वा. —( L. 1933 ) $M_2$ मातृहा ( for भ्रूणहा ).
—( L. 1934 ) T वा ( for ऽपि ). $M_2$ दृश्यति (sic) ( for
शुध्यति ). —( L. 1936 ) $M_2$ भक्तस् ( for भक्त्या ).
—( L. 1937 ) $G_3$ वापि ( for वाचा ). —( L. 1938 )
$G_3$ पाठतः. T $G_1$ अध्यायस्यास्य ( $G_1$ °स्य तु ) पाठकः.
—( L. 1940 ) T $G_3$ हि ( for [अ]पि ). $G_{1.2}$ $M_3$
[ऽ]श्नंति ( for ऽत्यन्त- ). —( L. 1942 ) $M_4$ पापं सर्वम् ( by
transp. ). $G_3$ $M_{2.4}$ व्यपोहति ( for प्रणश्यति ). —( L.

तस्य रात्रिकृतं सर्वं पापमाशु प्रणश्यति ।
अतः परं विशेषं तु कपिलानां ब्रवीमि ते ।
याश्चैताः कपिलाः प्रोक्ता दश राजन्मया तव ।
तासां चतस्रः प्रवराः पवित्राः पापनाशनाः । [ 1945 ]
सुवर्णकपिला पुण्या तथा रक्ताक्षिपिङ्गला ।
पिङ्गलाक्षी च या गौश्च यद्वा पिङ्गलपिङ्गला ।
एताश्चतस्रः प्रवराः पुण्याः पापप्रणाशनाः ।
नमस्कृता वा स्पृष्टा वा घ्नन्ति पापं नरस्य तु ।
यस्यैताः कपिलाः सन्ति गृहे पापप्रणाशनाः । [ 1950 ]
तत्र श्रीर्विजयः कीर्तिः स्थिता नित्यं युधिष्ठिर ।
एतासां प्रीतिमायाति क्षीरेण तु वृषध्वजः ।
दध्ना तु त्रिदशाः सर्वे घृतेन तु हुताशनः ।
पितरः पितामहाश्चैव तथैव प्रपितामहाः ।
सकृद्दत्तेन तुष्यन्ति वर्षकोटिं युधिष्ठिर । [ 1955 ]
कपिलाया घृतं क्षीरं दधि पायसमेव वा ।
श्रोत्रियेभ्यः सकृद्दत्त्वा सर्वपापैः प्रमुच्यते ।
उपवासं तु यत्कृत्वा अहोरात्रं जितेन्द्रियः ।
कपिलापञ्चगव्यं तु पीत्वा चान्द्रायणात्परम् ।
सौम्ये मुहूर्ते तत्प्राश्य शुद्धात्मा शुद्धमानसः । [ 1960 ]
क्रोधानृतविनिर्मुक्तो मद्गतेनान्तरात्मना ।
कपिलापञ्चगव्येन समन्त्रेण पृथक्पृथक् ।
यो मत्प्रतिकृतिं वापि शंकराकृतिमेव वा ।
स्नापयेद्द्विपुवे यस्तु सोऽश्वमेधफलं लभेत् ।
स मुक्तपापः शुद्धात्मा यानेनाम्बरशोभिना । [ 1965 ]
मम लोकं व्रजेन्मर्त्यो रुद्रलोकमथापि वा ।
ब्रह्मणा तु पुरा सृष्टा कपिला काञ्चनप्रभा ।
अग्निकुण्डात्परैर्मन्त्रैर्होमधेनुर्महाप्रभा ।
सृष्टमात्रां तु तां दृष्ट्वा देवा रुद्रादयो दिवि ।
सिद्धा ब्रह्मर्षयश्चैव वेदाः साङ्गाः सहाध्वराः । [ 1970 ]
सागराः सरितश्चापि पर्वताः सवलाहकाः ।
गन्धर्वाप्सरसो यक्षाः पन्नगाश्चाप्युपस्थिताः ।
सर्वे विस्मयमापन्नाः शिखिमध्ये महाप्रभाम् ।
मन्त्रैश्च विविधैः सर्वैस्तुष्टुवुस्तामनेकशः ।
कृताञ्जलिपुटाः सर्वे ताम्रशृङ्गीं त्रिलोचनाम् । [ 1975 ]
शिरोभिः पतिता भूमौ सवत्सामम‍ृतारणिम् ।
ऊचुः प्राञ्जलयः सर्वे चतुर्वक्त्रं पितामहम् ।
आज्ञापय महादेव किं ते कर्म प्रियं विभो ।
एवमुक्तः सुरैः सर्वैर्ब्रह्मा वचनमब्रवीत् ।

---

1943 ) $G_3$ ततः ( for अतः ), and कपिलाया ( for °लानां ). — ( L. 1944 ) $M_4$ पूर्वं ( for राजन् ). — ( L. 1945 ) $G_1$ om. ( hapl. ) from the post. half up to the prior half of line 1948. $G_2$ $M_3$ पुण्याः पापप्रणाशनाः ( for the post. half ). — ( L. 1946 ) $M_2$ रत्नाक्षि- ( for रक्ताक्षि- ). Some MSS. -पिंगळा. — ( L. 1947 ) $T_2$ $G_3$ $M_2$ गौरी ( for गौश्च ). $M_4$ पिंगाक्षी च यथा गौश्च ( for the prior half ). $M_4$ या च ( for यद्वा ). T $G_3$ या चापि मुखपिंगला ( for the post. half ). — ( L. 1948 ) T $G_3$ ताः प्रोक्ताः ( for प्रवराः ). $T_1$ -प्रणाशकाः. $G_2$ $M_3$ पवित्राः पापनाशनाः ( for the post. half ). — ( L. 1949 ) $G_{1.2}$ $M_3$ दृष्टा ( for स्पृष्टा ). $G_3$ नमस्यतां ( for नरस्य तु ). — ( L. 1950 ) T तस्य; $M_2$ याश्च ( for यस्य ). $T_1$ -प्रणाशकाः ( for °शनाः ). — ( L. 1951 ) $M_4$ तस्य ( for तत्र ). $M_4$ स्थिरा; Kumbh. ed. स्फीता ( for स्थिता ). — ( L. 1952 ) $G_{1.2}$ देवः सं- ( for एतासां ). $G_3$ प्रियम् ( for प्रीतिम् ). $G_3$ वृषभ- ( for तु वृष- ). — ( L. 1953 ) $G_{1.2}$ $M_{3.4}$ च ( for the first तु ). $G_2$ $M_{2-4}$ च ( for the second तु ). — ( L. 1956 ) $G_2$ $M_{2.4}$ कापिलानां. $M_4$ च ( for वा ). — ( L. 1657 ) $G_1$, $M_{2-4}$ नरः ( for सर्व- ). — ( L. 1958 ) $G_3$ कुर्याद् ( for कृत्वा ). $G_2$ $M_{2.4}$ [अ]प्यहोरात्रं; $M_3$ ह्यहो° ( for अहो° ). — ( L. 1959 ) $T_2$ च ( for तु ). T $G_3$ पिबेच्च् ( for पीत्वा ). $T_1$ चांद्रायणं चरेत्; $M_{2.3}$ ( *sup. lin.* ) °णं भवेत् ( for °णात्परम् ). — ( L. 1960 ) T $G_3$ हृष्ट- ( for शुद्ध- ). — ( L. 1963 ) T $G_{1.2}$ प्रीतिकृतं ( for प्रतिकृतिं ). $G_3$ च ( for the first वा ). — ( L. 1964 ) $M_2$ भक्त्या ( for यस्तु ). $T_1$ भवेत् ( for लभेत् ). — ( L. 1965 ) T $G_3$ $M_{2.4}$ पूतात्मा ( for शुद्धात्मा ). — ( L. 1966 ) $G_2$ विशेन् ( for व्रजेन् ). $G_{1.2}$ $M_{3.4}$ मुक्तो ( for मर्त्यो ). — ( L. 1968 ) $T_1$ $G_{1.3}$ $M_4$ होमधेनुं महाप्रभां. — ( L. 1969 ) $M_2$ दिशि ( for दिवि ). — ( L. 1970 ) $G_{1.2}$ $M_3$ सहाध्वरैः. — ( L. 1971 ) $G_2$ $M_{2-4}$ चैव ( for चापि ). — ( L. 1972 ) $G_3$ $M_3$( *sup. lin.* ).$_4$ पर्वताश् ( for पन्नगाश् ). — ( L. 1973 ) $G_1$ महाप्रभाः. — ( L. 1974 ) $G_1$ $M_3$ तां तु; $G_2$ सर्वास् ( for सर्वैस् ). $M_2$ मंत्रैः स्तोत्रैश्च विविधैस् ( for the prior half ). — ( L. 1975 ) T $G_3$ संतस् ( for सर्वे ). T त्रिशृंगीं तां; $G_1$ नातिशृंगीं; $G_2$ $M_2$ तां त्रिशृंगीं ( for ताम्रशृङ्गीं ). — ( L. 1976 ) $M_2$ प्रणता ( for पतिता ). $G_{1.2}$ $M_3$ मूर्ध्ना प्रणम्य तां भूमौ ( for the prior half ). $G_2$ $M_{2-4}$ अमृतारणीं. — After line 1977, $M_2$ ins. :

किमिदं देवदेवेश सर्वलोकपितामह ।

— ( L. 1978 ) $G_{1.2}$ $M_3$ ते कुर्मः; $M_2$ कुर्मस्ते ( for ते कर्म ). $M_2$ प्रभो ( for विभो ). — ( L. 1980 ) $M_2$ हि

भवन्तोऽप्यनुगृह्णन्तु दोग्ध्रीमेनां पयस्विनीम् । [ 1980 ]
होमधेनुरियं ज्ञेया ह्यग्निं संतर्पयिष्यति ।
ततोऽग्निस्तर्पितः सर्वान्भवतस्तर्पयिष्यति ।
प्रीताः क्षीरामृतेनास्या जातवीर्यपराक्रमाः ।
जयिष्यथ यथाकामं दानवान्सर्व एव तु ।
जातवीर्यबलैश्वर्याः सत्त्ववन्तो जितारयः । [ 1985 ]
असंख्येयबलाः सर्वे पालयिष्यथ वै प्रजाः ।
पालिताश्च प्रजाः सर्वा भवद्भिरिह धर्मतः ।
पूजयिष्यन्ति वो नित्यं यज्ञैर्विविधदक्षिणैः ।
एवमुक्ताः सुराः सर्वे ब्रह्मणा परमेष्ठिना ।
ततः संहृष्टमनसः कपिलायै वरं ददुः । [ 1990 ]
यस्माल्लोकहितायाद्य ब्रह्मणा त्वं विनिर्मिता ।
तस्मात्पूता पवित्रा च भव पापव्यपोहिनी ।
ये त्वां दृष्ट्वा नमस्यन्ति स्पृष्ट्वा चापि करैर्नराः ।
तेषां वर्षकृतं पापं त्वद्भक्तानां प्रणश्यति ।
अकामकृतमज्ञातमदृष्टं यच्च पातकम् । [ 1995 ]
त्वां दृष्ट्वा ये नमस्यन्ति नराः सर्वंसहेति च ।
तेषां तद्विलयं याति तमः सूर्योदये यथा ।
इत्युक्त्वास्यै वरं दत्त्वा प्रययुस्ते यथागतम् ।
लोकनिस्तारणार्थाय सा च लोकांश्चचार ह ।

तस्यामेव समुद्भूता ह्येताश्च कपिलानघ । [ 2000 ]
विचरन्ति महीमेनां लोकानुग्रहकारणात् ।
तस्मात्तु कपिला देया परत्र हितमिच्छता ।
यथा च दीयते राजन्कपिला ह्यग्निहोत्रिणे ।
तथाग्रशृङ्गयोस्तस्या विष्णुरिन्द्रश्च तिष्ठतः ।
चन्द्रवज्रधरौ चापि तिष्ठतः शृङ्गमूलयोः । [ 2005 ]
शृङ्गमध्ये तथा ब्रह्मा ललाटे गोवृषध्वजः ।
कर्णयोरश्विनौ देवौ चक्षुषोः शशिभास्करौ ।
दन्तेषु मरुतो देवा जिह्वायां वाक्सरस्वती ।
रोमान्ते मुनयः सर्वे चर्मण्येव प्रजापतिः ।
निश्वासेषु स्थिता वेदाः सषडङ्गपदक्रमाः । [ 2010 ]
नासापुटे स्थिता गन्धाः पुष्पाणि सुरभीणि च ।
अधरे वसवः सर्वे मुखे चाग्निः प्रतिष्ठितः ।
साध्या देवाः स्थिताः कक्षे ग्रीवायां पार्वती स्थिता ।
पृष्ठे च नक्षत्रगणाः ककुद्देशे नभःस्थलम् ।
अपाने सर्वतीर्थानि गोमूत्रे जाह्नवी स्वयम् । [ 2015 ]
इष्टतुष्टमयी लक्ष्मीर्गोमये वसते सदा ।
नासिकायां तदा देवी ज्येष्ठा वसति भामिनी ।
श्रोणीतटस्थाः पितरो रमा लाङ्गूलमाश्रिताः ।
पार्श्वयोरुभयोः सर्वे विश्वे देवाः प्रतिष्ठिताः ।

---

( for ऽपि ). $M_4$ दोग्ध्रीमेतां यशस्विनीं ( for the post. half ). — ( L. 1981 ) T $G_3$ जज्ञे ; $M_4$ यज्ञे ( for ज्ञेया ). $T_1$ $G_{1.2}$ ह्यग्नीन्. — ( L. 1982 ) $G_1$ $M_3$ अतो ( for ततो ). — ( L. 1983 ) T $G_{2.3}$ पीताः ( for प्रीताः ). — ( 1985 ) $G_{1.2}$ $M_3$ -बलैर्युक्ताः ( for °श्वर्याः ). $M_4$ सत्यवंतो. $G_{1.2}$ $M_3$ जितेंद्रियाः ( for जितारयः ). — ( L. 1986 ) T $G_3$ $M_4$ अदे( $M_4$ °दै )वमातृकाः सर्वास् ( for the prior half ). T तर्पयिष्यथ; $G_3$ $M_4$ तार° ( for पाल° ). — ( L. 1987 ) T इति; $G_3$ $M_4$ इव ( for इह ). — ( L. 1988 ) $T_2$ $G_{1.2}$ $M_{2.3}$ या ( for वो ). $G_3$ पूजयिष्यति सा नित्यं. — ( L. 1990 ) $M_2$ प्र- ( for सं- ). $G_1$ $M_3$ कपिलाया. $T_2$ ददौ. — Before line 1991, $T_1$ $G_1$ M ins. देवाः; $G_2$ देवता; $G_3$ देवी. — (L. 1992) T त्वं हि ( for पूता ). $G_3$ मम ( for भव ). $T_2$ $M_{2.4}$ -व्यपोहनी. — ( L. 1993 ) $G_1$ $M_3$ तुष्टा ( for दृष्ट्वा ). T $G_3$ $M_{2.4}$ स्पृशंति च ( for स्पृष्ट्वा चापि ). — ( L. 1995 ) $M_2$ पापकं. — $G_1$ $M_3$ read line 1996 twice. — (L. 1996) $G_3$ तां ( for त्वां ). $G_1$ $M_3$ ( both first time ) तु ( for ये ). $G_1$ $M_3$ ( both second time ) ये त्वां तुष्टां नमस्यंति ( for the prior half ). $T_1$ सर्वे- ( for सर्व- ). $G_3$ नराः सर्वे स्तुवंति च ( for the post. half ). — Before line 1998, MSS. ins. श्रीभगवान्. — ( L. 1999 ) $G_3$ $M_4$ लोके ( for लोक- ). T $G_{1.3}$ -निस्तरणार्थाय; $M_2$ -निस्तारणार्थं तु. $G_3$ $M_4$ निर्मिता ब्रह्मणा प्रभो ( for the post. half ). — ( L. 2000 ) $G_3$ एवं. T $G_3$ शेषाश्; $M_4$ ज्येष्ठाश् ( for ह्येताश् ). $G_1$ नव ( for [अ]नघ ). — ( L. 2002 ) $M_2$ इच्छतां. — ( L. 2003 ) $G_{1.3}$ $M_4$ यदा ( for यथा ). $G_3$ $M_4$ कपिला ( for दीयते ). $G_3$ $M_4$ दीयते ( for कपिला ). — ( L. 2004 ) $T_1$ $G_3$ $M_4$ तदा ( for तथा ). $G_{1.2}$ $M_3$ च; $M_4$ तु ( for [अ]ग्र- ). $G_1$ $M_{2.3}$ तस्य. $G_{1.2}$ $M_4$ तिष्ठति. — ( L. 2005 ) T -पाश- ( for -वज्र- ). $M_4$ वा ( for च ). $G_3$ चक्रवज्रे च काशेय ( for the prior half ). — ( L. 2006 ) T वृषभ- ( for गोवृष- ). — ( L. 2007 T $G_{1.2}$ $M_3$ अश्विनी-. $G_2$ $M_{2.3}$ चक्षुषी-. — ( L. 2008 ) $M_2$ तु; $M_4$ च ( for वाक्- ). — ( L. 2009 ) $G_{1.2}$ $M_3$ रोमकूपेषु मुनयश् ( for the prior half ). — ( L. 2010 ) $T_1$ षडंगपदविक्रमाः. — ( L. 2013 ) $T_1$ $G_{1.3}$ $M_4$ कक्ष्ये; $G_2$ कुक्षौ ( for कक्षे ). — ( L. 2014 ) T $M_3$ ( *sup. lin.* ).$_4$ नभस्थितं; $M_{2.3}$ यमः स्थितः ( for नभ स्थलम् ). — $M_2$ om. lines 2016–2017. — ( L. 2016 ) T अष्टैश्वर्यमयी लक्ष्मीर् ( for the prior half ). $G_{1.3}$ वसती ( sic ). $G_1$ तदा ( for सदा ). — ( L. 2018 ) $T_2$ $G_{1.2}$ $M_3$ रामा; $G_3$ रोम-; $M_4$ उमा ( for रमा ). — ( L.

तिष्ठत्युरसि तासां तु प्रीतः शक्तिधरो गुहः । [ 2020 ]
जानुजङ्घोरुदेशेषु पञ्च तिष्ठन्ति वायवः ।
खुरमध्येषु गन्धर्वाः खुराग्रेषु च पन्नगाः ।
चत्वारः सागराः पूर्णास्तस्या एव पयोधराः ।
रतिर्मेधा क्षमा स्वाहा श्रद्धा शान्तिर्धृतिः स्मृतिः ।
कीर्तिर्दीप्तिः क्रिया कान्तिस्तुष्टिः पुष्टिश्च संततिः ।[2025]
दिशश्च विदिशश्चैव सेवन्ते कपिलां सदा ।
देवाः पितृगणाश्चापि गन्धर्वाप्सरसां गणाः ।
लोका द्वीपार्णवाश्चैव गङ्गाद्याः सरितस्तथा ।
ग्रहाः पितृगणाश्चापि वेदाः साङ्गाः सहाध्वरैः ।
वेदोक्तैर्विविधैर्मन्त्रैः स्तुवन्ति हृषितास्तथा । [ 2030 ]
विद्याधराश्च ये सिद्धा भूतास्तारागणास्तथा ।
पुष्पवृष्टिं च वर्षन्ति प्रनृत्यन्ति च हर्षिताः ।
ब्रह्मणोत्पादिता देवी वह्निकुण्डान्महाप्रभा ।
नमस्ते कपिले पुण्ये सर्वदेवैर्नमस्कृते ।
कपिलेऽथ महासत्त्वे सर्वतीर्थमये शुभे । [ 2035 ]
दातारं स्वजनोपेतं ब्रह्मलोकं नय स्वयम् ।
अहो रत्नमिदं पुण्यं सर्वदुःखघ्नमुत्तमम् ।
अहो धर्मार्जितं शुद्धमिदमर्घ्यं महाधनम् ।
इत्याकाशे स्थिता देवा जल्पन्ति च नमन्ति च ।
तस्याः प्रतिगृहीता च भुङ्क्ते यावद्द्विजोत्तमः । [ 2040 ]
तावद्देवगणाः सर्वे कपिलामर्चयन्ति च ।
स्वर्णशृङ्गी रौप्यखुरा गन्धैः पुष्पैश्च पूजिता ।
वस्त्राभ्यामहताभ्यां तु यावत्तिष्ठत्यलंकृता ।
तावद्यदिच्छेत्कपिला मन्त्रपूता सुसंस्कृता ।
भूलोकवासिनः सर्वान्ब्रह्मलोकं नयेत्स्वयम् । [ 2045 ]
भूरश्वः कनकं गावो रौप्यमन्नं तिला यवाः ।
दीयमानानि विप्राय प्रहृष्यन्ति दिने दिने ।
अथ त्वश्रोत्रियेभ्यो वै तानि दत्तानि पाण्डव ।
तथा निन्दन्त्यथात्मानमशुभं किं नु नः कृतम् ।
अहो रक्षःपिशाचैश्च लुप्यमानाः समन्ततः । [ 2050 ]
यास्यामो निरयं शीघ्रमिति शोचन्ति तानि वै ।
एतान्यपि द्विजेभ्यो वै श्रोत्रियेभ्यो विशेषतः ।
दीयमानानि वर्धन्ते दातारं तारयन्ति च ।

युधिष्ठिर उवाच ।

देवदेवेश दैत्यघ्न कालः को हव्यकव्ययोः ।
के तत्र पूजामर्हन्ति वर्जनीयाश्च के द्विजाः । [ 2055 ]

---

2019 ) T समाश्रिताः ( for प्रतिष्ठिताः ). — ( L. 2020 ) $G_2$ $M_2$ तस्यास् ( for तासां ). $G_2$ शितः ( for प्रीतः ). $G_3$ [ऽ]नघ ; $M_4$ गुरुः ( for गुहः ). — ( L. 2023 ) $G_3$ तस्याम्. — ( L. 2024 ) $T_2$ धृतिर् ( for रतिर् ). $M_2$ स्वधा ( for क्षमा ). T धृतिर्मतिः ; $G_3$ $M_2$ स्मृतिर्धृतिः ( by transp. ). — ( L. 2025 ) $T_1$ श्रिया ( for क्रिया ). $G_3$ $M_4$ शांतिस् ( for कान्तिस् ). $G_2$ $M_3$ पुष्टिस्तुष्टिश् ( by transp. ). T समुन्नतिः ( for च संततिः ). — ( L. 2026 ) $G_{1,2}$ $M_3$ प्र- ( for वि- ). — $G_3$ $M_2$ read line 2027 twice. — ( L. 2027 ) T $G_3$ ( first time ) चैव ( for चापि ). $M_4$ गणैः. $T_1$ सेवंते कपिलां सदा ( for the post. half ). — ( L 2028 ) $M_2$ लोक- ( for लोका ) and चारि ( for चैव ). $T_1$ om. the post. half and the prior half of line 2029. $T_2$ गंधर्वाः ( for गङ्गाद्याः ). — ( L. 2029 ) $T_2$ देवाः ( for ग्रहाः ). $T_2$ $G_{2,3}$ चैव ( for चापि ). $M_4$ ( *inf. lin.* ) देवाः ( for वेदाः ). $G_2$ $M_3$ तथा ( for सह ). — ( L. 2030 ) $M_4$ धर्मैः ( for मन्त्रैः ). T $G_1$ सदा ( for तथा ). $M_2$ स्तुवंतो हर्षितास्तथा. — ( L. 2031 ) T येपि स्वर्लोकवासिनः ( for the post. half ). — ( L. 2032 ) $M_2$ प्रमुंचंति ( for च वर्षन्ति ). — ( L. 2033 ) $M_4$ देवि. $M_2$ ब्राह्मणोत्पादिते देवि. $T_2$ $G_3$ $M_{2,4}$ -प्रभे ; Madras ed. -प्रभो ( for -प्रभा ). — ( L. 2034 ) T $G_3$ देवि ( for पुण्ये ). T $G_3$ $M_2$ -देव- ( for -देवैर् ). — ( L. 2035 ) $M_2$ त्वं ( for ऽथ ). — ( L. 2036 ) T नयस्व मां ; $G_2$ नयस्व तां ( sic ) ( for नय स्वयम् ). — Before line 2039, T ins. भगवान्. — ( L. 2039 ) $G_1$ $M_{2,3}$ इत्याकाश- ; $M_4$ शुद्धाकाशे. $G_{1,2}$ $M_{2,3}$ ते तु ( for देवा ). $G_{1,2}$ $M_3$ स( $G_2$ पू )र्वदेवा जपंति च ( for the post. half ). — ( L. 2040 ) T $M_3$ द्विजोत्तमाः. — ( L. 2041 ) $G_3$ $M_4$ ये ; $M_2$ वै ( for च ). — ( L. 2042 ) $M_2$ सुवर्णशृंगी ( hypermetric ) ( for स्वर्ण° ). $G_1$ $M_{2,3}$ रूप्यखुरा. $M_3$ पूजितां. T $G_{1,3}$ गंधपुष्पैरलंकृता ( for the post. half ). — ( L. 2043 ) $G_3$ $M_4$ अहिताभ्यां ( sic ) ( for अह° ). — ( L. 2044 ) T ईप्सेत् ( for इच्छेत् ). $G_3$ $M_4$ स्वलंकृता ( for सुसंस्कृता ). — ( L. 2045 ) $M_2$ ब्रह्मलोके. G $M_{2,3}$ नय ( for नयेत् ). — ( L. 2046 ) $G_3$ रूप्यं ; $M_4$ रूपम् ( for रौप्यम् ). $G_3$ रूपं ( for अन्नं ). — ( L. 2048 ) T वा ( for तु ). $M_2$ corrupt ; $M_4$ अथ त्वश्रोत्रिये यस्तु ( for the prior half ). $M_4$ दद्याद्दानानि पांडव. — ( L. 2049 ) $G_3$ अशुभात् ( for °भं ). — ( L. 2050 ) $G_2$ अथो ( for अहो ). — ( L. 2051 ) $M_2$ विलयं ( for निरयं ). — ( L. 2052 ) T एतान्यथ ; $M_2$ तथैतानि ( for एतान्यपि ). — ( L. 2053 ) T $G_3$ $M_4$ हृष्यंति ( $G_3$ $M_4$ °ते ) ( for वर्धन्ते ). — ( L. 2054 ) $G_2$ भव्य- ( sic ) ( for हव्य- ). ( L. 2056 ) $G_1$ देवाः ( for दैवं ). $T_1$ पूर्वाह्णिकं ( for

भगवानुवाच ।

दैवं पूर्वाह्णिकं ज्ञेयं पैतृकं चापराह्णिकम् ।
कालहीनं च यद्दानं तद्दानं राक्षसं विदुः ।
अवघुष्टं च यद्भुक्तमनृतेन च भारत ।
परामृष्टं शुना वापि तद्भागं राक्षसं विदुः ।
यावन्तः पतिता विप्रा जडोन्मत्तादयोऽपि च । [2060]
दैवे च पित्र्ये ये चापि राजन्नार्हन्ति सत्क्रियाम् ।
क्लीबः प्लीही च कुष्ठी च राजयक्ष्मान्वितश्च यः ।
अपस्मारी च यश्चापि पित्र्ये नार्हति सत्क्रियाम् ।
चिकित्सका देवलका वृथा नियमधारिणः ।
सोमविक्रयिणश्चापि श्राद्धे नार्हन्ति सत्कृतिम् । [ 2065 ]
एकोद्दिष्टस्य ये चान्नं भुञ्जते विधिवद्द्विजाः ।
चान्द्रायणमकृत्वा ते पुनर्नार्हन्ति सत्कृतिम् ।
गायका नर्तकाश्चैव प्लवका वादकास्तथा ।
कथका यौधिकाश्चैव श्राद्धे नार्हन्ति सत्कृतिम् ।
अनग्नयश्च ये विप्राः प्रेतनिर्यातकाश्च ये । [ 2070 ]
स्तेनाश्चापि विकर्मस्था राजन्नार्हन्ति सत्कृतिम् ।
अपरिज्ञातपूर्वाश्च गणपुत्राश्च ये द्विजाः ।
पुत्रिकापुत्रकाश्चापि श्राद्धे नार्हन्ति सत्कृतिम् ।
ऋणकर्ता च यो विप्रो यश्च वाणिज्यको द्विजः ।
प्राणिविक्रयवृत्तिश्च श्राद्धे नार्हन्ति सत्कृतिम् । [ 2075 ]
चीर्णव्रता गुणैर्युक्ता नित्यं स्वाध्यायतत्पराः ।
सावित्रीज्ञाः क्रियावन्तस्ते श्राद्धे सत्कृतिक्षमाः ।
श्राद्धस्य ब्राह्मणः कालः प्राप्तो दधि घृतं तदा ।
दर्भाः सुमनसः क्षेत्रं तत्काले श्राद्धदो भवेत् ।
चारित्रनियता राजन्कृशा ये कृशवृत्तयः । [ 2080 ]
अर्थिनश्चोपगच्छन्ति तेभ्यो दत्तं महत्फलम् ।
तपस्विनश्च ये विप्रास्तथा भैक्षचराश्च ये ।
अर्थिनः केचिदिच्छन्ति तेषां दत्तं महत्फलम् ।
एवं धर्मविदां श्रेष्ठ ज्ञात्वा सर्वात्मना तदा ।
श्रोत्रियाय दरिद्राय प्रयच्छानुपकारिणे । [ 2085 ]
दानं यत्ते प्रियं किंचिच्छ्रोत्रियाणां च यत्प्रियम् ।

---

पूर्वाह्णिकं ). $M_2$ कर्म ( for ज्ञेयं ). — ( L. 2057 ) $T_1$ om. च. $M_4$ राजसं ( for राक्षसं ). — ( L. 2058 ) T $G_2$ अपघुष्टं; Madras ed. अवदृष्टं. $G_2$ भक्तम् ( for भुक्तम् ). $M_2$ अन्नतेन ( for अनृ° ). — ( L. 2059 ) $G_3$ $M_4$ चापि; $M_2$ लीढं ( for वापि ). $G_{1.2}$ $M_{2.3}$ दानं ( for भागं ). — (L. 2060) $M_4$ अदांताः ( for यावन्तः ). $M_2$ यावंत्त्वपमिता विप्रा ( for the prior half ). — ( L. 2061 ) $M_2$ वा; $M_4$ तु ( for the first च ). $T_1$ $G_{1.3}$ पित्रिये ( for पित्र्ये ये ). $M_{2.4}$ om. ये. $G_2$ ये राजन्; $M_2$ ये वापि; Madras ed. ते विप्रा ( for ये चापि ). $T_2$ दैवे च पितृकार्ये च ( for the prior half ). $G_2$ हीना ( for राजन् ). $M_2$ सत्कृतिं ( for सत्क्रियाम् ). — After line 2061, $M_2$ ins. :

खादितश्चावलीढश्च कलिपूर्वं च यत्कृतम् ।
रजसा वाभिमृष्टं च तद्दानं राक्षसं विदुः ।

— $G_3$ om. ( hapl. ) lines 2062–2063. — ( L. 2062 ) $M_4$ ( *inf. lin.* as above ) यश्चापि ( for कुष्ठी च ). $T_2$ तथा ( for च यः ). — ( L. 2063 ) $T_2$ ये ( for यश् ). $M_2$ ( *inf. lin.* as above ).3 [ अं ]धः ( for [ अ ]पि ). $M_4$ राजन् ( for पित्र्ये ). $G_{1.2}$ $M_4$ नार्हति. $G_1$ $M_{2.3}$ सत्कृतिं. — ( L. 2064 ) $M_2$ चिकित्सको देवलको. $G_1$ $M_3$ मिथ्या ( for वृथा ). T -कारिणः ( for -धारिणः ). $M_4$ वृथा ये नामधारिणः. — ( L. 2065 ) T सात्क्रियां. — $G_2$ om. line 2066; $T_2$ reads the same after line 2069. — ( L. 2066 ) $T_1$ एकोद्दिष्टं च; $G_3$ $M_4$ °ष्टे च ( for °ष्टस्य ). $M_4$ तु ( for च ). $M_3$ भुंजंते. $M_4$ विधिवर्जिताः ( for °द्विजाः ). — T $G_2$ om. line 2067. — ( L. 2068 ) $M_4$ ये च ( for चैव ). $G_1$ $M_3$ गायको नर्तकश्चैव. $M_2$ प्लाविका; $M_3$ प्लुवगा. — $G_3$ om. ( hapl. ) lines 2069–2073. — ( L. 2069 ) $G_2$ क्रयिका ( for कथका ). $T_2$ $G_2$ $M_4$ यौधकाश्. T सत्क्रियां ( for सत्कृतिम् ). — $G_2$ om. line 2070. — ( L. 2070 ) $T_2$ $G_1$ $M_3$ व्रत-; $M_2$ मृत- ( for प्रेत- ). $M_4$ व्रतनिर्घातकाश्च ये. — $M_4$ om. ( hapl. ) lines 2072–2075. — ( L. 2072 ) $T_1$ $G_1$ ऋण- ( for गण- ). $M_2$ and Madras ed. गण( $M_2$ °णि )-पुत्रश्च यो द्विजः. — ( L. 2073 ) T $M_2$ ( *sup. lin.* ) -पुत्रकश् ( for °काश् ). $M_2$ पुत्रिकापूर्वपुत्राश्च ( for the prior half ). Madras ed. सत्क्रियां. — $M_2$ om. ( hapl. ) lines 2074–2075. — ( L. 2074 ) Kumbh. ed. and Madras ed. रणकर्ता ( for ऋण° ). — ( L. 2075 ) T -विक्रयकृच्चैव ( for °वृत्तिश्च ). — ( L. 2076 ) $T_1$ $G_2$ चीर्णव्रत-. $M_{2.4}$ नित्य-. — ( L. 2077 ) $M_3$ श्राद्धे सत्कृतिकाः क्षमाः ( for the post. half ). — ( L. 2078 ) Madras ed. काल- ( for कालः ). $G_1$ श्राद्धस्य ब्राह्मणाः कालाः. $T_1$ $M_{2.3}$ प्राप्तं. — ( L. 2079 ) $G_1$ om. श्राद्धदो. — ( L. 2080 ) $T_2$ चारित्रे. $G_{1.2}$ $M_3$ -निरता; $G_3$ -नियतो. — ( L. 2082 ) $M_{2.4}$ युक्तास्च ( for विप्रास् ). $G_1$ -परायणाः; $G_2$ $M_3$ -पराश्च ये ( for -चरा° ). — ( L. 2083 ) $M_2$ किंचिद् ( for के° ). $M_2$ महा- ( for महत् ). — ( L. 2084 ) Kumbh. ed. -भृतां ( for -विदां ). $T_1$ श्रेष्ठान्; °$G_2$ श्रेष्ठं. T $G_3$ $M_4$ सदा ( for तदा ). — ( L. 2085 ) $G_3$ प्रयत्नानुपकारिणे. — ( L. 2086 ) T $G_2$ श्रोत्रियाय ( for °याणां ). $G_3$ $M_4$ फलं ( for

तत्प्रयच्छस्व धर्मज्ञ यदिच्छसि तदक्षयम् ।
निरयं ये च गच्छन्ति तच्छृणुष्व युधिष्ठिर ।
गुर्वर्थं वा भयार्थं वा नो चेदन्यत्र पाण्डव ।
वदन्ति येऽनृतं विप्रास्ते वै निरयगामिनः । [ 2090 ]
परदाराभिहर्तारः परदाराभिमर्शकाः ।
परदारप्रयोक्तारस्ते वै निरयगामिनः ।
सूचकाः संधिभेत्तारः परद्रव्योपजीविनः ।
अकृतज्ञाश्च मित्राणां ते वै निरयगामिनः ।
वर्णाश्रमाणां ये बाह्याः पाषण्डस्थाश्च पाण्डव । [2095]
उपासते च तान्ये तु ते सर्वे नरकालयाः ।
वेदविक्रयिणश्चैव वेदानां चैव दूषकाः ।
वेदानां लेखकाश्चैव ते वै निरयगामिनः ।
रसविक्रयिणो राजन्विषविक्रयिणश्च ये ।
क्षीरविक्रयिणश्चापि ते वै निरयगामिनः । [ 2100 ]
चण्डालेभ्यस्तु ये क्षीरं प्रयच्छन्ति नराधमाः ।
अर्थार्थमथ वा स्नेहात्ते वै निरयगामिनः ।
पशूनां दमकाश्चैव तथा नासानुवेधकाः ।
पुंस्त्वस्य हिंसकाश्चैव ते वै निरयगामिनः ।
अदातारः समर्था ये द्रव्याणां लोभकारणात् । [ 2105 ]
दीनानाथान्न पश्यन्ति ते वै निरयगामिनः ।
क्षान्तान्दान्तान्कृशान्प्राज्ञान्दीर्घकालं सदोषितान् ।
त्यजन्ति कृतकृत्या ये ते वै निरयगामिनः ।
बालानामथ वृद्धानां श्रान्तानां चापि ये नराः ।
अदत्त्वाश्नन्ति ये मृष्टं ते वै निरयगामिनः । [ 2110 ]
एते पूर्वर्षिभिः प्रोक्ता नरा निरयगामिनः ।
ये स्वर्गं समनुप्राप्तास्ताञ्शृणुष्व युधिष्ठिर ।
दानेन तपसा चैव सत्येन च दमेन च ।
ये धर्ममनुवर्तन्ते ते नराः स्वर्गगामिनः ।
शुश्रूषयाप्युपाध्यायाच्छ्रुतमादाय पाण्डव । [ 2115 ]
ये प्रतिग्रहनिःस्नेहास्ते नराः स्वर्गगामिनः ।
मधुमांसासवेभ्यस्तु निवृत्ता व्रतवत्तु ये ।
परदारनिवृत्ताश्च ते नराः स्वर्गगामिनः ।
मातरं पितरं चैव शुश्रूषन्ति च ये नराः ।
भ्रातॄणामपि सस्नेहास्ते नराः स्वर्गगामिनः । [ 2120 ]

---

प्रियम् ). — ( L. 2087 ) $T_{1}$ $M_{4}$ यदि ( for यद् ). T $G_{3}$ $M_{4}$ महत्फलं ( for तदक्षयम् ). — ( L. 2088 ) T तु ( for च ) and तान् ( for तत् ). — ( L. 2089 ) $T_{1}$ $G_{3}$ $M_{4}$ corrupt ; $T_{2}$ तवार्थं ( for भयार्थं ). $M_{4}$ न ( for नो ). — ( L. 2090 ) $G_{3}$ उपासते च तान्ये तु ( for the prior half ). — ( L. 2091 ) $G_{3}$ $M_{4}$ परदारापहर्तारः ( for the prior half ). — After line 2091, $M_{2}$ ins. :

अनाथामप्रदां बालां वृद्धां क्षीणां तपस्विनीम् ।
वञ्चयन्ति नरा ये च ते वै निरयगामिनः ।

—( L. 2094 ) $G_{3}$ $M_{4}$ विप्राणां ; $M_{2}$ विप्रा वै ( for मित्राणां ). — $M_{2}$ om. lines 2095–2096. — ( L. 2095 ) $G_{1.2}$ $M_{3}$ पापंडाश्चैव पापिनः ( for the post. half ). — ( L. 2096 ) T उपासिताश् ( for °सते ). $G_{1}$ $M_{3}$ एव ( for ये तु ). $G_{2}$ छिन्नं ( for सर्वे ). T $G_{3}$ ते वै निरयगामिनः ( for the post. half ). —( L. 2097 ) $M_{4}$ चापि ( for the second चैव ). — ( L. 2098 ) $T_{1}$ लेखिताश् ; $T_{2}$ $G_{3}$ लेखिनश् ( for लेखकाश् ). $G_{3}$ चापि ( for चैव ). $M_{4}$ वेदावलेपिनश्चापि ( for the prior half ). $M_{2}$ सर्वे ( for ते वै ). — $M_{2}$ om. ( hapl. ) lines 2099–2104. — ( L. 2099 ) $G_{3}$ मेष- ( for विष- ). — ( L. 2103 ) $M_{4}$ नाभ्यनु- ( for नासानु- ). — ( L. 2104 ) $G_{1.2}$ $M_{3}$ पुंस्त्वहिंस( Kumbh. ed. and Madras ed. °सा )कराश्चैव ( for the prior half ). — ( L. 2105 ) $M_{2}$ आदातारः ( for अ° ) and द्रव्याढ्यं ( for °णां ). — ( L. 2106 ) $M_{4}$ दीनानंधान् ( for °नाथान् ). — After line 2106, $M_{2}$ ins. :

ब्राह्मणानां गवां चैव कन्यानां च युधिष्ठिर ।
येऽन्तरं यान्ति कार्येषु ते वै निरयगामिनः ।
उपाध्यायांश्च भृत्यांश्च भ्रातृंश्च भरतर्षभ ।
ये त्यजन्ति सभार्यांश्च ते वै निरयगामिनः ।

—( L. 2107 ) $M_{4}$ दांतान्क्षांतान् ( by transp. ). $T_{1}$ om. कृशान्. Madras ed. -काल- ( for -कालं ). —( L. 2108 ) T वै ( for ये ). —( L. 2109 ) $M_{4}$ चैव ; Madras ed. अपि ( for अथ ). $M_{2}$ चैव ( for चापि ). — ( L. 2110 ) $G_{2}$ damaged. $G_{1}$ $M_{3}$ मृष्टान्नं ; $M_{2}$ ते लोके ( for ये मृष्टं ). — $M_{1}$ om. ( hapl. ) lines 2111–2116. — ( L. 2111 ) $G_{1}$ ये पूर्वमृषिभिः प्रोक्ता ; $G_{2}$ ** च ऋषिभिः प्रोक्ता ( for the prior half ). $G_{2}$ om. नरा. — ( L. 2112 ) T उपभुंजंति ; $G_{3}$ *समासाद्य ; $M_{2.3}$ तु नरा यांति ( for समनुप्राप्तास् ). —( L. 2115 ) $G_{2}$ damaged. T $G_{3}$ शुश्रूषाभिरुपाध्यायात् ; $M_{2.3}$ शुश्रूषुरप्यु° ( for the prior half ). — After line 2116, $M_{2}$ ins. :

प्रतिपादा[पन्नः] स दाता च श्रद्धयाश्रद्धयापि वा ।
दातारश्चापि विद्यानां ते नराः स्वर्गगामिनः ।
क्षमावन्तश्च धीराश्च धर्मकार्येषु प्रार्थिताः ।
मङ्गलाचारयुक्ताश्च ते नराः स्वर्गगामिनः ।

— ( L. 2117 ) $T_{1}$ वृत्तपूर्वया ; $T_{2}$ वृत्तपूर्तये ; $G_{3}$ वृत्तवंतये ; $M_{4}$ व्रतिनश्च ये ( for व्रतवत्तु ये ). — ( L. 2118 ) $G_{1}$ $M_{3}$ ये ( for च ). — ( L. 2121 ) $T_{1}$ $M_{2.4}$ -कालेषु

ये तु भोजनकाले तु नियताश्चातिथिप्रियाः ।
द्वाररोधं न कुर्वन्ति ते नराः स्वर्गगामिनः ।
वैवाहिकं तु कन्यानां दरिद्राणां च ये नराः ।
कारयन्ति च कुर्वन्ति ते नराः स्वर्गगामिनः ।
रसानामथ बीजानामोषधीनां तथैव च ।
दातारः श्रद्धयोपेतास्ते नराः स्वर्गगामिनः ।
क्षेमाक्षेमं च मार्गेषु समानि विषमाणि च ।
अर्थिनां ये च वक्ष्यन्ति ते नराः स्वर्गगामिनः ।
पर्वद्वये चतुर्दश्यामष्टम्यां संध्ययोर्द्वयोः ।
आर्द्रायां जन्मनक्षत्रे विषुवे श्रवणे तथा ।
ये ग्राम्यधर्मविरतास्ते नराः स्वर्गगामिनः ।
हव्यकव्यविधानं च नरकस्वर्गगामिनौ ।
धर्माधर्मौ च कथितौ भूयः किं श्रोतुमिच्छसि ।

Colophon.

युधिष्ठिर उवाच ।

इदं मे तत्त्वतो देव वक्तुमर्हस्यशेषतः ।
हिंसामकृत्वा यो मर्त्यो ब्रह्महत्यामवाप्नुयात् ।

भगवानुवाच ।

ब्राह्मणं स्वयमाहूय भिक्षार्थं कृशवृत्तिनम् ।
ब्रूयान्नास्तीति यः पश्चात्तमाहुर्ब्रह्मघातकम् ।
मध्यस्थस्येह विप्रस्य योऽनूचानस्य भारत ।
वृत्तिं हरति दुर्बुद्धिस्तमाहुर्ब्रह्मघातकम् ।
गोकुलस्य तृषार्तस्य जलान्ते वसुधाधिप ।
उत्पादयति यो विघ्नं तमाहुर्ब्रह्मघातकम् ।
यः प्रवृत्तां श्रुतिं सत्यां शास्त्रं वा मुनिभिः कृतम् ।
दूषयत्यनभिज्ञो यस्तं विद्याद्ब्रह्मघातकम् ।
आश्रमे वा वने वापि ग्रामे वा नगरेऽपि वा ।
अग्निं यः प्रक्षिपेत्क्रुद्धस्तमाहुर्ब्रह्मघातकम् ।
चक्षुषा वापि हीनस्य पङ्गोर्वापि जडस्य च ।
हरेद्वै यस्तु सर्वस्वं तं विद्याद्ब्रह्मघातकम् ।
क्रोधाद्वा यदि वा द्वेषादाकुष्टस्तर्जितोऽपि वा ।
ऋतौ स्त्रियं वा नोपेयात्तमाहुर्ब्रह्मघातकम् ।

---

( for -काले तु ). Madras ed. निर्यातास्. — ( L. 2123 ) $G_3$ $M_{2.4}$ तु ( for च ). — After line 2124, $M_2$ ins. :

तापसानां तु ये दाने ये त्वशक्ता नरेश्वर ।
धर्मोपदेशं कुर्वन्ति ते नराः स्वर्गगामिनः ।
दानानामुपदेशं च तपसो नियमस्य च ।
व्रतानामपि ये कुर्युस्ते नराः स्वर्गगामिनः ।
ये च मार्गोपदेष्टारस्तथा संक्रमकारिणः ।
मार्गशुद्धिकरा ये च ते नराः स्वर्गगामिनः ।
सायं प्रातः सदा संध्यां नित्यं ये चाप्युपासते ।

— $M_2$ om. (hapl.) lines 2125–2131. — ( L. 2127 ) $G_{1.2}$ $M_3$ क्षोभं क्षे( $G_2$ °भक्षे )मं ( for क्षेमाक्षेमं ). — $G_3$ om. ( ? hapl. ) lines 2128–2131. — ( L. 2128 ) $M_3$ अंधानां ये ; $M_4$ येतिथिनां ( for अर्थिनां ये ). — $M_4$ om. lines 2129–2132. — ( L. 2130 ) Madras ed. [ ऽ ]थ वा ( for तथा ). — ( L. 2131 ) T $G_1$ -निरतास् ( for -वि° ). — ( L. 2132 ) $G_3$ -निदानं ( for -विधानं ). $G_{2.3}$ -गामिनः ( for °नौ ). — ( L. 2133 ) $G_{1.2}$ $M_{2.3}$ श्रोतुं किम् ( by transp. ). — Colophon. — *Sub-parvan :* $T_2$ $G_2$ $M_{2.4}$ वैष्णवधर्म. — *Adhy. name :* $M_2$ सर्वधर्मविधिः. — *Adhy. no. :* $T_1$ 94 ; $T_2$ $M_4$ 103 ; $G_{1.2}$ 93 ; $G_3$ 104 ; $M_2$ 10 ; $M_3$ 92. — ( L. 2136 ) $T_1$ आगम्य ( for आहूय ). $G_3$ दीक्षार्थं ; $M_2$ भिक्षुकं ( for भिक्षार्थं ). $G_{1.2}$ $M_3$ भिक्षार्थं वृत्तिकर्षितं ( for the post. half ). — ( L. 2137 ) $M_2$ विद्याद् ( for आहुर् ). — ( L. 2138 ) $T_1$ $G_2$ दरिद्रस्य ( for मध्यस्थस्य ). — ( L. 2139 ) $M_2$ विद्याद् ( for आहुर् ). — After line 2139, $G_{1.2}$ $M_3$ read lines 2144–2145. — ( L. 2140 ) T $G_3$ जलार्थमभिधावतः ( for the post. half ). — ( L. 2141 ) T विघ्नं करोति यो मर्त्यस् ( for the prior half ). $M_2$ विद्याद् ( for आहुर् ). — $M_4$ om. (hapl.) lines 2142–2145. — ( L. 2142 ) $G_2$ damaged. $G_1$ $M_3$ प्रवृत्ता वा श्रुतिः सम्यक् ; $M_2$ यः प्रवृत्तं श्रुतं सम्यक्. $T_1$ तां ( for वा ). — ( L. 2143 ) T [अ]विधेयोज्ञस् ; Madras ed. [अ]नभिज्ञाय ( for °ज्ञो यस् ). $M_2$ दूषयेत्परमार्थं वा ( for the prior half ). T $G_3$ आहुर् ( for विद्याद् ). — $M_2$ transp. lines 2144 and 2145. — ( L. 2144 ) $G_2$ च ( for वा ). $G_{1.2}$ $M_3$ [आ]लये ( for वने ). $M_2$ ग्रामेषु ( for ग्रामे वा ). — ( L. 2145 ) $M_2$ विद्याद् ( for आहुर् ). — ( L. 2146 ) $M_2$ विप्र- ( for वापि ). T $G_3$ मत्तस्य च ; $G_{1.2}$ पंकोर्वापि ; $M_2$ संकुलस्य ; $M_4$ मूकस्य च ( for पङ्गोर्वापि ). Some MSS. जळस्य. $M_2$ वा ( for च ). — ( L. 2147 ) T आहुर् ( for विद्याद् ). — After line 2147, $G_{1.2}$ $M_3$ ins. :

गुरुं त्वंकृत्य हुंकृत्य अतिक्रम्य च शासनम् ।
वर्तते यस्तु मूढात्मा तमाहुर्ब्रह्मघातकम् ।

— ( L. 2148 ) $M_2$ आक्रुष्टं ( for °ष्टस् ). — After line 2148, $M_2$ ins. :

यावत्सारो भवेद्धीरस्तन्नाशे यस्य दुःस्थितिः । [ 2150 ]
तत्सर्वस्वं हरेद्यो वै तमाहुर्ब्रह्मघातकम् ।

युधिष्ठिर उवाच ।

सर्वेषामपि दानानां यत्तु दानं विशिष्यते ।
अभोज्यान्नाश्च ये विप्रास्तान्ब्रवीहि सुरोत्तम ।

भगवानुवाच ।

अन्नमेव प्रशंसन्ति देवा ब्रह्मपुरःसराः ।
अन्नेन सदृशं दानं न भूतं न भविष्यति । [ 2155 ]
अन्नमूर्जस्करं लोके अन्नात्प्राणाः प्रतिष्ठिताः ।
अभोज्यान्नानिमान्राजन्वक्ष्यमाणान्निबोध मे ।
दीक्षितस्य कदर्यस्य बद्धस्य निकृतस्य च ।
अभिशस्तस्य षण्डस्य पाकभेदकरस्य च ।
चिकित्सकस्य सर्वस्य तथा चोच्छिष्टभोजिनः । [ 2160 ]
उग्रान्नं सूतकान्नं च शूद्रोच्छेषणमेव च ।
द्विषदन्नं न भोक्तव्यं पतितान्नं च यच्छ्रुतम् ।
तथा च पिशुनस्यान्नं यज्ञविक्रयिणस्तथा ।
शैलूषतन्तुवायान्नं कृतघ्नस्यान्नमेव च ।
अम्बष्ठस्य निषादस्य रङ्गावतरकस्य च । [ 2165 ]
सुवर्णकर्तुर्वैणस्य शस्त्रविक्रयिणस्तथा ।
सूतानां शौण्डिकानां च वैद्यस्य रजकस्य च ।
स्त्रीजितस्य नृशंसस्य तथा माहिषिकस्य च ।
अनिर्दशानां प्रेतानां गणिकानां तथैव च ।
वन्दिनो द्यूतकर्तुश्च तथा द्यूतविदामपि । [ 2170 ]
परिवित्तस्य यच्चान्नं परिवेत्तुस्तथैव च ।
यश्चाग्रदिधिषुर्विप्रो दिधिषूपपतिस्तथा ।
तयोरप्युभयोरन्नं राज्ञश्चापि विवर्जयेत् ।
राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ।
आयुः सुवर्णकारान्नं यशश्चर्मावकृन्तिनः । [ 2175 ]
गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति ।
आयुश्चिकित्सकस्यान्नं शुक्लं तु वृषलीपतेः ।
विष्ठा वार्धुषिकस्यान्नं तस्मात्तत्परिवर्जयेत् ।
तेषां त्वगस्थिरोमाणि भुङ्क्ते योऽन्नं तु भक्षयेत् ।
अमात्यान्नमथैतेषां भुक्त्वा तु त्रियहं क्षिपेत् । [ 2180 ]

---

मातरं पितरं वापि तथादत्तभयं सुतम् ।
त्यजेच्च तरुणीं भार्यां तं विद्याद्ब्रह्मघातकम् ।

— ( L. 2149 ) $M_2$ च ( for वा ). $G_1$ $M_{2-4}$ विद्याद् ( for आहुर् ). — $G_3$ $M_2$ om. ( hapl. ) lines 2150–2151. — ( L. 2150 ) $M_3$ विघ्नं ( sic ); $M_4$ दीनस् ( for धीरस् ). $M_3$ नाशयेद् ( for तन्नाशे ). $M_4$ दुःस्थितः. — ( L. 2151 ) $M_{3.4}$ विद्याद् ( for आहुर् ). — ( L. 2152 ) $G_3$ $M_{2.4}$ एव ( for अपि ). — ( L. 2153 ) $M_2$ अभोज्यान्नं च विप्राणां ( for the prior half ). $M_2$ तन्मे ब्रूहि ( for तान्ब्रवीहि ). $G_3$ नरोत्तम ( for सुरो° ). — ( L. 2154 ) $G_3$ देवा ब्रह्मर्षयः सुराः ( for the post. half ). — ( L. 2156 ) Kumbh. ed. and Madras ed. ह्यन्नात् $M_3$ ( *sup. lin.* as above ) अन्नं. — ( L. 2157 ) $G_{1.2}$ $M_3$ मया ( for इमान् ). $M_2$ सर्वान् ( for राजन् ). $G_1$ $M_3$ निबोधत. — ( L. 2158 ) $G_{1.2}$ $M_2$ ( also as above ).$_3$ क्रुद्धस्य ( for ब° ). T $G_3$ $M_4$ निगळेन तु ( for निकृतस्य च ). $M_2$ तु ( for च ). — ( L. 2159 ) $G_{1.2}$ $M_3$ अभिशप्तस्य ( for °शस्तस्य ). $G_2$ दंडस्य ( for षण्डस्य ). $M_2$ -भेदतरस्य ( for °करस्य ). $G_1$ तु ( for च ). — ( L. 2160 ) $G_2$ damaged. $G_1$ $M_{3.4}$ दूतस्य ( for सर्वस्य ). — $G_3$ om. from the post. half of line 2161 up to the prior half of line 2166. $G_1$ om. ( hapl. ) lines 2162-2164. — ( L. 2162 ) T नटस्यान्नं; $M_2$ न गह्यान्नं ( for न भोक्तव्यं ). $T_2$ om. च. $T_1$ यदश्रुतं; $M_{2.3}$ अनर्चितं ( for च यच्छ्रुतम् ). — $M_2$ om. ( hapl. ) lines 2164–2166. — ( L. 2165 ) $G_1$ $M_3$ अंबष्ठकनिषादाभ्यां ( for the prior half ). T रंगावतरणस्य च ( for the post. half ). — ( L. 2166 ) T $G_3$ शास्त्र- ( for शस्त्र- ). — ( L. 2167 ) $G_{1.2}$ $M_3$ शौडकानां. T $G_3$ $M_4$ चेलनिर्णेजकस्य च; $M_2$ वेलनिन्नयकस्य च ( for the post. half ). — ( L. 2169 ) $G_3$ अनिर्दिशानां. $M_2$ अनिर्दशान्नं प्रेतान्नं ( for the prior half ). $M_2$ गणिकान्नं. — ( L. 2170 ) $G_3$ वंदिनां. T वंदिनां दू( $T_2$ द्य )तकर्तृणां ( for the prior half ). — ( L. 2171 ) $G_2$ $M_4$ -वित्तेश्च ( for -वित्तस्य ). — ( L. 2172 ) T $M_2$ [अ]ग्रे ( for [अ]ग्र- ). — ( L. 2173 ) $M_2$ अत्र ( for अन्नं ). $G_1$ $M_3$ राज्ञां; $M_2$ अन्नं ( for राज्ञश् ). — After line 2173, $M_{2.3}$ ins. :

गोळकस्य च कुण्डस्य राजान्नं चापि वर्जयेत् ।

— ( L. 2175 ) $M_2$ तेजश् ( for यशश् ). $M_2$ om. from र्मावकृन्तिनः up to लोकेभ्यः in line 2176. — ( L. 2176 ) $G_3$ गणिकानां. $G_{1.2}$ $M_3$ -कीर्तितं ( for -कृन्तति ). — ( L. 2177 ) $G_2$ पूयं; $G_3$ $M_2$ पूयश्; $M_4$ मूत्रं ( for आयुश् ). $G_1$ च; $M_2$ तं; $M_3$ तत् ( for तु ). — ( L. 2178 ) $G_2$ damaged T विद्या ( for विष्ठा ). $M_2$ विष्ठां वार्ध्युशिकायान्नं ( for the prior half ). T तान्; $G_3$ तु ( for तत् ). $M_2$ पातयेत्कुंडगोळयोः ( for the post. half ). — ( L. 2179 ) $T_1$ येषां ( for तेषां ). — ( L. 2180 ) $M_2$ तथा ( for अथ ). $G_3$ अमत्यान्नं च वै

मत्या भुक्त्वा सकृद्वापि प्राजापत्यं चरेद्द्विजः ।
दानानां च फलं यद्वै शृणु पाण्डव तत्त्वतः ।
जलदस्तृप्तिमाप्नोति सुखमक्षयमन्नदः ।
तिलदस्तु प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ।
भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः । [ 2185 ]
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ।
वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ।
अनडुहः श्रियं जुष्टां गोदश्च ब्रध्नविष्टपम् ।
यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः ।
धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसाम्यताम् । [2190]
सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते ।
हिरण्यभूगवाश्वाजवस्त्रशय्यासनादिषु ।
योऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव च ।
तावुभौ गच्छतः स्वर्गं नरकं च विपर्यये ।
अनृतं न वदेदिष्ट्वा तपस्तप्त्वा न विस्मयेत् । [ 2195 ]
नार्तोऽप्यपवदेद्विप्रान्न दत्त्वा परिकीर्तयेत् ।
यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात् ।
आयुर्विप्रापवादेन दानं तु परिकीर्तनात् ।
एकः प्रजायते जन्तुरेक एव प्रमीयते ।
एकोऽनुभुङ्क्ते सुकृतमेकश्चाप्नोति दुष्कृतम् । [ 2200 ]
मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुवर्तते ।
अनागतानि कार्याणि कर्तुं गणयते मनः ।
शरीरकं समुद्दिश्य स्मयते नूनमन्तकः ।
तस्माद्धर्मसहायोऽस्तु धर्मं संचिनुयात्सदा । [ 2205 ]
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ।
येषां तटाकानि बहूदकानि
सभाश्च कूपाश्च प्रतिश्रयाश्च ।
अन्नप्रदानं मधुरा च वाणी
यमस्य ते निर्विषया भवन्ति । [ 2210 ]

Colophon.

युधिष्ठिर उवाच ।

अनेकान्तं बहुद्वारं धर्ममाहुर्मनीषिणः ।
किंलक्षणोऽसौ भवति तन्मे ब्रूहि जनार्दन ।

भगवानुवाच ।

शृणु राजन्समासेन धर्मशौचविधिक्रमम् ।
अहिंसा सत्यमस्तेयमानृशंस्यं दमः शमः ।

---

तेषां ; $M_4$ अमात्यान्नमतस्तेषां ( for the prior half ). T $M_4$ त्र्यहं ( submetric ) ( for त्रियहं ). $M_3$ क्षपेत्. $G_2$ भुक्त्वा तूपवसेत्र्यहं ; $M_2$ भुक्त्वा तुद्यमहं क्षिपेत् ; $M_4$ ( *inf. lin.* ) भुक्त्वा तु त्र्यक्षरं जपेत् ( for the post. half ). —( L. 2181 ) $G_1$ भक्त्या ; $G_3$ $M_3$ मर्त्यो ; $M_2$ भुक्त्वा ( for मत्या ). $G_3$ च ( for वा ). — ( L. 2182 ) $M_2$ चान्यत् ( for यद्वै ). $G_3$ -नंदन ( for तत्त्वतः ). —( L. 2183 ) $M_2$ वारिदस् ( for जलदस् ). T G अक्षय्यम्. — After line 2183, $T_1$ reads lines 2188–2189 ; $T_1$ om. lines 2185–2186. — ( L. 2185 ) $M_3$ भूतिम् ( for भूमिम् ). — After line 2185, $T_2$ $G_3$ read lines 2190–2191. — ( L. 2186 ) Some MSS. ग्रहदो ( for गृ° ). —( L. 2187 ) $M_2$ अर्क- ( for अश्वि- ). $T_1$ अश्वदः सूर्यलोकगः ( for the post. half ). — ( L. 2188 ) Madras ed. श्रयं ( for श्रियं ). $G_{1.2}$ $M_3$ गोदो गोलोकमश्नुते ; $G_3$ गोप्रदश्च त्रिविष्टपं ; $M_2$ गोदो ब्रध्नस्य विष्टपं ( for the post. half ). — $T_1$ om. line 2190–2191. — ( L. 2190 ) $G_{1.2}$ -सौम्यतां ( for -साम्यताम् ). — ( L. 2191 ) $G_3$ $M_{2.4}$ तु प्र- ( for एव ). — ( L. 2192 ) $M_4$ -शय्यासनादिव. — ( L. 2193 ) $G_{1.3}$ $M_4$ [ऽ]र्चितः. T $M_4$ वा ( for च ). — ( L. 2194 ) $G_3$ उभौ तु ( for तावुभौ ). $G_3$ $M_{2.4}$ तु ( for च ). — ( L. 2195 ) $G_1$ विद्वांस् ( for इष्ट्वा ). — ( L. 2196 ) $G_2$ $M_3$ [अ]भिभवेद् ( for [अ]पवदेद् ). $M_2$ विप्रं ( for विप्रान् ). — ( L. 2197 ) $M_2$ क्षितवस् ( for the first क्षरति ). — ( L. 2199 ) $M_2$ प्रसूयते ( for प्रजा° ). T $M_2$ प्रलीयते ( for प्रमी° ). — ( L. 2200 ) T $G_3$ हि ( for ऽनु- ). $M_4$ एव च ( for चाप्नोति ). — ( L. 2202 ) Madras ed. -गच्छति ( for -वर्तते ). — ( L. 2203 ) T $G_3$ $M_2$ जनः ; $M_4$ नरः ( for मनः ). — ( L. 2204 ) T समुद्वीक्ष्य ; $M_4$ परं वीक्ष्य ( for समुद्दिश्य ). $G_3$ शरीरकंपमुद्वीक्ष्य ; $M_2$ साशिरःकंपमुद्वीक्ष्य ( for the prior half ). — ( L. 2205 ) $M_4$ धर्मः ( for धर्म- ). $G_2$ $M_3$ तु ; $M_4$ [ऽ]स्ति ( for ऽस्तु ). $G_2$ धर्मान् ( for धर्मं ). T धर्मसंचयवान्सदा ( for the post. half ). — ( L. 2207 ) $M_2$ सभाः प्रपाश्च ( for बहूदकानि ). — ( L. 2208 ) $M_2$ कूपाश्च यूपाश्च ( for सभाश्च कूपाश्च ). $G_{1.2}$ शुभाः प्रपा- ( $G_1$ °भा ग्रहा )श्च ; $M_4$ शुभाः प्रतिश्रयाः ( for प्रतिश्रयाश्च ). —( L. 2210 ) $M_4$ निर्वचना ( for निर्विषया ). — Colophon. — *Sub-parvan* : T G $M_4$ वैष्णवधर्म. — *Adhy. name* : $M_2$ भोज्याभोज्यविधिः. — *Adhy. no.* : $T_1$ 95 ; $T_2$ $G_{1.2}$ 94 ; $G_3$ 105 ; $M_2$ 11 ; $M_3$ 93 ; $M_4$ 104. — ( L. 2211 ) $M_2$ अनेकं तं बहुविधं. — ( L. 2212 ) $M_4$ तं ( for तन् ). $M_2$ सुरेश्वर ( for जनार्दन ). — ( L. 2215 ) $M_2$ नियतं ( for निश्चितं ). $G_1$ $M_3$ निर्मलस्य च लक्षणं ( for the post. half ), — ( L. 2216 ) T $G_1$

आर्जवं चैव राजेन्द्र निश्चितं धर्मलक्षणम् । [ 2215 ]
ब्रह्मचर्यं तपः क्षान्तिर्मधुमांसस्य वर्जनम् ।
मर्यादायां स्थितिश्चैव शमः शौचस्य लक्षणम् ।
बाल्ये विद्यां निषेवेत यौवने दारसंग्रहम् ।
वार्धक्ये मौनमातिष्ठेत्सर्वदा धर्ममाचरेत् ।
ब्राह्मणान्नावमन्येत गुरून्परिवदेन्न च । [ 2220 ]
यतीनामनुकूलः स्यादेष धर्मः सनातनः ।
यतिर्गुरुर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेव गुरुः स्त्रीणां सर्वेषां पार्थिवो गुरुः ।
यद्गृहस्थार्जितं पापं ज्ञानतोऽज्ञानतोऽपि वा ।
निर्दहिष्यति तत्सर्वमेकरात्रोषितो यतिः । [ 2225 ]
दुर्वृत्ता वा सुवृत्ता वा ज्ञानिनोऽज्ञानिनोऽपि वा ।
गृहस्थैर्यतयः पूज्याः परत्र हितकाङ्क्षिभिः ।
एकदण्डी त्रिदण्डी वा शिखण्डी मुण्डितोऽपि वा ।
काषायदण्डधारोऽपि यतिः पूज्यो युधिष्ठिर ।
अपूजितो गृहस्थैर्वा तथा चाप्यवमानितः । [ 2230 ]
यतिर्वाप्यतिथिर्वापि नरके पातयिष्यतः ।
तस्मात्तु यत्नतः पूज्या मद्भक्ता मत्परायणाः ।
मयि संन्यस्तकर्माणः परत्र हितकाङ्क्षिभिः ।
प्रहरेन्न द्विजान्प्राज्ञो गां न हन्यात्कदाचन ।
भ्रूणहत्यासमं चैतदुभयं यो निषेवते । [ 2235 ]
नाग्निं मुखेनोपधमेन्न च पादौ प्रतापयेत् ।
नाधः कुर्यात्कदाचित्तु न पृष्ठं परितापयेत् ।
नान्तरागमनं कुर्यान्न चामेध्यं विनिक्षिपेत् ।
उच्छिष्टो न स्पृशेदग्निमाशौचस्थो न जातुचित् ।
श्वचण्डालादिभिः स्पृष्टो नाङ्गमग्नौ प्रतापयेत् । [ 2240 ]
सर्वदेवमयो वह्निस्तस्माच्छुद्धः सदा स्पृशेत् ।
प्राप्तमूत्रपुरीषस्तु न स्पृशेद्वह्निमात्मवान् ।
यावत्तु धारयेद्वेगं तावदप्रयतो भवेत् ।
पचनाग्निं न गृह्णीयात्परवेश्मनि जातुचित् ।
तेन पक्वेन चान्नेन यत्कर्म कुरुते शुभम् । [ 2245 ]
तच्छुभस्य फलस्यार्धमग्निदस्य भवेन्नृप ।
तस्माच्छुभतरं कर्म प्रकुर्यादविनाशितम् ।
प्रमादाद्यदि वाज्ञानात्तस्य नाशो भविष्यति ।
गृह्णीयात्तु मथित्वा वा श्रोत्रियागारतोऽपि वा ।

युधिष्ठिर उवाच ।

कीदृशाः साधवो विप्राः केभ्यो दत्तं महत्फलम् । [2250]
कीदृशेभ्यो हि दातव्यं तन्मे ब्रूहि जनार्दन ।

भगवानुवाच ।

अक्रोधनाः सत्यपरा धर्मनित्या जितेन्द्रियाः ।

---

मांसवि- ( for -मांसस्य ). —( L. 2217 ) T $G_{1.3}$ स्थितश्. $T_1$ सदा; $G_{1.2}$ $M_{2.3}$ शमं ( for शमः ). —( L. 2218 ) $M_2$ -संग्रहः ( for °हम् ). —(L. 2219) $G_3$ $M_4$ वार्धके; $M_2$ स्थाविर्ये ( for वार्धक्ये ). $M_2$ मोक्षम् ( for मौनम् ). $T_1$ $G_{1.3}$ सर्वथा ( for °दा ). —( L. 2220) $M_2$ सः ( for च ). —$T_1$ om. (hapl.) line 2223. —(L. 2223) $M_4$ ब्राह्मणो ( for पार्थिवो ). —(L. 2225) $G_3$ द्विजः ( for यतिः ). —( L. 2226 ) $G_3$ दुर्वृत्तं वा सुवृत्तं वा. — After the prior half of line 2227, T reads the post. half of line 2232 and the prior half of line 2233. $G_1$ om. line 2228. —( L. 2228 ) Kumbh. ed. शिखी वा; Madras ed. शिखितो ( for शिखण्डी ). $M_2$ शिखी मुंडी तथैव च ( for the post. half ). —( L. 2229 ). $T_1$ -मात्रधारो; $T_2$ -मात्रदंडो; $G_3$ -दंड-मात्रो; $M_{2.4}$ -मात्रसारो ( for -दण्डधारो ). $G_{1.2}$ न संशयः ( for युधिष्ठिर ). —( L. 2231 ) $G_{1.2}$ पातयिष्यति. —(L. 2232) Madras ed. यतयः ( for यत्नतः ). —(L. 2234 ) $G_{1.2}$ $M_3$ विप्रो ( for प्राज्ञो ). —( L. 2235 ) $G_2$ $M_3$ चैव; $M_{2.3}$ ( *inf. lin.* ) पापम् ( for चैतद् ). —( L 2236 ) $M_2$ [अ]ग्निर् (sic) ( for [अ]ग्निं ). —( L 2237 ) $M_2$ न च पृष्ठं प्रतापयेत् ( for the post. half ). — $M_2$ om. ( hapl. ) lines 2238–2240. —( L. 2241 ) $M_4$ सर्ववेदमयो ह्यग्निस् ( for the prior half ). $G_3$ तदा ( for सदा ). $M_{2.3}$ तस्माच्छुद्धकरः स्पृशेत्. —( L. 2242 ) T न स्पृशेद्वह्निगो द्विजान् ( for the post. half ). — $T_2$ om. line 2243. —( L. 2243 ) $M_2$ वारयेद् ( for धार° ). $G_3$ $M_4$ अग्निं ( for वेगं ). $G_3$ $M_4$ तावत्तु प्रयतो भवेत् ( for the post. half ). —( L. 2244 ) $M_4$ पचनाग्नीन्. —( L. 2245 ) $G_{1.2}$ $M_3$ तस्मिन् ( for तेन ). —( L. 2246 ) $M_{2-4}$ फलं च ( for फलस्य ). $G_2$ तत्कर्मणः शुभस्यार्धम् ( for the prior half ). —( L. 2247 ) $T_2$ $G_3$ शुभकरं. $G_{1.2}$ $M_{2.3}$ तस्माद्गृह( $M_2$ °च्चूली )गतं वह्निं ( for the prior half ). $M_2$ अविनाशनं. —( L. 2248 ) $G_3$ भुंजानस् ( for वाज्ञानात् ). —( L. 2249 ) $M_4$ प्रगृह्णात् ( sic ) ( for गृह्णीयात् ). $M_2$ तं ( for तु ). —( L. 2250 ) $M_3$ तेभ्यो. $G_{1.2}$ $M_3$ महा- ( for महत् ). —( L. 2251 ) T $G_3$ कीदृग्भ्यो हि प्रदातव्यं ( for the prior half ). —( L. 2252 ) $G_2$ $M_2$ दमे रताः ( for जितेन्द्रियाः ). —( L. 2253 ) $G_1$ $M_3$ महा- ( for महत् ). —( L. 2254 ) $G_3$ अमानिताः ( for °नः ). $M_2$ अदृष्टार्था ( for दृष्टार्था वि- ). — After line 2254, $T_1$ reads lines 2258–2259. —(L. 2255) $G_1$ महा- ( for महत् ). —$G_3$

तादृशाः साधवो विप्रास्तेभ्यो दत्तं महत्फलम् ।
अमानिनः सर्वसहा दृष्टार्था विजितेन्द्रियाः ।
सर्वभूतहिता मैत्रास्तेभ्यो दत्तं महत्फलम् ।
अलुब्धाः शुचयो वैद्या ह्रीमन्तः सत्यवादिनः ।
स्वधर्मनिरता ये तु तेभ्यो दत्तं महत्फलम् ।
साङ्गांश्च चतुरो वेदान्योऽधीयीत दिने दिने ।
शूद्रान्नं यस्य देहे न तत्पात्रमृषयो विदुः ।
प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च समन्वितः ।
तारयेत्तत्कुलं सर्वमेकोऽपीह युधिष्ठिर ।
गामश्वमन्नं वित्तं वा तद्विधे प्रतिपादयेत् ।
निशम्य च गुणोपेतं ब्राह्मणं साधुसंमतम् ।
दूरादाहृत्य सत्कृत्य तं प्रयत्नेन पूजयेत् ।

युधिष्ठिर उवाच ।

धर्माधर्मविधिर्देव मम भीष्मेण भाषितः ।
भीष्मवाक्यात्सारभूतं वद धर्मं सुरेश्वर ।

भगवानुवाच ।

अन्नेन धार्यते सर्वं जगदेतच्चराचरम् ।
अन्नात्प्रभवति प्राणः प्रत्यक्षं नास्ति संशयः ।
कलत्रं पीडयित्वापि देशे काले च शक्तितः ।
दातव्यं भिक्षवे चान्नमात्मनो भूतिमिच्छता ।
विप्रमध्वपरिश्रान्तं बालं वृद्धमथापि वा ।
अर्चयेद्गुरुवत्प्रीतो गृहस्थो गृहमागतम् ।
क्रोधमुत्पतितं हित्वा सुशीलो वीतमत्सरः ।
अर्चयेदतिथिं प्रीतः परत्र हितभूतये ।
अतिथिं नावमन्येत नानृतां गिरमीरयेत् ।
न पृच्छेद्गोत्रचरणं नाधीतं वा कदाचन ।
चण्डालो वा श्वपाको वा काले यः कश्चिदागतः ।
अन्नेन पूजनीयः स परत्र हितमिच्छता ।
पिधाय तु गृहद्वारं भुङ्क्ते ह्येकः प्रहृष्टवत् ।
स्वर्गद्वारपिधानं वै कृतं तेन युधिष्ठिर ।
पितॄन्देवानृषीन्विप्रानतिथींश्च निराश्रयान् ।
यो नरः प्रीणयत्यन्नैस्तस्य पुण्यफलं महत् ।
कृत्वापि पापं बहुशो यो दद्यादन्नमर्थिने ।
ब्राह्मणाय विशेषेण सर्वपापैः प्रमुच्यते ।
अन्नदः प्राणदो लोके प्राणदः सर्वदो भवेत् ।
तस्मादन्नं विशेषेण दातव्यं भूतिमिच्छता ।
अन्नं ह्यमृतमित्याहुरन्नं प्रजननं स्मृतम् ।
अन्नप्रणाशे सीदन्ति शरीरे पञ्च धातवः ।
बलं बलवतो नश्येदन्नहीनस्य देहिनः ।
तस्मादन्नं प्रदातव्यं श्रद्धयाश्रद्धयापि वा ।
आदत्ते हि रसं सर्वमादित्यः स्वगभस्तिभिः ।
वायुस्तस्मात्समादाय रसं मेघेषु धारयेत् ।
तत्तु मेघगतं भूमौ शक्रो वर्षति तादृशम् ।

---

$M_4$ om. (hapl.) lines 2256–2257. — (L. 2257) T $M_3$ च (for तु). $G_1$ महा- (for महत्). — (L. 2258) $M_2$ तु (for च). Kumbh. ed. and Madras ed. [ऽ]धीयेत (for °यीत). — (L. 2259) $G_2$ $M_{2.3}$ नो देहे (for देहे न). T $G_1$ $M_2$ तं (for तत्). — (L. 2260) T $G_3$ transp. वृत्तेन and शीलेन. $G_3$ समचेतनः; $M_2$ च दमेन च (for च समन्वितः). — (L. 2261) $M_2$ च (for तत्). $G_{1.2}$ स; $M_{2.3}$ हि (for [इ]ह). — (L. 2262) T अन्नमश्वं (by transp.). $T_2$ $G_{2.3}$ तद्विदे (sic). — (L. 2263) $G_{1.2}$ $M_{2.3}$ तु (for च). $M_2$ गुणोपेतो. $G_1$ $M_2$ साधु( $M_2$ °र )संमितं. — (L. 2264) $M_{2-4}$ आहूय (for आहृत्य). — (L. 2265) $M_4$ सर्वधर्म- (for धर्मा°). $G_1$ त्वेवं; $M_{2.3}$ कृत्स्नो (for देव). $G_{1.2}$ भीमं (for मम). $G_{1.2}$ $M_{2.3}$ भाषितं. — (L. 2267) $M_4$ अनेन (for अन्नेन). — (L. 2268) $M_{2-4}$ अन्नाद्भवंति हि प्राणाः (for the prior half). $M_4$ [अ]त्र (for [अ]स्ति). — (L. 2269) $G_1$ $M_{2.3}$ तु; $G_2$ यो (for [अ]पि). $G_{1.3}$ $M_{2.3}$ देश- (for देशे). $G_3$ [ऽ]पि; $M_2$ तु (for च). — (L. 2271) T $G_{1.3}$ विप्रमध्यपरिश्रांतं. $M_4$ दृढम् (for वृद्धम्). — (L. 2273) $G_3$ सुशीती (sic) (for °लो). — (L. 2274) T $G_1$ विप्रः (for प्रीतः). $M_{2.3}$ [इ]ह च (for हित-). $M_4$ परत्र हितमिच्छता. — (L. 2275) T शुष्कां (for [अ]नृतां). $G_3$ शुद्धां गिरसमीरयेत् (sic) (for the post. half). — (L. 2276) $M_2$ -चरणे; $M_3$ °णौ. $T_1$ नातिधीतं; $T_2$ $G_3$ अतिथिं वा (for नाधीतं वा). — (L. 2277) $T_1$ $M_3$ चांडालो. — (L. 2278) $G_2$ स्यात्; $M_2$ च (for स). $G_1$ $M_3$ अन्नेन पूजनीयाः स्युः. — (L. 2279) $M_2$ यः पिधाय (for पिधाय तु). Madras ed. योन्नं (for ह्येकः). $G_2$ $M_{2.3}$ प्रहृष्टवान्. — (L. 2282) $M_2$ यो रहः (for यो नरः). $M_2$ शृणु (for महत्). $M_4$ तस्य पुण्यं महत्फलं. — (L. 2283) $G_2$ $M_3$ तु (for [अ]पि). $G_3$ $M_4$ ददाति (for दद्याद्). — $M_2$ om. (hapl.) lines 2286–2289. — (L. 2286) $G_3$ $M_4$ प्रयत्नेन (for विशेषेण). — (L. 2287) $M_4$ परं (for स्मृतम्). — (L. 2290) $G_{1.2}$ विशेषेण (for प्रदातव्यं). — (L. 2291) $G_1$ आदित्यस्य; $M_2$ °त्यः स्वैर् (for °त्यः स्व-). — (L. 2292) $M_2$ रसं मेघे निधापयेत् (for the post. half). — (L. 2293) $G_3$ तं; $M_2$ यत् (for तत्). T $G_3$ वै रसं;

तेन दिग्धा भवेद्देवी मही प्रीता च पाण्डव ।
तस्यां सस्यानि रोहन्ति यैर्जीवन्त्यखिलाः प्रजाः । [2295]
मांसमेदोस्थिमज्जानां संभवस्तेभ्य एव हि ।
एवं सूर्यश्च पवनो मेघः शक्रस्तथैव च ।
एक एव स्मृतो राशिर्यतो भूतानि जज्ञिरे ।
भवनानि च दिव्यानि दिवि तेषां महात्मनाम् ।
नानासंस्थानरूपाणि नानाभूतयुतानि च । [2300]
चन्द्रमण्डलशुभ्राणि किङ्किणीजालवन्ति च ।
तरुणादित्यवर्णानि स्थावराणि चराणि च ।
अनेकशतसंख्यानि सान्तर्जलवनानि च ।
तत्र पुष्पफलोपेताः कामदाः सुरपादपाः ।
वाप्यो वीथ्यः सभाः कूपा दीर्घिकाश्च सहस्रशः । [2305]
घोषवन्ति च यानानि युक्तान्यथ सहस्रशः ।
भक्ष्यभोज्यमयाः शैला वासांस्याभरणानि च ।
क्षीरस्रवन्त्यः सरितस्तथा चैवान्नपर्वताः ।
प्रासादाः पाण्डराः शुभ्राः शय्याश्च कनकोज्ज्वलाः ।
अन्नदास्तत्र तिष्ठन्ति तस्मादन्नप्रदो भवेत् । [2310]

Colophon.

युधिष्ठिर उवाच ।

अन्नदानफलं श्रुत्वा प्रीतोऽस्मि मधुसूदन ।
भोजनस्य विधिं वक्तुं देवदेव त्वमर्हसि ।

भगवानुवाच ।

भोजनस्य द्विजातीनां विधानं शृणु पाण्डव ।
स्नातः शुचिः शुचौ देशे निर्जने हुतपावकः ।
मण्डलं कारयित्वा तु चतुरश्रं द्विजोत्तमः । [2315]
क्षत्रियश्चेत्ततो वृत्तं वैश्योऽर्धेन्दुसमाकृतिम् ।
आर्द्रपादस्तु भुञ्जीयात्प्राङ्मुखश्चासने शुचौ ।
पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः ।
नैकवासास्तु भुञ्जीयान्न चान्तर्धाय वा द्विजः ।
न भिन्नपात्रे भुञ्जीत पर्णपृष्ठे तथैव च । [2320]
अन्नं पूर्वं नमस्कुर्यात्प्रहृष्टेनान्तरात्मना ।
नान्यदालोकयेदन्नान्न जुगुप्सेत तत्परः ।
जुगुप्सितं च यच्चान्नं राक्षसा एव भुञ्जते ।
पाणिना जलमुद्धृत्य कुर्यादन्नं प्रदक्षिणम् ।
अपेयं तद्विजानीयात्पीत्वा चान्द्रायणं चरेत् । [2325]
परिवेषजलादन्यत्पेयमेतत्तु मन्त्रवत् ।

---

M2 वासवः; M3.4 तद्रसं (for तादृशम्). —(L. 2294) G3 दीप्ता; M2.3 स्निग्धा (for दिग्धा). M4 एव (for देवी). M3 मम (for मही). T G3 पार्थिव; Kumbh. ed. भारत (for पाण्डव). —(L. 2297) M2.4 एवमन्नं च सूर्यश्च पवनः शक्र एव च. —(L. 2298) G1 स्थितो (for स्मृतो). — After line 2298, M2.3 ins.:

प्राणान्ददाति भूतानां तेजश्च भरतर्षभ ।
अन्नदानेन संप्रीता देवाश्च पितृभिः सह ।
तस्मात्तेजो यशो वीर्यं बलायुर्धृतयः सदा ।
श्रद्धयान्नं प्रदातव्यमिति पौराणिकी श्रुतिः ।
अन्नदानात्तु ये लोकास्ताञ्शृणुष्व युधिष्ठिर । [5]

[(L. 4) M3 श्रद्धदानं (sic) (for °यान्नं).]

—(L. 2299) M2 पावनानि (for भव°). —(L. 2300) G3 -संस्थानि (for -संस्थान-). G1 नानास्थितानि भूतानि (for the prior half). G2 M4 -भूति-; M2.3 -भूमि- (for -भूत-). G1 M3 -गतानि (for -युतानि). —(L. 2304) G1 ततः (for तत्र). —(L. 2305) T2 दिव्याः; G2 विध्यः (sic) (for वीथ्यः). T2 सरः; G2 सदा (for सभाः). T1 वाप्यो वीर्याप्सरः कूपा; G1 वाप्योपेयुः सभां कूपां (sic) (for the prior half). M2.4 [ए]व सर्वशः (for च सहस्रशः). — After line 2305, G1.2 M3 read lines 2307–2308. —(L. 2306) M4 च (for [अ]थ). —(L. 2309) G1.2 प्रासाद-. G1.2 M2.3 प्रस्तराः (for पाण्डराः). M4 भ्रात्राः (sic) (for शुभ्राः). —(L. 2310) M2 अन्नदानांस्तु तिष्ठंति. G1.2 ह्यन्नदान- (for तस्मादन्न-). T1 M4 भव (for भवेत्). — Colophon. — *Sub-parvan:* T G3 M2.4 वैष्णवधर्म. — *Adhy. name:* M2 अन्नविशेषः. — *Adhy. no.:* T1 96; T2 105; G1.2 M4 95; G3 106; M2 12; M3 94. —(L. 2311) M2 [अ]सुर- (for मधु-). —(L. 2314) G2 शुद्धः (for शुचिः). —(L. 2315) G1.2 M3 च (for तु). —(L. 2316) M2 वैश्यस्यार्धेंदुसंनिभं; M4 वैश्यश्चेन्मुसलाकृतिं (for the post. half). —(L. 2319) M2.4 नानंतर्धाय (for न चान्त°). M2 वै (for वा). T G3 M4 पुनः (for द्विजः). —(L. 2320) M2.4 -भांडे (for -पात्रे). —(L. 2322) T [अ]न्यम् (for [अ]न्यद्). T अन्नं; G3 अश्नन् (for अन्नान्). M2 वा पुनः; M3.4 तत्पुनः (for तत्परः). —(L. 2323) M2 तु तच् (for च यच्). —(L. 2325) G2 आपोशनं तु तत्पीत्वा (for the prior half). G2 द्विजश्; M3.4 भुक्त्वा (for पीत्वा). —(L. 2326) M2.4 परिषेक- (for °वेष-). G1.2 अन्यत्; M3 एवं; M3.4 एव (for एतत्). T2 मंत्रावित्. —(L. 2327) M4 चैव (for कुर्यात्). T समंत्रास्. M2 च (for तु). —(L. 2328) M4 प्राणाहुतेर्. —(L. 2329) G2 समाहितं, T M4 प्राणाहुतिर्. —(L.

पञ्च प्राणाहुतीः कुर्यात्सम'' तु पृथक्पृथक् ।
यथा रसं न जानाति जिह्वा प्राणाहुतौ नृप ।
तथा समाहितः कुर्यात्प्राणाहुतिमतन्द्रितः ।
विदित्वान्नमथान्नादं पञ्च प्राणांश्च पाण्डव । [ 2330 ]
यः कुर्यादाहुतीः पञ्च तेनेष्टाः पञ्च वायवः ।
अतोऽन्यथा तु भुञ्जानो ब्राह्मणो ज्ञानदुर्बलः ।
तेनान्नेनासुरान्प्रेतान्राक्षसांस्तर्पयिष्यति ।
वक्त्रप्रमाणान्पिण्डांश्च ग्रसेदेकैकशः पुनः ।
वक्त्राधिकं तु यत्पिण्डमात्मोच्छिष्टं तदुच्यते । [ 2335 ]
पिण्डावशिष्टमन्यच्च वक्त्रनिःसृतमेव च ।
अभोज्यं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत् ।
स्वमुच्छिष्टं तु यो भुङ्क्ते यो भुङ्क्ते मुक्तभोजनम् ।
चान्द्रायणं चरेत्कृच्छ्रं प्राजापत्यमथापि वा ।
पिबतः पतिते तोये भोजने मुखनिःसृते । [ 2340 ]
अभोज्यं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत् ।
पीतशेषं तु तन्नाम न पेयं पाण्डुनन्दन ।
पिबेद्यदि हि तन्मोहाद्द्विजश्चान्द्रायणं चरेत् ।
पानीयानि पिबेद्येन तत्पात्रं द्विजसत्तमः ।
अनुच्छिष्टं भवेत्तावद्यावद्भूमौ न निक्षिपेत् । [ 2345 ]
मौनी वाप्यथ वामौनी प्रहृष्टः संयतेन्द्रियः ।
भुञ्जीत विधिवद्विप्रो न चोच्छिष्टं प्रदापयेत् ।
सदा चात्याशनं नाद्यान्नातिहीनं च कर्हिचित् ।
यथान्नेन व्यथा न स्यात्तथा भुञ्जीत नित्यशः ।
उदक्यामपि चण्डालं श्वानं वा रुरुमेव वा । [ 2350 ]
भुञ्जानो यदि वा पश्येत्तदन्नं च परित्यजेत् ।
भुञ्जानो ह्यत्यजन्मोहाद्द्विजश्चान्द्रायणं चरेत् ।
केशकीटावपन्नं च मुखमारुतवीजितम् ।
अभोज्यं तद्विजानीयाद्भुक्त्वा चान्द्रायणं चरेत् ।
उत्थाय च पुनः स्पृष्टं पादस्पृष्टं च लङ्घितम् । [ 2355 ]
अन्नं तद्राक्षसं विद्यात्तस्मात्तत्परिवर्जयेत् ।
राक्षसोच्छिष्टभुग्विप्रः सप्त पूर्वान्परानपि ।
निरये रौरवे घोरे स्वपितॄन्पातयिष्यति ।
तस्मिन्नाचमनं कुर्याद्यस्मिन्पात्रे स भुक्तवान् ।
यद्युत्तिष्ठत्यनाचान्तो भुक्तवानासनात्ततः । [ 2360 ]

---

2330 ) $M_{2-4}$ विदित्वा चान्नमन्नादं. —( L. 2333 ) T $G_3$ [अं]तेन ( for [अ]न्नेन ). —( L. 2334 ) T $G_3$ $M_2$ -प्रमाण- ( for °णान् ). $M_2$ -पिंडानि ( for पिण्डांश्च ). —( L. 2335 ) $M_2$ वक्त्रातिरिक्तं ( for °धिकं तु ). $M_2$ om. from यत्पिण्डम् up to स्वमुच्छिष्टं तु in the prior half of line 2338. —( L. 2336 ) $G_{1.2}$ $M_3$ अन्नं च; $M_4$ अन्यच्चेद् ( for अन्यच्च ). $G_{1.2}$ $M_3$ वक्त्रान्निःसृतमेव वा ( $M_3$ च ). —( L. 2338 ) $G_2$ स्वयमुष्णं ( for स्वमुच्छिष्टं ). $G_3$ om. one यो भुङ्क्ते. $G_1$ मुंडिभोजनं; $G_3$ कांस्यभाजने; $M_2$ भुक्तवाजने ( sic ); $M_4$ मुक्तभाजनं ( *inf. lin.* °मोदनं ) ( for °भोजनम् ). —After line 2339, $G_{1.2}$ $M_3$ ins. :

स्त्रीपात्रभुङ्नरः पापः स्त्रीणामुच्छिष्टभुक्तथा ।
तया सह च यो भुङ्क्ते स भुङ्क्ते मद्यमेव हि ।
न तस्य निष्कृतिर्दृष्टा मुनिभिस्तत्त्वदर्शिभिः ।

—( L. 2340 ) $G_{1.2}$ पिबतस्तु तथा तोयं ( for the prior half ). —( L. 2341 ) $M_2$ भवेदन्नं ( for विजानीयाद् ). — $M_{2.4}$ om. ( hapl. ) lines 2342–2343. —( L. 2342 ) T तत्तोयम् ( for तन्नाम ) and अपेयं ( for न पेयं ). —( L. 2343 ) $G_{1.2}$ $M_3$ [इ]ह ( for हि ). — $G_3$ om. lines 2344–2345. —( L. 2344 ) $M_4$ पानीयादि ( for °यानि ) and पात्रेण ( for तत्पात्रं ). —( L. 2345 ) $M_4$ यावत्तावद् ( by transp. ). T वि- ( for न ). —( L. 2346 ) $M_4$ हि ( for [अ]पि ). $G_3$ भुंजन्; Kumbh. ed. and ] Madras ed. भूमौ ( for [अ]मौनी ). $G_{1.2}$ $M_3$ नावलोक्या ( $M_3$ न वालोक्य ) दिशस्तथा ( for the post. half ). —( L. 2347 ) T $G_3$ $M_{2.4}$ न चोच्छिष्टानि चावपेत् ( $M_2$ धापयेत; $M_4$ वापयेत् ) ( for the post. half ). —( L. 2348 ) $G_1$ $M_{2.3}$ चात्यशनं; $M_4$ चात्यशितं. $G_3$ नात्यहीनं ( for नाति° ). $M_3$ न ( for च ). —( L. 2349 ) $T_1$ यदा चेच्छा ****; $T_2$ यथा चेच्छा यथा पथ्यं; Gi यथार्थेन विधानस्य; $G_3$ $M_4$ यदा( $M_4$ °था )न्नेच्छा यदा ( $M_4$ °था ) न स्यात्; $M_2$ यथा देहव्यथा न स्यात्; $M_3$ यथान्नेच्छा यदा न स्यात् ( for the prior half ). —( L. 2350 ) $M_{2.4}$ अथ ( for अपि ). $T_1$ वा शूद्रम्; $G_{1.2}$ सूकरम्; $M_2$ कुक्कुटम् ( for वा रुरुम् ). $M_3$ च ( for the second वा ). —( L. 2351 ) $T_2$ $G_3$ $M_{2.4}$ पश्येत्तु ( for वा पश्येत् ). $M_2$ तदा ( for तद् ). $M_2$ तु ( for च ). —( L. 2352 ) $M_2$ न त्यजन् ( for ह्यत्य° ). —( L. 2353 ) T $G_{2.3}$ -कीटोपपन्नं; $M_2$ -कीटाभि° ( for -कीटाव° ). $M_2$ -वीजितः. —( L. 2354 ) $G_1$ तद्भोज्यं. $M_2$ द्विजातीनां ( for विजानीयाद् ). —( L. 2355 ) $G_3$ तु ( for the first च ). $M_2$ भुक्तं ( for स्पृष्टं ). T $G_{1.3}$ पदास्पृष्टं ( for पाद° ). $M_2$ न पादस्पृष्टलंघितं. —( L. 2357 ) $G_{1.3}$ $M_4$ पूर्वापरान्. T दश पूर्वान्दशापरान् ( for the post. half ). —( L. 2358 ) $G_{1.2}$ $M_3$ नरके ( for निरये ). $M_4$ रौरवे नरके घोरे. T $G_{1.2}$ स ( for स्व- ). —( L. 2359 ) $G_2$ तस्मान् ( for तस्मिन् ). $T_2$ $M_{2.4}$ भांडे ( for पात्रे ). —( L. 2360 ) T $G_1$ यद् ( for यदि ).

स्नानं सद्यः प्रकुर्वीत सोऽन्यथाप्रयतो भवेत् ।

युधिष्ठिर उवाच ।

तृणमुष्टिविधानं च तृणमाहात्म्यमेव च ।
इक्षोः सोमसमुद्भूतिं वक्तुमर्हसि मानद ।

भगवानुवाच ।

पितरो वृषभा ज्ञेया गावो लोकस्य मातरः ।
तासां तु पूजया राजन्पूजिताः पितृमातरः । [2365]
सभा प्रपा गृहं चापि देवतायतनानि च ।
शुध्यन्ति शकृदा यासां किं पूतमधिकं ततः ।
ग्रासमुष्टिं परगवे दद्यात्संवत्सरं तु यः ।
अकृत्वा स्वयमाहारं व्रतं तत्सार्वकालिकम् ।
गावो मे मातरः सर्वाः पितरश्चैव गोवृषाः । [2370]
ग्रासमुष्टिं मया दत्तां प्रतिगृह्णन्तु मातरः ।
इत्युक्त्वानेन मन्त्रेण सावित्र्या वा समाहितः ।
अभिमन्त्र्य ग्रासमुष्टिं तस्य पुण्यफलं शृणु ।
यत्कृतं दुष्कृतं तेन ज्ञानतोऽज्ञानतोऽपि वा ।
तस्य नश्यति तत्सर्वं दुःस्वप्नं च विनश्यति । [2375]
तिलाः पवित्राः पापघ्ना नारायणसमुद्भवाः ।
तिलाञ्श्राद्धे प्रशंसन्ति दानमेतदनुत्तमम् ।
तिलान्दद्यात्तिलान्भक्ष्यात्तिलान्प्रातरुपस्पृशेत् ।
तिलं तिलमिति ब्रूयात्तिलाः पापहरा हि ते ।
क्रीताः प्रतिगृहीता वा न विक्रेया द्विजातिभिः । [2380]
भोजनाभ्यञ्जनाद्दानाद्योऽन्यत्तु कुरुते तिलैः ।
कृमिर्भूत्वा श्वविष्ठायां पितृभिः सह मज्जति ।
तिलान्न पीडयेद्विप्रो यन्त्रचक्रे स्वयं नृप ।
पीडयन्हि द्विजो मोहान्नरकं याति रौरवम् ।
इक्षुवंशोद्भवः सोमः सोमवंशोद्भवा द्विजाः । [2385]
इक्षून्न पीडयेत्तस्मादिक्षुघात्यात्मघातकः ।
इक्षुदण्डसहस्राणामेकैकेन युधिष्ठिर ।
ब्रह्महत्यामवाप्नोति ब्राह्मणो यन्त्रपीडकः ।
तस्मान्न पीडयेदिक्षून्यन्त्रचक्रे द्विजोत्तमः ।

Colophon.

युधिष्ठिर उवाच ।

समुच्चयं तु धर्माणां भोज्याभोज्यं तथैव च । [2390]
श्रुतं मया त्वत्प्रसादादापद्धर्मं ब्रवीहि मे ।

भगवानुवाच ।

दुर्भिक्षे राष्ट्रसंबाधे त्वाशौचे मृतसूतके ।
धर्मकालेऽध्वनि तथा नियमो नैव लुप्यते ।
दूराध्वगमनात्खिन्नो द्विजालाभेऽथ शूद्रतः ।
अकृतान्नं च यत्किंचिद्गृह्णीयादात्मवृत्तये । [2395]
आतुरो दुःखितो वापि भयार्तो वा बुभुक्षितः ।

---

$M_4$ यद्युच्छिष्टस्त्वनाचांतो भुक्त्वा पात्रात्ततः स्वयं. — (L. 2361) T $G_1$ पतितो (for [अ]प्रयतो). — (L 2362) $T_1$ $M_2$ तिल- (for तृण-). — (L. 2363) $G_2$ $M_4$ -समुद्भूतं. T माधव (for मानद). — (L. 2364) $M_2$ मातरं. — (L. 2365) $G_{1,2}$ -देवताः (for -मातरः). — (L. 2366) $M_2$ सदा (for सभा). T $G_2$ $M_2$ गृहांश् (for गृहं). — (L. 2367) $M_3$ तासां. $T_1$ $G_{1,2}$ $M_{3,4}$ भूतम् (for पूतम्). — (L. 2368) T गवे दद्यात्; $G_3$ परं गावे (for परगवे). T परं (for दद्यात्). — (L. 2369) $G_{1,2}$ $M_2$ प्रातस्तत् (for व्रतं तत्). T -लोकदं (for -कालिकम्). — (L. 2370) $M_4$ वै (for मे). — (L. 2371) $G_{1,2}$ दत्तं. $G_3$ ग्रासमुष्टिर्मया दत्ता. $G_{1,2}$ -गृह्णीत. — (L. 2372) $M_2$ [अ]नेनापि (for [उ]क्त्वानेन). Kumbh. ed. गायत्र्या (for सावित्र्या). — (L. 2373) $M_2$ दद्यात्तु ग्रासमुष्टिं यस् (for the prior half). $M_4$ दद्यात्तस्य (for तस्य पुण्य-). — (L. 2375) $T_2$ दुःस्वप्नश्. — $G_3$ om. (hapl.) line 2377. — (L. 2377) $M_2$ च तद् (for °एतद्). — (L. 2378) $G_2$ $M_4$ तिलं (for the second तिलान्). $G_3$ भक्षयेत्; $M_{2,3}$ दद्यात् (for भक्ष्यात्). — (L. 2379) T $G_3$ तिलास्तिला; $M_4$ तिलांस्तिलान् (for तिलं तिलम्). $G_3$ ब्रूयुस् (for ब्रूयात्). — (L. 2380) $G_{1,2}$ $M_3$ (*inf. lin.* as above) कृत्वा ($G_2$ क्रीत्वा) प्रतिगृहीत्वा वा. — (L. 2381) $M_4$ अन्यत्र (for योऽन्यत्तु). — (L. 2384) T पीडयेत्तु; $M_2$ °यापि; $M_4$ °या हि (for °यन्हि). — (L. 2385) $G_2$ $M_4$ सोमवंशोद्भवो द्विजः. — (L. 2386) $M_{2,3}$ इक्षुं. $M_4$ घातयेत् (for पीड°). $T_2$ $G_3$ $M_{2-4}$ इक्षुघाता- ($M_4$ °तो)त्मघातकः (for the post. half). — (L. 2387) T नराधिप (for युधिष्ठिर). — (L. 2388) Kumbh. ed. द्विजश्चेद् (for ब्राह्मणो). $T_1$ $G_1$ $M_{2,3}$ -पीडितः; $M_4$ -पीडनः. — (L. 2389) $G_{1,2}$ $M_{2,3}$ इक्षुं. — Colophon. — *Sub-parvan:* $G_3$ $M_{2-4}$ वैष्णव- ($M_3$ विष्णु)धर्म. — *Adhy. name:* $M_3$ भोजनविधिः. — *Adhy. no.:* $T_1$ 97; $T_2$ 106; $G_{1,2}$ $M_4$ 96; $G_3$ 107; $M_2$ 13; $M_3$ 95. — (L. 2390) $G_{2,3}$ $M_{3,4}$ च (for तु). Madras ed. च केशव (for तथैव च). — (L. 2392) $G_{1,2}$ [ऽ]प्याशौचे; $M_3$ आशौचे (for त्वाशौचे). — (L. 2393) $G_1$ येन (for नैव). $G_{2,3}$ $M_{2,4}$ नियमोर्थो ($M_2$ °मस्थो) न लु($M_4$ लि)प्यते. — (L. 2394) $M_2$ तु (for ऽथ). — (L. 2395) $G_3$

भुञ्जन्नविधिना विप्रः प्रायश्चित्तीयते न च ।
निमन्त्रितस्तु यो विप्रो विधिवद्धव्यकव्ययोः ।
मांसान्यपि च भुञ्जानः प्रायश्चित्तीयते न च ।
अष्टौ तान्यव्रतघ्नानि आपो मूलं घृतं पयः । [ 2400 ]
हविर्ब्राह्मणकामाय गुरोर्वचनमौषधम् ।
अशक्तो विधिवत्कर्तुं प्रायश्चित्तानि यो नरः ।
विदुषां वचनेनापि दानेनापि विशुध्यति ।
अनृतावृतुकाले वा दिवा रात्रौ तथापि वा ।
प्रोषितस्तु स्त्रियं गच्छेत्प्रायश्चित्तीयते न च । [ 2405 ]

युधिष्ठिर उवाच ।

प्रशस्याः कीदृशा विप्रा निन्द्याश्चापि सुरेश्वर ।
अष्टकायाश्च कः कालस्तन्मे कथय सुव्रत ।

भगवानुवाच ।

सत्यसन्धं द्विजं दृष्ट्वा स्थानाद्वेपति भास्करः ।
एष मे मण्डलं भित्त्वा याति ब्रह्म सनातनम् ।
कुलीनः कर्मकृद्वैद्यस्तथा चाप्यानृशंस्यवान् । [ 2410 ]
ह्रीमानृजुः सत्यवादी पात्रं सर्वे इमे द्विजाः ।
एते चाग्रासनस्थास्तु भुञ्जानाः प्रथमं द्विजाः ।
तस्यां पङ्क्त्यां च ये चान्ये तान्पुनन्त्येव दर्शनात् ।
मद्भक्ता ये द्विजश्रेष्ठा मद्गता मत्परायणाः ।
तान्पङ्क्तिपावनान्विद्धि पूज्यांश्चैव विशेषतः । [ 2415 ]
निन्द्याञ्शृणु द्विजान्राजन्नपि वा वेदपारगान् ।
ब्राह्मणच्छद्मना लोके चरतः पापकारिणः ।
अनग्निरनधीयानः प्रतिग्रहरुचिस्तु यः ।
यत्र कुत्र तु भुञ्जानस्तं विद्यात्पङ्क्तिदूषकम् ।
मृतसूतकपुष्टाङ्गो यश्च शूद्रान्नभुग्द्विजः । [ 2420 ]
अहं चापि न जानामि गतिं तस्य नराधिप ।
शूद्रान्नरसपुष्टाङ्गो ह्यधीयानोऽपि नित्यशः ।
जपतो जुह्वतो वापि गतिरूर्ध्वा न विद्यते ।
आहिताग्निश्च यो विप्रः शूद्रान्नान्न निवर्तते ।
पञ्च तस्य प्रणश्यन्ति आत्मा ब्रह्म त्रयोऽग्नयः । [ 2425 ]
शूद्रप्रेषणकर्तुश्च ब्राह्मणस्य विशेषतः ।
भूमावन्नं प्रदातव्यं श्वसृगालसमो हि सः ।
प्रेतभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ।
अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ।
त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम् । [ 2430 ]
प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति ।
अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजोत्तमाः ।
पदे पदेऽश्वमेधस्य फलं ते प्राप्नुवन्ति हि ।
न तेषामशुभं किंचित्पापं वाशुभकर्मणाम् ।
जलावगाहनादेव सद्यः शौचं विधीयते । [ 2435 ]

---

अकृत्वान्नं. G $M_3$ तु ( for च ). $G_1$ अनु- ( for आत्म- ). — ( L. 2396 ) T तथार्तो; $G_2$ तृषार्तो ( for भयार्तो ). — ( L. 2397 ) $G_{2.3}$ $M_{3.4}$ भुंजानो ( for भुञ्जन् ). — After line 2397, $M_2$ ins. :

यत्किंचिदपि कुर्वाणो विद्वद्गुरुनियोगतः ।
तेषां वचनसामर्थ्यात्प्रायश्चित्तीयते न च ।

— $M_2$ reads lines 2398–2399 after line 2405. — ( L. 2398 ) $M_2$ निमंत्रयंस्. — ( L. 2399 ) $G_{1.2}$ $M_{2.4}$ मांसादीन्यपि भुंजानः. — ( L. 2401 ) Kumbh. ed. and Madras ed. -काम्या च ( for -कामाय ). — ( L. 2402 ) $G_2$ आयत्तो ( for अशक्तो ). — ( L. 2403 ) $M_2$ च ( for the second [अ]पि ). $M_4$ युधिष्ठिर ( for विशुध्यति ). — $M_1$ om. lines 2404–2405. — ( L. 2404 ) T $G_1$ रात्रौ वा यदि वा दिवा ( for the post. half ). — ( L. 2405 ) $M_2$ प्रोषितं तु प्रियां गच्छेत्. — ( L. 2406 ) $M_{2.3}$ प्रशस्ताः. — ( L. 2407 ) T $G_3$ $M_3$ यः ( for कः ). — ( L. 2408 ) $M_2$ सत्यसंधान्द्विजान्. $G_2$ चलति ( for वेपति ). — ( L. 2410 ) $G_1$ $M_4$ वा ( for च ). — ( L. 2412 ) $M_4$ च; Madras ed. ते ( for तु ). — ( L. 2413 ) $G_{1.2}$ $M_{2.3}$ तु ( for the first च ). — ( L. 2414 ) $G_{1.2}$ मद्भक्ता ( for मद्गता ). — ( L. 2416 ) $G_2$ निंद्यानपि शृणुष्वेमान् ( for the prior half ). $G_2$ $M_4$ वेदांत- ( for वा वेद- ). $G_3$ अविवादेन पारगाः. — ( L. 2417 ) $M_{2.3}$ ब्राह्मणान्. T काले ( for लोके ). $G_{1.2}$ $M_4$ चरंतः. $G_3$ -चारिणः ( for -का° ). T यश्चरन्पापकारकः ( for the post. half ). — ( L 2418 ) T द्विजः; $G_3$ च यः ( for तु यः ). — $T_2$ om. ( hapl. ) lines 2419–2420. — ( L. 2419 ) $G_3$ $M_4$ तत्र ( for कुत्र ). $T_1$ $G_3$ $M_2$ च ( for तु ). Kumbh. ed. यतस्ततस्तु भुंजानस्. $G_1$ ब्रह्म- ( for पङ्क्ति- ). — ( L. 2420 ) $G_1$ $M_2$ तु ( for च ). — $T_1$ ins. after line 2420 : $T_2$ after 2418 :

असूयालुर्दम्भपरो महानहमिति ब्रुवन् ।

— ( L. 2422 ) $T_2$ om.; $G_2$ [ऽ]पि ( for हि ). $G_{1.2}$ हि ( for ऽपि ). — ( L. 2423 ) $M_1$ भुंजतो ( for जुह्वतो ). G ऊर्ध्वं. — ( L. 2424 ) $M_2$ तु ( for च ). T $G_3$ विप्रो यः ( by transp. ). $M_2$ शूद्रान्नं नाभिवर्तते. — ( L. 2426 ) $M_2$ युधिष्ठिर ( for विशेषतः ). — ( L. 2427 ) T भूम्यां पिंडं; $G_{2.3}$ $M_1$ भूम्यामन्नं. — ( L. 2428 ) $G_3$ $M_3$ ( *sup. lin.* ) -दुर्लभः ( for -दुर्बलः ). — ( L. 2429 ) $T_2$ $M_{2.3}$ -गच्छन् ( for -गच्छेन् ). — ( L. 2434 ) $M_4$ यत् ( for न ). — ( L. 2437 ) $T_1$ न

शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि ।
निर्वृतेन न भोक्तव्यं विद्धि शूद्रान्नमेव तत् ।
विप्राणां भोक्तुकामानामत्यन्तं चान्नकाङ्क्षया ।
यो विघ्नं कुरुते मर्त्यस्ततो नान्योऽस्ति पापकृत् ।

सर्वे च वेदाः सह षड्भिरङ्गैः [ 2440 ]
सांख्यं पुराणं च कुले च जन्म ।
नैतानि सर्वाणि गतिर्भवन्ति
शीलव्यपेतस्य नृप द्विजस्य ।

ग्रहोपरागे विषुवेऽयनान्ते
पित्र्ये मघासु स्वसुते च जाते । [ 2445 ]
गयेषु पिण्डेषु च पाण्डुपुत्र
दत्तं भवेन्निष्कसहस्रतुल्यम् ।

वैशाखमासस्य च या तृतीया
नवम्यसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य च कृष्णपक्षे [ 2450 ]
त्रयोदशी पञ्चदशी च माघे ।
उपप्लवे चन्द्रमसो रवेश्च
श्राद्धस्य कालो ह्ययनद्वये च ।
यस्त्वेकपङ्क्त्यां विषयं ददाति
स्नेहाद्भयाद्वा यदि वार्थहेतोः । [ 2455 ]

क्रूरं दुराचारमनात्मवन्तं
ब्रह्मघ्नमेनं मुनयो वदन्ति ।
इहैवैकस्य नामुत्र अमुत्रैकस्य नो इह ।
इह चामुत्र चैकस्य नामुत्रैकस्य नो इह ।

धनानि येषां विपुलानि सन्ति [ 2460 ]
नित्यं रमन्ते परलोकमूढाः ।
तेषामयं शत्रुवरघ्नलोको
नान्यः सदा देहसुखे रतानाम् ।

ये योगयुक्तास्तपसि प्रसक्ताः
स्वाध्यायशीला जरयन्ति देहम् । [ 2465 ]
जितेन्द्रिया भूतहिते निविष्टा-
स्तेषामसौ नायमरिघ्नलोकः ।

ये धर्ममेव प्रथमं चरन्ति
धर्मेण लब्ध्वापि धनानि काले ।
दारानवाप्य क्रतुभिर्जयन्ते [ 2470 ]
तेषामयं चैव परश्च लोकः ।

ये नैव विद्यां न तपो न दानं
न चापि मूढाः प्रजने यतन्ते ।

---

वृत्तेन ; $T_2$ निवृत्तेन ; $G_3$ निवर्तेन ; $M_2$ निहृतेन ( for निर्वृतेन ). $G_2$ तु ( for न ). — ( L. 2438 ) $G_{1.2}$ $M_3$ चान्न( $M_3$ भोक्तु )कांक्षिणां. — ( L. 2439 ) $M_2$ विघ्नं तु ( for यो विघ्नं ) and [ऽ]न्यो न ( by transp. ). — ( L. 2440 ) T $G_{2.3}$ हि ( for च ). — ( L. 2441 ) $M_4$ सांगं ( for सांख्यं ). — ( L. 2444 ) $M_4$ [ऽ]यने च ( for °नान्ते ). — ( L. 2445 ) $M_2$ [ऽ]प- ( for च ). — ( L. 2446 ) T $G_3$ $M_4$ पद्मेषु ; Madras ed. सर्वेषु ( for पिण्डेषु ). — $M_{2.4}$ om. lines 2448–2449. — ( L. 2449 ) Madras ed. अनवद्यासौ ( for नवम्यसौ ). — ( L. 2450 ) $G_2$ तु ( for च ). — $M_2$ om. from line 2453 up to the prior half of line 2488. — ( L. 2453 ) $M_3$ [ऽ]पि ( for हि ). — After line 2453, $T_1$ $G_1$ $M_3$ ins. :

पानीयमप्यत्र तिलैर्विमिश्रं
दद्यात्पितृभ्यः प्रयतो मनुष्यः ।

This is followed by lines 2460–2461 in $G_1$ and by lines 2460–2463 in $M_3$. — $G_2$ ins. after line 2453 : $G_1$ after line 2461 : $M_3$ after line 2463 :

श्राद्धं कृतं तेन समाः सहस्रं
रहस्यमेतत्पितरो वदन्ति ।

— ( L. 2454 ) $M_4$ -पंक्तौ. — ( L. 2456 ) $M_4$ दुरात्मानम् ( for °चारम् ). — ( L. 2457 ) $M_4$ स्वात्मोपघातं ( for ब्रह्मघ्नमेनं ). $G_{1.2}$ कवयो ( for मुनयो ). — After line 2457, $M_3$ reads lines 2464–2471. $G_2$ reads lines 2458–2459 after line 2471. — ( L. 2458 ) $G_1$ चैवास्य ; $G_2$ चैकस्य ( for [ए]वैकस्य ). $M_4$ ( *sup. lin.* ) बहु ( for इह ). — ( L. 2459 ) $T_1$ lacuna. $G_2$ partly damaged. $T_2$ अमुत्रेह न कस्यचित् (for the post. half). — $G_2$ reads lines 2460–2463 after line 2475. — ( L. 2461 ) $G_3$ -लोकमुत्तमाः ( for -लोकमूढाः ). — ( L. 2462 ) $G_2$ -गणघ्न- ( for -वरघ्न- ). — ( L. 2463 ) Madras ed. नान्यत् ( for नान्यः ). T $G_1$ सुखं ( for सदा ). $M_4$ देहसौख्ये. — ( L. 2464 ) $G_{1.2}$ $M_3$ चैव मुक्तास् ( for योगयुक्तास् ). $G_{2.3}$ $M_3$ प्रयुक्ताः ( for प्रसक्ताः ). — ( L. 2466 ) $M_4$ विप्रास्तथा ( for जितेन्द्रिया ). — ( L. 2467 ) $G_1$ चापि परश्च ; $M_4$ नाम रिपुघ्न- ( for नायमरिघ्न- ). — ( L. 2468 ) $T_1$ om. ये. — ( L. 2469 ) $G_3$ धर्माणि ( for धर्मेण ). $G_{1.2}$ लब्धानि ( for लब्ध्वापि ). — ( L. 2471 ) $G_3$ [ऽ]पि ( for the second च ). — $G_1$ om. lines 2472–2520. — ( L. 2472 ) $G_3$ $M_4$ ये( $M_4$ ए )षां न

न चापि गच्छन्ति सुखानि भोगां-
स्तेषामयं चैव परश्च नास्ति । [ 2475 ]

युधिष्ठिर उवाच ।

नारायण पुराणेश योगावास नमोऽस्तु ते ।
श्रोतुमिच्छामि कार्त्स्न्येन धर्मसारसमुच्चयम् ।

भगवानुवाच ।

धर्मसारं महाराज मनुना प्रोक्तमादितः ।
प्रवक्ष्यामि मनुप्रोक्तं पौराणं श्रुतिसंहितम् ।
अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः । [ 2480 ]
दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत तान्सदा ।
गौरेकस्यैव दातव्या न बहूनां युधिष्ठिर ।
सा गौर्विक्रयमापन्ना दहत्यासप्तमं कुलम् ।
बहूनां न प्रदातव्या गौर्वस्त्रं शयनं स्त्रियः ।
तादृग्भूतं तु तद्दानं दातारं नोपतिष्ठति । [ 2485 ]
आक्रम्य ब्राह्मणैर्भुक्तमनार्याणां तु वेश्मनि ।
गोभिश्च पुण्यं तत्तेषां राजसूयाद्विशिष्यते ।
मा ददात्विति यो ब्रूयाद्गव्यग्नौ ब्राह्मणेषु च ।
तिर्यग्योनिशतं गत्वा चण्डालेषूपजायते ।
ब्राह्मणस्वं तु देवस्वं दरिद्रस्य च यद्धनम् । [ 2490 ]
गुरोश्चापि हृतं राजन्स्वर्गस्थमपि पातयेत् ।
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ।
द्वितीयं धर्मशास्त्राणि तृतीयं लोकसंग्रहः ।
आ समुद्राच्च यत्पूर्वादा समुद्राच्च पश्चिमात् ।
हिमवद्विन्ध्ययोर्मध्यमार्यावर्तं प्रचक्षते । [ 2495 ]
सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तद्देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ।
यस्मिन्देशे य आचारः पारंपर्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ।
कुरुक्षेत्रं च मत्स्याश्च पाञ्चालाः शूरसेनयः । [ 2500 ]
एते ब्रह्मर्षिदेशास्तु ब्रह्मावर्तादनन्तराः ।
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं चारित्रं तु गृह्णीयुः पृथिव्यां सर्वमानवाः ।
हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विशसनादपि ।
प्रत्यगेव प्रयागात्तु मध्यदेशः प्रकीर्तितः । [ 2505 ]
कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो याज्ञियो देशो म्लेच्छदेशस्ततः परम् ।
एतान्विज्ञाय देशांस्तु संश्रयेयुर्द्विजातयः ।
शूद्रस्तु यस्मिन्कस्मिन्वा निवसेद्वृत्तिकर्शितः ।
आचारप्रभवो धर्मो ह्यहिंसा सत्यमेव च । [ 2510 ]
दानं चैव यथाशक्ति नियमाश्च यमैः सह ।
वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् ।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ।
गर्भहोमैर्जातकर्मनामचौलोपनायनैः ।
स्वाध्यायैस्तद्व्रतैश्चैव विवाहस्नातकव्रतैः । [ 2515 ]
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ।

---

( for ये नैव ). — ( L. 2473 ) $T_2$ यजंते ( for यतन्ते ). — ( L. 2474 ) $M_3$ भोगं. $M_4$ ये चापि गच्छंति परस्य भार्यां. — ( L. 2475 ) $M_4$ तेषामयं नैव परश्च लोकः. — ( L. 2476 ) $G_2$ $M_3$ लोकावास ( for योगा° ). — ( L. 2479 ) T वक्ष्यामि मनुना प्रोक्तं ( for the prior half ). $G_2$ $M_4$ पुराण-. $M_4$ -संमितं ( for -संहितम् ). — ( L. 2486 ) $G_2$ $M_3$ च ( for तु ). — ( L. 2487 ) $M_4$ पुण्यवत् ( for पुण्यं तत् ). — ( L. 2488 ) $G_2$ $M_3$ गोषु च; $M_2$ गोरग्नि-; $M_4$ गवां तु ( for गव्यग्नौ ). Kumbh. ed. ब्राह्मणेषु च गोषु च ( for the post. half ). — ( L. 2489 ) $M_2$ ब्रह्मयोनि- ( for तिर्यग्योनि- ). $M_2$ देवत्वमाधिगच्छति ( for the post. half ). — ( L. 2490 ) T च ( for तु ). $M_2$ तु ( for च ). — ( L. 2491 ) $G_2$ स्वर्गस्थान् ( for °स्थम् ). $M_4$ स्वर्गाच्च नरकं नयेत् ( for the post. half ). — ( L. 2492 ) T प्रथमं; $G_3$ अपरं ( for परमं ). — ( L. 2493 ) T $G_{2.3}$ लोकसंग्रहं. — ( L. 2494 ) $M_{2.3}$ आसमुद्रा( $M_2$ °द्र )श्च. $M_{2.4}$ वै ( for यत् ). $M_2$ आसमुद्रश्च पश्चिमात् ( for the post. half ). — ( L. 2495 ) $G_2$ $M_{2.3}$ मध्ये ( for मध्यम् ). $G_2$. मध्यावर्तं ( for आर्या° ). — ( L. 2496 ) T सारावती- ( for सरस्वती- ). — ( L. 2497 ) $M_{3.4}$ तं ( for तद् ). $M_{2.3}$ -निर्जितं ( for -निर्मितं ). — ( L. 2499 ) $M_2$ सदाचारः स उच्यते. — ( L. 2500 ) $M_2$ मत्स्यश्च; $M_3$ मत्स्यानां. $M_2$ शूरसेनकाः. — ( L. 2501 ) $M_2$ अनंतरं. — ( L. 2502 ) $M_4$ अद्य- ( for अग्र- ). — ( L. 2503 ) T $G_2$ स्व- ( for स्वं ). $M_2$ चरित्रं. $G_2$ $M_4$ च ( for तु ). T तु गृह्णीयात्; $M_2$ निरीक्षंति. — ( L. 2504 ) T $M_2$ मध्ये. — ( L. 2505 ) $M_2$. च ( for तु ). — ( L. 2506 ) T सरते; $G_3$ चरते. — ( L. 2507 ) $M_{2.3}$ याज्ञिको ( for °यो ) and त्वतः ( for ततः ). — ( L. 2508 ) $G_2$ $M_{2.3}$ संश्रयेरन् ( for °येयुर् ). — ( L. 2509 ) $M_{2.3}$ निविशेद् ( for निवसेद् ). — ( L. 2510 ) $G_{2.3}$ आचारः ( for °र- ). $M_3$ -प्रथमो ( for -प्रभवो ). — ( L. 2511 ) $M_2$ [अ]पि ( for [ए]व ) and नियमानि ( for °माश्च ). — ( L. 2512 ) $G_3$ क्रतुभिः ( for कर्मभिः ). — ( L. 2513 ) $M_2$ कुर्युः ( for कार्यः ). — ( L. 2514 ) $M_2$

धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
विद्या तस्मिन्न वप्तव्या शुभं बीजमिवोषरे ।
लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा ।
यस्माज्ज्ञानमिदं प्राप्तं तं पूर्वमभिवादयेत् । [ 2520 ]
सव्येन सव्यं संगृह्य दक्षिणेन तु दक्षिणम् ।
न कुर्यादेकहस्तेन गुरोः पादाभिवादनम् ।
निषेकादीनि कर्माणि यः करोति यथाविधि ।
अध्यापयति चैवैनं स विप्रो गुरुरुच्यते ।
कृत्वोपनयनं वेदान्योऽध्यापयति नित्यशः । [ 2525 ]
सकल्पान्सरहस्यांश्च स चोपाध्याय उच्यते ।
साङ्गांश्च वेदानध्याप्य शिक्षयित्वा व्रतानि च ।
विवृणोति च मन्त्रार्थानाचार्यः सोऽभिधीयते ।
उपाध्यायाद्दशाचार्य आचार्याणां शतं पिता ।
पितुः शतगुणं माता गौरवेणातिरिच्यते । [ 2530 ]
तस्मात्तेषां वशे तिष्ठेत्तच्छुश्रूषापरो भवेत् ।
अवमानाद्धि तेषां तु नरकं स्यादसंशयः ।
हीनाङ्गानतिरिक्ताङ्गान्विद्याहीनान्वयोधिकान् ।
रूपद्रविणहीनांश्च जातिहीनांश्च नाक्षिपेत् ।
शपता यत्कृतं पुण्यं शप्यमानं तु गच्छति । [ 2535 ]
शप्यमानस्य यत्पापं शपन्तमनुगच्छति ।
नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम् ।
द्वेषं डम्भं च मानं च क्रोधं तैक्ष्ण्यं च वर्जयेत् ।

Colophon.

युधिष्ठिर उवाच ।

भगवंस्तव भक्तस्य मम धर्मजनप्रिय ।
धर्मं पुण्यतमं देव पृच्छतः कथयस्व मे । [ 2540 ]

भगवानुवाच ।

यदेतदग्निहोत्रं वै सृष्टं वर्णत्रयस्य तु ।
मन्त्रवद्यद्धुतं सम्यग्विधिना चाप्युपासितम् ।
आहिताग्निं नयत्यूर्ध्वं सपत्नीकं सबान्धवम् ।

युधिष्ठिर उवाच ।

कथं तद्ब्राह्मणैर्देव होतव्यं क्षत्रियैः कथम् ।
वैश्यैर्वा देवदेवेश कथं वा सुहुतं भवेत् । [ 2545 ]
कस्मिन्कालेऽथ वा कस्य आधेयोऽग्निः सुरोत्तम ।
आहितस्य कथं वापि सम्यगाचरणं भवेत् ।
कत्यग्नयः किमात्मानः स्थानं किं कस्य वा विभो ।

---

गर्भैर्; $M_4$ गार्ह- ( for गर्भ- ). $M_2$ जातकर्मैर्. — ( L. 2515 ) T $G_2$ तु; $M_2$ च ( for तद् ). $G_2$ $M_3$ तपोभिश्च ( for व्रतैश्चैव ). — ( L. 2517 ) $G_2$ यदि; $G_3$ $M_4$ यस्य ( for यत्र ). T च ( for वा ). — ( L. 2518 ) $M_4$ अवक्तव्या ( for न वप्त° ). $M_2$ न तत्र विद्या वक्तव्या ( for the prior half ). — ( L. 2520 ) $M_3$ समाज्ञानम् ( for यस्माज्ज्ञा° ). $M_2$ ततो ज्ञानागमप्राप्तं ( for the prior half ). $T_2$ $M_2$ तत् ( for तं ). — ( L. 2521 ) T $G_3$ $M_4$ सव्येन सव्यः स्प्रष्टव्यो ( for the prior half ) and दक्षिणः ( for °णम् ). — ( L. 2522 ) T पादाभिवंदनं. — ( L. 2523 ) $G_3$ कार्याणि ( for कर्माणि ). $M_4$ कुर्यात्तु ( for करोति ). $M_2$ विधानतः; $M_3$ यथा विधिः. — $M_4$ om. ( hapl. ) lines 2525–2526. — ( L. 2525 ) $M_2$ कृतोपनयनाद्विदान्. $G_3$ transp. वेदान् and यो. $M_2$ om. यो. — ( L. 2526 ) T सकलान्; $G_3$ सकल्पं. — ( L. 2527 ) $M_2$ सांगान्वेदान्य अध्याप्य ( for the prior half ). $M_4$ क्षपयित्वा ( for शिक्ष° ). — ( L. 2528 ) $G_2$ सोपजायते ( for सोऽभिधी° ). — ( L. 2529 ) $G_3$ आचार्यात्तु ( for °र्याणां ). $T_2$ शतान् ( for शतं ). — ( L. 2530 ) $M_{2.4}$ दशतमा ( for शतगुणं ). — After line 2530, $G_2$ and Kumbh. ed. ins.:

एतेषामपि सर्वेषां गरीयाञ्ज्ञानदो गुरुः ।
गुरोः परतरं किंचिन्न भूतं न भविष्यति ।

— ( L. 2531 ) $G_{1.2}$ $M_3$ शुश्रूषापरमो भवेत्. — ( L. 2532 ) $G_3$ तु ( for हि ). T अथैतेषां ( for हि तेषां तु ). $G_{1.3}$ नरकं स्यान्न संशयः; $M_2$ °कान्याति सर्वशः; $M_4$ °कान्यात्यसंशयं ( for the post. half ). — ( L. 2533 ) $M_2$ वयोतिगान् ( for °धिकान् ). — ( L. 2534 ) $M_4$ corrupt for the prior half. $G_3$ $M_4$ न वाचा त्वाक्षिपेद्बुधः. — ( L. 2535 ) $M_4$ शप्तस्य ( for शपता ). $T_1$ $G_1$ च; $G_3$ हि ( for तु ). $M_2$ उपैति वै ( for तु गच्छति ). — ( L. 2537 ) $M_4$ निंदनं ( for कुत्सनम् ). — ( L. 2538 ) $G_3$ दंभं ( for डम्भं ). $M_4$ मौनं ( for मानं ). $G_{1.2}$ $M_3$ वि- ( for the third च ). — Colophon. — *Sub-parvan* : T $M_2$ वैष्णवधर्म; $M_3$ विष्णुधर्म. — *Adhy. no.* : $T_1$ 98; $T_2$ 107; $G_{1.2}$ $M_4$ 97; $G_3$ 108; $M_2$ 14; $M_3$ 96. — ( L. 2539 ) $G_{1.2}$ $M_3$ स्वभक्तस्य हृषीकेश धर्मांध( $M_3$ मम ध )र्ममजानतः. — ( L. 2541 ) $M_2$ तद् ( for यद् ). $T_2$ $G_2$ दृष्टं ( for सृष्टं ). $T_1$ तत् ( for तु ). — ( L. 2542 ) $G_2$ $M_{2.4}$ विधानाच् ( for विधिना ). — ( L. 2543 ) $M_3$ नयामि ( for नयति ). — ( L. 2546 ) $G_{1.2}$ कथं; $M_3$ तथा ( for ऽथ वा ). $G_3$ तस्य; Madras ed. तस्मिन् ( for कस्य ). T $G_1$ ह्याधेयो; $M_2$ त्वा° ( for आ° ). — ( L. 2548 ) $M_{2.3}$ त्यक्ताग्नयः ( for कत्य° ). $G_2$ आत्मा स ( for आत्मानः ). $M_4$ तस्य ( for कस्य ). — $G_3$ om. line 2549. — ( L. 2549 ) $G_2$ कं ( for

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कतरस्मिन्हुते स्थाने किं व्रजेदाग्निहोत्रिकः ।
अग्निहोत्रनिमित्तं च किमुत्पन्नं पुरानघ । [ 2550 ]
कथमेवाथ हूयन्ते प्रीयन्ते च सुराः कथम् ।
विधिवन्मन्त्रवद्भक्त्या पूजितास्त्वग्नयः कथम् ।
कां गतिं वदतां श्रेष्ठ नयन्ति ह्यग्निहोत्रिणः ।
दुर्हुताश्चापि भगवन्नविज्ञातास्त्रयोऽग्नयः ।
किमाहिताग्नेः कुर्वन्ति दुश्चीर्णा वापि केशव । [ 2555 ]
उत्सन्नाग्निस्तु पापात्मा कां योनिं देव गच्छति ।
एतत्सर्वं समासेन भक्त्या ह्युपगतस्य मे ।
वक्तुमर्हसि सर्वज्ञ सर्वावास नमोऽस्तु ते ।

भगवानुवाच ।

शृणु राजन्महापुण्यमिदं धर्मामृतं परम् ।
यत्तु तारयते युक्तान्ब्राह्मणानग्निहोत्रिणः । [ 2560 ]
ब्रह्मत्वेनासृजं लोकानहमादौ महाद्युते ।
सृष्टोऽग्निर्मुखतः पूर्वं लोकानां हितकाम्यया ।
यस्मादग्रे स भूतानां सर्वेषां निर्मितो मया ।
तस्मादग्नीत्यभिहितः पुराणज्ञैर्मनीषिणः ।
यस्मात्तु सर्वकृत्येषु पूर्वमस्मै प्रदीयते । [ 2565 ]
आहुतिर्दीप्यमानाय तस्मादग्नीति कीर्त्यते ।
यस्माच्च नयति ह्यग्र्यां गतिं विप्रान्सुपूजितः ।
तस्माच्च नयनाद्राजन्वेदेष्वग्नीति कीर्त्यते ।
यस्माच्च दुर्हुतः सोऽयमलं भक्षयितुं क्षणात् ।
यजमानं नरश्रेष्ठ क्रव्यादोऽग्निस्ततः स्मृतः । [ 2570 ]
सर्वभूतात्मको राजन्देवानामेष वै मुखम् ।
प्रथमं मन्मुखात्सृष्टो लोकार्थे पचनः प्रभुः ।
सृष्टमात्रो जगत्सर्वमत्तुमैच्छत्पुरा खलु ।
ततः प्रशमितः सोऽग्निरुपास्यैव मया पुरा ।
सततोपासनात्सोऽयमौपासन इति स्मृतः । [ 2575 ]
आहुतिः सर्वमाख्यातं तस्मिन्वसति सोऽनलः ।
आवसथ्य इति ख्यातस्तेनासौ ब्रह्मवादिभिः ।
तस्मिन्पञ्च महायज्ञा वर्तन्ते यस्य धर्मतः ।
सोममण्डलमध्येन गतिस्तस्य द्विजन्मनः ।
ते च सप्तर्षयः सिद्धाः संयतेन्द्रियबुद्धयः । [ 2580 ]
गता ह्यमरसायुज्यमेकाभ्यर्चनतत्पराः ।
अपरे चावसथ्यं च पचनाग्निं प्रचक्षते ।
तस्मिन्पञ्च महायज्ञा वैश्वदेवश्च वर्तते ।
स्थालीपाकं च गार्हं च सर्वे ह्यस्मिन्प्रतिष्ठिताः ।

---

कि ). $T_2$ पृच्छेद् ( for व्रजेद् ). T $G_2$ -होत्रकः. —( L. 2550 ) $M_2$ अग्नित्रय- ( for °होत्र- ). —( L. 2551 ) $M_1$ सुरैः. —( L. 2552 ) $T_1$ च; $T_2$ $G_3$ हि ( for तु ). —( L. 2553 ) $M_2$ के नयंति ( for नयन्ति हि ). $T_2$ $M_{3.4}$ -होत्रिगं. —( L. 2554 ) $G_2$ सुहुताश्; $M_4$ अकृ° ( for दुर्हु° ). $M_2$ [अ]वधूताश्च ( for [अ]पि भगवन् ) and तथा ( for त्रयो ). —$M_1$ om. line 2555. —( L. 2555 ) $G_2$ दुश्चीर्णं. —( L. 2556 ) T विच्छिन्नाग्निस्तु पापात्मा; $G_3$ $M_3$ उच्छि( $M_3$ °त्स )न्नाग्निस्तु पा° ( for the prior half ). $M_2$ यास्यति ( for गच्छ° ). T कां योनिमधिगच्छति. —( L. 2557 ) $M_3$ [अ]भ्युप- ( for ह्युप- ). —( L. 2558 ) $G_{1.2}$ सर्वेषां च; Kumbh. ed. सर्वाधिकं; Madras ed. °त्मक ( for °वास ). —( L. 2559 ) $T_1$ महाभाग; $G_2$ यथापुण्यम् ( for महापुण्यम् ). $M_2$ इमं ( for इदं ). $M_2$ महत्; $M_3$ वरं ( for परम् ). —( L. 2560 ) $M_2$ कारयते ( for तार° ). $G_2$ यज्ञान् ( for युक्तान् ). —( L. 2561 ) $M_{2.3}$ [अ]सृजल् ( for [अ]सृजं ). T महीपते ( for महाद्युते ). —( L. 2562 ) $T_1$ सृष्ट्वाग्नि-; $T_2$ सृष्टोग्नि-; $G_3$ सृष्ट्वाग्निं ( for सृष्टोऽग्निर् ). —( L. 2564 ) $M_4$ अग्निस्तु ( for अग्नीति ). $T_2$ [अ]भिहितं. T $G_3$ $M_4$ महर्षिभिः; $M_{2.3}$ महात्मभिः ( for मनीषिणः ). —$M_4$ om. lines 2566–2568. —( L. 2566 ) T आहुतिं; $G_2$ आहुतीं ( for °तिर् ). T अग्निश्च; $G_{1.2}$ $M_3$ चा( $G_2$ त्व )ग्नीति ( for अग्नीति ). $G_{1.2}$ कथ्यते; $M_2$ चोच्यते ( for कीर्त्यते ). —$M_2$ om. ( hapl. ) lines 2567–2568. —( L. 2567 ) $G_{1.2}$ तु नयति; $G_3$ $M_3$ नयतीति ( for °ति हि ). T $G_1$ [अ]ग्र्यं. $M_3$ विप्रः. $G_2$ सुपूजितान्. —( L. 2568 ) Madras ed. यस्मात् ( for त° ). $G_{1.2}$ कथ्यते ( for कीर्त्य° ). —( L. 2569 ) $M_4$ तु ( for च ). T दुर्हृतः; $G_3$ दुर्हृदः ( sic ); $M_{2.3}$ जुहुतं ( for दुर्हुतः ). —( L. 2571 ) $M_{2.3}$ एव ( for एष ). —( L. 2572 ) T पावकः प्रभुः; $G_3$ पचनात्प्रभोः; $M_{2.3}$ पावनः प्रभुः; $M_4$ वंचन- ( *sup. lin.* पचन )प्रदः. —( L. 2573 ) $G_3$ सृष्टमात्रे. $M_2$ हर्तुम् ( for अत्तुम् ). $G_3$ [अ]खिलं ( for खलु ). —( L. 2574 ) $M_4$ आहुत्या ( for ततः प्र- ). $G_3$ $M_4$ उपास्यत ( for °स्यैव ). T उपासा( $T_2$ °सी )नो मया पुनः ( for the post. half ). —( L. 2575 ) $M_4$ पूर्वम् ( for सोऽयम् ). $G_2$ औपासनमिति स्मृतं ( for the post. half ). —( L. 2576 ) $M_2$ पूर्वम् ( for सर्वम् ). T आख्याता; $G_{1.2}$ °ति. —( L. 2577 ) $T_1$ अवधार्य ( for आवसथ्य ). —( L. 2580 ) Madras ed. तेन ( for ते च ). —( L. 2581 ) $G_1$ गत्वा ( for गता ). —( L. 2582 ) $T_2$ तं; $M_4$ तु ( for the second च ). —( L. 2583 ) $M_{3.4}$ वैश्वदेवं ( for °देवश् ). —( L. 2584 ) $T_2$ $G_3$ $M_3$ गार्ह्यं. $M_{2.4}$ स्थालीपाकश्च गृ( $M_2$ °कादिगृ )ह्याश्च ( for the prior half ). T $G_1$ [ऽ]पि;

गृह्यकर्मवहो यस्मात्तस्माद्गृहपतिस्तु सः । [ 2585 ]
औपासनं चावसथ्यं सभ्यं पचनपावकम् ।
आहुर्ब्रह्मविदः केचिन्मतमेतन्ममापि च ।
अग्निहोत्रप्रकारं तु शृणु राजन्समाहितः ।
त्रयाणां गुणनामानि वह्नीनामुच्यते मया ।
गृहाणां हि पतित्वं हि गृहपत्यमिति स्मृतम् । [ 2590 ]
गृहपत्यं तु यस्यासीत्तस्यासीद्गार्हपत्यता ।
यजमानं तु यस्मात्तु दक्षिणां तु गतिं नयेत् ।
दक्षिणाग्निं तमाहुस्तं दक्षिणायतनं द्विजाः ।
आहुतिः सर्वमाख्यातं हवनं हव्यवाहनम् ।
सर्वहव्यवहो वह्निर्गतश्चाहवनीयताम् । [ 2595 ]
यस्त्वावसथ्यं जुहुयान्मूलाग्निं विधिवद्द्विजः ।
आवसथ्यं तु ये चाग्निं पचनाग्निं प्रचक्षते ।
तेषां स भागतो वह्निः सभ्य इत्यभिधीयते ।
आवसथ्यस्तु यो वह्निः प्रथमः स प्रजापतिः ।
ब्रह्मा च गार्हपत्योऽग्निस्तस्मादेव तु सो भवेत् । [ 2600 ]
दक्षिणाग्निस्त्वयं रुद्रः क्रोधात्मा चण्ड एव सः ।
अहमाहवनीयोऽग्निरा होमाद्यस्य वै मुखे ।
सभ्योऽग्निः पञ्चमो यस्तु स्कन्द एव नराधिप ।
पृथिवी गार्हपत्योऽग्निरन्तरिक्षं च दक्षिणः ।
स्वर्ग आहवनीयोऽग्निरेवमग्नित्रयं स्मृतम् । [ 2605 ]
वृत्तो हि गार्हपत्योऽग्निर्यस्माद्वृत्ता च मेदिनी ।
अर्धचन्द्राकृतिः खं वै दक्षिणाग्निस्तथा भवेत् ।
चतुरश्रं ततः स्वर्गं निर्मलं यन्निरामयम् ।
तस्मादाहवनीयोऽग्निश्चतुरश्रो भवेन्नृप ।
जुहुयाद्गार्हपत्यं यो भुवं जयति स द्विजः । [ 2610 ]
जुहोति दक्षिणाग्निं यः स जयत्यन्तरिक्षकम् ।
पृथिवीमन्तरिक्षं च दिवं चर्षिगणैः सह ।
जयत्याहवनीयं यो जुहुयाद्भक्तिमान्द्विजः ।
आभिमुख्येन होमस्तु यस्य यज्ञेषु वर्तते ।
तेनाप्याहवनीयत्वं गतो वह्निर्महाद्युतिः । [ 2615 ]
आ होमाद्योऽग्निहोत्रेषु यज्ञे वा यत्र सर्वशः ।
यस्मादस्मिन्प्रवर्तन्ते ततो ह्याहवनीयता ।
यस्त्वावसथ्यं जुहुयान्मूलाग्निं विधिवद्द्विजः ।
स तु सप्तर्षिलोकेषु सपत्नीकः प्रमोदते ।
यश्चाप्युपासते सभ्यं विधिवत्प्रयतात्मवान् । [ 2620 ]

---

$G_{2}$ $M_{3}$ च ( for हि ). — ( L. 2585 ) T $G_{1}$ -कर्मवशो ; $M_{4}$ °सहो ( for °वहो ). T $G_{1}$ स्मृतः ( for तु सः ). — ( L. 2586 ) T गार्ह्यं ; $G_{3}$ सह्यं ; $M_{2}$ गृह्यं ( for सभ्यं ). — ( L. 2588 ) $G_{2}$ -प्रकारं च ; $G_{3}$ -प्रमाणं तु ; $M_{3}$ -प्रकरणं. — ( L. 2589 ) T $G_{1}$ सदा ( for मया ). -- ( L. 2590 ) $M_{2}$ गार्हपत्यम् ( for गृह° ). — ( L. 2591 ) T [अ]स्ति ( for [आ]सीत् ). $G_{1}$ तस्मा*द् ; $G_{2}$ तस्मात्तद् ; $M_{2.4}$ तस्य तद् ; $M_{3}$ स तस्माद् ; Madras ed. तत्तस्माद् ( for तस्यासीद् ). — ( L. 2592 ) T यश्चाग्निर् ( for यस्मात्तु ). $M_{4}$ यजमानस्य यस्माद्धि ( for the prior half ). — ( L. 2593 ) $M_{2}$ तद् ( for तम् ). T $G_{2}$ तद् ; $M_{4}$ तु ; Madras ed. ते ( for the second तं ). $M_{2.3}$ ( *sup. lin.* as above ) दाक्षिणत्वाच्च तद्विदः ( for the post. half ). — ( L. 2594 ) $T_{1}$ आख्याता ; $T_{2}$ $G_{2}$ °ति. $G_{2}$ पचनं ; $M_{2.3}$ वहनं ( for हवनं ). Madras ed. हव्यं वै वहनं स्मृतं ( for the post. half ). — After line 2595, $M_{2}$ reads lines 2614-2617. $M_{2-4}$ om. line 2596. — ( L. 2596 ) $G_{2}$ यद्वा ( for यस्तु ). — $G_{3}$ om. ( hapl. ) lines 2597–2618. — ( L. 2597 ) T आवसथ्ये. $T_{1}$ यश्चापि ; $T_{2}$ $G_{2}$ यश्चाग्निः ( $G_{2}$ °ग्निं ) ; Madras ed. तं चाग्निं. $M_{2}$ पाचनाग्निं. — ( L. 2598 ) $G_{1.2}$ सभ्यम्. — ( L. 2600 ) $M_{2}$ वै ; $M_{4}$ तु ( for च ). $G_{1.2}$ तस्मिन् ( for तस्माद् ). $G_{1.2}$ $M_{2}$ हि ( for तु ). $T_{1}$ $G_{1}$ $M_{4}$ [ऽ]भवत् ( for भवेत् ). — ( L. 2601 ) $G_{1}$ $M_{2.3}$ स्वयं ( for त्वयं ). $M_{4}$ च ( for सः ). — ( L. 2603 ) $M_{2.4}$ सभ्याग्निः. $T_{2}$ [ऽ]ग्निस् ( for यस् ). — ( L. 2604 ) $G_{2}$ दाक्षिणं ; $M_{2}$ °णा. — ( L. 2605 ) $G_{1.2}$ $M_{2-4}$ स्वर्गम्. — ( L. 2606 ) $G_{2}$ [ऽ]यं ; $M_{2}$ वै ; $M_{4}$ च ( for हि ). — ( L. 2607 ) T द्यौर् ( for खं ). — ( L. 2608 ) $M_{2.3}$ ( *inf. lin.* ) भवेद् ( for ततः ). Madras ed. तु ( for यन् ). $M_{3}$ निराश्रयं ( for °मयम् ). T चतुरश्रो यतः स्वर्गो निर्मितोयं निरामयः. — ( L. 2609 ) T विधीयते ( for भवेन्नृप ). — ( L. 2610 ) T जुहुयाद्गार्हपत्याग्नौ यो भुवं जयते द्विजः. — ( L. 2611 ) $M_{2}$ जुहुयाद् ( for जुहोति ). T जुहोति दक्षिणं यस्तु ( for the prior half ). — ( L. 2612 ) $G_{1.2}$ ऋषिगणैः ( for चर्षि° ). — ( L. 2613 ) T [आ]हवनीयो. $M_{2}$ भक्तितो ; $M_{4}$ शक्तिमान् ( for भक्ति° ). $G_{1}$ नरः ; $M_{2}$ मयि ( for द्विजः ). — ( L. 2615 ) T $M_{4}$ हि ( for [अ]पि ). $M_{3}$ [आ]हवनीयस्तु ( for °यत्वं ). $G_{1}$ महात्मनः ( for °द्युतिः ). — ( L. 2616 ) $G_{2}$ अग्नि- ( for योऽग्नि- ). $M_{3}$ यज्ञो वा ; $M_{4}$ यज्ञा ये ; Madras ed. यज्ञैर्वा ( for यज्ञे वा ). — ( L. 2617 ) $M_{3}$ अग्नि ( for अस्मिन् ). $T_{1}$ स * ; $T_{2}$ तेन ( for ततो ). — ( L. 2618 ) T मुखाग्नि- ( $T_{2}$ °ग्निं ) ( for मूलाग्निं ). — ( L. 2619 ) $M_{2}$ वै ( for तु ). T -लोके तु ( for -लोकेषु ). $M_{3}$ स सप्तऋषिलोकेषु. — ( L. 2620 ) $M_{2}$ [अ]भ्युपासते. — ( L.

जयेत्स वाङ्मयं सर्वं तथा त्वृषिसभामपि ।
अग्नीनामथ वाग्नेस्तु यस्य होमः प्रदीयते ।
इष्टो भवति सर्वाग्नेरग्निहोत्रं च तद्भवेत् ।
त्रयाणां यजमानस्य चातुर्होत्रमिति स्मृतम् ।
हो इत्येव विषादो वै विषादो दुःखमुच्यते । [ 2625 ]
दुःखं तापत्रयं प्रोक्तं तापं हि नरकं विदुः ।
तस्माद्धै त्रायते दुःखाद्यजमानं हुतोऽनलः ।
तस्मात्तु विधिवत्प्रोक्तमग्निहोत्रमिति श्रुतौ ।
तदग्निहोत्रं सृष्टं वै ब्रह्मणा लोककर्तृणा ।
वेदाश्चाप्यग्निहोत्रार्थं जज्ञिरे स्वयमेव तु । [ 2630 ]
अग्निहोत्रफला वेदा शीलवृत्तफलं श्रुतम् ।
रतिपुत्रफला दारा दानभोगफलं धनम् ।
त्रिवेदमन्त्रसंयोगादग्निहोत्रं प्रवर्तते ।
ऋग्यजुःसामभिः पुण्यैः स्थाप्यते सूत्रसंयुतैः ।
वसन्ते ब्राह्मणस्य स्यादाधेयोऽग्निर्नराधिप । [ 2635 ]
वसन्तो ब्राह्मणः प्रोक्तो वेदयोनिः स उच्यते ।
अग्न्याधेयं तु येनाथ वसन्ते क्रियते नृप ।
तस्य श्रीर्ब्रह्मवृद्धिश्च ब्राह्मणस्य विवर्धते ।
क्षत्रियस्याग्निराधेयो ग्रीष्मे श्रेष्ठः स वै नृप ।
येनाधानं तु वै ग्रीष्मे क्रियते तस्य वर्धते । [ 2640 ]
श्रीः प्रजाः पशवश्चैव वित्तं तेजो बलं यशः ।
शरद्रात्रेऽथ वैश्यस्य ह्याधानीयो हुताशनः ।
शरद्रात्रं स्वयं वैश्यो वैश्ययोनिः स उच्यते ।
शरद्याधानमेवं वै क्रियते येन पाण्डव ।
तस्यापि श्रीः प्रजायुश्च पशवोऽर्थश्च वर्धते । [ 2645 ]
पशवः सर्व एवैते त्रिभिर्वेदैरलंकृताः ।
अग्निहोत्रात्प्रवर्तन्ते यैरिदं ध्रियते जगत् ।
ग्राम्यारण्याश्च पशवस्तथा वृक्षास्तृणानि च ।
फलान्योषधयश्चापि ह्यग्निहोत्रकृते हि ताः ।
रसाः स्नेहास्तथा गन्धा रत्नानि मणयस्तथा । [ 2650 ]
काञ्चनानि च लोहानि ह्यग्निहोत्रकृतेऽभवन् ।
आयुर्वेदो धनुर्वेदो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं च तत्सर्वमग्निहोत्रकृते कृतम् ।
छन्दः शिक्षाश्च कल्पाश्च तथा व्याकरणं नृप ।

---

2621 ) $G_2$ $M_{2-4}$ स जयेद् ( by transp. ); $G_3$ स जयो. $M_{2.3}$ यामयं ; $M_4$ दुर्जयं ( for वाङ्मयं ). $G_2$ ह्यपि ( for सर्वं ). $G_{1.2}$ तथा ऋषि- ; $M_2$ तथाप्यृषि- ; $M_3$ तथा चर्षि- ( for तथा त्वृषि- ). —( L. 2622 ) $M_2$ यतो ( for यस्य ). $M_{3.4}$ प्रतीयते ( for प्रदी° ). — $G_1$ om. lines 2623–2625. —( L. 2623 ) $G_2$ $M_{2-4}$ सर्वा( $M_4$ °र्वो )ग्निर्. —( L. 2624 ) $G_2$ त्राणाद्धै ; $M_2$ त्रासाद्धै ; $M_3$ (*sup. lin.* as above) त्रासनाद्धै ( hypermetric ) ; Madras ed. त्राणाय ( for त्रयाणां ). $M_{2-4}$ चाग्निहोत्रम् ( for चातुर्हो° ). $M_2$ अतिस्मृतः ( for इति स्मृतम् ). —( L. 2625 ) $G_{2.3}$ $M_4$ हो इत्येष ; Kumbh. ed. हो इज्येषु. $G_3$ विवादो ( for विषादो ). —( L. 2626 ) T $G_{1.2}$ तावत्रयं ( for तापत्रयं ). $M_4$ च ( for हि ). —After line 2626, $G_{1.2}$ $M_3$ ins. :

आध्यात्मिकं चाधिदैवमाधिभौतिकमेव च ।
एतत्तापत्रयं प्रोक्तमात्मविद्भिः परंतप ।
[ ( L. 1 ) $G_2$ आधिभूतिकम्. ]

—( L. 2627 ) $G_{1.2}$ $M_3$ यस्माद्. —( L. 2628 ) $G_3$ श्रुतं. —( L. 2630) $G_1$ -होत्राश्च ( sic ); $G_2$ -होत्रं च ; $G_3$ होत्रात्तु ; $M_3$ (*sup. lin.*) -होत्रं तु ( for -होत्रार्थं ). —( L. 2632 ) $G_3$ $M_{2-4}$ नारी ( for दारा ). $T_1$ धानाभोग- ; $G_{1.2}$ दत्तभुक्त- ; $M_4$ दानहोम- ( for °भोग- ). —( L. 2633 ) $G_3$ $M_{2.3}$ प्रचक्षते ( for प्रवर्तते ). —( L. 2635 ) T $G_2$ [आ]दाव् ( for स्याद् ). —( L. 2636 ) $G_{1.2}$ $M_3$ ज्ञेयो ( for प्रोक्तो ). $M_{2.3}$ ब्रह्म- ( for वेद- ). —( L. 2637 ) $M_2$ अग्निर्धानं ( sic ); $M_4$ अग्न्याधानं ( for °धेयं ). $G_{1.2}$ [ऽ]नघ ( for नृप ). —( L. 2638 ) $M_2$ -पुष्टिश् ( for -वृद्धिश् ). $G_3$ ब्राह्मणं स ( for °णस्य ). —( L. 2639 ) $T_2$ $G_{1.3}$ श्रेष्ठे. T तथैव च ; $M_2$ स उच्यते ( for स वै नृप ). —( L. 2640 ) $M_3$ योऽग्न्याधानं ( for येना° ). —( L. 2641 ) T $G_3$ $M_3$ ( *sup, lin.* ) प्रज्ञा ( for प्रजाः ). —( L. 2642 ) $T_2$ शरद्रात्रौ ; $G_{1.2}$ °द्रुतौ ; $G_3$ °त्प्राते ( for °द्रात्रे ). T $G_{1.2}$ तु ( for ऽथ ). T $G_1$ [अ]पि ( for हि ). $G_1$ [आ]धानयो ( sic ); $M_4$ [ अ ]ग्न्याधेयो ( for [ आ ]धानीयो ). —( L. 2643 ) $T_1$ $M_1$ शरद्रात्रः ; $T_2$ °द्रात्रिः ; $G_3$ °द्रात्रीः ( for °द्रात्रं ). —( L. 2644 ) $M_4$ चैव ( for येन ). —( L. 2645 ) $G_{2.3}$ $M_3$ [आ]युः ( for [अ]पि ). $G_3$ $M_3$ प्रजापुष्टिः ; $M_2$ °श्चायुः ( for °युश्च ). T चैव ( for ऽर्थश्च ). —( L. 2647 ) $T_2$ तैरेव ( for यैरिदं ). $G_3$ यैरिंद्रियगतैर्जगत् ; $M_2$ यैरिदं प्रीयते ज° (for the post. half). —( L. 2648 ) $M_2$ वृक्ष- ( for वृक्षास् ). —( L. 2649 ) $M_{2.3}$ [औ]षधयश्. $M_4$ फलानि च बहून्यासन् ( for the prior half ). $G_1$ $M_4$ अग्नि- ; $M_{2.3}$ चाग्नि- ( for ह्यग्नि- ). $M_3$ -होत्रे. $G_2$ हविः ; $G_3$ च ताः ; $M_2$ कृतं ; $M_3$ च हि ( for हि ताः ). —( L. 2651 ) $M_2$ कांचनाद्यानि ( for °नि च ). $M_{2.3}$ च ( for हि ). $T_2$ $G_3$ $M_2$ भवेत् ; $G_1$ कृतं ( for ऽभवन् ). — $M_2$ om. lines 2652–2653. —( L. 2652 ) Lacuna in $G_1$ for the prior half. $M_4$ वेदाश्चैव च सर्वशः ( for the post. half ). —( L. 2654 ) $T_2$ $G_1$ $M_{3.4}$ शिक्षा. $T_2$ कल्पश् ; $G_1$ कल्पं. $G_{1.2}$ तथा व्याकर-

शास्त्रं ज्योतिर्निरुक्तं चाप्यग्निहोत्रकृते कृतम् ।
इतिहासपुराणं च गाथाश्चोपनिषत्तथा ।
आथर्वणानि कर्माणि चाग्निहोत्रकृते कृतम् ।
यच्चैतस्यां पृथिव्यां हि किंचिदस्ति चराचरम् ।
तत्सर्वमग्निहोत्रस्य कृते सृष्टं स्वयंभुवा ।
अग्निहोत्रस्य दर्शस्य पौर्णमासस्य चाप्यथ ।
यूपेष्टिपशुबन्धानां सोमपानक्रियावताम् ।
तिथिनक्षत्रयोगानां मुहूर्तकरणात्मनाम् ।
कालस्य वेदनार्थं तु ज्योतिर्ज्ञानं कृतं पुरा ।
ऋग्यजुःसाममन्त्राणां श्लोकतत्त्वार्थचिन्तनात् ।
प्रत्यापत्तिविकल्पानां छन्दो ज्ञानं प्रकल्पितम् ।
वर्णाक्षरपदार्थानां संधिलिङ्गं विवक्षितम् ।
नामधातुविवेकार्थं पुरा व्याकरणं कृतम् ।
यूपवेद्यध्वरार्थं तु प्रोक्षणश्रवणाय तु ।
यज्ञदैवतयोगार्थं शिक्षाज्ञानं प्रकल्पितम् ।
यज्ञपात्रपवित्रार्थं द्रव्यसंभारणाय च ।
सर्वयज्ञविकल्पाय पुराकल्पं प्रकल्पितम् ।
नामधातुविभक्तीनां तत्त्वार्थनियमाय च ।
सर्ववेदनिरुक्तानां निरुक्तमृषिभिः कृतम् ।
वेद्यर्थं पृथिवी सृष्टा संभारार्थं तथैव च ।
इध्मार्थमथ यूपार्थं ब्रह्मा चक्रे वनस्पतिम् ।
ग्राम्यारण्याश्च पशवो जायन्ते यज्ञकारणात् ।
मन्त्राणां विनियोगं च प्रोषिता श्रावणं तथा ।
अनूयाजप्रयाजांश्च मरुतां शंसिनस्तथा ।
उद्गातॄंश्चैव साम्नां वै बलिप्रस्थानमेव च ।
विष्णुक्रमाणां क्रमणं दक्षिणावभृथं तथा ।
त्रिकालमर्चनं चैव स्थानेषूपहृतं तथा ।
देवताग्रहणं मोक्षं हविषां श्रवणं तथा ।
नावबुध्यन्ति ये विप्रा निन्दन्ति च पशोर्वधम् ।
ते यान्ति नरकं घोरं रौरवं तमसावृतम् ।
शतवर्षसहस्राणि तत्र स्थित्वा नराधमाः ।
क्रिमिभिर्भक्ष्यमाणाश्च तिष्ठेयुः पूयशोणिते ।
यूपास्तु मन्त्रसंस्कारैरेषां वै पशवस्तथा ।
यजमानेन सहिताः स्वर्गं यान्ति नरेश्वर ।
यावत्कालं हि यज्वा वै स्वर्गलोके महीयते ।
तावत्कालं प्रमोदन्ते पशवो ह्यध्वरे हताः ।

---

णानि च. — ( L. 2655 ) Lacuna in $G_1$. $T_2$ $G_3$ $M_2$ ज्योतिर्ज्ञानं ; $M_4$ ज्योतिःशास्त्रं. T हि ; $M_2$ om. ( for [अ]पि ). $M_2$ भवेत् ( for कृतम् ). — ( L. 2656 ) $M_{3.4}$ इतिहासः. $T_1$ $G_1$ $M_2$ -पुराणाश्. $M_3$ वा ( for the second च ). — ( L. 2657 ) $G_{1.3}$ अथर्वणानि. $M_2$ भवेत् ( for कृतम् ). — ( L. 2658 ) T [ए]तत्स्यात् ; $G_1$ $M_4$ तस्यां ( for [ए]तस्यां ). $G_3$ तु ( for हि ). — ( L. 2660 ) $M_3$ पूर्णमासस्य. — ( L. 2662 ) $G_1$ -करणात्मिकः ; $G_2$ °णात्मकं. — ( L. 2663 ) $M_2$ कालसं- ( for कालस्य ). T तज् ( for तु ). $M_4$ om. (hapl.) from the post. half up to the prior half of line 2668. $G_1$ ज्योतिर्ज्ञानि- ( for °र्ज्ञानं ). — ( L. 2665 ) $M_2$ -विकल्पार्थं. T शब्द- ( for छन्दो ). — After line 2665, T reads lines 2670–2672. — ( L. 2666 ) $M_3$ संधि. $G_2$ -लिंग-. $T_2$ संधिलिंगविवक्षतुः ; $G_1$ °गविवक्षितां ; $M_2$ °गविभक्तितः ( for the post. half ). — ( L. 2667 ) T -विकल्पार्थम् ; $M_2$ -विधेयार्थं ( for -विवेकार्थं ). T इदं ( for पुरा ). $G_{1.2}$ पुराणकरणं स्मृतं ( for the post. half ). — ( L. 2668 ) $M_2$ यूपवेदाध्वरार्थं तु ; $M_3$ °वेद्यस्वरार्थं तु ( for the prior half ). T $M_2$ प्रोक्षणश्रा- ( $M_2$ °णं श्रा )वणाय तु ; $G_1$ °णाश्रवणादिकं ; $G_3$ $M_3$ °णाश्रवणाय तु. — ( L. 2670 ) $G_{2.3}$ $M_4$ -संभरणाय. — ( L. 2671 ) $M_2$ -विकल्पार्थं ( for °ल्पाय ). — ( L. 2672 ) $G_1$ नानाधातु- ( for नाम° ). $G_{1.2}$ -विकल्पानां ; $M_3$ -विभक्तानां. $M_4$ तत्त्वार्थं. $G_1$ -नियमानि ( for °माय ). — ( L. 2674 ) $G_3$ विद्धि तां ; $M_3$ पृथिवीं. $G_3$ $M_4$ सृष्टा. — ( L. 2675 ) T स्रुगर्थम् ; $G_1$ $M_4$ इज्यार्थम् ( for इध्मा° ). $G_3$ सर्व- ( for अथ ). $M_{2.4}$ वनस्पतीन्. — ( L. 2676 ) $M_2$ सूयंते ( for जा° ). $M_4$ याग- ( for यज्ञ- ). — ( L. 2677 ) $T_1$ प्रेषितं श्रवणं ; $T_2$ $M_{3.4}$ प्रेषिताश्रा( $M_3$ °श्र )- वणं ; $G_{1.2}$ प्रेक्षितश्राप( $G_2$ °व )कं ; Madras ed. प्रेषित- श्रवणं. — ( L. 2678 ) $T_1$ $G_3$ अनुज्याजांश्च मरुतां ; $G_1$ अनूज्याजाश्च प्रयाजाश्च ( hypermetric ) ( for the prior half ). T $M_4$ शंसनं ( for शंसिनस् ). — ( L. 2679 ) $M_3$ उद्गात्रं ; $M_4$ उद्गातुश् ( for °तॄंश् ). $M_2$ उद्गातृत्वं च साम्नां वै ( for the prior half ). $G_2$ प्रति- ( for बलि- ). — After line 2679, $T_1$ reads lines 2682–2684, repeating lines 2683–2684 after line 2681. — ( L. 2680 ) $G_3$ क्रमणाद् ( for °णं ). $M_4$ दक्षिणावभृथस्. — ( L. 2681 ) $M_4$ [उ]पभृतं ( for °हृतं ). — ( L. 2682 ) $M_2$ -श्रवणं ( for -ग्रहणं ). $T_1$ चैव ( for मोक्षं ). $G_1$ $M_4$ श्रपणं ( for श्रवणं ). — ( L. 2685 ) $G_1$ शतं. $M_3$ तत्र ( for स्थित्वा ). — ( L. 2686 ) T ते ( for च ). — After line 2686, $G_{1.2}$ read lines 2690–2695. — ( L. 2687 ) $M_2$ ओषध्या ; $M_3$ रक्षां वै ( for एषां वै ). — ( L. 2688 ) T $G_1$ साहितः. — ( L. 2689 ) $T_1$ यज्या. $M_4$ स्वर्गं ( for -स्वर्ग ). — After line 2689, $G_{1.2}$ ins. :

वृक्षा यूपत्वमिच्छन्ति पशुत्वं पशवस्तथा ।
तृणानीच्छन्ति दर्भत्वमोषध्यश्च हविष्यताम् ।
सोमत्वं च लताः सर्वा वेदित्वं वै वसुंधरा ।
यस्मात्पशुत्वमिच्छन्ति पशवः स्वर्गलिप्सया ।
तस्मात्पशुवधे हिंसा नास्ति यज्ञेषु पाण्डव । [ 2695 ]
अहिंसा वैदिकं कर्म ब्रह्मकर्मेति तत्स्मृतम् ।
वेदोक्तं ये न कुर्वन्ति हिंसाबुद्ध्या क्रतुं द्विजाः ।
सद्यः शूद्रत्वमायान्ति प्रेत्य चण्डालतामपि ।
गावो यज्ञार्थमुत्पन्ना दक्षिणार्थं तथैव च ।
सुवर्णं रजतं चैव पात्री कुम्भार्थमेव च । [ 2700 ]
दर्भाः संस्तरणार्थं तु रक्षसां रक्षणाय च ।
यजनार्थं द्विजाः सृष्टास्तारका दिवि देवताः ।
क्षत्रिया रक्षणार्थं तु वैश्या वार्तानिमित्ततः ।
शुश्रूषार्थं त्रयाणां तु शूद्राः सृष्टाः स्वयंभुवा ।
एवमेतज्जगत्सर्वमग्निहोत्रकृते कृतम् । [ 2705 ]
नावबुध्यन्ति ये चैतन्नरास्तु तमसा वृताः ।
ते यान्ति नरकं घोरं रौरवं नाम विश्रुतम् ।
रौरवाद्विप्रमुक्तास्तु क्रिमियोनिं व्रजन्ति ते ।
यथोक्तमग्निहोत्राणां शुश्रूषन्ति च ये द्विजाः ।
तैर्दत्तं सुहुतं चेष्टं दत्तमध्यापितं भवेत् । [ 2710 ]
एवमिष्टं च पूर्तं च यद्विप्रैः क्रियते नृप ।
तत्सर्वं सम्यगाहृत्य चादित्ये स्थापयाम्यहम् ।
मया स्थापितमादित्ये लोकस्य सुकृतं हि तत् ।
धारयेत्तत्सहस्रांशुः सुकृतं ह्यग्निहोत्रिणम् ।
यावत्कालं तु तिष्ठन्ति लोके चाप्यग्निहोत्रिणः । [ 2715 ]
तावत्तेषां हि पुण्येन दीप्यन्ते रविणाम्बरे ।
स्वर्गे स्वर्गं गतानां तु वीर्याद्भवति वीर्यवान् ।
तत्र ते ह्युपयुञ्जन्ति ह्यग्निहोत्रस्य यत्फलम् ।
समानरूपा देवानां तिष्ठन्त्याभूतसंप्लवम् ।
वृथाग्निना च ये केचिद्दह्यन्ते ह्यग्निहोत्रिणः । [ 2720 ]
न तेऽग्निहोत्रिणां लोकं मनसापि व्रजन्ति वै ।
वीरघ्नास्ते दुराचाराः सुदरिद्रा नराधमाः ।
विकला व्याधिताश्चापि जायन्ते शूद्रयोनिषु ।
तस्मादप्रोषितैर्नित्यमग्निहोत्रं द्विजातिभिः ।
होतव्यं विधिवद्राजन्नूर्ध्वमिच्छन्ति ये गतिम् । [ 2725 ]
आत्मवत्तत्र मन्तव्यमग्निहोत्रं युधिष्ठिर ।
न त्याज्यं क्षणमप्येतद्गृहीतव्यं द्विजातिभिः ।
वृद्धत्वेऽप्यग्निहोत्रं वै गृह्णन्ति विधिवद्द्विजाः ।
शूद्रान्नाद्विरता दान्ताः संयतेन्द्रियबुद्धयः ।
पञ्चयज्ञपरा नित्यं क्रोधलोभविवर्जिताः । [ 2730 ]
द्विकालमतिथींश्चैव पूजयन्ति च भक्तितः ।
तेऽपि सूर्योदयप्रख्यैर्विमानैर्वायुवेगिभिः ।

---

तावत्कालं वसेयुस्ते पशवश्चापि हर्षिताः ।

—(L. 2690) $M_4$ हि (for प्र-). —(L. 2692) $G_{1.2}$ बर्हिस्त्वम्; Madras ed. बर्हिष्ट्वम् (for दर्भत्वम्). T वै (for च). —(L. 2693) T सर्वे (sic). $G_3$ $M_4$ च (for वै). —(L. 2696) $G_{1.2}$ तत्कृतं (for तत्स्मृतम्). —(L. 2698) Some MSS. चंडाळताम्. —(L. 2700) $M_4$ [अ]पि (for [ए]व). $G_3$ पात्र- (for पात्री). —(L. 2701) $G_1$ om. (hapl.) from the post. half up to the prior half of line 2703. —(L. 2702) $M_2$ भुवि (for दिवि). —(L. 2705) T $G_3$ एव (for एतज्). —(L. 2706) T ना($T_2$ अ)वजानंति (for °बुध्यन्ति). $M_4$ यच् (for ये). T $G_3$ वेदान्; $G_1$ चैव; $G_2$ चैतं (sic) (for चैतन्). —(L. 2707) T प्र- (for ते). —(L. 2709) $M_2$ -होत्राणि. —(L. 2710) T तु तच्च; $G_3$ $M_{2.4}$ तु दत्तं (for दत्तं सु-). —(L. 2712) T $G_3$ तु समाहृत्य (for सम्यगा°) and आदित्ये (for चा°). —(L. 2713) $T_2$ $M_4$ हि यत्; $G_2$ हितं; $M_{2.3}$ कृतं (for हि तत्). —(L. 2714) $T_2$ $G_3$ स (for तत्). —(L. 2715) T $G_3$ हि (for तु). T $G_3$ $M_3$ लोकाश् (for लोके). —(L. 2716) T तेजोस्य; $G_1$ ते वह्नि-; $G_2$ [ए]व हि; $G_3$ $M_4$ ते बाह्य- (for तेषां हि). $M_{2.3}$ रविरंबरे. —(L. 2717) T $G_3$ $M_3$ न ते; $M_2$ स्वर्गात् (for स्वर्गे). T $G_3$ स्वर्ग- (for स्वर्गं). T नित्याद् (for वीर्याद्). —(L. 2718) $M_4$ [ऽ]भ्युप- (for ह्युप-). $G_{1.2}$ -भुंजंति; $G_3$ -भुंजीत; $M_2$ -युज्यंति. $M_2$ च (for हि). $G_{1.2}$ तत् (for यत्). —(L. 2719) $M_2$ वेदानां (for देवानां). —(L. 2720) T $G_3$ वयं (sic) (for च ये). T वा; $G_3$ च (for हि). —(L. 2721) $M_{2.3}$ हि (for ते). $G_1$ लोके. $M_{2.3}$ ते (for वै). —(L. 2722) T विरक्तास् (for वीरघ्नास्). T मदोद्रिक्ता; $G_{1.2}$ दरिद्रास्तु (for सुदरिद्रा). —(L. 2724) $T_1$ चाप्रोषितैर् (for अप्रो°). T $G_{2.3}$ ह्यग्नि- (for अग्नि-). —(L. 2725) $M_{2.3}$ चेद् (for ये). $T_1$ ऊर्ध्वां गच्छंति ये गतिं (for the post. half). —(L. 2726) $G_{1.2}$ आत्मवन्नावमंतव्यम्; $M_{2.3}$ °जं सत्रमेतत्स्याद् (for the prior half). —(L. 2727) T एतद्धि; $G_{1.2}$ इत्येतद् (for अप्येतद्). $G_1$ प्रगृहीतं; $G_{2.3}$ $M_4$ ग्रहीतव्यं. —(L. 2728) $G_1$ पृथक्त्वे; $M_{2.3}$ वार्धक्ये (for वृद्धत्वे). $G_{1.2}$ $M_{2.3}$ ये (for वै). T पृथक्त्वे त्वग्निहोत्रान्वै. —(L. 2729) T शूद्रान्न- (for °न्नाद्). —(L. 2730) $T_2$ $G_3$ -रता (for -परा). $G_{1.2}$ लोभ-

मम लोके प्रमोदन्ते दृष्ट्वा मां च युधिष्ठिर ।
मन्वन्तरं च तत्रैकं मोदित्वा द्विजसत्तमाः ।
इह मानुष्यके लोके जायन्ते द्विजसत्तमाः । [2735]
बालाहिताग्नयो ये च शूद्रान्नाद्विरताः सदा ।
क्रोधलोभविनिर्मुक्ताः प्रातःस्नानपरायणाः ।
यथोक्तमग्निहोत्रं वै जुह्वते विजितेन्द्रियाः ।
आतिथेयाः सदा सौम्या द्विकालं मत्परायणाः ।
ते यान्त्यपुनरावृत्तिं भित्त्वा चादित्यमण्डलम् । [2740]
मम लोकं सपत्नीका यानैः सूर्योदयप्रभैः ।
तत्र बालार्कसंकाशाः कामगाः कामरूपिणः ।
ऐश्वर्यगुणसंपन्नाः क्रीडन्ति च यथासुखम् ।
इत्येषा ह्याहिताग्नीनां विभूतिः पाण्डुनन्दन ।
ये च देवश्रुतिं केचिन्निन्दमाना ह्यबुद्धयः । [2745]
प्रमाणं न च कुर्वन्ति ते यान्ति ह्यक्षयं तमः ।
प्रमाणमितिहासं च वेदान्कुर्वन्ति ये द्विजाः ।
ते यान्त्यमरसायुज्यं नित्यमास्तिक्यबुद्धयः ।

Colophon.

युधिष्ठिर उवाच ।

चक्रायुध नमस्तेऽस्तु देवेश गरुडध्वज ।
चान्द्रायणविधिं पुण्यमाख्याहि भगवन्मम । [2750]

भगवानुवाच ।

शृणु पाण्डव तत्त्वेन सर्वपापप्रणाशनम् ।
पापिनो येन शुध्यन्ति तत्ते वक्ष्यामि सर्वशः ।
ब्राह्मणः क्षत्रियो वापि वैश्यो वा चरितव्रतः ।
यथावत्कर्तुंकामो यस्तस्येयं प्रथमा क्रिया ।
शोधयेत्तु शरीरं स्वं पञ्चगव्येन यन्त्रितः । [2755]
शरीरं कक्षपक्षान्तं ततः कुर्वीत पावनम् ।
शुद्धवासाः शुचिर्भूत्वा मौञ्जीं बध्नीत मेखलाम् ।
पालाशदण्डमादाय ब्रह्मचारिव्रते स्थितः ।
कृतोपवासः पूर्वं तु शुक्लप्रतिपदि द्विजः ।
नदीसंगमतीर्थेषु शुचौ देशे गृहेऽपि वा । [2760]
गोमयेनोपलिप्तेऽथ स्थण्डिलेऽग्निं निधापयेत् ।
आघारावाज्यभागौ च प्रणवं व्याहृतीस्तथा ।
वारुणैश्चापि पञ्चैव हुत्वा सर्वान्यथाक्रमम् ।
सत्याय विष्णवे चेति ब्रह्मर्षिभ्योऽथ ब्रह्मणे ।

---

क्रोध-. —(L. 2731) G$_3$ M$_{2.3}$ अतिथिं. T$_1$ भोजयंति (for पूज°). M$_{2.3}$ स (for च). G$_2$ भक्षितः; M$_{2.3}$ शक्तितः (for भक्तितः). —(L. 2734) T$_1$ G$_2$ मोदिता; G$_1$ मुदिता; M$_4$ मोदंते. —M$_4$ om. (hapl.) line 2735. —(L. 2735) T G$_3$ M$_2$ भवंति (for जायन्ते). M$_2$ -पुंगवाः (for -सत्तमाः). —(L. 2736) T शीलाहिताग्नयो (for बाला°). —(L. 2737) G$_2$ व्रत- (for प्रातः-). —(L. 2738) G$_1$ जुह्वंति. M$_{2.3}$ संयतेंद्रियाः (for विजि°). M$_4$ ये जुह्वंति जितेंद्रियाः. —(L. 2739) G$_1$ अतिथेयाः. T सम्यग्; G$_3$ सौख्या (sic) (for सौम्या). T$_1$ नारायणपरायणाः; T$_2$ चांद्रायण° (for the post. half). —(L. 2740) G$_2$ सूर्यस्य (for चादित्य-). —(L. 2742) T G$_3$ -चारिणः (for -रूपिणः). —(L. 2743) T G$_3$ -सुख- (for -गुण-). T क्रीडंते. —(L. 2744) M$_4$ श्रुतैषा (for इत्येषा). T$_1$ G$_1$ इत्येषाभ्या(G$_1$ °मा)हिताग्नीनां. —(L. 2745) G$_{1.2}$ श्रुतिं केचिन्निंद(G$_2$ °द्य)माना श्रुतिं दूष्यंत्यबुद्धयः. —(L. 2746) T प्र- (for च). T$_2$ ये (for ते). M$_3$ [इ]ह (for हि). G$_{1.2}$ ते यांतीहापि दुर्गतिं (for the post. half). —(L. 2747) G$_1$ सर्वांश्च; G$_2$ सर्वान्हि (for कुर्वन्ति). M$_{2.3}$ वेदान्विप्रांस्तथाध्वरान् (for the post. half). —Colophon. —*Sub-parvan:* T M$_{2.4}$ श्री(T$_1$ om. श्री)वैष्णवधर्मशास्त्र; G$_3$ धर्मशास्त्र; M$_3$ विष्णुधर्म. —*Adhy. name:* M$_{2-4}$ अग्निहोत्रप्रशंसा(M$_3$ °शंसनं). —*Adhy. no.:* T$_1$ 99; T$_2$ 108; G$_{1.2}$ M$_4$ 98; G$_3$ 109; M$_2$ 15; M$_3$ 97. —(L. 2749) T योगेश (for देवेश). —(L. 2750) M$_4$ चंद्रायण-. T पुरुषोत्तम (for भगवन्मम). —(L. 2751) M$_3$ सत्येन (for तत्त्वेन). —(L. 2753) M$_{2.3}$ वैश्यः शूद्रो (for वापि वैश्यो). —(L. 2754) T$_2$ [ऽ]यं (for यस्). T$_2$ यन्मन्ये (for तस्येयं). T प्रथम- (for °मा). —(L. 2755) T$_1$ शोधयेत्स्वं शरीरं तु; T$_2$ °त्स्वशरीरे त्वत् (for the prior half). M$_3$ मंत्रितः. G$_3$ पंचगव्यैरतंत्रितः. —(L. 2756) G$_2$ सशिरः (for शरीरं). T G$_3$ कक्षपक्षौ (G$_3$ °रक्षां) ततः कुर्वन्; G$_1$ M$_4$ Madras ed. साशिरः कृष्णपक्षांते (G$_1$ °क्षौ तु; M$_4$ [*inf. lin.*] °क्षस्य; Madras ed. °क्षे तु (for the prior half). M$_{2.3}$ कुर्यात्तु (for कुर्वीत). G$_2$ M$_4$ (*sup. lin.*) वापन (for पावनम्). T G$_3$ शिरसो वपनं तथा (for the post. half). —(L. 2757) G$_{1.2}$ शुक्लवासाः (for शुद्ध°). —(L. 2758) M$_3$ पलाश-; M$_4$ पालाशं. G$_1$ M$_4$ ब्रह्मचारी. —(L. 2759) M$_{2-4}$ -प्रतिपदं. T द्विजाः. —(L. 2760) G$_3$ -देशेषु (for -तीर्थेषु). T नदीषु समदेशेषु (for the prior half). —(L. 2761) G$_3$ -लिप्तेन (for -लिप्तेऽथ). —(L. 2762) T M$_{2-4}$ प्रणव-. T G$_3$ M$_4$ व्याहृतिं. —(L. 2763) G$_{1.2}$ M$_{3.4}$ वारुणं (M$_4$ °णां) (for °णैश्च्). M$_{2.3}$ [अ]थ; M$_4$ [ए]वं (for [ए]व). —(L. 2764) T M$_{2.3}$

विश्वेभ्यश्चैव देवेभ्यः प्रजापतय एव च । [ 2765 ]
षट्कृत्वो जुहुयात्पश्चात्प्रायश्चित्ताहुतिं द्विजः ।
ततः समापयेदग्निं शान्तिं कृत्वाथ पौष्टिकम् ।
प्रणम्याग्निं च सोमं च भस्म धृत्वा तथात्मनि ।
नदीं गत्वा विविक्तात्मा सोमाय वरुणाय च ।
आदित्याय नमस्कृत्वा ततः स्नायात्समाहितः । [ 2770 ]
उत्तीर्योदकमाचम्य त्वासीनः पूर्वतोमुखः ।
प्राणायामं ततः कृत्वा पवित्रैरभिषेचनम् ।
आचान्तस्त्वभिवीक्षेत चोर्ध्वबाहुर्दिवाकरम् ।
कृताञ्जलिपुटः पश्चात्कुर्याच्चैव प्रदक्षिणम् ।
नारायणं वा रुद्रं वा ब्रह्माणमथ वापि वा । [ 2775 ]
वारुणं मन्त्रसूक्तं वा प्राग्भोजनमथापि वा ।
वीरघ्नमृषभं वापि तथा चाप्यघमर्षणम् ।
गायत्रीं मम वा देवीं सावित्रीं वा जपेत्ततः ।
ततश्चाष्टादशं वापि सहस्रमथ वापरम् ।
ततो मध्याह्नकाले वै पायसं यावकं हि वा । [ 2780 ]
पाचयित्वा प्रयत्नेन प्रयतः सुसमाहितः ।
पात्रं तु सुसमादाय सौवर्णं राजतं तु वा ।
ताम्रं वा मृन्मयं वापि औदुम्बरमथापि वा ।
वृक्षाणां याज्ञियानां तु पर्णैरार्द्रैरकुत्सितैः ।
पुटकेन तु गुप्तेन चरेद्भैक्षं समाहितः । [ 2785 ]
ब्राह्मणानां गृहाणां तु सप्तानां नापरं व्रजेत् ।
गोदोहमात्रं तिष्ठेत्तु वाग्यतः संयतेन्द्रियः ।
न हसेच्च न वीक्षेच्च नाभिभाषेत वा स्त्रियम् ।
दृष्ट्वा मूत्रं पुरीषं च चण्डालं वा रजस्वलाम् ।
पतितं च तथा श्वानमादित्यमवलोकयेत् । [ 2790 ]
यो हि पादुकमारुह्य सर्वदा प्रचरेद्द्विजः ।
तं दृष्ट्वा पापकर्माणमादित्यमवलोकयेत् ।
ततस्त्वावसथं प्राप्तो भिक्षां निक्षिप्य भूतले ।
प्रक्षाल्य पादावा जान्वोर्हस्तावाकूर्परं पुनः ।
आचम्य वारिणा तेन वह्निं विप्रांश्च पूजयेत् । [ 2795 ]
पञ्च सप्ताथ वा कुर्याद्भागान्भैक्षस्य तस्य वै ।
तेषामन्यतमं पिण्डमादित्याय निवेदयेत् ।
ब्रह्मणे चाग्नये चैव सोमाय वरुणाय च ।
विश्वेभ्यश्चैव देवेभ्यो दद्यादन्नं यथाक्रमम् ।
अवशिष्टमथैकं तु वक्त्रमात्रं प्रकल्पयेत् । [ 2800 ]
अङ्गुल्यग्रे स्थितं पिण्डं गायत्र्या चाभिमन्त्रयेत् ।
अङ्गुलीभिस्त्रिभिः पिण्डं प्राश्नीयात्प्राङ्मुखः शुचिः ।

---

[ए]व ( for [इ]ति ). T $G_3$ [ऽ]पि ( for ऽथ ). — ( L. 2765 ) $M_{2,3}$ [अ]पि ( for [ए]व ). $G_{1,2}$ $M_4$ [ऽ]थ प्रजापतये तथा ; $M_{2,3}$ स प्रजापतयेपि च ( for the post. half ). — ( L. 2766 ) $G_1$ $M_{2,3}$ षट्कृत्वा ; $M_4$ षड्हुत्वा. T $M_4$ प्रायश्चिताहुतीर्. T $G_1$ $M_3$ द्विजाः. — ( L. 2767 ) $G_2$ अग्नौ. $G_3$ $M_4$ पौष्टिकीं. — ( L. 2768 ) $G_{1,2}$ चाग्निं ( by transp. ). $G_{1,2}$ $M_3$ दिग्ध्वा ; $G_3$ $M_4$ दत्त्वा ; $M_2$ दिग्धं ( for धृत्वा ). $G_{1,2}$ यथात्मानि ; $G_3$ [अ]थ वर्त्मनि. — ( L. 2769 ) $G_{1,2}$ विशुद्धात्मा ; $G_3$ विविक्तांतां ; $M_{2,3}$ °क्तांता ; $M_4$ विमुक्ताय ( *sup. lin.* °त्मा ) ( for विविक्तात्मा ). — ( L. 2770 ) $M_4$ समावृतः ( for °हितः ). — ( L. 2771 ) $G_{1,2}$ चासीनः ; $M_{2-4}$ स्वा° ( for त्वा° ). $M_4$ पूर्वतोमुखं. — ( L. 2773 ) $G_{1,2}$ om. च. — ( L. 2774 ) $G_{1,2}$ स्थित्वा ( for पश्चात् ). — ( L. 2775 ) $G_1$ च ( for the third वा ). T $G_3$ स्वाध्यायं ( $T_1$ ब्रह्माणं ) ब्राह्मणं तथा ; $M_4$ [अ]प्यथ स्वाध्यायमेव वा ( for the post. half ). — ( L. 2776 ) $M_{2-4}$ आरणं ( $M_4$ °ण्यं ) ( for वारुणं ). T यम- ; $G_3$ $M_4$ मम ( for मन्त्र- ). T $M_{2,3}$ च ( for the first वा ). $M_{2,3}$ om. the post. half and the prior half of line 2777. — ( L. 2777 ) $G_3$ वीरस्तम् ( for °घ्नम् ). T च ( for वा ). — ( L. 2778 ) $G_{1,2}$ $M_4$ देवीं वा ( by transp. ). $M_{2,3}$ ततो जपेत् ( by transp. ). — ( L. 2779 ) $G_{1,2}$ $M_4$ शते वा ( $M_4$ च ) ( for ततश्च ). $M_4$ च ( for the first वा ). $T_2$ च ( for the second वा ). — ( L. 2780 ) $M_{2,3}$ वा ( for वै ). — ( L. 2781 ) T $G_3$ तु ( for सु- ). — $M_4$ om. ( hapl. ) lines 2782–2785. — ( L. 2782 ) Madras ed. ततः ( for तु सु- ). T $G_3$ $M_2$ ततः पात्रं समादा( $M_2$ °धा )य ( for the prior half ). $T_1$ तथा ; $G_3$ हि वा ( for तु वा ). — ( L. 2783 ) Some MSS. मृण्मयं. — ( L. 2784 ) $T_1$ यज्ञियानां ; $G_{1,2}$ $M_{2,3}$ याज्ञिकानां. — ( L. 2785 ) $T_1$ च ( for तु ). — ( L. 2786 ) $M_3$ च ( for तु ). $G_{1,2}$ चापरं ; $M_{2,3}$ न परं ( for नापरं ). — ( L. 2787 ) $G_1$ तिष्ठंस्तु ; $M_4$ तिष्ठेच्च. $M_4$ om. ( hapl. ) the post. half and the prior half of line 2788. — ( L. 2788 ) $G_2$ न हसेन्न च वीक्षेत. $G_{1,2}$ स्त्रियः ; $M_4$ स्त्रिया. — ( L. 2789 ) $G_{1,2}$ $M_3$ वा ( for च ). $M_4$ दृष्ट्वा पुरीषं मूत्रं च. $M_4$ च ( for वा ). — $T_2$ $M_2$ om. ( hapl. ) lines 2791–2792. — ( L. 2791 ) $G_3$ आक्रम्य ( for आरुह्य ). $G_1$ सर्वथा प्रपथेद्द्विजः. — ( L. 2793 ) $M_{2,3}$ स्वावसथं ( for त्वा° ). $M_4$ प्राप्य ( for प्राप्तो ). $M_3$ भिक्षान्नं ( for भिक्षां नि- ). — ( L. 2794 ) T $G_3$ $M_{3,4}$ पादावाजानू ( $G_3$ $M_4$ °नु ) ; $M_2$ पाणिपादौ द्वौ ( for पादावा जान्वोर् ). T हस्तम्. $M_{3,4}$ ( *sup. lin.* ) आकोपरं. $M_2$ आजानू हस्तकौ पुनः. — ( L. 2799 ) T $G_1$ चैव ; $G_2$

यथा च वर्धते सोमो ह्रसते च यथा पुनः ।
तथा पिण्डाश्च वर्धन्ते ह्रसन्ते च दिने दिने ।
त्रिकालं स्नानमस्योक्तं द्विकालमथ वा सकृत् । [ 2805 ]
ब्रह्मचारी सदा वापि न च वस्त्रं प्रपीडयेत् ।
स्थाने न दिवसं तिष्ठेद्रात्रौ वीरासनं व्रजेत् ।
भवेत्स्थाण्डिलशायी वाप्यथ वा वृक्षमूलिकः ।
वल्कलं यदि वा क्षौमं शाणं कार्पासकं तु वा ।
आच्छादनं भवेत्तस्य वस्त्रार्थं पाण्डुनन्दन । [ 2810 ]
एवं चान्द्रायणे पूर्णे मासस्यान्ते प्रयत्नवान् ।
ब्राह्मणान्भोजयेद्भक्त्या दद्याच्चैव च दक्षिणाम् ।
चान्द्रायणेन चीर्णेन यत्कृतं तेन दुष्कृतम् ।
तत्सर्वं तत्क्षणादेव भस्मीभवति काष्ठवत् ।
ब्रह्महत्याथ गोहत्या सुवर्णस्तैन्यमेव च । [ 2815 ]
भ्रूणहत्या सुरापानं गुरोर्दारव्यतिक्रमः ।
एवमन्यानि पापानि पातकीयानि यानि च ।
चान्द्रायणेन नश्यन्ति वायुना पांसवो यथा ।
अनिर्दशाया गोः क्षीरमौष्ट्रमाविकमेव च ।
मृतसूतकयोश्चान्नं भुक्त्वा चान्द्रायणं चरेत् । [ 2820 ]
उपपातकिनश्चान्नं पतितान्नं तथैव च ।
शूद्रस्योच्छेषणं चैव भुक्त्वा चान्द्रायणं चरेत् ।
आकाशस्थं तु हस्तस्थमासनस्थं तथैव च ।
परहस्तस्थितं चैव भुक्त्वा चान्द्रायणं चरेत् ।
अथाग्रेदिधिषोरन्नं दिधिषूपपतेस्तथा । [ 2825 ]
परिवेत्तुस्तथा चान्नं परिवित्तान्नमेव च ।
कुण्डान्नं गोलकान्नं च देवलान्नं तथैव च ।
तथा पुरोहितस्यान्नं भुक्त्वा चान्द्रायणं चरेत् ।
सुरासवं विषं सर्पिर्लाक्षा लवणमेव च ।
तैलं चापि च विक्रीणन्द्विजश्चान्द्रायणं चरेत् । [ 2830 ]
एकोद्दिष्टं तु यो भुङ्क्ते दिनमध्यगतोऽपि यः ।
भिन्नभाण्डे तु यो भुङ्क्ते द्विजश्चान्द्रायणं चरेत् ।
यो भुङ्क्तेऽनुपनीतेन यो भुङ्क्ते च स्त्रिया सह ।
यो भुङ्क्ते कन्यया सार्धं द्विजश्चान्द्रायणं चरेत् ।
उच्छिष्टं स्थापयेद्विप्रो यो मोहाद्भोजनान्तरे । [ 2835 ]
दद्याद्वा यदि संमोहाद्द्विजश्चान्द्रायणं चरेत् ।
तुम्बकोशातकं चैव पलण्डुं गृञ्जनं तथा ।
छत्राकं लघुनं चैव भुक्त्वा चान्द्रायणं चरेत् ।
तथा पर्युषितं चान्नं पक्वं परगृहागतम् ।
विपक्वं च तथा मांसं भुक्त्वा चान्द्रायणं चरेत् । [2840 ]
उदक्यया शुना वापि चण्डालैर्वा द्विजोत्तमः ।
दृष्टमन्नं तु भुञ्जानो द्विजश्चान्द्रायणं चरेत् ।

---

अन्यान् ; $G_3$ $M_4$ दद्याद् ( for अन्नं ). — ( L. 2800 ) T $G_3$ तथा ( for अथ ). — ( L. 2801 ) T अंगुलीभिस्त्रिभिः ; $G_3$ °ल्यग्रस्थितं ( for °ग्रे स्थितं ). $M_4$ -मंत्रितं ( for -मन्त्रयेत् ). — ( L. 2802 ) $M_2$ पुनः ( for शुचिः ). — ( L. 2803 ) T तथा ( for the second यथा ). — ( L. 2807 ) $G_3$ स्थानेषु दिवसे तिष्ठेद् ( for the prior half ). $M_2$ स्वैरासनं ( for वीरा° ). — ( L. 2808 ) $T_2$ व्रते ( for भवेत् ). $M_{2.3}$ च ( for the first वा ). T $G_{1.3}$ om. [अ]पि. $M_4$ -मूलकं ( for -मूलिकः ). — ( L. 2809 ) $M_4$ वाप्यथ ( for यदि वा ). T $G_3$ शोणं. $M_{2-4}$ कार्पासिकं. Kumbh. ed. and Madras ed. तथा ( for तु वा ). — ( L. 2810 ) T $G_1$ $M_2$ वस्त्रार्धं. — ( L. 2811 ) T प्रयत्नतः. — ( L. 2812 ) $G_3$ $M_{2-4}$ तु ( for the second च ). — ( L. 2815 ) $G_1$ $M_{2.3}$ च ( for [अ]थ ). T -स्तेयम् ( for -स्तैन्यम् ). $M_{2-4}$ वा ( for च ). — ( L. 2816 ) $G_1$ $M_{2.4}$ -व्यतिक्रमं. — ( L. 2817 ) T $G_3$ तपनीयानि ( for पातकी° ). $M_3$ कानिचित् ( for यानि च ). — ( L. 2819 ) $M_{2.4}$ वा ( for च ). — ( L. 2820 ) T $G_{1.3}$ भक्त्या ( for भुक्त्वा ). — ( L. 2821 ) T $G_3$ पतितानां. — $M_4$ om. ( hapl. ) lines 2822–2826. $G_1$ om. ( hapl. ) from the post. half of line 2822 up to the prior half of line 2837. $G_3$ om. ( hapl. ) lines 2823–2828. $T_1$ $M_2$ read lines 2823–2824, after line 2828. — ( L. 2823 ) Madras ed. अधः स्रस्तं ( for आसनस्थं ). — After line 2824, $M_2$ ins. :

आसन्दीस्थस्तु यो भुङ्क्ते शयनीयगतोऽपि च ।
यो भुङ्क्ते वा सहस्थस्तु द्विजश्चान्द्रायणं चरेत् ।

— ( L. 2825 ) $T_2$ तथाग्रे- ; $M_{2.3}$ अथाग्र-. $M_{2.3}$ अपि ( for तथा ). — ( L. 2826 ) $T_1$ $M_2$ परिवित्तेस् ( for °वेत्तुस् ). $T_1$ परिवेत्तान्नमेव च ; $M_3$ परिवित्तुस्तथैव च ( for the post. half ). — ( L. 2829 ) $M_{2.3}$ सु( $M_2$ पु )रामांसं ( for °सवं ). $M_4$ घृतं ( for विषं ). — ( L. 2830 ) $M_2$ सोमं ( for चापि ). — ( L. 2831 ) $G_2$ $M_4$ जन- ; $M_3$ जल- ( for दिन- ). $M_2$ यो भुंक्ते जलमध्यगः ( for the post. half ). — ( L. 2832 ) $G_3$ -भांडेपि ; Kumbh. ed. and Madras ed. -भांडेषु ( for -भाण्डे तु ). — ( L. 2834 ) $M_4$ चैव ( for सार्धं ). $G_2$ $M_3$ कन्यया सह यो भुंक्ते. — ( L. 2837 ) $M_2$ तुंबं. $G_3$ -कोशातकीं. $M_3$ तुंबं कोशातकीं चैव. $M_2$ फलंडुं. — ( L. 2838 ) T $G_3$ वृंताकं ; $M_{3.4}$ चि( $M_4$ छि )त्राकं ( for छत्राकं ). $M_2$ जग्ध्वा ( for भुक्त्वा ). — $M_{2.4}$ om. ( hapl. ) lines 2839–2840. — ( L. 2839 ) $G_{1.2}$ द्विजः ( for तथा ). — ( L. 2841 ) $M_2$ उदक्या वा ( for °क्यया ). T $G_{2.3}$ च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

एतत्पुरा विशुद्ध्यर्थमृषिभिश्चरितं व्रतम् ।
पावनं सर्वपापानां पुण्यं पाण्डव चोदितम् ।
एतेन वसवो रुद्राश्चादित्याश्च दिवं गताः । [ 2845 ]
एतदाद्यं परं गुह्यं पवित्रं पावनं स्मृतम् ।
यथोक्तमेतद्यः कुर्याद्द्विजः पापप्रणाशनम् ।
स दिवं याति पूतात्मा निर्मलादित्यसंनिभः ।

Colophon.

वैशंपायन उवाच ।

केशवेनैवमुक्ते तु चान्द्रायणविधिक्रमे ।
अपृच्छत्पुनरन्यांश्च धर्मान्धर्मात्मजो नृप । [ 2850 ]

युधिष्ठिर उवाच ।

सर्वभूतपते श्रीमन्सर्वभूतनमस्कृत ।
सर्वभूतहितं धर्मं सर्वज्ञ कथयस्व मे ।

भगवानुवाच ।

यद्दरिद्रजनस्यापि स्वर्ग्यं सुखकरं भवेत् ।
सर्वपापप्रशमनं तच्छृणुष्व युधिष्ठिर ।
कार्त्तिकाद्यास्तु ये मासा द्वादशैव प्रकीर्तिताः । [ 2855 ]
तेष्वेकभुक्तनियमः सर्वेषामुच्यते मया ।
कार्त्तिके यस्तु वै मासे नन्दायां संयतेन्द्रियः ।
एकभुक्तेन मद्भक्तो मासमेकं तु वर्तते ।
जलं वा न पिबेन्मासे नान्तरं भोजनात्परम् ।
आदित्यरूपं मां नित्यमर्चयन्सुसमाहितः । [ 2860 ]
व्रतान्ते भोजयेद्विप्रान्दक्षिणां संप्रदाय च ।
क्रोधलोभविनिर्मुक्तस्तस्य पुण्यफलं शृणु ।
विधिवत्कपिलादाने यत्पुण्यं समुदाहृतम् ।
तत्पुण्यं समनुप्राप्य सूर्यलोके महीयते ।
ततश्चापि च्युतः कालात्पुरुषेषूपजायते । [ 2865 ]
मार्गशीर्षं तु यो मासमेकभुक्तेन वर्तते ।
कामं क्रोधं च लोभं च परित्यज्य यथाविधि ।
स्नात्वा चादित्यरूपं मामर्चयेन्नियतेन्द्रियः ।
जपन्नेव तु गायत्रीं मामिकां वाग्यतः शुचिः ।
मासे परिसमाप्ते तु भोजयित्वा द्विजाञ्शुचीन् । [ 2870 ]
तानर्चयति मद्भक्त्या तस्य पुण्यफलं शृणु ।
अग्निहोत्रे कृते पुण्यमाहिताग्नेस्तु यद्भवेत् ।
तत्पुण्यफलमासाद्य यानेनाम्बरशोभिना ।
सप्तर्षिलोके चरति यथाकामं यथासुखम् ।

---

(for वा). $M_4$ चंडालैश्च नृपोत्तम. —(L. 2842) T दृष्टमन्नं न भुंजीयाद् (for the post. half). — $G_3$ om. line 2843. —(L. 2843) T चरित·. —(L. 2844) $G_{1.2}$ $M_3$ -भूतानां (for -पापानां). $M_{2.3}$ चोत्तमं (for चोदितम्). —(L. 2845) T om. the first च. —(L. 2846) T $G_3$ पवित्रं पापनाशनं (for the post. half). —(L. 2847) $T_1$ -प्रणाशनः. — $G_3$ om. line 2848. —(L. 2848) $T_1$ दिवं स (by transp.). T $G_2$ विमलादित्यसंनिभः. — Colophon. — *Sub-parvan :* T $G_2$ $M_4$ वैष्णवधर्म ; $G_3$ $M_2$ धर्मशास्त्र ; $M_3$ विष्णुधर्म. — *Adhy. name :* $G_{1.2}$ $M_{2-4}$ चांद्रायणविधिः. — *Adhy. no. :* $T_1$ 100; $T_2$ $M_4$ 109; $G_{1.2}$ 99; $G_3$ 110; $M_2$ 16; $M_3$ 98. —(L. 2849) $T_2$ [ए]वमुक्तस्तु ; $M_2$ [ए]तदाख्याते. —(L. 2850) $M_{2.4}$ अप्यन्यान् (for अन्यांश्च). —(L. 2851) $T_2$ -नमस्तु ते ; $M_2$ °स्कृतः. —(L. 2852) $M_2$ सर्वं त्वं ; $M_4$ धर्मज्ञ (for सर्वज्ञ). $G_{1.2}$ नः (for मे). —(L. 2853) $T_2$ $G_3$ $M_{2-4}$ स्वर्गं. $M_2$ सुखतरं (for °करं). —(L. 2855) MSS. कार्तिकाद्यास्. $M_{2.3}$ [ए]ते (for [ए]व). —(L. 2856) $G_{1.2}$ $M_4$ [ए]व (for [ए]क-). $T_2$ -भक्त- ; $G_2$ $M_2$ -भुक्ति- (for -भुक्त-). —(L. 2857) MSS. कार्तिके. T मासे वै (by transp.). $M_2$ संयतो नरः (for °तेन्द्रियः). —(L. 2859) $T_2$ मासं (for मासे). $T_1$ $G_1$ जलपानं पिबेन्मासम् (for the prior half). $T_1$ $G_1$ अंतरा (for नान्तरं). —(L. 2860) $T_1$ $G_1$ -पुत्रं (for -रूपं). $M_{2.3}$ मा (for मां). $M_2$ वापि (for नित्यम्). $G_3$ अर्चयेत् (for °यन्). $M_2$ नित्यमर्चन्समाहितः. —(L. 2861) $M_2$ मासांते (for व्रतान्ते). $M_2$ दक्षिणाः. $T_1$ च (for सं-). $T_2$ $G_{1.3}$ $M_{2.4}$ ददेत्पुनः (for संप्रदाय च). —(L. 2864) $M_{2.3}$ -प्राप्तः (for -प्राप्य). T मम (for सूर्य-). —(L. 2865) $M_4$ कुरुष्वेषु (sic) (for पुरुषेषु). T दिशा वर्षेषु जायते. — After line 2865, T $M_3$ ins. :

तत्र स्थित्वा चिरं कालमस्मिन्विप्रो भविष्यति ।

$M_3$ cont. : $M_2$ ins. after line 2865 :

तत्र प्रकामं क्रीडित्वा मानुषेषूपजायते ।
राजराजार्चितो विप्रः कोटीधनपतिर्भवेत् ।

—(L. 2866) $G_1$ मार्गशीर्षे. T $G_3$ यः क्षिपेत् (for वर्तते). —(L. 2867) $T_1$ $G_1$ कामः (sic) (for कामं). —(L. 2868) $M_2$ संयतेंद्रियः. —(L. 2869) $M_4$ च (for तु). $T_1$ मामेकां (sic); $T_2$ ममैकां; $M_3$ मामकीं. —(L. 2870) $G_{1.2}$ शुचिः (for शुचीन्). —(L. 2871) T $G_{1.3}$ अर्चयंति. —(L. 2872) T हुते; $M_2$ तु ते (for कृते). $G_3$ पुण्ये. $G_3$ $M_4$ च (for तु). —(L. 2873) $M_4$ पुण्यं. —(L. 2874) $G_{1.2}$ स ह सप्तर्षिलोकेषु (for the prior half). $G_3$ $M_{3.4}$ यथाकालं (for °कामं). —(L. 2876) $M_4$ प्रकाशं (for

ततश्चापि च्युतः कालाद्धरिवर्षेषु जायते ।
तत्र प्रकामं क्रीडित्वा राजा पश्चाद्भविष्यति ।
पौषमासं क्षपेदेवमेकभुक्तेन यो नरः ।
अर्चयन्नेव मां नित्यं मद्व्रतेनान्तरात्मना ।
अहिंसासत्यसहितः क्रोधहर्षविवर्जितः ।
एवं युक्तस्य राजेन्द्र शृणु यत्फलमुत्तमम् ।
विप्रातिथ्यसहस्रेषु यत्पुण्यं समुदाहृतम् ।
तत्पुण्यं समनुप्राप्य शक्रलोके महीयते ।
अवकीर्णस्ततः कालादिलावर्षेषु जायते ।
तत्र स्थित्वा चिरं कालमस्मिन्विप्रो भविष्यति ।
माघमासं तथा यस्तु वर्तते चैकभुक्ततः ।
मदर्चनपरो भूत्वा डम्भक्रोधविवर्जितः ।
मामिकामपि गायित्रीं संध्यायां तु जपेद्बुधः ।
दत्त्वा तु दक्षिणामन्ते भोजयित्वा द्विजानपि ।
नमस्करोति तान्भक्त्या मद्व्रतेनान्तरात्मना ।
त्रिकालं स्नानयुक्तस्य तस्य पुण्यफलं शृणु ।
नीलकण्ठप्रयुक्तेन यानेनाम्बरशोभिना ।
पितृलोकं व्रजेच्छ्रीमान्सेव्यमानोऽप्सरोगणैः ।
तत्र प्रकामं क्रीडित्वा भद्राश्वेषूपजायते ।
ततश्च्युतश्चतुर्वेदी विप्रो भवति भूतले ।
यः क्षपेत्फाल्गुनं मासमेकभुक्तो जितेन्द्रियः ।
नमो ब्रह्मण्यदेवायेत्येतन्मन्त्रं जपेत्सदा ।
पायसं भोजयेद्विप्रान्व्रतान्ते संयतेन्द्रियः ।
मदर्चनपरोऽक्रोधस्तस्य पुण्यफलं शृणु ।
विमानं सारसैर्युक्तमारूढः कामगामि च ।
नक्षत्रलोके रमते नक्षत्रसदृशाकृतिः ।
ततश्चापि च्युतः कालात्केतुमालेषु जायते ।
तत्र प्रकामं क्रीडित्वा मानुषेषु मुनिर्भवेत् ।
चैत्रमासं तु यो राजन्नेकभुक्तेन वर्तते ।
ब्रह्मचारी तु मद्भक्त्या तस्य पुण्यफलं शृणु ।
यदग्निहोत्रिणः पुण्यं यथोक्तं व्रतचारिणः ।
तत्पुण्यफलमासाद्य चन्द्रलोके महीयते ।
ततोऽवतीर्णो जायेत वर्षे रमणके पुनः ।
भुक्त्वा कामांस्ततस्तस्मिन्निह राजा भविष्यति ।
वैशाखं यस्तु वै मासमेकभुक्तेन वर्तते ।
द्विजमग्रासने कृत्वा भुञ्जन्भूमौ च वाग्यतः ।
नमो ब्रह्मण्यदेवायेत्यर्चयित्वा दिवाकरम् ।
व्रतान्ते भोजयेद्विप्रांस्तस्य पुण्यफलं शृणु ।
फलं यद्विधिवत्प्रोक्तमग्निष्टोमातिरात्रयोः ।
तत्पुण्यं फलमासाद्य देवलोके महीयते ।
ततो हैमवते वर्षे जायते कालपर्ययात् ।
तत्र प्रकामं क्रीडित्वा विप्रः पश्चाद्भविष्यति ।
ज्येष्ठमासं तु यो राजन्नेकभुक्तेन वर्तते ।
विप्रमग्रासने कृत्वा भूमौ भुञ्जन्यथाविधि ।

---

°मं ). —( L. 2877 ) T $G_{1.2}$ $M_{2.3}$ पौष्यमासं. $T_2$ $G_1$ क्षिपेद्. T $G_3$ यस्तु ( for एवम् ). T वै ( for यो ). $G_2$ ( also as above ) द्विजः ( for नरः ). —( L. 2878 ) $M_4$ आदित्यं ( for मां नित्यं ). $M_2$ अर्चन्नेव तु मां नित्यं. T $G_3$ मद्भक्तेन ( for मद्व्रतेन ). —( L. 2879 ) $M_{2-4}$ -निरतः ( for -सहितः ). T $G_3$ क्रोधासूयावि( $G_3$ °दि )वर्जितः. —( L. 2881 ) $M_3$ विप्रातिथि-. T -सहस्रे तु ( for °स्रेषु ). —( L. 2882 ) $M_{2-4}$ फलं ( for पुण्यं ). $G_3$ $M_2$ -प्राप्तः ( for -प्राप्य ). —$M_4$ om. line 2883. —( L. 2883 ) Madras ed. अवतीर्णस् ( for °कीर्णस् ). —( L. 2884 ) $G_1$ लोके ( for विप्रो ). —( L. 2885 ) $T_1$ om. च. $M_{2.3}$ -भुक्तितः ; $M_4$ -भक्ततः. —( L. 2886 ) T ममार्चन- ( for मद° ). —( L. 2887 ) $T_2$ तथा मम ; $G_3$ एकाहम् ; $M_2$ मामिकां वा ( for मामिकाम् ). $G_1$ सावित्रीं ( for गायित्रीं ). $M_2$ पुनः ; $M_4$ द्विजः ( for बुधः ). —( L. 2889 ) T $G_3$ तान्सर्वान् ; $M_{2.3}$ मद्भक्त्या. —( L. 2890 ) $G_2$ त्रिकाल- ( for °लं ). $T_2$ -संयुक्तस् ( for -युक्तस्य ). $G_1$ त्रिकालज्ञानयुक्तस्य. —( L. 2891 ) $G_1$ -प्रसक्तेन ( for -प्रयु° ). —( L. 2892 ) $M_4$ शीघ्रं ( for श्रीमान् ). $G_2$ सेवमानो. —( L. 2895 ) $T_2$ क्षिपेत् ; $G_{1.2}$ $M_3$ चरेत् ( for क्षपेत् ). $G_{1.2}$ $M_4$ [ऽ]प्यसंशयः ( $G_1$ °यं ); $M_{2.3}$ न संशयः ( for जितेन्द्रियः ). —( L. 2896 ) $M_4$ [इ]त्युक्त्वा ( for [इ]त्येतन् ). $G_2$ जपन्सदा ; $M_2$ उदाहरत् ( for जपेत्सदा ). —( L. 2898 ) $G_3$ तदर्चन-. $M_{2.3}$ भूत्वा ( for ऽक्रोधस् ). —( L. 2900 ) $M_2$ सुखं नक्षत्रलोकेषु ( for the prior half). —$G_1$ om. line 2902. —( L. 2903 ) $M_4$ -भक्तेन. —After line 2903, the sequence of lines in T is : 2910–2912, 2921, 2914–2916, 2909, 2910–2912 ( r. ), 2913, 2906–2908, 2917–2920, 2921 ( r. ). T om. lines 2904–2905. —( L. 2904 ) $G_3$ $M_3$ मद्भक्तस्. —( L. 2905 ) $M_4$ यथोक्त-. $M_2$ ब्रह्मचारिणः ( for व्रत° ). — $M_4$ om. lines 2907–2908. —( L. 2907 ) T रामणके. —( L. 2908 ) T भुक्त्वा भोगांस्ततस्तस्माद् ( for the prior half). —$M_4$ om. lines 2909–2914. —( L. 2909 ) $G_{1.2}$ $M_3$ वैशाखे यस्तु वै मासे ( for the prior half ) and ह्येक- ( for एक- ). $G_3$ -भक्तेन. —( L. 2910 ) T ( first time ) अग्राशि( $T_2$ °स )नं. $G_2$ स- ( for च ). T ( first time ) नित्यशः ( for

नमो ब्रह्मण्यदेवायेत्यर्चयन्मां समाहितः ।
डम्भानृतविनिर्मुक्तस्तस्य पुण्यफलं शृणु । [ 2920 ]
चीर्णे चान्द्रायणे सम्यग्यत्पुण्यं समुदाहृतम् ।
तत्पुण्यफलमासाद्य देवलोके महीयते ।
अथोत्तरकुरुष्वेव जायते निर्गतस्ततः ।
ततश्चापि च्युतः कालादिह लोके द्विजो भवेत् ।
आषाढमासं यो राजन्नेकभुक्तेन वर्तते । [ 2925 ]
ब्रह्मचारी जितक्रोधो मदर्चनपरायणः ।
विप्रमग्रासने कृत्वा भूमौ भुञ्जञ्जितेन्द्रियः ।
कृत्वा त्रिषवणं स्नानमष्टाक्षरविधानतः ।
व्रतान्ते भोजयेद्विप्रान्पायसेन युधिष्ठिर ।
गुडोदनेन वा राजंस्तस्य पुण्यफलं शृणु । [ 2930 ]
कपिलाशतदानस्य यत्पुण्यं पाण्डुनन्दन ।
तत्पुण्यफलमासाद्य देवलोके महीयते ।
ततोऽवतीर्णः काले तु शाकद्वीपे प्रजायते ।
ततश्चापि च्युतः कालादिह विप्रो भविष्यति ।
श्रावणं यः क्षपेन्मासमेकभुक्तेन वर्तते । [ 2935 ]
नमो ब्रह्मण्यदेवायेत्युक्त्वा मामर्चयेत्सदा ।
विप्रमग्रासने कृत्वा भूमौ भुञ्जन्यथाविधि ।
पायसेनार्चयेद्विप्राञ्जितक्रोधो जितेन्द्रियः ।
लोभमोहविनिर्मुक्तस्तस्य पुण्यफलं शृणु ।
कपिलादानस्य यत्पुण्यं विधिदत्तस्य पाण्डव । [ 2940 ]
तत्पुण्यं समनुप्राप्य शक्रलोके महीयते ।
ततश्चापि च्युतः कालात्कुशद्वीपे प्रजायते ।
तत्र प्रकामं क्रीडित्वा विप्रो भवति मानुषे ।
यस्तु भाद्रपदं मासमेकभुक्तेन वर्तते ।
ब्रह्मचारी जितक्रोधः सत्यसंधो जितेन्द्रियः । [ 2945 ]
विप्रमग्रासने कृत्वा पाकभेदविवर्जितः ।
नमो ब्रह्मण्यदेवायेत्युक्त्वास्य चरणौ स्पृशेत् ।
तिलान्वापि घृतं वापि व्रतान्ते दक्षिणां ददत् ।
मद्भक्तस्य नरश्रेष्ठ तस्य पुण्यफलं शृणु ।
यत्फलं विधिवत्प्रोक्तं राजसूयाश्वमेधयोः । [ 2950 ]
तत्पुण्यफलमासाद्य शक्रलोके महीयते ।
ततश्चापि च्युतः कालाज्जायते धनदालये ।
तत्र प्रकामं क्रीडित्वा राजा भवति मानुषे ।
यश्चाप्याश्वयुजं मासमेकभुक्तेन वर्तते ।
मद्गायत्रीं जपेद्भक्त्या मद्गतेनान्तरात्मना । [ 2955 ]
द्विसंध्यं वा त्रिसंध्यं वा शतमष्टोत्तरं तु वा ।
विप्रमग्रासने कृत्वा संयतेन्द्रियमानसः ।
व्रतान्ते भोजयेद्विप्रांस्तस्य पुण्यफलं शृणु ।
अश्वमेधस्य यत्पुण्यं विधिवत्पाण्डुनन्दन ।
तत्पुण्यफलमासाद्य मम लोके महीयते । [ 2960 ]
ततश्चापि च्युतः कालाच्छ्वेतद्वीपे प्रजायते ।
तत्र भुक्त्वा महाभोगानत्र विप्रपरो भवेत् ।

Colophon.

---

वाग्यतः ). — ( L. 2914 ) $T_2$ $M_{2.3}$ पुण्य- ( for पुण्यं ). — ( L. 2916 ) $G_2$ $M_{2.3}$ मोदित्वा ( for क्रीडित्वा ). — ( L. 2917 ) T ज्येष्ठमासे. $G_{1.2}$ विप्रो ह्येक- ( for राजन्नेक- ). $M_4$ -भक्तेन. — ( L. 2918 ) $M_2$ जितेंद्रियः ( for यथाविधि ). — ( L. 2919 ) $G_1$ $M_3$ [इ]त्युच्चरन् ( for [इ]त्यर्चयन् ). $M_4$ यथाविधि ( for समाहितः ). — ( L. 2920 ) $M_4$ कामक्रोध- ( for डम्भानृत- ). T -विमुक्तस्तु ( for -विनिर्मुक्तस् ). — ( L. 2921 ) $M_4$ चीर्ण- ( for चीर्णे ). — ( L. 2922 ) $G_1$ तत्पुण्यं. T तपोलोके; $G_1$ शक्र° ( for देव° ). — ( L. 2923 ) $G_{1.2}$ -कुरौ वर्षे ( for -कुरुष्वेव ). — ( L. 2925 ) Madras ed. -भक्तेन. — ( L. 2927 ) $M_2$ भुंजन्भूमौ ( by transp. ). $M_4$ द्विजोत्तमः ( for जितेन्द्रियः ). — ( L. 2928 ) Madras ed. त्रिषवण-. $G_1$ -विधारितः ( for °नतः ). — ( L. 2930 ) $G_{1.2}$ $M_{2-4}$ गुळोदनेन ( for गुडोदनेन ). $G_{1.2}$ $M_3$ राजेंद्र ( for वा राजंस् ). — ( L. 2931 ) $G_2$ $M_2$ -दश- ( for -शत- ). $M_2$ -दत्तस्य ( for -दानस्य ). — ( L. 2932 ) $M_4$ मम ( for देव- ). — ( L. 2933 ) Madras ed. कालेन ( for काले तु ). T स ( for प्र- ). — ( L. 2935 ) $G_1$ क्षिपेन्. $M_4$ -भक्तेन. T $G_3$ $M_4$ संयु( T °य )-तः; $G_2$ पांडव; $M_{2.3}$ ( *sup. lin.* as above ) भक्तिमान् ( for वर्तते ). — ( L. 2936 ) T $G_2$ अर्चयन्. — ( L. 2938 ) $G_3$ $M_{2.4}$ [अ]र्चयन् ( for °येद् ). $M_2$ विप्रो. — ( L. 2940 ) Hypermetric. T $M_4$ कपिलादस्य; $G_3$ °दशस्य; $M_2$ °शतस्य ( for °दानस्य ). $M_3$ कपिलादानपुण्यं यद् ( for the prior half ). — ( L. 2941 ) $M_{2.3}$ -प्राप्तः. — $T_2$ om. line 2942. — ( L. 2942 ) $M_4$ महीयते ( for प्रजा° ). — ( L. 2943 ) $G_3$ मानुषः. — ( L. 2944 ) Madras ed. -भक्तेन. — ( L. 2947 ) $M_2$ तु ( for [अ]स्य ). — ( L. 2948 ) $T_1$ $G_{1.2}$ om. the first वा. $M_2$ तिलान्वाथ; $M_3$ °न्यपि (sic) ( for °न्वापि ). Madras ed. घृतान्. T ददेत्; $G_3$ ददन्; $M_2$ दिशेत् ( for ददत् ). — ( L. 2954 ) $T_1$ -युर्जि; $M_2$ -युजेन् (sic) ( for -युजं ). Madras ed. -भक्तेन. — ( L. 2955 ) $T_1$ महत्पुण्यं; $T_2$ जपन्नित्यं ( for जपेद्भक्त्या ). — After line 2956, T ins.:

नमो ब्रह्मण्यदेवायेत्यसकृन्मां प्रणम्य च ।

— ( L. 2957 ) $T_2$ विजितेंद्रियमानसः. — ( L. 2959 ) $M_3$ अश्वमेधे च ( for °धस्य ). — T $G_3$ om. line 2961.

युधिष्ठिर उवाच ।

एवं संवत्सरं पूर्णमेकभुक्तेन यः क्षिपेत् ।
तस्य पुण्यफलं यद्वै तन्ममाचक्ष्व केशव ।

भगवानुवाच ।

शृणु पाण्डव सत्यं मे वचनं पुण्यमुत्तमम् । [ 2965 ]
यदकृत्वाथ वा कृत्वा नरः पापैः प्रमुच्यते ।
एकभुक्तेन वर्तेत नरः संवत्सरं तु यः ।
ब्रह्मचारी ह्यधःशायी जितक्रोधो जितेन्द्रियः ।
शुचिः स्नानरतो व्यग्रः सत्यवागनसूयकः ।
अर्चयन्नेव मां नित्यं मद्गतेनान्तरात्मना । [ 2970 ]
संध्ययोस्तु जपेन्नित्यं मद्गायत्रीं समाहितः ।
नमो ब्रह्मण्यदेवायेत्यसकृन्मां प्रणम्य च ।
विप्रमग्रासने कृत्वा यावकं भैक्षमेव च ।
भुक्त्वा तु वाग्यतो भूमावाचान्तस्य द्विजन्मनः ।
नमोऽस्तु वासुदेवायेत्युक्त्वा तु चरणौ स्पृशेत् । [2975]
मासे मासे समाप्ते तु भोजयित्वा द्विजाञ्छुचीन् ।
संवत्सरे ततः पूर्णे दद्यात्तु व्रतदक्षिणाम् ।
नवनीतमयीं गां वा तिलधेनुमथापि वा ।
विप्रहस्तच्युतैस्तोयैः सहिरण्यैः समुक्षितः ।
तस्य पुण्यफलं राजन्कथ्यमानं मया शृणु । [ 2980 ]
दशजन्मकृतं पापं ज्ञानतोऽज्ञानतोऽपि वा ।
तद्विनश्यति तस्याशु नात्र कार्या विचारणा ।

युधिष्ठिर उवाच ।

सर्वेषामुपवासानां यच्छ्रेयः सुमहत्फलम् ।
यच्च निःश्रेयसं लोके तद्भवान्वक्तुमर्हति ।

भगवानुवाच ।

शृणु राजन्यथापूर्वं यथा गीतं तु नारदे । [ 2985 ]
तथा ते कथयिष्यामि मद्भक्ताय युधिष्ठिर ।
यस्तु भक्त्या शुचिर्भूत्वा पञ्चम्यां मे नराधिप ।
उपवासव्रतं कुर्यात्त्रिकालं चार्चयंस्तु माम् ।
सर्वक्रतुफलं लब्ध्वा मम लोके महीयते ।

युधिष्ठिर उवाच ।

भगवन्देवदेवेश पञ्चमी नाम का तव । [ 2990 ]
तामहं श्रोतुमिच्छामि कथयस्व ममाच्युत ।

भगवानुवाच ।

पर्वद्वयं च द्वादश्यां श्रवणं च नराधिप ।
तत्पञ्चमीति विख्याता मत्प्रिया च विशेषतः ।
तस्मात्तु ब्राह्मणश्रेष्ठैर्मन्निवेशितबुद्धिभिः ।
उपवासस्तु कर्तव्यो मत्प्रियार्थं युधिष्ठिर । [ 2995 ]
द्वादश्यामेव वा कुर्यादुपवासमशक्नुवन् ।
तेनाहं परमां प्रीतिं यास्यामि नरपुंगव ।
अहोरात्रेण द्वादश्यां मार्गशीर्षे तु केशवम् ।
उपोष्य पूजयेद्यो मां सोऽश्वमेधफलं लभेत् ।

---

— ( L. 2962 ) $G_3$ $M_4$ तत्र ( for अत्र ). $M_{2.4}$ द्विजवरो ; $M_3$ विप्रवरो. $G_2$ ततो विप्रो भवेन्नरः. — Colophon om. in T. — *Sub-parvan :* $M_{2-4}$ वैष्णव( $M_3$ विष्णु )-धर्म. — *Adhy. name :* $G_{1.2}$ $M_3$ एकभुक्तिविधिः ; $M_2$ एकभुक्तिविधानं. — *Adhy. no.:* $G_{1.2}$ 100 ; $G_3$ 111 ; $M_2$ 17 ; $M_3$ 99 ; $M_4$ 110. — ( L. 2963 ) T पुण्यम् ( for पूर्णम् ). $M_{2.4}$ -भक्तेन. $T_2$ संक्षिपेत् ; $G_3$ $M_{2.3}$ यः क्षपेत् ; $M_4$ वर्तते ( for यः क्षिपेत् ). — ( L. 2964 ) T विद्वांस् ( for यद्वै ). — ( L. 2965 ) $M_4$ सत्त्वं ( for सत्यं ). — ( L. 2966 ) T $G_2$ कृत्वा वा ( by transp. ). $G_3$ यः कृत्वा तु व्रतं चैतन् ; $M_2$ तच्छ्रुत्वाथ कृतो वापि ( for the prior half ). $G_3$ वि- ( for प्र- ). — ( L. 2970 ) $M_2$ अर्चन्नेव तु ( for °यन्नेव ). $T_1$ मा नित्यं ; $M_4$ मादित्यं ( for मां नित्यं ). — ( L. 2971 ) $G_{1.2}$ $M_4$ जपन्. — ( L. 2973 ) $G_3$ अग्रासनं and भक्ष्यम्. — ( L. 2974 ) $G_{1.2}$ $M_4$ भूत्वा ( for भूमाव् ). — ( L. 2975 ) $M_2$ देवदेवाय ( for वासु° ). — ( L. 2977 ) $M_2$ कृतदक्षिणाः ; $M_4$ घृतदक्षिणां ( for व्रत° ). — ( L. 2978 ) $M_4$ धेनुं ( for गां वा ). — ( L. 2979 ) $M_2$ स हिपुण्यैः ( for सहिरण्यैः ). — ( L. 2980 ) $M_2$ वक्ष्यमाणं ( for कथ्यमानं ). — After line 2980, T $G_2$ and Madras ed. ins. an addl. colophon. — *Sub-parvan :* T $G_2$ वैष्णवधर्म. — *Adhy. no.:* $T_1$ $G_2$ 100 ; $T_2$ 110. — ( L. 2984 ) $G_3$ $M_{2.3}$ अर्हसि. — ( L. 2985 ) $T_2$ $M_{2.4}$ मया ( for यथा- ). $M_4$ सर्वं ( for -पूर्वं ). $G_2$ मोदते ( for नारदे ). Kumbh. ed. मयाभीष्टं तु मोदते ( for the post. half ). — ( L. 2986 ) $G_3$ यथा ( for तथा ). $M_2$ मद्भक्तस्य ( for °क्ताय ). — ( L. 2987 ) $G_3$ $M_{2.3}$ ( *inf. lin.* ) यो ( for मे ). — ( L. 2988 ) $M_4$ उपवासं. $G_1$ कार्यं ( for कुर्यात् ). $G_1$ यो ( for च ). $G_3$ तु सः ; $M_4$ बुधः ( for तु माम् ). — ( L. 2991 ) $G_{1.2}$ $M_3$ अनघ ( for अच्युत ). — ( L. 2992 ) $G_{1.2}$ $M_3$ पर्वद्वये. $G_3$ $M_{2-4}$ द्वादश्यौ. — ( L. 2993 ) Madras ed. मत्पंचमी. — ( L. 2994 ) $M_2$ तस्माद्भागवतैर्भक्तैर् ( for the prior half ). — ( L. 2995 ) $G_{1.2}$ विशेषतः ( for युधिष्ठिर ). — ( L. 2998 ) $G_3$ अहोरात्रं च ( for °रात्रेण ). $G_{1.2}$ $M_4$ मार्गशीर्षेण ; $G_3$ °र्षे च ( for °र्षे तु ). — ( L. 2999 ) T धीमान् ( for यो मां ). — ( L. 3000 )

द्वादश्यां पुष्यमासे तु नाम्ना नारायणं तु माम् । [3000]
उपोष्य पूजयेद्यो मां वाजपेयफलं लभेत् ।
द्वादश्यां माघमासे तु मामुपोष्य तु माधवम् ।
पूजयेद्यः समाप्नोति राजसूयफलं लभेत् ।
द्वादश्यां फाल्गुने मासि गोविन्दाख्यमुपोष्य माम् ।
अर्चयेद्यः समाप्नोति ह्यतिरात्रफलं नृप । [3005]
द्वादश्यां मासि चैत्रे तु मां विष्णुं समुपोष्य यः ।
पूजयंस्तदवाप्नोति पौण्डरीकस्य यत्फलम् ।
द्वादश्यां मासि वैशाखे मधुसूदनसंज्ञितम् ।
उपोष्य पूजयेद्यो मां सोऽग्निष्टोमस्य पाण्डव ।
द्वादश्यां ज्येष्ठमासे तु मामुपोष्य त्रिविक्रमम् । [3010]
अर्चयेद्यः समाप्नोति गवां मेधफलं नृप ।
आषाढे वामनाख्यं मां द्वादश्यां समुपोष्य च ।
नरमेधस्य स फलं प्राप्नोति भरतर्षभ ।
द्वादश्यां श्रावणे मासि श्रीधराख्यमुपोष्य माम् ।
पूजयेद्यः समाप्नोति पञ्चयज्ञफलं नृप । [3015]
मासे भाद्रपदे यो मां हृषीकेशाख्यमर्चयेत् ।
उपोष्य स समाप्नोति सौत्रामणिफलं नृप ।
द्वादश्यामाश्वयुङ्मासे पद्मनाभमुपोष्य माम् ।
अर्चयेद्यः समाप्नोति गोसहस्रफलं नृप ।
द्वादश्यां कार्त्तिके मासि मां दामोदरसंज्ञितम् । [3020]
उपोष्य पूजयेद्यस्तु सर्वक्रतुफलं लभेत् ।
केवलेनोपवासेन द्वादश्यां पाण्डुनन्दन ।
यत्फलं पूर्वमुद्दिष्टं तस्यार्धं लभते फलम् ।
श्रवणेऽप्येवमेवं मां योऽर्चयेद्भक्तिमान्नरः ।
मम सालोक्यमाप्नोति नात्र कार्या विचारणा । [3025]
मासे मासे समभ्यर्च्य क्रमशो मामतन्द्रितः ।
पूर्णे संवत्सरे कुर्यात्पुनः संवत्सरार्चनम् ।
एवं द्वादशवर्षं यो मद्भक्तो मत्परायणः ।
अविघ्नमर्चयानस्तु मम सालोक्यमाप्नुयात् ।
अर्चयेत्प्रीतिमान्यो मां द्वादश्यां वेदसंहिताम् । [3030]
स पूर्वोक्तफलं राजल्लँभते नात्र संशयः ।
गन्धं पुष्पं फलं तोयं पत्रं वा फलमेव वा ।
द्वादश्यां मम यो दद्यात्ततो नान्योऽस्ति मत्प्रियः ।
एतेन विधिना सर्वे देवाः शक्रपुरोगमाः ।
मद्भक्ता नरशार्दूल स्वर्गभोगांस्तु भुञ्जते । [3035]

वैशंपायन उवाच ।

एवं वदति देवेशे केशवे पाण्डुनन्दनः ।
कृताञ्जलिः स्तोत्रमिदं भक्त्या धर्मात्मजोऽब्रवीत् ।

युधिष्ठिर उवाच ।

सर्वलोकेश देवेश हृषीकेश नमोऽस्तु ते ।

---

M$_4$ पौषमासस्य ( for पुष्यमासे तु ). — ( L. 3001 ) T G$_3$ सद्यो ; M$_2$ यस्तु ; M$_4$ यः स ( for यो मां ). Kumbh. ed. वाजिमेध- ( for वाजपेय- ). — ( L. 3003 ) G$_3$ स आप्नोति ( for समा° ). M$_4$ वाजपेय- ( for राजसूय- ). — ( L. 3004 ) T$_1$ G$_1$ M$_2$ मासे. — ( L. 3005 ) G$_3$ स आप्नोति ( for समा° ). — ( L. 3006 ) M$_2$ चैत्रमासे ( for मासि चैत्रे ), and मां च विष्णुमुपोष्य तु ( for the post. half ). — ( L. 3007 ) T M$_4$ पूजयेत्समवा( M$_4$ °वा )प्नोति ; G$_3$ Madras ed. पूजयन्फ( G$_3$ °येत्फ )लमाप्नोति ; M$_2$ पूजयेद्यः स चा° ( for the prior half ). M$_2$ पौंडरीकफलं नृप. — ( L. 3008 ) G$_1$ -संज्ञिकं ( for -संज्ञितम् ). M$_2$ उपोष्य यो मां वैशाखे द्वादश्यां मधुसूदनं. — ( L. 3009 ) M$_2$ पूजयेत्फलमाप्नोति ( for the prior half ). T G$_3$ अग्निष्टोमफलं लभेत्. — ( L. 3013 ) T$_1$ पूजयन्फलमाप्नोति ; M$_2$ पूजयेन्नरमेधस्य ( for the prior half ). T$_1$ नरमेधस्य यत्फलं ; T$_2$ G$_1$ M$_4$ प्राप्नुयान्नर- ( T$_2$ °न्नृप )सत्तम ; M$_2$ स फलं प्राप्नुयान्नृप. — M$_2$ om. ( hapl. ) lines 3014–3015. — ( L. 3014 ) G$_3$ मासे. — ( L. 3015 ) M$_3$ अर्चयेद् ( for पूज° ). M$_4$ स चाप्नोति ( for समा° ). — ( L. 3016 ) G$_1$ M$_3$ मासि. M$_2$ हृषीकेशमुपोष्य तु ( for the post. half ). — ( L. 3017 ) M$_2$ अर्चयेत्फलमाप्नोति सौत्रामणिं नृपोत्तम. — ( L. 3018 ) T मासि. — ( L. 3019 ) M$_2$ स चाप्नोति ( for समा° ). G$_3$ नरः ( for नृप ). — ( L. 3020 ) G$_3$ M$_2$ मासे. G$_3$ -संज्ञिकं ( for °तम् ). — ( L. 3023 ) M$_4$ नरः ; Kumbh. ed. नृप ( for फलम् ). — ( L. 3024 ) T$_1$ श्रावणे. T$_2$ G$_3$ तु ( for ऽपि ). — ( L. 3025 ) M$_2$ आयाति ( for आप्नोति ). — ( L. 3028 ) G$_1$ एतं ; G$_2$ एतद् ( for एवं ). M$_{2,3}$ -वर्षाणि ( for -वर्षं यो ). — ( L. 3029 ) M$_2$ अविघ्नेन ( for °घ्नम् ). Kumbh. ed. सायुज्यम् ( for सालोक्यम् ). T अश्नुते ( for आप्नुयात् ). M$_2$ तत्सालोक्यमवाप्नुयात्. — ( L. 3030 ) M$_{2,3}$ अभ्यसे( M$_3$ °र्चये )त्प्रतिमासं यो ( for the prior half ). — ( L. 3031 ) T$_1$ प्राप्य मद्गते ( for राजल्लँभते ). — ( L. 3032 ) M$_{2,3}$ तथा ( for the first फलं ). T$_2$ अर्चयेत् ( for पत्रं वा ). G$_3$ जलम् ; Madras ed. मूलम् ( for the second फलम् ). — ( L. 3033 ) G$_1$ M$_3$ तत्समो न ; M$_2$ ततोन्यो वा ( for ततो नान्यो ). M$_4$ पुण्यकृत् ( for मत्प्रियः ). — ( L. 3035 ) G$_{1,2}$ M$_2$ -लोकांस् ( for -भोगांस् ). — ( L. 3037 ) T G$_3$ M$_{2,4}$ कृतांजलिपुटस्तोत्रमि( G$_3$ °स्तत्र इ )दं भक्त्याभ्यु( T$_2$ °क्त्याप्यु- ; G$_3$ °क्त्या ह्यु )वाच ह ( G$_3$ च ). — ( L. 3038 ) M$_2$ नमः ( for ऽस्तु ते ). — ( L. 3039 ) G$_{1,2}$ नित्यं

सहस्रशिरसे तुभ्यं सहस्राक्ष नमो नमः ।
त्रयीमय त्रयीनाथ त्रयीस्तुत नमो नमः ।
यज्ञात्मन्यज्ञसंभूत यज्ञनाथ नमो नमः ।
चतुर्मूर्ते चतुर्बाहो चतुर्व्यूह नमो नमः ।
लोकात्मँल्लोककृन्नाथ लोकावास नमो नमः ।
सृष्टिसंहारकर्त्रे ते नरसिंह नमो नमः ।
भक्तप्रिय नमस्तेऽस्तु भक्तवत्सल ते नमः ।
ब्रह्मावास नमस्तेऽस्तु ब्रह्मनाथ नमो नमः ।
रुद्ररूप नमस्तेऽस्तु रुद्रकर्मरताय ते ।
पञ्चयज्ञ नमस्तेऽस्तु सर्वयज्ञ नमो नमः ।
कृष्णप्रिय नमस्तेऽस्तु कृष्ण नाथ नमो नमः ।
योगावास नमस्तेऽस्तु योगनाथ नमो नमः ।
हयवक्त्र नमस्तेऽस्तु चक्रपाणे नमो नमः ।
पञ्चभूत नमस्तेऽस्तु पञ्चायुध नमो नमः ।

वैशंपायन उवाच ।

भक्तिगद्गदया वाचा स्तुवत्येवं युधिष्ठिरे ।
गृहीत्वा केशवो हस्ते प्रीतात्मा तं न्यवारयत् ।
निवार्य च पुनर्वाचा भक्तिनम्रं युधिष्ठिरम् ।
वक्तुमेवं नरश्रेष्ठं धर्मपुत्रं प्रचक्रमे ।

भगवानुवाच ।

अन्यवत्किमिदं राजन्मां स्तौषि नरपुंगव ।
तिष्ठ पृच्छ यथापूर्वं धर्मानेव युधिष्ठिर ।

युधिष्ठिर उवाच ।

भगवंस्त्वत्प्रसादात्तु स्मृत्वा स्मृत्वा पुनः पुनः ।
न शान्तिरस्ति देवेश नृत्यतीव च मे मनः ।
इदं च मम संप्रश्नं वक्तुमर्हसि माधव ।
कृष्णपक्षेषु द्वादश्यां पूजनीयः कथं भवान् ।

भगवानुवाच ।

शृणु राजन्यथातत्त्वं तत्सर्वं कथयामि ते ।
फलं तु कृष्णद्वादश्यामर्चनायां फलं मम ।
एकादश्यामुपोष्याथ द्वादश्यामर्चयेत्तु माम् ।
विप्रानपि यथालाभं भोजयेद्भक्तिमान्नरः ।
स गच्छेद्दक्षिणामूर्तिं मां वा नात्र विचारणा ।
चन्द्रसालोक्यमथ वा ग्रहनक्षत्रपूजितः ।

Colophon.

वैशंपायन उवाच ।

केशवेनैवमाख्याते धर्मपुत्रः पुनः प्रभुम् ।

---

(for तुभ्यं). $M_4$ [ऽ]स्तु ते (for नमः). — T om. line 3040. $M_4$ om. (hapl.) lines 3040–3041. — (L. 3041) $M_2$ [ऽ]स्तु ते (for नमः). — (L. 3042) $M_4$ [ऽ]स्तु ते (for नमः). — (L. 3043) T $G_3$ $M_3$ लोकनाथेश; $M_4$ सर्वलोकेश (for लोककृन्नाथ). T लोकाधार; $G_3$ लोकज्येष्ठ; $M_{2,3}$ (*inf. lin.*) लोकनाथ (for लोकावास). $G_{1,2}$ [ऽ]स्तु ते (for नमः). — (L. 3044) $T_1$ $G_{2,3}$ -हर्त्रे (for -कर्त्रे). $M_{2,3}$ नारसिंह. — $T_1$ om. (hapl.) lines 3045–3052. $M_4$ om. (hapl.) line 3045. $T_2$ reads lines 3045–3046 after line 3048; $G_3$ reads them after line 3050. $M_2$ om. from the post. half of line 3045 up to the prior half of line 3048. — (L. 3046) $M_3$ ब्रह्मवास; $M_4$ ब्रह्मरूप (for ब्रह्मावास). — (L. 3047) $M_3$ रौद्र- (for रुद्र-). $G_3$ $M_4$ रुद्ररूपधराय ते. — After line 3048, Madras ed. ins.:

सृष्टिसंहारकर्त्रे ते रुद्रप्रिय नमोऽस्तु ते ।

— $T_2$ om. (hapl.) lines 3049–3050. $G_3$ om. (hapl.) line 3049. — (L. 3049) $M_2$ transp. the prior half and the post. half. $G_1$ $M_3$ om. (hapl.) the post. half and the prior half of line 3050. — (L. 3050) $G_2$ योगप्रिय (for योगावास). $M_4$ योगावास; Kumbh. ed. and Madras ed. योगिनाथ (for योग°). — (L. 3051) $G_{1,2}$ [ऽ]स्तु ते (for नमः). — (L. 3054) $M_4$ दक्षिणे (for केशवो). $T_1$ सं-; $T_2$ स; $M_{2,3}$ तु (for तं). — (L. 3055) $T_1$ स (for च). T $G_{1,2}$ चाह (for वाचा). — (L. 3056) $G_3$ $M_4$ एव (for एवं). $G_{2,3}$ $M_{2,4}$ नरश्रेष्ठ. — (L. 3057) $M_4$ मा. $M_2$ स्तौषि मां (by transp.). — (L. 3058) $G_{1,2}$ धर्मपुत्र (for धर्मानेव). — (L. 3059) T प्रभावं; $G_3$ $M_{2-4}$ प्रसादं (for °दात्). — (L. 3060) $G_{1,2}$ $M_3$ मे देव (for देवेश). — (L. 3061) $M_4$ इमं (for इदं). $M_2$ इदं च सम्यक्प्रश्नं त्वं (for the prior half). T $G_3$ केशव; $M_2$ मानद (for माधव). — (L. 3062) T $G_3$ -पक्षे च; $M_{2-4}$ -पक्षे तु (for -पक्षेषु). $M_{2,3}$ अर्चनीयः (for पूज°). — (L. 3063) $G_2$ यथा तत्र; $M_{2-4}$ यथातथ्यं. Madras ed. पूर्वं (for सर्वं). $M_2$ [अ]हं (for ते). — (L. 3064) $G_{1,2}$ परमं; $M_3$ वरं तु (for फलं तु). T $M_4$ अर्चनाद्यत्; $G_3$ °नायाः (for °नायां). $M_2$ अहं (for फलं). — (L. 3066) T यथायोगं (for °लाभं). — (L. 3067) $M_{2,3}$ मम (for मां वा). — (L. 3068) T -सायुज्यम् (for -सालोक्यम्). $M_4$ नक्षत्रग्रहपूजितं. — Colophon. — *Sub-parvan*: T $M_{2,4}$ वै- ($T_2$ श्रीवै)-ष्णवधर्म. — *Adhy. name*: $G_{1,2}$ $M_{2,3}$ उपवासविधिः. — *Adhy. no.*: $T_1$ 102; $T_2$ $M_4$ 111; $G_{1,2}$ 101;

पप्रच्छ दानकालस्य विशेषं च विधिं नृप । [ 3070 ]

युधिष्ठिर उवाच ।

देव किं फलमाख्यातं दानस्य विषुवेषु च ।
सूर्येन्दूपप्लवे चैव दत्ते दाने च यत्फलम् ।

भगवानुवाच ।

शृणुष्व राजन्विषुवे सोमार्कग्रहणेषु च ।
व्यतीपातेऽयने चैव दानं स्यादक्षयं नृप ।
राजन्नयनयोर्मध्ये विषुवं संप्रचक्षते । [ 3075 ]
समरात्रं दिने तत्र संध्यायां विषुवे नृप ।
ब्रह्माहं शंकरश्चापि तिष्ठामः सहिताः सकृत् ।
क्रियाकरणकार्याणामेकीभावत्वकारणात् ।
अस्माकमेकीभूतानां निष्फलं तत्परं पदम् ।
तन्मुहूर्तं परं पुण्यं राजन्विषुवसंज्ञितम् । [ 3080 ]
तदेवाद्याक्षरं ब्रह्म परं ब्रह्मेति कीर्तितम् ।
तस्मिन्मुहूर्ते सर्वेऽपि चिन्तयन्तः परं पदम् ।
देवाश्च पितरो रुद्रा वसवश्चाश्विनौ तथा ।
साध्या विश्वे च गन्धर्वाः सिद्धा ब्रह्मर्षयस्तथा ।
सूर्यादयो ग्रहाश्चैव सागराः सरितस्तथा । [ 3085 ]
मरुतोऽप्सरसो नागा यक्षराक्षसगुह्यकाः ।
एते चान्ये च राजेन्द्र विषुवे संयतेन्द्रियाः ।
सोपवासाः प्रयत्नेन भवन्ति ध्यानतत्पराः ।
अन्नं गावस्तिलान्भूमिं कन्यादानं तथैव च ।
गृहमाच्छादनं धान्यं वाहनं शयनं तथा । [ 3090 ]
यच्चान्यच्च मया प्रोक्तं तत्प्रयच्छ युधिष्ठिर ।
दीयते विषुवेष्वेवं श्रोत्रियेभ्यो विशेषतः ।
तस्य दानस्य कौन्तेय क्षयो नैवोपपद्यते ।
वर्धतेऽहरहः पुण्यं तद्दानं कोटिसंमितम् ।
विषुवे स्नपनं यस्तु मम कुर्याद्धरस्य वा । [ 3095 ]
अर्चनं च यथान्यायं तस्य पुण्यफलं शृणु ।
दशजन्मकृतं पापं तस्य सद्यो विनश्यति ।
दशानामश्वमेधानामिष्टानां लभते फलम् ।
विमानं दिव्यमारूढः कामरूपी यथासुखम् ।
स याति मामकं लोकं रुद्रलोकमथापि वा । [ 3100 ]
तत्रस्थैर्देवगन्धर्वैर्गीयमानो यथासुखम् ।
दिव्यवर्षसहस्राणि कोटिमेकं तु मोदते ।
ततश्चापि च्युतः कालादिह लोके द्विजोत्तमः ।
चतुर्णामपि वेदानां पारगो ब्रह्मविद्भवेत् ।
चन्द्रसूर्यग्रहे वापि मम वा शंकरस्य वा [ 3105 ]
गायत्रीं मामिकां वापि जपेद्यः शंकरस्य वा ।
शङ्खतूर्यनिनादैश्च कांस्यघण्टास्वनैरपि ।
कारयेत्तु ध्वनिं भक्त्या तस्य पुण्यफलं शृणु ।

---

$G_3$ 112; $M_2$ 18; $M_3$ 100. — (L. 3069) $G_3$ केशवे च (for °वेन). $M_2$ समाख्यातो; $M_3$ [ए]वमाख्यातो. $G_1$ $M_2$ पुनः पुनः; $G_3$ तु तं प्रभुं; $M_3$ पुनः प्रभुः; $M_4$ प्रतापवान् (for पुनः प्रभुम्). — (L. 3070) $M_{2.3}$ अपृच्छद् (for पप्रच्छ). — (L. 3071) $G_{1.2}$ विषुवेष्वमरेश्वर (for the post. half). — (L. 3072) $M_3$ om. (hapl.) from the post. half up to the prior half of line 3074. $G_{1.2}$ वक्तुमर्हसि य($G_2$ त)त्फलं (for the post. half). — (L. 3074) $G_1$ व्यतीपातदिने चैव; $G_3$ °पातायने चैव. $M_2$ दत्तं (for दानं). G फलं (for नृप). — (L. 3075) $T_2$ $G_{2.3}$ $M_4$ मध्यं. — (L. 3076) $G_{1.2}$ समे रात्रिं ($G_2$ °त्रि-); $M_3$ समरात्रिं; $M_4$ समे च त्रि- (for समरात्रं). $G_3$ दिनं. $M_2$ त्रिसंध्यां (for संध्यायां). — (L. 3077) $G_1$ विक्रमः सहितः सकृत् (for the post. half). — (L. 3078) $M_{2-4}$ -कारण- (for -करण-). $G_1$ -कारणत्व- (hypermetric); $M_4$ -भूतत्व- (for -भावत्व-). — (L. 3079) $G_1$ निष्कृतिं; Madras ed. निष्कलं (for निष्फलं). $G_3$ परं परं; $M_3$ पदं परं (by transp.). — (L. 3080) $M_4$ तं (for तन्). T $G_3$ दिव्यं (for पुण्यं). $M_4$ विपुल- (for विषुव-). — (L. 3082) T $G_2$ एतन् (for तस्मिन्). $G_{1.3}$ $M_2$ तु (for ऽपि). $G_1$ चिंतयंति. $M_3$ परस्परं (for परं पदम्). — (L. 3083) $M_2$ शक्रश् (for देवाश्). — (L. 3084) $G_{1.2}$ $M_3$ च विश्वे (by transp.); $G_3$ $M_4$ विश्वे स-. — (L. 3085) $G_{1.2}$ $M_4$ सोमादयो (for सूर्या°). $M_{2.3}$ सोमो ग्रहगणाश्चैव (for the prior half). $G_{1.2}$ सरितः सागरास्तथा. — (L. 3086) $M_{2.3}$ चाप्सरो (for ऽप्सरसो). $M_2$ यक्षा (for यक्ष-). — (L. 3087) $G_{2.3}$ विषये (for विषुवे). — (L. 3089) $M_2$ गावं. $T_2$ तथा (for तिलान्). $M_2$ कन्याम् (for भूमिं). $M_2$ अन्यदन्यच्च तादृशः (for the post. half). — (L. 3090) $G_{1.2}$ आयतनं (for आच्छादनं). — (L. 3091) T $G_3$ नोक्तं (for प्रोक्तं). — (L. 3092) $M_{2.4}$ [ए]व (for [ए]वं). — (L. 3093) $G_{1.2}$ $M_3$ क्षयं. — (L. 3095) G स्नापनं; $M_2$ स्नपना. — (L. 3096) $G_{1.2}$ अर्चनां. $M_{2.3}$ पंचगव्येन विधिवत् (for the prior half). — (L. 3099) $M_2$ आरूढं. — $G_1$ om. (hapl.) lines 3100–3101. — (L. 3100) $M_4$ ब्रह्म- (for रुद्र-). — (L. 3101) $M_2$ तत्र वै (for तत्रस्थैर्). — (L. 3102) T -सहस्राणां; $M_2$ °स्रं तु (for °स्राणि). — (L. 3103) $M_2$ द्विजो भवेत् (for द्विजोत्तमः). — (L. 3104) T $G_3$ ब्राह्मणो (for ब्रह्मविद्). — (L. 3105)

गान्धर्वैर्होमजप्यैश्च शब्दैरुत्कृष्टनादिभिः ।
दुर्बलोऽपि भवेद्राहुः सोमश्च बलवान्भवेत् । [ 3110 ]
सूर्येन्दूपप्लवे चैव श्रोत्रियेभ्यः प्रदीयते ।
तत्सहस्रसमं भूत्वा दातारमुपतिष्ठति ।
महापातकयुक्तोऽपि यद्यपि स्यान्नरो नृप ।
निर्लेपस्तत्क्षणादेव तेन दानेन जायते ।
चन्द्रसूर्यप्रकाशेन विमानेन विराजता । [ 3115 ]
याति सोमपुरं रम्यं सेव्यमानोऽप्सरोगणैः ।
यावदृक्षाणि तिष्ठन्ति गगने शशिना सह ।
तावत्कालं स राजेन्द्र सोमलोके महीयते ।
ततश्चापि च्युतः कालादिह लोके युधिष्ठिर ।
वेदवेदाङ्गविद्विप्रः कोटीधनपतिर्भवेत् । [ 3120 ]

युधिष्ठिर उवाच ।

भगवंस्तव गायत्री बुध्यते तु कथं नृभिः ।
किं वा तस्याः फलं देव ममाचक्ष्व सुरेश्वर ।

भगवानुवाच ।

द्वादश्यां विषुवे चैव चन्द्रसूर्यग्रहे तथा ।
अयने श्रवणे चैव व्यतीपाते तथैव च ।
अश्वत्थदर्शने चैव तथा मद्दर्शनेऽपि च । [ 3125 ]
जप्त्वा तु मम गायत्रीमथ वाष्टाक्षरं नृप ।
आर्जितं दुष्कृतं तस्य नाशयेन्नात्र संशयः ।

युधिष्ठिर उवाच ।

अश्वत्थदर्शनं चैव किं त्वद्दर्शनसंमितम् ।
एतत्कथय देवेश परं कौतूहलं हि मे ।

भगवानुवाच ।

अहमश्वत्थरूपेण पालयामि जगत्त्रयम् । [ 3130 ]
अश्वत्थो न स्थितो यत्र नाहं तत्र प्रतिष्ठितः ।
यत्राहं संस्थितो राजन्नश्वत्थश्चापि तत्र वै ।
यस्त्वेनमर्चयेद्भक्त्या स मां साक्षात्समर्चति ।
यस्त्वेनं प्रहरेत्कोपान्मामेव प्रहरेत्तु सः ।
तस्मात्प्रदक्षिणं कुर्यान्न छिन्द्यादेनमन्वहम् । [ 3135 ]
व्रतस्य पारणं तीर्थमार्जवं तीर्थमुच्यते ।
देवशुश्रूषणं तीर्थं गुरुशुश्रूषणं तथा ।
गुरुशुश्रूषणं तीर्थं तीर्थज्ञानस्य धारणम् ।
नराणां पोषणं तीर्थं गार्हस्थ्यं तीर्थमुच्यते ।
आतिथेयं परं तीर्थमतिथिस्तीर्थमुच्यते । [ 3140 ]
ब्रह्मचर्यं परं तीर्थं त्रेताग्निस्तीर्थमुच्यते ।
मूलं धर्मं तु विज्ञाय मनस्तत्रावधार्यताम् ।

---

G1. 2 व्योम्नि ; M2 धाम्नि ( for वापि ). — ( L. 3107 ) Kumbh. ed. -स्वनैश्चैव ( for -निनादैश्च ). — ( L. 3108 ) M2 महत् ( for शृणु ). — ( L. 3109 ) T G2 गंधर्वैर्. G3 गंधर्वैर्वा मध्यमैश्च ( for the prior half ). G1. 2 जप्तैर् ( for शब्दैर् ). G1 -नामाभिः ; M2. 3 -वादिभिः ( for -नादिभिः ). — ( L. 3110 ) G3 M2 हि ; M3 [ ऽ ]भि- ( for ऽपि ). — ( L. 3111 ) M2 यद्वै ( for चैव ). T2 ग्रहणे विषुवे चैव ( for the prior half ). — ( L. 3112 ) G1 M2. 3 -गुणं ( for -समं ). T -तिष्ठते. — ( L. 3113 ) M2 -संयुक्तो ( for -युक्तोऽपि ). G1. 2 नरोत्तम ( for नरो नृप ). — ( L. 3114 ) G1. 2 निष्पापस् ( for निर्ले° ). T2 नादेन ( for दानेन ). — ( L. 3118 ) T महाराज ( for स राजेन्द्र ). — ( L. 3119 ) M4 नराधिप ( for युधिष्ठिर ). — ( L. 3120 ) T कोटि- ( for कोटी- ). — ( L. 3121 ) G1 M2. 3 जप्यते ( for बुध्यते ). G1. 2 विभो ; M4 मया ( for नृभिः ). — ( L. 3122 ) M2. 3 तन्ममाचक्ष्व केशव ( for the post. half ). — ( L. 3123 ) T G3 [ ऽ ]पि वा ( for तथा ). — ( L. 3124 ) M2 अयने ग्रहणे पुण्ये ( for the prior half ). T2 व्यतिपादे. — ( L. 3125 ) G2 -दर्शनेनैव ; M2 °नेनापि ( for °ने चैव ). G1 M2 मद्दर्शनेन ( for °नेऽपि ). — ( L. 3126 ) G1. 2 M3 जप्या ( for जप्त्वा ). M2 [ अ ]ष्टाक्षरीं. — ( L. 3127 ) T G3 अर्जितं. M2 यावज्जीवं विनाशयेत् ( for the post. half ). — M2 om. lines 3128–3129. — ( L. 3128 ) T1 G3 -दर्शने. G1 किंचिद् ( for किं त्वद् ). — G1 om. line 3131. — ( L. 3133 ) T1 मा ( for मां ). — ( L. 3134 ) M2 यः ( for सः ). — ( L. 3135 ) T2 एवम् ( for एनम् ). — M2. 3 read lines 3136–3281 after line 3329. — ( L. 3136 ) M2. 3 चरणं ( for पारणं ). G3 पूर्णम् ( for तीर्थम् ). M4 om. ( hapl. ) from the post. half up to the prior half of line 3150. Madras ed. सर्वतीर्थेषु पांडव ( for the post. half ). — ( L. 3137 ) T1 देवे ; G3 वेद- ( for देव- ). M2. 3 द्विज- ( for गुरु- ). T1 G1 त्रेताग्निस्तीर्थमुच्यते ( for the post. half ). — After line 3137, Madras ed. ins. :

पुत्रस्य पारणं तीर्थमार्जवं तीर्थमुच्यते ।

— G1 om. line 3138 and the prior half of line 3139. — ( L. 3138 ) T द्विज- ; G2 पितृ- ( for गुरु- ). M2. 3 ज्ञानं ; Madras ed. अर्थं ( for तीर्थ- ). G3 M2. 3 पारणं ( for धारणम् ). G2 मातृशुश्रूणस्तथा ( for the post. half ). — ( L. 3139 ) G2. 3 दाराणां ( for न° ). G2 तोषणं ( for पो° ). M2. 3 दारसंतोषणं तीर्थं. — ( L. 3140 ) G2. 3 M2. 3 आतिथेयाः. G1. 2 ब्रह्मतीर्थं सनातनं ( for the post. half ). — ( L. 3141 ) T गुरुशुश्रूषणं तथा ( for the post. half ). — ( L. 3142 ) G3 M2. 3 मूलं ध( M2 °लध )र्मस्य

गच्छ तीर्थानि कौन्तेय धर्मो धर्मेण वर्धते ।
द्विविधं तीर्थमित्याहुः स्थावरं जङ्गमं तथा ।
स्थावराज्जङ्गमं श्रेष्ठं ततो ज्ञानपरिग्रहः । [ 3145 ]
कर्मणापि विशुद्धस्य पुरुषस्येह भारत ।
हृदये सर्वतीर्थानि तीर्थभूतः स उच्यते ।
गुरुतीर्थं परं ज्ञानमतस्तीर्थं न विद्यते ।
ज्ञानतीर्थं परं तीर्थं ब्रह्मतीर्थं सनातनम् ।
क्षमा तु परमं तीर्थं सर्वतीर्थेषु पाण्डव । [ 3150 ]
क्षमावतामयं लोकः परश्चैव क्षमावताम् ।
मानितोऽमानितो वापि पूजितोऽपूजितोऽपि वा ।
आक्रुष्टस्तर्जितो वापि क्षमावांस्तीर्थमुच्यते ।
क्षमा दमः क्षमा दानं क्षमा यज्ञः क्षमा तपः ।
क्षमाहिंसा क्षमा धर्मः क्षमा चेन्द्रियनिग्रहः । [ 3155 ]
क्षमा दया क्षमा यज्ञः क्षमयैतद्धृतं जगत् ।
क्षमावान्प्राप्नुयात्स्वर्गं क्षमावान्प्राप्नुयाद्यशः ।
क्षमावान्प्राप्नुयान्मोक्षं तस्मात्सा तीर्थमुच्यते ।
आत्मा नदी भारतपुण्यतीर्थ-
मात्मा तीर्थं सर्वतीर्थप्रधानम् । [ 3160 ]
आत्मा तु यज्ञः सततं मन्यते वै
स्वर्गो मोक्षः सर्वमात्मन्यधीनम् ।
आचारनैर्मल्यमुपागतेन
सत्यप्रसन्नक्षमशीतलेन ।
ज्ञानाम्बुना स्नाति च यो हि नित्यं [ 3165 ]
किं तस्य भूयः सलिलेन कृत्यम् ।
युधिष्ठिर उवाच ।
भगवन्सर्वपापघ्नं प्रायश्चित्तमदुष्करम् ।
त्वद्भक्तस्य सुरश्रेष्ठ मम त्वं वक्तुमर्हसि ।
भगवानुवाच ।
रहस्यमिदमत्यर्थमश्राव्यं पापकर्मणाम् ।
अधार्मिकाणामश्राव्यं प्रायश्चित्तं ब्रवीमि ते । [ 3170 ]
पावनं ब्राह्मणं दृष्ट्वा मद्गतेनान्तरात्मना ।
नमो ब्रह्मण्यदेवायेत्यभिवादनमाचरेत् ।
प्रदक्षिणं च त्रिः कुर्यात्पुनरष्टाक्षरेण तु ।
तेन तुष्टो नरश्रेष्ठ तत्पापं क्षपयाम्यहम् ।
यत्र कृष्टां वराहस्य मृत्तिकां शिरसा वहन् । [ 3175 ]
प्राणायामशतं कृत्वा नरः पापैः प्रमुच्यते ।
दक्षिणावर्तशङ्खाद्वा कपिलाशृङ्गतोऽपि वा ।
प्राक्स्रोतसं नदीं गत्वा ममायतनसंनिधौ ।

---

विज्ञाय. — ( L. 3145 ) $G_3$ ·परिग्रहात्. — ( L. 3147 ) $M_2$ -भूतस्य ( for -भूतः स ). — ( L. 3148 ) $G_3$ $M_3$ गुरुस्; $M_2$ कुरु- ( for गुरु- ). T एतत् ( for अतस् ). — ( L. 3149 ) T ज्ञानं ( for ज्ञान- ). T $G_3$ $M_2$ तपस् ( for परं ). — ( L. 3150 ) $M_2$ तत् ( for तु ) and भारत ( for पाण्डव ). — ( L. 3151 ) T $G_2$ $M_2$ परलोकः ( for परश्चैव ). — ( L. 3153 ) $M_2$ तापितो ( for तर्जितो ). — ( L. 3154 ) T $G_{1.2}$ क्षमा यशः; $M_3$ क्षमाशयः ( for क्षमा दमः ). T $G_{1.3}$ $M_4$ सत्यं; $M_3$ यज्ञं ( for यज्ञः ). $G_{1.2}$ $M_3$ दमः ( for तपः ). — ( L. 3155 ) $M_2$ -विग्रहः ( for -निग्रहः ). — ( L. 3156 ) $M_2$ शीलं ( for दया ). $M_3$ यज्ञं. $G_{1.2}$ $M_3$ [ए]व ( for [ए]तद् ). — After line 3156, $G_{1.2}$ $M_3$ ins. :

क्षमावान्ब्राह्मणो देवः क्षमावान्ब्राह्मणो वरः ।

— $M_3$ om. ( hapl. ) line 3157. — ( L. 3158 ) $G_{1.2}$ साधुः स; Madras ed. तीर्थं स ( for सा तीर्थम् ). $G_3$ तस्माच्छ्रेष्ठा क्षमोच्यते ( for the post. half ). — ( L. 3159 ) T -तीर्था. — ( L. 3160 ) T ह्यात्मा ( for आत्मा ). — ( L. 3161 ) T आत्मा यज्ञः साम चात्मा त( $T_2$ य )था वै; $G_3$ $M_4$ आत्मा यज्ञः ( $M_4$ °तः ) सममात्मन्यथा वै; $M_{2.3}$ Madras ed. आत्मा यज्ञः सर्वमात्मन्यथैव ( Madras ed. °थो वै ). — ( L. 3162 ) T आत्मप्रधानं; $M_4$ °न्यधीतं. — ( L. 3163 ) $G_2$ आचार्य- ( for °र- ). T $G_3$ $M_{2.4}$ आचा( $G_3$ °धा )रवस्त्रांतरक्षालि- ( $T_1$ °क्षाळ-; $M_2$ °गाळि )तेन. — ( L. 3164 ) $G_3$ -क्षण- ( for -क्षम- ). $T_1$ सत्यः प्रसन्नः क्षणशीतलेन; $T_2$ सत्यः प्रसादक्षम°; $G_{1.2}$ सत्यः क्षमानिस्थ( $G_2$ °स्त )ळ°. — ( L. 3165 ) $G_3$ पूर्णांबुना; $M_2$ ज्ञानं पुरा ( for ज्ञानाम्बुना ). T $G_{1.2}$ $M_3$ हि ( for च ). T यश्च नित्यं; $G_{1.2}$ $M_3$ नित्यमेवं ( for यो हि नित्यं ). — ( L. 3166 ) $G_3$ भोगेन धनेन ( for भूयः सलिलेन ). $G_{1.2}$ तीर्थं ( for कृत्यम् ). — ( L. 3167 ) $M_{2.3}$ सुदुष्करं. — ( L. 3168 ) $M_4$ नर- ( for सुर- ). $M_{2-4}$ वक्तुं त्वम् ( by transp. ). — ( L. 3169) $M_2$ अत्यंतम् ( for अत्यर्थम् ). $G_2$ $M_{2.3}$ पापकर्मिणां. — ( L. 3170 ) $M_2$ अवैष्णवानाम् ( for अधार्मिकाणाम् ). — ( L. 3172 ) $M_2$ [इ]त्यभिवाद्य यथाविधि ( for the post. half ). — ( L. 3173 ) Kumbh. ed. and Madras ed. यः ( for त्रिः ). — ( L. 3174 ) $M_2$ नरव्याघ्र ( for °श्रेष्ठ ). $G_{1.2}$ $M_3$ तेन तुष्टेन ( $G_2$ °ष्टे तु ) विप्रेण ( for the prior half ). T क्षमयामि ( for क्षप° ). — ( L. 3175 ) $G_{1.2}$ पोत्रकृष्टां; $M_{2.3}$ क्षेत्रकृष्टां ( $M_2$ °ष्णां ) ( for यत्र कृष्टां ). — ( L. 3176 ) $M_3$ वि- ( for प्र- ). — ( L. 3177 ) $M_4$ -शंखं. — ( L. 3178 ) $M_{2-4}$ मम सूक्तेन संयतः ( for the post. half ). — $M_3$ reads line 3179 twice. —(L. 3179) $G_3$ $M_3$ ( second time ) सकृदेव हि ( $G_3$ तु )

सलिलेन तु यः स्नायात्सकृदेव रविग्रहे ।
तस्य यत्संचितं पापं तत्क्षणादेव नश्यति । [ 3180 ]
मस्तकान्निःसृतैस्तोयैः कपिलाया युधिष्ठिर ।
गोमूत्रेणापि यः स्नायाद्रोहिण्या मम वा दिने ।
विप्रपादच्युतैर्वापि तोयैः पापं प्रणश्यति ।
नमस्येद्यस्तु मद्भक्त्या शिंशुमारं प्रजापतिम् ।
चतुर्दशाङ्गसंयुक्तं तस्य पापं प्रणश्यति । [ 3185 ]
ततश्चतुर्दशाङ्गानि शृणु तस्य नराधिप ।
शिरो धर्मो हनुर्ब्रह्मा पुच्छावुत्तरदक्षिणौ ।
हृदयं तु भवेद्विष्णुर्हस्तौ स्यातां तथाश्विनौ ।
अग्निर्मध्यं भवेद्राजँल्लिङ्गं संवत्सरं भवेत् ।
मित्रावरुणकौ पादौ पुच्छमूलं हुताशनः । [ 3190 ]
ततः पश्चाद्भवेदिन्द्रस्ततः पश्चात्प्रजापतिः ।
अभयं च ततः पश्चात्स एव ध्रुवसंज्ञितः ।
एतान्यङ्गानि सर्वाणि शिंशुमारप्रजापतेः ।
पिबेत्तु पञ्चगव्यं यः पौर्णमास्यामुपोष्य तु ।
तस्य नश्यति तत्सर्वं यत्पापं पूर्वसंचितम् । [ 3195 ]

तथैव ब्रह्मकूर्चं तु समन्त्रं तु पृथक्पृथक् ।
मासि मासि पिबेद्यस्तु तस्य पापं प्रणश्यति ।
पापं च ब्रह्मकूर्चं च शृणु मन्त्रं च भारत ।
पालाशं पद्मपत्रं वा ताम्रं वाथ हिरण्मयम् ।
सादयित्वा तु गृह्णीयात्तत्तु पात्रमुदाहृतम् । [ 3200 ]
गायत्र्या गृह्य गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ।
तेजोऽसि शुक्रमित्याज्यं देवस्येति कुशोदकम् ।
आपो हि ष्ठेति संगृह्य यवचूर्णं यथाविधि ।
ब्रह्मणे च यथा हुत्वा समिद्धे च हुताशने । [ 3205 ]
आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु ।
उद्धृत्य प्रणवेनैव पिबेत्तु प्रणवेन तु ।
महतापि स पापेन त्वचेवाहिर्विमुच्यते ।
भद्रं न इति यः पादं पठेदृक्संहितां यथा ।
अन्तर्जले वाथादित्ये तस्य पापं प्रणश्यति । [ 3210 ]

मम सूक्तं जपेद्यस्तु नित्यं मद्गतमानसः ।
न पापेन तु लिप्येत पद्मपत्रमिवाम्भसा ।

Colophon.

---

( for सलिलेन तु ). $M_4$ सलिलेन ( for सकृदेव ). $M_2$ सलिले रविविग्रहे ; $M_3$ ( first time ) सलिले चावगाहयेत् ( for the post. half ). —( L. 3183 ) $G_{1.2}$ $M_3$ विप्रपादाच्. —( L. 3184 ) $G_{1.2}$ शिंशुमार-. $M_2$ शिंशुमारः प्रजापतिः. —( L. 3185 ) $G_1$ -संरिक्तं ( for -संयुक्तं ). $G_{1.2}$ तत्क्षणादेव नश्यति ( for the post. half ). — After line 3185, $M_{2.3}$ ins. :

युधिष्ठिरः ।
चतुर्दश सुरश्रेष्ठ तस्याङ्गानि प्रजापतेः ।
क्रमेण नामतस्तानि वक्तुमर्हसि मानद ।

भगवान् ।

—( L. 3186 ) $G_2$ $M_3$ युधिष्ठिर ( for नराधिप ). —( L. 3187 ) $M_{2.3}$ यमो ( for धर्मो ). $G_1$ वृषाव्; $G_2$ पृष्ठाव् ( for पुच्छाव् ). —( L. 3188 ) $G_{1.2}$ अंसौ ; $M_{2.3}$ हस्ते ( for हस्तौ ). —( L. 3189 ) $G_{1.2}$ $M_4$ अत्रिर् ( for अग्निर् ). $M_{2.3}$ संवत्सरो. $G_3$ लिंगस्यांतं यथा भवेत् ( for the post. half ). —( L. 3190 ) $M_2$ मित्रावरुणतौ. $G_{1.2}$ $M_3$ ऊरुद्वंद्वं ( for पुच्छमूलं ). —( L. 3191 ) $M_{2.3}$ अतः ( for ततः ). $T_1$ $G_3$ बृहस्पतिः ( for प्रजापतिः ). —( L. 3192 ) $G_3$ उभयं ( for अ° ). T $G_2$ ध्रुवः ( for ततः ). —( L. 3194 ) T पंचगव्येन ; $G_3$ °गव्यं स ( for °गव्यं यः ). $M_{2.4}$ उपोषितः. —( L. 3197 ) T मासे मासे. $G_3$ क्षिपेद् ( for पिबेद् ). —( L. 3198) $M_2$ तंत्रं ; Kumbh. ed. तत्र ( for मन्त्रं ). $M_4$ पात्रं च ब्रह्मकूर्चस्य मंत्रं च शृणु भारत. —( L. 3199 ) $M_{2-4}$ पलाशं. —( L. 3200 ) $G_3$ साथयित्वा ( for साद° ). $M_4$ पूर्वम् ( for पात्रम् ). —( L. 3201 ) $T_1$ गायत्रिया ( hypermetric ). $M_4$ गृह्यते मूत्रं ; Kumbh. ed. गृह्णते मूत्रं ( for गृह्य गोमूत्रं ). —( L. 3202) $G_2$ गो- ( for च ). $T_2$ -क्रावेति ; $G_2$ -क्राव्ण्णेति ; $M_3$ -क्राविण्णेति ( hypermetric ) ( for -क्राव्णेति ). $M_2$ दधितक्रेति तथा दधि ( sic ). —( L. 3203 ) T तेजः शुक्रमसीत्याज्यं ; $G_{2.3}$ तेजोसि शुक्रमसीत्याज्यं ( hypermetric ); $M_{2.3}$ आज्यं शुक्रमसीत्येव ( for the prior half ). $G_{1.2}$ त्वेति ( hypermetric ) ( for [इ]ति ). —( L. 3204 ) $G_1$ आपो हि ष्ठेत्यृचा गृह्य. $M_4$ यवपूर्वं. $M_2$ यथाक्रमं ( for °विधि ). —( L. 3205 ) $T_2$ ब्रह्मणेति ( for °णे च ). $M_4$ तथा. $M_2$ हुत्वा ब्रह्माहुतीः सर्वाः ( for the prior half ). T समिधैश्च. $M_{2.3}$ समृद्धेऽग्नौ यथाविधि. —( L. 3206 ) $G_{1.2}$ निर्मथ्य ; $M_2$ उद्धृत्य. —( L. 3207 ) $M_2$ निर्मथ्यं ( for उद्धृत्य ). —( L. 3209 ) T $G_3$ पार्थ ( for पादं ). $G_1$ पठन् ; $M_2$ जपेद् ( for पठेद् ). $G_{1.2}$ सदा ; $G_3$ इमां ; $M_{2.3}$ समं ; $M_4$ अयं ( for यथा ). —( L. 3210 ) $G_1$ [अ]भ्यादित्ये. —( L. 3211 ) T पठेद् ( for जपेद् ). —( L. 3212 ) $M_{2-4}$ न स पापेन लिप्येत. — Colophon, — *Sub-parvan :* T $M_4$ श्रीवैष्णवधर्मं ;

युधिष्ठिर उवाच ।

कीदृशा ब्राह्मणाः पुण्या भावशुद्धाः सुरेश्वर ।
यत्कर्म सफलं नेति कथयस्व ममाच्युत ।

भगवानुवाच ।

शृणु पाण्डव तत्सर्वं ब्राह्मणानां यथाक्रमम् । [ 3215 ]
सफलं निष्फलं चैव तेषां कर्म ब्रवीमि ते ।
त्रिदण्डधारणं मौनं जटाधारणमुण्डनम् ।
वल्कलाजिनसंवासो व्रतचर्याभिषेचनम् ।
अग्निहोत्रं वने वासः स्वाध्यायं दानसत्क्रिया ।
सर्वाण्येतानि वै मिथ्या यदि भावो न निर्मलः । [ 3220 ]
अग्निहोत्रं वृथा राजन्वृथा वेदास्तथैव च ।
शीलेन देवास्तुष्यन्ति श्रुतयस्तत्र कारणम् ।
क्षान्तं दान्तं जितक्रोधं जितात्मानं जितेन्द्रियम् ।
तमग्र्यं ब्राह्मणं मन्ये शेषाः शूद्रा इति स्मृताः ।
अग्निहोत्रव्रतपरान्स्वाध्यायनिरताञ्शुचीन् । [ 3225 ]
उपवासरतान्दान्तांस्तान्देवा ब्राह्मणान्विदुः ।
न जातिः पूज्यते राजन्गुणाः कल्याणकारणाः ।
चण्डालमपि वृत्तस्थं तं देवा ब्राह्मणं विदुः ।
मनःशौचं कर्मशौचं कुलशौचं च भारत ।
शरीरशौचं वाक्शौचं शौचं पञ्चविधं स्मृतम् । [ 3230 ]
पञ्चस्वेतेषु शौचेषु हृदि शौचं विशिष्यते ।
हृदयस्य तु शौचेन स्वर्गं गच्छन्ति मानवाः ।
अग्निहोत्रपरिभ्रष्टः प्रसक्तः क्रयविक्रये ।
वर्णसंकरकर्ता च ब्राह्मणो वृषलैः समः ।
यस्य वेदश्रुतिर्नष्टा कर्षकश्चापि यो द्विजः । [ 3235 ]
विकर्मसेवी कौन्तेय स वै वृषल उच्यते ।
वृषो हि धर्मो विज्ञेयस्तस्य यः कुरुते लयम् ।
वृषलं तं विदुर्देवा निकृष्टं श्वपचादपि ।
स्तुतिभिर्ब्रह्मपूताभिर्यः शूद्रं स्तौति मानवः ।
न च मां स्तौति पापात्मा स मामाक्रोशयेद्भृशम् । [ 3240 ]
श्वदृतौ तु यथा क्षीरं ब्रह्म वै वृषले तथा ।
दुष्टतामेति तत्सर्वं शुना लीढं हविर्यथा ।
अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ।
यान्युक्तानि मया सम्यग्विद्यास्थानानि भारत । [ 3245 ]
उत्पन्नानि पवित्राणि पावनार्थं तथैव च ।
तस्मात्तानि न शूद्रस्य स्प्रष्टव्यानि युधिष्ठिर ।

---

$M_2$ वैष्णवे धर्मशास्त्रे ; $M_3$ विष्णुधर्मे. — *Adhy. name :* $M_2$ प्रायश्चित्तविधिः. — *Adhy. no. :* $T_1$ $G_{1.2}$ $M_3$ 102 ; $T_2$ $M_4$ 112 ; $G_3$ 113 ; $M_2$ 12. — ( L. 3213 ) $M_4$ भावात् ( for भाव- ). — ( L. 3214 ) $M_4$ यत्तत्कर्मफलं नैति ( for the prior half ). $G_{1.2}$ [अ]नघ ( for [अ]च्युत ). — ( L. 3215 ) $M_2$ युधिष्ठिर ; $M_4$ विशेषतः ( for यथाक्रमम् ). — ( L. 3216 ) $T_2$ $G_3$ $M_2$ [इ]ति ( for [ए]व ). — $G_3$ om. line 3217. — ( L. 3217 ) $M_2$ -धारिणं. $G_1$ -मंडनं ( for -मुण्डनम् ). — ( L. 3218 ) $M_2$ -संवासा. — ( L. 3219 ) $M_{2.3}$ स्वाध्यायो. $G_{1.2}$ दार- ( for दान- ). $M_2$ -संक्रिया ( for -सत्क्रिया ). — ( L. 3221 ) $M_4$ यथा ( for the second वृथा ). $G_3$ देवास् ( for वेदास् ). — After line 3221, $M_{2.3}$ ins. :

शीलहीनस्य विप्रस्य शीलं सर्वस्य साधनम् ।

— ( L. 3222 ) $M_{2-4}$ वेदास् ( for देवास् ). $G_3$ शीलेन देवास्तुष्येरन्कर्मणा पितरस्तथा. — ( L. 3223 ) $M_2$ जितमानं ( for जितात्मानं ). — ( L. 3224 ) $G_3$ अहं ( for अग्र्यं ). $G_3$ श्रुतिः ( for स्मृताः ). — ( L. 3226 ) $T_2$ $G_3$ -व्रतपरांस् ; $M_4$ -परान्दांतांस् ( for -रतान्दा° ). — ( L. 3227 ) $G_{1.2}$ न जात्या पूजितो राजन् ; $M_{2.3}$ न जातिपूज्यास्ते राजन् ( for the prior half ). $M_{2.3}$ कल्याणकारकाः. — ( L. 3228 ) $T_1$ $M_4$ उत्तमं ( for ब्राह्मणं ). — ( L. 3231 ) $M_{2.3}$ [ए]षु च ; $M_4$ [ए]व तु ( for [ए]तेषु ). $G_1$ धृति- ( for हृदि ). — ( L. 3233 ) T -परिभ्रष्टाः. T $G_{1.2}$ प्रसक्ताः ; $G_3$ प्रसह्य. G क्रयविक्रयैः ( $G_3$ °यः ). — ( L. 3234 ) T -कर्तारो ( for -कर्ता च ). T ब्राह्मणा वृषलैः समाः. — ( L. 3235 ) $G_3$ यस्य वेदस्मृतिर्नास्ति ( for the prior half ). $G_1$ कर्षकाश्चापि ये द्विजाः. — ( L. 3237 ) $M_{2.3}$ धर्मो हि ( by transp. ). — ( L. 3238 ) T $G_3$ विजानीयान् ( for विदुर्देवा ). $M_{2.3}$ निकृष्टाः. $G_1$ श्वपचादिभिः. — ( L. 3239 ) $G_3$ स्मृतिभिर् ; $M_4$ श्रुति° ( for स्तुति° ). T $G_3$ -भूताभिर् ; $M_4$ -पूर्वाभिः ( for -पूताभिर् ). $M_{2.3}$ यः स्तौति वृषलस्तु मां ; $M_4$ शूद्रः स्तौतीति मां नरः ( for the post. half ). — ( L. 3240 ) $M_4$ स ( for च ). T $G_3$ ममाक्रोशकरो भृशं ( T also नृप ) ; $M_2$ स मामाक्रोशते भृशं ; Madras ed. स तु चंडाल एव च ( for the post. half ). — ( L. 3241 ) $T_1$ श्वधृतौ ; $T_2$ श्वादृतं ; $G_1$ श्वद्रुतौ ; $G_3$ श्वाभृतं ( for श्वदृतौ ). $T_2$ $G_3$ च ( for तु ). $G_1$ ब्रह्मळ ( for वृषले ). T $G_3$ ब्रह्म तस्य विन( $G_3$ प्रण )श्यति. — ( L. 3242 ) T $G_3$ अदुष्टो रु( $T_2$ °ष्टे दु- ; $G_3$ °ष्टो दु )ष्टतामेति ; $M_{2-4}$ अदृ- ( $M_4$ °दु )ष्टं दुष्टतामेति ( for the prior half ). $G_3$ तीर्थं ( for लीढं ). — ( L. 3243 ) T षट्चतुर्वेदा ; $G_3$ षट्च सर्वेषां ; $M_2$ चतुरो वेदा ( for वेदाश्चत्वारो ). — ( L. 3244 ) T $G_3$ पुराणं धर्मशास्त्रं च ( for the prior half ). — ( L. 3245 ) $G_1$ यदि ( for यानि ). — ( L. 3246 )

सर्वं तच्छूद्रसंस्पृष्टमपवित्रं न संशयः ।
लोके त्रीण्यपवित्राणि पञ्चामेध्यानि भारत ।
श्वा च शूद्रः श्वपाकश्चेत्यपवित्राणि पाण्डव । [ 3250 ]
देवलः कुक्कुटो यूप उदक्या वृषलीपतिः ।
पञ्चैते स्युरमेध्याश्च स्प्रष्टव्या न कथंचन ।
स्पृष्ट्वैतानष्ट वै विप्रः सचेलो जलमाविशेत् ।
मद्भक्ताञ्शूद्रसामान्यानवमन्यन्ति ये नराः ।
नरकेष्वेव तिष्ठन्ति वर्षकोटिं नराधमाः । [ 3255 ]
चण्डालमपि मद्भक्तं नावमन्येत बुद्धिमान् ।
अवमत्य पतन्त्येव रौरवे नरके नराः ।
मम भक्तस्य भक्तेषु प्रीतिरभ्यधिका नृप ।
तस्मान्मद्भक्तभक्ताश्च पूजनीया विशेषतः ।
कीटपक्षिमृगाणां च मयि संन्यस्तचेतसाम् । [ 3260 ]
उध्र्वामेव गतिं विद्धि किं पुनर्ज्ञानिनां नृणाम् ।
पत्रं वाप्यथ वा पुष्पं फलं वा जलमेव वा ।
ददाति मम शूद्रोऽपि शिरसा धारयामि तत् ।
विप्रानेवार्चयेद्भक्त्या शूद्रः प्रायेण मत्प्रियः ।
तेषां तेनैव रूपेण पूजां गृह्णामि भारत । [ 3265 ]
वेदोक्तेनैव मार्गेण सर्वभूतहृदि स्थितम् ।
मामर्चयन्ति ते विप्रा मत्सायुज्यं व्रजन्ति ते ।
मद्भक्तानां हितायैव प्रादुर्भावः कृतो मया ।
प्रादुर्भावाकृतिः काचिदर्चनीया युधिष्ठिर ।
आसामन्यतमां मूर्तिं यो मद्भक्त्या समर्चति । [ 3270 ]
तेनैव परितुष्टोऽहं भविष्यामि न संशयः ।
मृदा च मणिरत्नैश्च ताम्रेण रजतेन वा ।
कृत्वा प्रतिकृतिं कुर्यादर्चनां काञ्चनेन वा ।
पुण्यं दशगुणं विद्यादेतेषामुत्तरोत्तरम् ।
जयकामोऽर्चयेद्राजा विद्याकामो द्विजोत्तमः । [ 3275 ]
वैश्यो वा धनकामस्तु शूद्रः पुण्यफलप्रियः ।
सर्वकामाः स्त्रियो वापि सर्वान्कामानवाप्नुयुः ।

Colophon.

युधिष्ठिर उवाच ।

कीदृशानां तु शूद्राणां नानुगृह्णासि चार्चनम् ।
उद्वेगस्तव कस्मात्तु तन्मे ब्रूहि सुरेश्वर ।

भगवानुवाच ।

अव्रतेनाप्यभक्तेन स्पृष्टां शूद्रेण चार्चनाम् । [ 3280 ]

---

$G_{1.2}$ $M_4$ भुवनार्थं ( for पाव° ). T $G_3$ युधिष्ठिर ( for तथैव च ). — ( L. 3247 ) $G_3$ शूद्रान्ये ; $M_{2.3}$ शूद्राद्यैः. T प्रष्टव्यानि ( for स्प्रष्ट° ). $M_2$ तथैव च ( for युधिष्ठिर ). — ( L. 3248 ) $G_1$ सर्वतः ; $M_4$ सर्वं च ( for सर्वं तत् ). $M_{2.3}$ -वक्त्रस्थम् ( for -संस्पृष्टम् ). — $G_3$ om. lines 3249–3250. — ( L. 3250 ) T शूद्रश्च ( by transp. ). — ( L. 3251 ) $G_{1.2}$ गायकः ( for देवलः ). $G_3$ काकयूपश्च ( for कुक्कुटो यूप ). $G_{1.2}$ ह्युदक्या. — ( L. 3252 ) $T_2$ य एते ; $G_1$ पंचैव ( for पञ्चैते ). T युधिष्ठिर ; $G_3$ कदाचन ( for कथंचन ). — ( L. 3253 ) $M_2$ [ए]तानि च ( for °नष्ट ). — ( L. 3254 ) $G_3$ -सामान्याद् ; $M_4$ -चंडालान्. — $G_3$ om. ( hapl. ) lines 3255–3257. $M_2$ om. lines 3255–3256. — ( L. 3255 ) $G_2$ -कोटीर् ( for -कोटिं ). — ( L. 3257 ) $T_2$ अवमन्य ; $G_{1.2}$ °मानात् ; $M_3$ °पत्य ( for °मत्य ). T पतति. $G_2$ $M_{3.4}$ नरके रौरवे ( by transp. ). T नरः. — ( L. 3258 ) T $G_3$ $M_4$ मद्भक्त- ( for भक्तस्य ). $G_{1.2}$ मम ( for नृप ). — ( L. 3259 ) $G_2$ भक्तस्य ( for मद्भक्त- ). $M_4$ मम प्रीतिकरा नृप ( for the post. half ). — ( L. 3260 ) $G_3$ -मानसां ( for -चेतसाम् ). — ( L. 3261 ) $M_4$ ऊर्ध्वम्. — ( L. 3262 ) $G_{1.2}$ $M_4$ [अ]प्याप ; $M_{2.3}$ तोयम् ( for जलम् ). — $M_4$ om. line 3263. — ( L. 3263 ) T $G_3$ तं ( for तत् ). — ( L. 3264 ) Madras ed. शूद्र- ( for शूद्रः ). T $G_3$ प्रायांश्च ; $G_2$ प्रायश्च ( for प्रायेण ). $T_1$ $G_2$ $M_2$ मत्प्रियान्. — ( L. 3265 ) T $G_{1.3}$ तस्य ( for तेषां ). — ( L. 3267 ) $M_{2.3}$ सायुज्यं यांति ते मयि ( $M_3$ °म ) ( for the post. half ). — ( L. 3268 ) T $G_3$ $M_4$ ब्राह्मणानां ; $M_2$ भक्तानां तु ( for मद्भक्तानां ). — ( L. 3269 ) T $G_1$ प्रादुर्भावकृतिः. — ( L. 3270 ) $G_2$ अऽयतमां ( for अन्य° ). $M_2$ असामान्यतमां मूर्तिं ( for the prior half ). $M_2$ मे भक्त्या ( for मद्भक्त्या ). — ( L. 3272 ) T $G_{2.3}$ $M_4$ मृदश्म- ( for मृदा च ). — ( L. 3273 ) $G_2$ मूर्तीनां ( for अर्चनां ). — ( L. 3274 ) $M_4$ कुर्याद् ( for विद्याद् ). — ( L. 3275 ) $M_3$ जयेद् ( for ऽर्चयेद् ). $G_3$ नित्यं फलैः पुष्पैर् ( for राजा विद्याकामो ). T [ऽ]र्चयेद्विजः ( for द्विजोत्तमः ). — ( L. 3276 ) $G_{1.2}$ सुख- ( for पुण्य- ). Madras ed. शूद्रः पुण्यं फलं स्त्रियः ( for the post. half ). — ( L. 3277 ) $G_1$ सर्वकामः. T $G_3$ $M_{2.3}$ सर्वकामप्रियो ( $T_1$ $G_3$ °या ) वापि ( for the prior half ). $M_2$ सर्व- ( for सर्वान् ). $T_1$ $G_1$ समाप्नुयात् ( $G_1$ °युः ) ( for अवाप्नुयुः ). — Colophon. — *Sub-parvan* : $T_2$ $G_{1.2}$ $M_2$ वैष्णवधर्म. — *Adhy. name* : $G_{1.2}$ भक्तार्चनविधिः. — *Adhy. no.* : $T_1$ 104 ; $T_2$ $M_4$ 113 ; $G_{1.2}$ $M_3$ 103 ; $M_2$ 20 ; $G_3$ 114. — ( L. 3278 ) $G_3$ भग्नव्रतानां ( for कीदृशानां तु ). G विप्राणां ( for शूद्राणां ). $T_2$ नाम ( for नानु- ). $G_3$ $M_2$ -गृह्णामि ( for °सि ). $G_2$ [अ]र्चनां. — ( L. 3279 ) $G_3$ इत्युक्तं ते यत्तु पूर्वं ( for the prior half ). T $G_3$ $M_3$ सुरोत्तम ( for सुरेश्वर ). $M_2$ तन्ममाचक्ष्व केशव ( for the post. half ). — $M_4$ om. ( hapl. ) lines 3280–3289. — ( L. 3280 ) $G_3$ स्पृष्टां विधिविवर्जितां ; $M_{2.3}$ स्पृष्टा शूद्रेण

तां वर्जयामि यत्नेन श्वपाकविहितामिव ।
नन्वहं शंकरश्चापि गावो विप्रास्तथैव च ।
अश्वत्थो मम रूपाणि सत्यमेतद्युधिष्ठिर ।
एतत्त्रयं हि मद्भक्तो नावमन्येत कर्हिचित् ।
अवमानितमेतत्तु दहत्यासप्तमं कुलम् । [3285]
अश्वत्थो ब्राह्मणा गावो मन्मयास्तारयन्ति ह ।
तस्मादेतत्प्रयत्नेन त्रयं पूजय पाण्डव ।

युधिष्ठिर उवाच ।

ब्राह्मणेनैव देहेन शूद्रत्वं कथमाप्नुयात् ।
ब्रह्म वा नश्यति कथं वक्तुं देव त्वमर्हसि ।

भगवानुवाच ।

कूपस्नानं तु यो विप्रः कुर्याद्द्वादशवार्षिकम् । [ 3290 ]
स तेनैव शरीरेण शूद्रत्वं यात्यसंशयम् ।
यस्तु राजाश्रयेणैव जीवेद्द्वादशवार्षिकम् ।
स शूद्रत्वं व्रजेद्विप्रो वेदानां पारगोऽपि सन् ।
पत्तने नगरे वापि यो द्वादशसमा वसेत् ।
स शूद्रत्वं वसेद्विप्रो नात्र कार्या विचारणा । [3295]
उत्पादयति यः पुत्रं शूद्रायां कामतो द्विजः ।
तस्य कायगतं ब्रह्म सद्य एव विनश्यति ।
मद्यपी स्त्रीमुखं मोहादास्वादयति यो नरः ।
तस्य कायगतं ब्रह्म सद्य एव विनश्यति ।
यः सोमलतिकां विप्रः केवलं भक्षयेद्वृथा । [ 3300 ]
तस्य कायगतं ब्रह्म सद्य एव विनश्यति ।
मैथुनं कुरुते यस्तु जिह्वायां ब्राह्मणो नृप ।
तस्य कायगतं ब्रह्म सद्य एव विनश्यति ।
विप्रत्वं दुर्लभं प्राप्य दुर्मार्गैरेवमादिभिः ।
विनाशयन्ति ये तत्तु ताञ्शोचामि युधिष्ठिर । [ 3305]
तस्मात्सर्वप्रयत्नेन मत्प्रियो यो युधिष्ठिर ।
जातिभ्रंशकरं कर्म न कुर्यादीदृशं द्विजः ।

### Colophon.

युधिष्ठिर उवाच ।

देशान्तरगते विप्रे संयुक्ते कालधर्मणा ।
शरीरनाशे संप्राप्ते कथं प्रेतविकल्पना ।

भगवानुवाच ।

श्रूयतामाहिताग्नेस्तु तथा भूतस्य संस्क्रिया । [ 3310 ]
पालाशवृन्तैः प्रतिमा कर्तव्या कल्पचोदिता ।
त्रीणि षष्टिशतान्याहुरस्थीन्यस्य नराधिप ।
तेषां विकल्पना कार्या यथाशास्त्रविनिश्चयम् ।
अशीत्यर्धं शिरसि च ग्रीवायां दश एव च ।
बाह्वोश्चापि शतं दद्यादङ्गुलीषु पुनर्दश । [3315]
उरसि त्रिंशतं दद्याज्जठरे चापि विंशतिम् ।

---

यार्चना ( for the post. half ). — ( L. 3281 ) G राजेंद्र ( for यत्नेन ). — $M_{2.3}$ om. line 3282. — ( L. 3282 ) T अहं च ( for नन्वहं ). $G_3$ वेदवेदांतविद्विप्रो गौश्चैव च सुदोहना. — ( L. 3283 ) Madras ed. [ऽ]मर॰ ( for मम ). $G_1$ रूपं हि ( for रूपाणि ). $G_{2.3}$ त्रयम् ( for सत्यम् ). $M_{2.3}$ गावो विप्रास्तथाश्वत्थं मम रूपं युधिष्ठिर. —( L. 3286 ) T $G_3$ $M_3$ अश्वत्था. $M_2$ ब्राह्मणो. $G_2$ $M_2$ हि ( for ह ). — ( L. 3288 ) T $M_3$ ब्राह्मणोनेन देहेन ; $M_2$ °णा स्वेन रूपेण ( for the prior half ). $M_2$ आप्नुयुः ( for °यात् ). $G_{1.2}$ कथं शूद्रत्वमाप्नुयात्. — ( L. 3289 ) $G_2$ ब्रह्महा न्यस्यति कथं ; $M_2$ तेषां ब्रह्म कथं नश्येद् ( for the prior half ). $G_3$ एतत् ; $M_2$ एव ( for देव ). — ( L. 3291 ) $M_2$ पांडव ; $M_4$ [अ]संशयः. $G_3$ शूद्र एव न संशयः ( for the post. half ). — After line 3291, $M_2$ ins. :

शूद्रग्रामेऽथ वाप्येकः कुर्याद्द्वादशवार्षिकम् ।
गृह्योक्तमपि कुर्वाणाः शूद्रत्वं यान्ति ते द्विजाः ।

— ( L. 3293 ) T सः ( for सन् ). $M_2$ प्रेत्य चंडालतामपि ( for the post. half ). — ( L. 3294 ) T $G_3$ $M_3$ पट्टणे ( for पत्तने ). — ( L. 3296 ) $G_2$ शूद्रायां काममोहितः. — ( L. 3297 ) $M_2$ समम् ( for सद्य ). — After line 3297, T $M_{2.3}$ read lines 3300–3301. $G_1$ om. line 3298. — ( L. 3298 ) $T_1$ $G_2$ मद्यपं. $G_2$ $M_{2.4}$ द्विजः ( for नरः ). — ( L. 3302 ) $G_3$ पांडुनंदन ; $M_2$ कामगो द्विजः ( for ब्राह्मणो नृप ). — ( L. 3305 ) $T_2$ $G_3$ विनाशयति. $T_2$ एतत् ( for ये तत् ). $G_3$ $M_2$ तत् ( for ताञ् ). — After line 3305, T $M_3$ ins. :

शूद्रस्त्रीसङ्गमो यस्तु सदा ब्राह्मणदूषकः ।
परहिंसापरो यस्तु तं तु शोचामि भारत ।

— ( L. 3306 ) $M_2$ मत्प्रियाय ( for °यो यो ). — $G_3$ om. line 3307. — Colophon. — *Sub-parvan* : T $G_{1.2}$ $M_{3.4}$ वैष्णवधर्म ; $M_2$ वैष्णवे धर्मशास्त्रे. — *Adhy. no.* : $T_1$ $M_3$ 105 ; $T_2$ $M_4$ 114 ; $G_{1.2}$ 104 ; $G_3$ 115 ; $M_2$ 21. — ( L. 3308 ) $M_{2.3}$ देशांतरगतो विप्रः. T $G_1$ संयुते ; $M_{2.3}$ संयुक्तः. $M_2$ कालधर्मिणः. — ( L. 3309 ) $M_{2.3}$ आहिताग्निः सुरश्रेष्ठ ( for the prior half ). T $G_{1.2}$ प्रेतत्वकल्पना. — ( L. 3310 ) $G_3$ आहिताग्निस्तु. — ( L. 3313 ) $G_{1.2}$ $M_{2.3}$ -विनिश्चितं ( for °श्चयम् ). — ( L. 3314 ) $M_{2.3}$ तु शिरसि ( for शिरसि च ). $G_3$ शतम् ( for दश ). — ( L. 3316 ) $G_1$ उरसस् ; $M_{2.3}$ उरस॰. T G त्रिशतं. $M_{2.3}$ विंशति ; Madras ed. °तिः. — ( L. 3318 ) $M_2$ शतपूर्वश्च ( for °मूर्वोस्तु ). $M_{2.3}$ तदर्धं

वृषणे द्वादशार्धं तु शिश्ने चाष्टार्धमेव च ।
दद्यात्तु शतमूर्वोस्तु षष्ट्यर्धं जानुजङ्घयोः ।
दश दद्याच्चरणयोरेषा प्रेतस्य निष्कृतिः ।
युधिष्ठिर उवाच ।
विशेषतीर्थं सर्वेषामशक्तानामनुग्रहात् । [3320]
भक्तानां तारणार्थं वै वक्तुमर्हसि धर्मतः ।
भगवानुवाच ।
प्रवरं सर्वतीर्थानां सत्यं गायन्ति सामगाः ।
सत्यस्य वचनं तीर्थमहिंसा तीर्थमुच्यते ।
तपस्तीर्थं दया तीर्थं शीलं तीर्थं युधिष्ठिर ।
अल्पसंतोषणं तीर्थं नारी तीर्थं पतिव्रता । [3325]
संतुष्टो ब्राह्मणस्तीर्थं ज्ञानं वा तीर्थमुच्यते ।
मद्भक्तः सततं तीर्थं शंकरस्य विशेषतः ।
यतयस्तीर्थमित्येव विद्वांसस्तीर्थमुच्यते ।
शरण्यः पुरुषस्तीर्थमन्नदस्तीर्थमुच्यते ।
त्रैलोक्येऽस्मिन्निरुद्विग्नो न बिभेमि कुतश्चन । [3330]
न दिवा यदि वा रात्रावुद्वेगः शूद्रलङ्घनात् ।
न भयं देवदैत्येभ्यो रक्षोभ्यश्चैव मे नृप ।
शूद्रवक्त्राच्च्युतं ब्रह्म भयं तु मम सुव्रत ।
तस्मात्सप्रणवं शूद्रो मन्नामापि न कीर्तयेत् ।
प्रणवं हि परं ब्रह्म नित्यं ब्रह्मविदो विदुः । [3335]
द्विजशुश्रूषणं धर्मं शूद्राणां भक्तितो मयि ।
तेन गच्छन्ति ते स्वर्गं चिन्तयन्तो हि मां सदा ।
द्विजशुश्रूषया शूद्रः परं श्रेयोऽधिगच्छति ।
द्विजशुश्रूषणादन्यन्नास्ति शूद्रस्य निष्कृतिः ।
रागो द्वेषश्च मोहश्च पारुष्यं च नृशंसता । [3340]
शाठ्यं च दीर्घवैरित्वमतिमानमनार्जवम् ।
अनृतं चापवादश्च पैशुन्यमतिलोभता ।
हिंसा स्तेयं मृषावादो वञ्चना रोषलोभता ।
अबुद्धिता च नास्तिक्यं भयमालस्यमेव च ।
अशौचं चाकृतज्ञत्वं डम्भता स्तम्भ एव च । [3345]
निकृतिश्चाप्यविज्ञानं जातके शूद्रमाविशेत् ।
दृष्ट्वा पितामहः शूद्रमभिभूतं तु तामसैः ।
द्विजशुश्रूषणं धर्मं शूद्राणां तु प्रयुक्तवान् ।
नश्यन्ति तामसा भावाः शूद्रस्य द्विजभक्तितः ।
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । [3350]

---

(for षष्ट्यर्धं). — (L. 3319) $M_{2.3}$ एषा प्रेतविकल्पना (for the post. half). — After line 3319, $M_{2.3}$ ins. :

एवं विकल्पनां कृत्वा कुर्याद्विप्रस्य संस्कृतिम् ।

— (L. 3320) $G_3$ अनुग्रहः. — (L. 3321) $G_3$ भूतानां तारणार्थाय (for the prior half). T तत्त्वतः (for धर्मतः). — (L. 3322) $G_{1.2}$ पावनं; $G_3$ प्रचारं (for प्रवरं). $M_4$ सत्यं सत्यवतां वर. — (L. 3323) $G_3$ वचनात्. $G_1$ एव च (for उच्यते). — (L. 3324) $M_{2.3}$ दानतीर्थं (for तपस्तीर्थं). — (L. 3325) $M_{2.3}$ अर्थ- (for अल्प-). — (L. 3326) $M_{2.3}$ ब्राह्मणं. $M_4$ संतुष्टा ब्राह्मणास्तीर्थं. $T_1$ $G_{1.3}$ ज्ञानवांस् (for ज्ञानं वा). — (L. 3327) T $G_2$ $M_{2.3}$ मद्भक्ताः. $M_{2.3}$ om. the post. half. T तु वा तथा (for विशेषतः). — (L. 3328) $G_{1.2}$ $M_4$ [ए]वं (for [ए]व). $M_{2.3}$ om. (hapl.) मित्येव विद्वांस्तीर्थं. — (L. 3329) $G_3$ शरण्य-. $M_2$ पुरुषं. $M_4$ शरण्यः पुण्यपुरुषो (for the prior half). $G_{1.2}$ अभयं (for अन्नदस्). — After line 3329, T and Madras ed. ins. :

विद्याविनीतकस्तीर्थं धर्मवक्ता विशेषतः ।

— While $M_{2.3}$ read lines 3136–3281 after line 3329. $G_3$ om line 3330. — (L. 3331) $G_3$ दिवा वा (for न दिवा). — (L. 3332) $M_4$ मम (for देव-). T $G_3$ राक्षसेभ्यश्च (for रक्षोभ्यश्चैव). $M_4$ भयं (for नृप). — $G_3$ om. lines 3333–3335. — (L. 3333) $T_2$ शूद्रवक्त्रच्युतं; $M_3$ °वक्त्राच्छ्रुतं. $M_4$ भयदं (for भयं तु). $M_{2.3}$ भयं तु सुमहन्मम (for the post. half). — (L. 3334) $M_{2.3}$ मन्नामानि. — (L. 3335) $G_{1.2}$ $M_4$ लोके ब्रह्म ($G_1$ नित्यं) (for ब्रह्म नित्यं). — (L. 3338) T द्विजशुश्रूषणात्. — (L. 3339) $G_1$ अन्या; $G_3$ धर्मं (for अन्यन्). $G_3$ प्राप्नुवंति च पुष्कलं (for the post. half). — $G_2$ om. line 3340. — (L. 3340) T रागद्वेषौ; $M_{2.3}$ रागद्वेषश् ($M_3$ °षं). $G_2$ चानृशंसता (for च नृ°). — (L. 3341) $G_3$ शौर्यं (for शाठ्यं). $M_4$ -वैरत्वम्. — (L. 3342) T $G_3$ दुर्वृत्तं (for अनृतं). $G_1$ om; $M_{2.3}$ [अ]पवादं च. $T_2$ $M_3$ पैशून्यम्. T $G_{2.3}$ अतिलोलता (for °भता). — $M_2$ om. lines 3343–3345. — (L. 3343) T परीवादो (for मृषा°). T द्वेषलोभता; $G_3$ दोषयुक्तता; $M_4$ रोषलोलता. — $G_3$ om. from the post. half of line 3344 up to the prior half of line 3346. — (L. 3345) $T_1$ आशौचं. T स्तंभतापि (for स्तम्भ एव). — (L. 3346) $M_3$ निष्कृतेश् (for निकृतिश्). T [अ]वज्ञानं (for [अ]वि°). T $M_{2.3}$ जनने; $G_3$ विज्ञानं (for जातके). $T_2$ आविशत्. — (L. 3347) Kumbh. ed. सृष्ट्वा (for दृष्ट्वा). $T_1$ पितामहाः; $G_2$ तु तामहं (for पितामहः). — (L. 3349) $M_{2.3}$ (*sup. lin.* as above)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तदहं भक्त्युपहृतं मूर्ध्ना गृह्णामि शूद्रतः ।
अन्त्यजो वापि यः कश्चित्सर्वपापसमन्वितः ।
यदि मां सततं ध्यायेत्सर्वपापैः प्रमुच्यते ।
विद्याविनयसंपन्ना ब्राह्मणा वेदपारगाः ।
मयि भक्तिं न कुर्वन्ति चण्डालसदृशा हि ते । [3355]
वृथा दत्तं वृथा जप्तं वृथा चेष्टं वृथा हुतम् ।
वृथातिथ्यं च तत्तस्य यो न भक्तो मम द्विजः ।
यत्कृतं च हुतं चापि यदिष्टं दत्तमेव च ।
अभक्तिमत्कृतं सर्वं राक्षसा एव भुञ्जते ।
स्थावरे जङ्गमे वापि सर्वभूतेषु पाण्डव । [3360]
समत्वेन यदा कुर्यान्मद्भक्तो मित्रशत्रुषु ।
आनृशंस्यमहिंसा च दया सत्यमथार्जवम् ।
अद्रोहश्चैव भूतानां मद्भक्तानां व्रतं नृप ।
नम इत्येव यो ब्रूयान्मद्भक्तः श्रद्धयान्वितः ।
तस्याक्षयो भवेल्लोकः श्वपाकस्यापि पाण्डव । [3365]
किं पुनर्ये यजन्ते मां याजका विधिपूर्वकम् ।
मद्भक्ता मद्गतप्राणाः कथयन्तश्च मां सदा ।
बहुवर्षसहस्राणि तपस्तप्स्यति यो नरः ।
नासौ पदमवाप्नोति मद्भक्तैर्यदवाप्यते ।
मामेव तस्माद्राजेन्द्र ध्याहि नित्यमतन्द्रितः । [3370]
अवाप्स्यसि ततः सिद्धिं द्रक्ष्यसे परमं पदम् ।
अपार्थकं प्रभाषन्ते शूद्रा भागवता इति ।
न शूद्रा भगवद्भक्ता विप्रा भागवताः स्मृताः ।
द्वादशाक्षरतत्त्वज्ञश्चतुर्व्यूहविभागवित् ।
अच्छिद्रः पञ्चकालज्ञः स वै भागवतः स्मृतः । [3375]
ऋग्वेदेनैव मां होता यजुषाध्वर्युरेव च ।
सामवेदेन चोद्गाता पुण्येनाभिष्टुवन्ति माम् ।
अथर्वशिरसा चैव नित्यमाथर्वणा द्विजाः ।
स्तुवन्ति सततं ये मां तेऽपि भागवताः स्मृताः ।
वेदाधीनाः सदा यज्ञा यज्ञाधीनास्तु देवताः । [3380]

---

मयि ( for द्विज- ). $G_3$ विप्रशुश्रूषणात्परं ( for the post. half ). — $G_3$ om. line 3350. — ( L. 3351 ) $G_2$ प्रीत्युपहृतं ( for भक्त्यु° ). $M_2$ गृह्णाति. — ( L. 3352 ) $G_{1.2}$ अग्रजो ; $M_2$ चंडालो ( for अन्त्यजो ). — ( L. 3353 ) $M_{2.3}$ स पापेभ्यः ( for सर्वपापैः ). — ( L. 3354 ) $T_1$ -संपन्न-. $M_2$ विद्याभिजनसंपन्ना ( for the prior half ). — After line 3354, $G_3$ ins. :

वेदान्तविदुषो नित्यं मम भक्ताः प्रकीर्तिताः ।

— $G_3$ om. line 3355. — ( L. 3355 ) $M_3$ कुर्वंतश्. $M_2$ -सदृशो. — ( L. 3356 ) $G_{1.2}$ दानं ( for दत्तं ). $G_{1.2}$ $M_4$ तप्तं ( for जप्तं ). $M_4$ वृथाहूतं वृथा कृतं ( for the post. half ). — ( L. 3357 ) $T_2$ $G_3$ नित्यं ; $M_3$ तीर्थं ( for [अ]तिथ्यं ). T यत् ( for तत् ). $M_2$ सर्वं ( for तस्य ). — $M_{2.3}$ ins. after line 3357 : T after line 3367 : $M_4$ after addl. insertion after line 3367 :

वृथा ज्ञानं वृथा ध्यानं वृथा योगपरिग्रहः ।
ब्रह्मचर्यं वृथा तस्य मम भक्तो न स द्विजः ।
नाहूयन्ते न पूज्यन्ते न ज्ञाप्यन्ते कदाचन ।
तेनाग्नयोऽग्निहोत्रेण यो न भक्तो मम द्विजः ।

[ ( L. 1 ) $M_2$ वृथा ध्यानं वृथा ज्ञानं ( for the prior half ). — ( L. 2 ) T $M_2$ यो न भक्तो मम ( T °यि ) द्विजः ( for the post. half ). — ( L. 3 ) $M_{2.3}$ न हूयंते. T $M_2$ स्थाप्यंते ( for ज्ञाप्यन्ते ). — ( L. 4 ) T मयि ( for मम ). $M_{2.4}$ तेनाग्निश्चात्र होत्राणि ; $M_3$ तेनाग्निहोत्रहोमेन ( for the prior half ).]

— ( L. 3359 ) $M_2$ अवैष्णवकृतं सर्वं ( for the prior half ). — ( L. 3361 ) $T_1$ $M_3$ ( *sup. lin.* ) यथा ; $M_{2.3.4}$ ( *sup. lin.* as above ) दयां ( for यदा ). — ( L. 3362 ) $G_{1.2}$ तथार्जवं ; $M_2$ तथार्णवं ; $M_4$ दमार्जवं ( for अथा° ). Madras ed. दमः सत्यं तथार्जवं. — ( L. 3363 ) $M_2$ अद्रोहं. $G_{1.2}$ मद्गतानां ( for मद्भक्तानां ). — ( L. 3364 ) Madras ed. मद्भक्तं. — ( L. 3365 ) $G_{1.3}$ तस्याक्षया भवेल्लोकाः (sic) ; $M_2$ तस्य मामक्षयो लोकः. G $M_3$ पार्थिव ( for पाण्डव ). — ( L. 3366 ) $G_1$ सादरा ; $G_2$ सदारं ; $G_3$ $M_4$ साधका ( $M_4$ °कं ) ; $M_{2.3}$ साधवो ( for याजका ). — After line 3367, $M_4$ ins. :

सर्वे ते गतिमुर्ध्वां हि लभन्ते नात्र संशयः ।

— ( L. 3368 ) $M_2$ तपस्तप्यंति ये नराः ( for the post. half ). — ( L. 3370 ) $M_2$ राजर्षे ; $M_4$ कौंतेय ( for राजेन्द्र ). $G_{1.2}$ ध्यायन् ; $G_3$ $M_4$ याहि ( for ध्याहि ). — ( L. 3371 ) $G_{1.2}$ $M_4$ च परं ; $M_2$ च पदं ( for परमं ). $M_2$ मम ( for पदम् ). $M_3$ द्रक्षस्येव पदं महत् ( for the post. half ). — ( L. 3373 ) $T_1$ विप्र- ( for विप्रा ). — After line 3373, T $M_{2.4}$ ins. :

सर्ववर्णेषु ते शूद्रा य ह्यभक्ता जनार्दने ।

— ( L. 3374 ) $T_1$ $G_{1.3}$ $M_4$ चतुर्वेद- ( for °र्व्यूह- ). — ( L. 3375 ) $G_2$ अछिद्र- (sic). $M_3$ -कालज्ञाः. $M_2$ सर्वे ( for स वै ). — $M_4$ om. lines 3376–3377. — ( L. 3376 ) T हि ( for [ए]व ). $G_{1.2}$ होता च ( for मां होता ). $G_3$ ऋग्वेदेन * चाध्वर्युर्होता च यजुषा तथा. — ( L. 3378 ) T [ए]वं. — ( L. 3379 ) T $G_1$ यो ( for ये ). $T_1$ $G_{1.2}$ वै ( for ऽपि ). — After line 3379, $M_{2.3}$ ins. :

वैखानसेन विधिना चतुर्वेदमयेन वै ।
चतुर्मूर्तिविधानज्ञाः सप्तविंशतिविग्रहैः ।

देवता ब्राह्मणाधीनास्तस्माद्विप्रास्तु देवताः ।
अनाश्रित्योच्छ्रयं नास्ति मुख्यमाश्रयमाश्रयेत् ।
रुद्रं समाश्रिता देवा रुद्रो ब्राह्मणमाश्रितः ।
ब्रह्मा मामाश्रितो राजन्नाहं कंचिदुपाश्रितः ।
ममाश्रयो न कश्चित्तु सर्वेषामाश्रयो ह्यहम् । [ 3385]
एवमेतन्मया प्रोक्तं रहस्यमिदमुत्तमम् ।
धर्मप्रियस्य ते राजन्नित्यमेवं समाचर ।
इदं पवित्रमाख्यानं पुण्यं वेदेन संमितम् ।
यः पठेन्मामकं धर्ममहन्यहनि पाण्डव ।
धर्मो विवर्धते तस्य बुद्धिश्चापि प्रसीदति । [ 3390 ]
पापक्षयमुपैत्येव कल्याणं च विवर्धते ।
एतत्पुण्यं पवित्रं च पापनाशनमुत्तमम् ।
श्रोतव्यं श्रद्धया युक्तैः श्रोत्रियैश्च विशेषतः ।
श्रावयेद्यस्त्विदं भक्त्या प्रयतोऽथ शृणोति वा ।
स गच्छेन्मम सायुज्यं नात्र कार्या विचारणा । [3395]
यश्चेदं श्रावयेच्छ्राद्धे मद्भक्तो मत्परायणः ।
पितरस्तस्य तृप्यन्ति यावदाभूतसंप्लवम् ।

वैशंपायन उवाच ।

श्रुत्वा भागवतान्धर्मान्साक्षाद्विष्णोर्जगद्गुरोः ।
प्रहृष्टमनसो भूत्वा चिन्तयन्तोऽद्भुताः कथाः ।
ऋषयः पाण्डवाश्चैव प्रणेमुस्तं जनार्दनम् । [ 3400 ]
पूजयामास गोविन्दं धर्मपुत्रः पुनः पुनः ।
देवा ब्रह्मर्षयः सिद्धा गन्धर्वाप्सरसस्तथा ।
भूता यक्षा ग्रहाश्चैव गुह्यका भुजगास्तथा ।
वालखिल्या महात्मानो योगिनस्तत्त्वदर्शिनः ।
तथा भागवताश्चापि पञ्चकालमुपासकाः । [3405]
कौतूहलसमायुक्ता भगवद्भक्तिमागताः ।
श्रुत्वा तु परमं पुण्यं वैष्णवं धर्मशासनम् ।
विमुक्तपापाः पूतास्ते संवृत्तास्तत्क्षणेन तु ।
प्रणम्य शिरसा विष्णुं प्रतिनन्द्य च तां कथाम् ।
द्रष्टारो द्वारकायां वै वयं सर्वे जगद्गुरुम् । [3410]
इति प्रहृष्टमनसो ययुर्देवगणैः सह ।
सर्वे ऋषिगणा राजन्ययुः स्वं स्वं निवेशनम् ।
गतेषु तेषु सर्वेषु केशवः केशिहा तदा ।
सस्मार दारुकं राजन्स च सात्यकिना सह ।
समीपस्थोऽभवत्सूतो याहि देवेति चाब्रवीत् । [3415]
ततो विषण्णवदनाः पाण्डवाः पुरुषोत्तमम् ।
अञ्जलिं मूर्ध्नि संधाय नेत्रैरश्रुपरिप्लुतैः ।
पिबन्तः सततं कृष्णं नोचुरार्ततरास्तदा ।
कृष्णोऽपि भगवान्देवः पृथामामन्त्र्य चार्तवत् ।
धृतराष्ट्रं च गान्धारीं विदुरं द्रौपदीं तथा । [ 3420]
कृष्णद्वैपायनं व्यासमृषीनन्यांश्च मन्त्रिणः ।
सुभद्रामात्मजयुतामुत्तरां स्पृश्य पाणिना ।
निर्गत्य वेश्मनस्तस्मादारुरोह महारथम् ।

---

जन्मप्रभृतिमद्भक्ता नित्यं च दशवर्जिताः ।
ये पूजयन्ति मां नित्यं ते वै भागवतोत्तमाः ।

— ( L. 3381 ) $M_2$ ते देवा ( for देवता ). $G_3$ प्रकीर्तिताः ( for तु देवताः ). — ( L. 3382 ) $M_2$ [उ]च्छ्रयो. $G_3$ विप्रेभ्यश्चाश्रयं नास्ति ( for the prior half ). — ( L. 3383 ) $M_{2, 3}$ ब्रह्माणम् ( for ब्राह्म° ). — ( L. 3385 ) $G_3$ [आ]श्रितो ( for [आ]श्रयो ). $M_{2-4}$ किंचित् ( for कश्चित् ). — $G_3$ om. line 3387. — ( L. 3387 ) $G_2$ सदाचर; $M_4$ समाचरेः. — ( L. 3388 ) $M_4$ पुण्यं वेदैश्च संश्रितं ( for the post. half ). — ( L. 3389 ) $M_{2, 3}$ भारत ( for पाण्डव ). — ( L. 3390 ) $G_2$ [ऽ]पि ( for वि- ). $M_2$ [ए]व ( for [अ]पि ). — ( L. 3391 ) $T_1$ उदेत्येव; $G_2$ $M_4$ उपैत्येवं. $G_3$ [अ]पि ( for वि- ). — ( L. 3392 ) $G_2$ $M_3$ पापनाशमनुत्तमं. — ( L. 3393 ) $M_{2, 3}$ मद्भक्तैश् ( for श्रोत्रियैश् ). — ( L. 3394 ) T $G_3$ $M_3$ पठते ( for प्रयतो ). $M_3$ यः ( for ऽथ ). —( L. 3396 ) T त्विदं; $M_{3, 4}$ चैव ( $M_4$ °वं ) ( for चेदं ). — $M_2$ om. line 3398. — ( L. 3399 ) $G_3$ -मानसा ( for -मनसो ). T $G_{2, 3}$ $M_3$ महर्षयः; $M_2$ [ऽ]द्भुतां कथां. — ( L. 3400 ) T $G_3$ $M_3$ पांडवाश्च प्रणेमुस्तं पूजयंतो जनार्दनं. — ( L. 3401 ) $M_3$ धर्मात्मा च ( for धर्मपुत्रः ). $M_2$ धर्मराजो युधिष्ठिरः ( for the post. half ). — ( L. 3403 ) $G_2$ ऋषयश्च महात्मानो ( for the prior half ). — ( L. 3405 ) $G_1$ यथा ( for तथा ). $M_{2, 3}$ [ए]व ( for [अ]पि ). — ( L. 3406 ) $G_3$ भगवद्भक्तिमार्गतः; $M_2$ °क्तितो गताः ( for the post. half ). — ( L. 3407 ) $M_2$ गुह्यं ( for पुण्यं ). — ( L. 3409 ) $G_{1, 2}$ $M_4$ ताः कथाः ( for तां कथाम् ). — $M_2$ om. line 3410. — ( L. 3411 ) $M_4$ पुनर् ( for ययुर् ). $M_2$ यथागतं ययुर्देवाः सर्वे ऋषिगणैः सह. — $M_2$ om. line 3412. — ( L. 3412 ) $M_{3, 4}$ त्वृषि- ( for ऋषि- ). — ( L. 3413 ) $M_2$ तेषु तेषु तु सर्वेषु ( for the prior half ). $T_1$ $G_1$ तथा; Kumbh. ed. हरिः ( for तदा ). — $M_2$ om. lines 3414–3436. — ( L. 3415 ) $G_1$ पाहि ( for याहि ). — ( L. 3417 ) T $G_3$ तेंजलिं. —( L. 3418 ) $G_3$ पीड्यंतः ( for पिबन्तः ). $G_2$ आर्तस्वरास् ( for °तरास् ). $G_3$ ततः ( for तदा ). — ( L. 3419 ) $G_1$ [अ]ब्रवीत् ( for [आ]र्तवत् ). — ( L. 3421 ) $M_3$ चामंत्र्य ( for अन्यांश्च ). — ( L. 3423 ) $G_1$ निगद्य वेश्मनस्तस्या ( for the prior half ). — ( L.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

वाजिभिः सैन्यसुग्रीवमेघपुष्पबलाहकैः ।
युक्तं च ध्वजभूतेन पतगेन्द्रेण धीमता । [3425]
अन्वारुरोह चाप्येनं प्रेम्णा राजा युधिष्ठिरः ।
अपास्य चाशु यन्तारं दारुकं सूतसत्तमम् ।
अभीशून्प्रतिजग्राह स्वयं कुरुपतिस्तदा ।
उपारुह्यार्जुनश्चापि चामरव्यजनं शुभम् ।
रुक्मदण्डं बृहन्मूर्ध्नि दुधावाभिप्रदक्षिणम् । [3430]
छत्रं शतशलाकं च दिव्यमाल्योपशोभितम् ।
वैडूर्यमणिदण्डं च चामीकरविभूषितम् ।
दधार तरसा भीमः छत्रं तच्छार्ङ्गधन्विनः ।
भीमसेनार्जुनौ चापि यमौ चाप्यरिसूदनौ ।
पृष्ठतोऽनुययुः कृष्णं मा शब्द इति हर्षिताः । [3435]
त्रियोजने व्यतीते तु परिष्वज्य च पाण्डवान् ।
विसृज्य कृष्णस्तान्सर्वान्प्रणतान्द्वारकां ययौ ।
तथा प्रणम्य गोविन्दं तदा प्रभृति पाण्डवाः ।
कपिलाद्यानि दानानि ददुर्धर्मपरायणाः ।
मधुसूदनवाक्यानि स्मृत्वा स्मृत्वा पुनः पुनः । [3440]
मनसा पूजयामासुर्हृदयस्थानि पाण्डवाः ।
युधिष्ठिरस्तु धर्मात्मा हृदि कृत्वा जनार्दनम् ।
तद्भक्तस्तन्मना युक्तस्तद्याजी तत्परोऽभवत् ।
एवमेतत्पुरावृत्तं वैष्णवं धर्मशासनम् ।
मया ते कथितं राजन्पवित्रं पापनाशनम् । [ 3445 ]
तच्छृणुष्व महाराज विष्णुप्रोक्तं कुरूद्वह ।
तेन गच्छसि नान्येन तद्विष्णोः परमं पदम् ।

Colophon.

---

3426 ) $G_1$ राजा प्रेम्णा ( by transp. ). — ( L. 3427 ) T च स ; $M_3$ चाश्व- ( for चाशु ). —( L. 3428 ) T $G_{1.2}$ $M_{3.4}$ कुरुपतेस्. $T_1$ $M_3$ तथा ( for तदा ). —( L. 3429 ) T $G_3$ $M_3$ उप्र( $M_3$ °पा )गृह्य ( for उपारुह्य ). $G_{1.3}$ $M_3$ चामरं. T -व्यजने शुभे ( $T_2$ °भं ). — ( L. 3430 ) $M_3$ रूग्मदंडं. $T_1$ महन्; $T_2$ महा-; $G_3$ $M_3$ वहन् ( for बृहन् ). $G_3$ मूर्ध्ना. T आशु ; $G_1$ अपि ; $M_3$ अथ ( for अभि- ). — After line 3430, $G_2$ ins. :

तथैव भीमसेनोऽपि रथमारुह्य वीर्यवान् ।

— ( L. 3431 ) $G_1$ चित्रं ( for छत्रं ). — ( L. 3433 ) $G_2$ $M_4$ शार्ङ्गधन्वनः. — After line 3433, $G_2$ ins. :

उपारुह्य रथं शीघ्रं चामरव्यजने शुभे ।
नकुलः सहदेवश्च धूयमानौ जनार्दनम् ।

— ( L. 3434 ) $T_2$ [ए]व ( for [अ]पि ). $G_2$ भीमसेनोर्जुनश्चैव ; $G_3$ माद्रीसुतावपि तदा ( for the prior half ). $G_3$ गच्छतो ; $M_{3.4}$ यमाव् ( for यमौ च ). — After line 3434, Madras ed. ins. :

माद्रीपुत्रौ तथा राजन्कृष्णस्याप्यरिसूदनौ ।

— ( L. 3435 ) $M_4$ भो ( for मा ). $T_1$ भूषिताः ; $M_4$ भाषिणः ; Madras ed. हर्षितौ ( for °ताः ). — ( L. 3438 ) $G_{1.3}$ $M_3$ तदा ; $M_2$ ततः ( for तथा ). $M_2$ तथा ( for तदा ). — ( L. 3439 ) T कपिलादीनि. $M_2$ विष्णु- ( for धर्म- ). — ( L. 3440 ) $G_3$ कृष्णेनोक्तानि धर्माणि ( for the prior half ). —( L. 3441 ) $T_2$ $G_3$ शिरसा ( for मनसा ). $M_2$ हृदिस्थं पंच पांडवाः ( for the post half ). —( L. 3442 ) $M_2$ [ऽ]थ ( for तु ). — ( L. 3443 ) T $G_{1.3}$ $M_3$ तन्मनो ( for °ना ). — Before line 3444, $T_1$ $G_1$ ins. वैशंपायनः. —( L. 3444 ) $G_{1.2}$ उक्तं ( for एतत् ). — After line 3445, $G_3$ ins. :

पुण्यं यशस्यमायुष्यं पुष्टिदं कीर्तिवर्धनम् ।

$G_3$ om. line 3446. — ( L. 3446 ) $M_4$ कुरुष्व ( for शृणुष्व ). T $M_{2.3}$ चिंतयस्व सदा विष्णुमप्रमत्तः कुरुद्वह. — Colophon. — *Sub-parvan* : T $G_{1.2}$ $M_{2-4}$ वै( $T_2$ $M_2$ श्रीवै )ष्णवधर्म. — *Adhy. name* : T भगवद्वारकाप्रयाणं. — *Adhy. no.* : $T_1$ 106 ; $T_2$ $M_4$ 115 ; $G_{1.2}$ 105 ; $G_3$ 116 ; $M_2$ 22 ; $M_3$ 104.

— After the colophon, $M_2$ ins. :

नमो नारायणाय शिव शिव नारायण शिव शिव नारायण शिव शिव शिव शिव राम राम कृष्ण कृष्ण कृष्णः । इत्यन्तकाले जल्पञ्जन्तुर्जीवितं मे जहासीत् ।

आद्यः शब्दः कथ्यते तस्य मुक्तिं ।
व्रीला नम्रो तिष्ठतोऽन्या ऋणस्थो ।

हरि । श्रीगणपतये नमः । अविघ्नमस्तु ।

— After the colophon, $M_3$ ins. :

हरिः श्रीगुरुभ्यो नमः । गुरुभ्यो नमः । कोल्लं ९९५ आमत कन्नि ञायर १० तीयतिकण्डरामत्तकोमन् । एऴुतिय आश्वमेधिकपर्वं ग्रन्थं । शुभमस्तु श्रीगुरुभ्यो नमः । पडिञ्ञारे कोविलकं बक आश्वमेधिकं ( *sup. lin.* °धीयं ) ग्रन्थम् ।

[ Date : Kollam 995 Kanya month Sunday Tenth. Scribe : Kanda Ramattakoman. Owner : Padiññāre Kovilakam ( Zamorin State Library ). ]

— After the colophon, $M_4$ ins. :

आश्वमेधिकं समाप्तं ।
कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वानुसृतस्वभावः ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि ॥

वैष्णवधर्मशास्त्रभागं पिन्ने ग्रन्थं वरुत्ति एऴुदि कूट्टियिरिक्कुन्नु ॥

[ अयं वैष्णवधर्मशास्त्रभागोऽन्यस्मिन्काले मातृकामानीय लिखित्वा योजितः । ]

# NOTES

## 1

11-16 Cf. 2. 55. 7-8. These do not refer to the actual words used by Vidura before, but only give the substance.

15 मेढीभूतः — The expression has occurred in Uddyogaparvan before, cf. 5. 36. 71. मेढ is the centre pillar round which the bulls move. मेढीभूत thus means 'being the main prop or support.' The reading मेधीभूत may mean 'being the brain.'

18 There is no doubt that वीरस्य is the correct reading; धीरस्य must have been substituted by some as Vidura can hardly be called a Vīra in the accepted sense of the word. Vidura could be a धर्मवीर like दयावीर.

## 2

16, 17, 19 क्षत्रधर्मs, मोक्षधर्मs, युद्धधर्मs and दानधर्मs were explained to Yudhisṭhira in Śāntiparvan and Ānuśāsanaparvan.

## 3

8 नरमेध — Human sacrifice. There is no doubt that the practice of offering human beings as sacrificial victims was prevalent in ancient times. The story of Śunaḥśepa in the Aitareyabrāhmaṇa (VIII) is well-known in this connection.

## 6

23 The presence of a corpse in the way is a bad omen. To avoid any evil effects, a person, in such a case, usually turns back a little and then proceeds.

26 It is not clear why Nārada advises Marutta to tell a lie about his entering the fire. Perhaps Nārada was afraid of being cursed by Saṁvarta.

## 9

29 The first line can not be satisfactorily explained. It is difficult to find out the correct reading on the strength of the MSS. Nīlakaṇṭha reads न गण्डिकाकारयोगं करेणुं and explains (unconvincingly) as follows:— नगं पर्वतं डीयते विहायसा गच्छतीति डीः पक्षी अल्पो डीः, डिका मक्षिका मशकादिस्तस्या आकारेण योगोऽस्यास्तीति रूपम् अणुं सूक्ष्मं करे कुर्वे कृन्छान्दसं मौवादिकत्वम् । करेणेति पाठे करोमीत्यध्याहारः । पाथोधिं करे कर्तुमगस्त्य इवाहं पर्वतमपि मशकीकर्तुं समर्थोऽस्मीत्यर्थः । न शण्डिकां जंगमो नो करेणुरिति पाठे तु करेणुर्हस्ती मम, ऐरावनः शण्डिका युद्धं द्रविडभाषाप्रसिद्धेः तां प्रति जंगमो गतिशीलो न भवतीति नो, अस्ति ऐरावतवाहनस्य मे शत्रुजय ईषत्कर इत्यर्थः। शण्डिकाशब्दस्तालव्यादिरिह ज्ञेयः, इन्द्रो हन्ति वृषभं शण्डिकानामिति मन्त्रवर्णात् दशमस्तूक्त तात्पर्यः।

The line as it stands may mean–a fierce or rushing female elephant is no cause for concern; I do not regard that as dangerous.

The second line is irrelevant. Agni had tauntingly asked Indra to explain how it came about that Vṛtra snatched away the world from Indra, even though Indra was very powerful. Indra's answer that he does not partake of the Soma offered by the enemies (that is, he does not accept any invitation from the enemies) is beside the point.

31 The Cyavana-episode is found in—*Ṛv.* 10. 9.

## 10

29 Jaimini-Aśvamedha refers to the three kinds (red, blue and virile) of bulls in the description of Yudhiṣṭhira's Aśvamedha.

30 Cf. आविक्षितस्य कामप्रेः विश्वे देवाः सभासद इति । Cf. 12. 29. 19. The Jaimini-Aśvamedha drops the Saṁvarta-Indra episode, and only refers to Marutta's gold left over the Himalayas.

## 11

18 स्वरादिविशेषानुपूर्वीमात्रस्वरूपे ऋगक्षरव्यतिरिक्तं यद् गानं तद् रथन्तरम्। (सामार्चिकभाष्य). रथंतर is a Sāman sung in the रथंतर metre.

## 13

$3^{cd}$ Cf. द्वे पदे बन्धमोक्षाय न ममेति ममेति च ।
ममेति बध्यते जन्तुर्न ममेति विमुच्यते ॥
(Uttaragitā 2. 45-46)

## 14

1 समाश्वास्यत has good support; Śı reads समाश्वासत which makes no sense. It was therefore proposed to retain समाश्वस्यत ( which is the usual form ) found in a larger number of MSS.

## 16

The Jaimini-Aśvamedha drops the whole of the अनुगीता episode ( Adhyāyas 16–50 ).

12 Kṛṣṇa refers to the Kāśyapa-Brāhmaṇa teaching as a पुरातन-इतिहास which apparently means that the doctrines in the Anugītā are more ancient than those in the Bhagvadgītā. अनुगीता, however, connotes 'A supplement to the Gītā.'

In this Adhyāya, the Indra-Vṛtra fight frequently referred to in the Ṛgveda, is interpreted metaphysically. Indra is the Ātman and Vṛtra the Ahaṁkāra. Vṛtra successively envelops Pṛthvī, Waters, Tejas Vāyu and Ākāśa ( the five elements ), which means Pṛthavī ( the gross body ), Waters ( the subtle body ), Tejas ( the light ), Vāyu ( the vital breath ), Ākāśa, ( void ) are falsely regarded as Ātman, the Highest Reality. When Vṛtra entered Indra ( Ātman ) himself, there arose the doubt about the real nature of Ātman, but thanks to the teachings of Vasiṣṭha, Indra got rid of this Moha, and was able to realise Ātman properly. Indra could undo the evil effects of Ahaṁkāra by his Vajra ( right knowledge or Viveka ).

40 परंतप—Kāśyapa is addressed here as परंतप, which is hardly suitable. This must be regarded as a slip due to the fact that it is Kṛṣṇa who is narrating the whole episode to Arjuna who can be appropriately called परंतप.

## 19

42 Telang who reads भाण्डं for कोष्ठं translates the verse as follows—As one placing any property in his store-room should fix his mind on the property, so placing one's mind in one's body and ( keeping ) the passages confined, one should there look for the self and avoid heedlessness. ( Sacred Books of the East, Vol. VIII. p. 253 ). The reading भाण्डं is supported by Śı ( which also reads निक्षिप्य ) and is perhaps simpler. In the verse as we read it काय is compared to कोष्ठ, आत्मन् to भाण्ड which is to be searched for. The proper sense of the verse depends upon what we understand by प्रक्षिप्य. The verse seems to emphasise what Gauḍapāda calls the अमनीभाव for the realisation of the Ātman, then प्रक्षिप्य ought to mean 'having discarded'. The idea in that case would be— Just as a person wishing to find out the treasure deposited in the store-room, should concentrate his mind only on the treasure, discarding all thoughts about the room, one wishing to realise the Ātman, should discard all thoughts about the mind through the sense-organs duly controlled, in respect of the body. The verse is clumsily worded in any case. मनसैव प्रदीपेन महानात्मनि दृश्यते, in verse 44 below seems, however, to go against the above idea.

49 As the Brāhmaṇa was not directly speaking to Kṛṣṇa, मां वाक्यमुक्त्वा, must be taken to mean 'having reported to me.'

56–57 Cf. Gītā IX 32–33.

## 21

The पुरातन-इतिहास about the ten होतृs is narrated by the Brāhmaṇa.

The ten Hotṛs are the five Karmendriyas and five Jñānendriyas.

The ten offerings are Śabda, Śparṣa etc. and Kriyā, Gati etc. ( of the Jñānendriyas and Karmendriyas ).

The ten fires are—दिशो वायू रविश्चन्द्रः पृथ्व्यग्नी विष्णुरेव च । इन्द्रः प्रजापतिर्मित्रमग्नयो दश...

17 ( वाक् ) गौरिव प्रस्रवत्येषा. —Cf. the description of सूनृता वाक् in the *Uttararāmacarita*, V. 31—

कामान्दुग्धे विप्रकर्षत्यलक्ष्मीं
कीर्तिं सूते दुष्कृतं या हिनस्ति ।
तां चाप्येतां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः ॥

## 22

This Adhyāya describes the सप्तहोतृविधान ( a पुरातन-इतिहास ). The seven Hotṛs are the five Jñānendriyas, Manas and Buddhi.

## 23

This Adhyāya contains the पञ्चहोतृविधान ( a पुरातन-इतिहास ). The five Hotṛs are–Prāṇa, Apāna, Udāna, Samāna and Vyāna.

Cf. the dispute about supremacy among the sense-organs, described in the Chāndogya ( I. 2 ) and Bṛhadāraṇyaka ( VI. 1 ) Upaniṣads.

## 25

This Adhyāya contains the चातुर्होत्रविधान. The four होतृs are Karaṇa, Karman, Kartṛ and Mokṣa.

7 अहं strictly speaking ought to refer to the Brāhmaṇa who is the speaker. The context shows that it refers to the Ātman.

14-16 ऋचः— The reference is to the passage— तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्म, उरो वेदिर्लोमानि बर्हिर्वेदः शिखा etc. Mahānārāyaṇopaniṣad, khaṇḍa, 25; Cf. also khaṇḍa 11$^{ab}$.

## 26

This Adhyāya contains the instruction given by Prajāpati to the serpents, gods and sages ( also a पुरातन-इतिहास ). When asked what would give Śreyas, Prajāpati uttered ॐ ( एकाक्षरं ब्रह्म ). The serpents interpreted ॐ as biting ( presumably by noting the movements of the lips ), the gods as giving gifts, and the Maharṣis as दम. ( The Asuras who are not mentioned before took it as दम्भ, 10$^{ab}$ ). Cf., for a similar situation, the Bṛhadāraṇyaka V-2. 1-3, where Prajāpati utters the syllable द, which is taken to mean दाम्यत, दत्त, and दयध्वम् respectively by the gods, men and Asuras. In Latin also D. D. D. stands for Dat, Dicat, Dedicat ( gives, devotes and dedicates ).

## 27

2 महद्वनम्. Cf. Śāṅkarabhyāṣya on the Chāndogya ( VI. 14. 3 ), where the Saṁsāra is elaborately compared to a forest.

19 The Saptarṣis are here said to be वसिष्ठप्रमुखाः.

## 28

This Adhyāya contains the Adhvaryu-Yati Saṁvāda ( a पुरातन-इतिहास ) criticizing the Hiṁsā in the sacrifice. The Yati stands for the Ahiṁsā-dharma. The Adhvaryu has no proper reply to give; he only pleads that he is acting according to the traditional Śāstra.

22 Kṣara is said to be स्वभाव. The Gītā says स्वभावोऽध्यात्ममुच्यते.

## 29

This Adhyāya contains the Kārtavīrya-Samudra Saṁvāda ( a पुरातन-इतिहास ) which emphasizes the Ahiṁsā cult.

1 The Brāhmaṇī is described here as भामिनी, which is not quite suitable.

16 का[illegible]s are probably the Khasis.

## 30

The ancient episode of Alarka is narrated here to emphasize the doctrine योगान्नास्ति परं सुखम् ।

## 31

7-12 These are the Gāthā sung by Ambarīṣa

## 32

The Brāhmaṇa-Janaka Saṁvāda ( a पुरातन-इतिहास ) is described here to advise that avarice for external objects should be eschewed.

## 33

4 Telang ( who reads वेति for वेत्ति ) translates— 'Sovereignty over the whole world, and even over heaven; that or else this knowledge; ( of these two ) knowledge is my only wealth.' The idea in the verse appears to be that real knowledge regards the sovereignty over the whole world or even over heaven as being on the same level ( तथा ); real knowledge is one's true wealth.

## 34

Kṛṣṇa tells Arjuna that the Brāhmaṇa represents Manas, and the Brāhmaṇī the Buddhi, and he himself is the Kṣetrajña. Here ends the Brāhmaṇa-Brāhmaṇī Saṁvāda.

## 35

Another पुरातन-इतिहास, Guru-Śiṣya-Saṁvāda is narrated here, dealing with the nature of Mokṣa.

31 नोपैति यावदध्यात्मं तावदेतान्न पश्यति — Nilakaṇṭha seems to disregard the न in एतान्न पश्यति. The meaning seems to be that so long one has not acquired the metaphysical knowledge, one does not see these ( Jyotis, Ākāśa etc. in the preceding line ) in their proper perspective.

## 36-38

These three Adhyāyas describe the तामस, राजस and सात्त्विक Guṇas in detail.

## 39

In this Adhyāya are described the three Guṇas ( Sattva, Rajas and Tamas ) as mutually mixed up, as they are not found independently existing anywhere. Each Guṇa is found in the other two, may be in a very small proportion.

## 40

2 The महानात्मा is said to be known as धृतिः, स्मृतिः, etc. What authority the writer has in his mind cannot be ascertained.

## 41

This Adhyāya is the smallest ( containing only five verses ) in this Parvan. It describes the Ahaṁkāra.

## 42

This Adhyāya deals with various topics, such as the dissolution of the Mahābhūtas, with the subtle Bhūtas surviving the Pralaya, the five Karmendriyas and Jñānendriyas, with their Adhyātma, Adhibhūta and Adhidaivata forms, the four-fold creation of beings, the means for securing Brahman by crossing over the terrible ocean of Moha etc.

## 43

This Adhyāya describes the Vibhūtis, on the lines of the Bhagavadgītā, but gives more details.

1 मध्यमः गुणः is the Rajas quality.

3 While the Gītā mentions only the अश्वत्थ as the best of trees, here we have as many as seven or eight claiming that honour.

5 The Gītā mentions the Meru and the Himālaya; here we have nearly a dozen mountains pointed out.

9 वेदानामृषयः—The Gītā says वेदानां सामवेदोऽहं.

15 Umā is the best amongst the ladies.

19 Dharma and Adharma are described categorically as Ahiṁsā and Hiṁsā.

## 44

2 श्रविष्ठ is the first नक्षत्र, and शिशिर the first season ( the Gītā says ऋतूनां कुसुमाकरः ).

6 The cow is the best of the चतुष्पद animals, and the Brāhmaṇas are the best amongst human beings.

11 Viṣṇu is the Ātman of Brahmadeva.

14 Rudra is said to be the Lord of the Gods, Dānavas, Naras, Kinnaras, Yakṣas, etc.

16 The Householder's state ( गार्हस्थ्य ) is the best ( in accordance with the Manusmṛti ).

## 45

This Adhyāya describes the Kālacakra ( wheel of time ) and the state of a householder.

16 The five Mahāyajñas are : —Devayajña, Ṛṣiyajña, Pitṛyajña, Bhūtayajña and Manuṣyayajña.

## 46

This Adhyāya describes in detail the duties of Brahmacarya, Vānaprastha, and Saṁnyāsa modes of life.

## 47

16 अन्तरात्मन् is here said to be अचेतन. Perhaps अचेतन इव is the meaning; or अन्तरात्मन् refers only to the भूतात्मन्.

## 48

Different views about Brahman are noticed here, such as Brahman being Avyakta, Anāmaya, Puruṣa, Sattva etc. In this connection are referred the Cārvākas, Tārkikas, Mīmāṁsakas, Nihilist Bauddhas, Vijñanavādi Bauddhas, Advaitins, Dvaitins, Bhedābhedavādins, Vaiśeṣikas, Kālavādins, etc.

## 49

This Adhyāya describes the importance of the path of knowledge (Jñāna-mārga). Once again, it is pointed out that Ahiṁsā is the Kṛtya *par excellence* and Jñāna is the highest good (Niḥśreyas). Then is described the nature of the Sattva and Kṣetrajña, their union and separation. One who is obsessed with the idea of Mamatva (something belonging to him) gets entangled in Saṁsāra; and as he wills, so he becomes.

The creation of the Saṁsāra, from Pradhāna (Avyakta), Mahat, Ahaṁkāra, Bhūtabījas, etc. is described. The five elements, their respective Guṇas, the twelvefold form of Tejas and Vāyu, the tenfold form of Gandha, the sixfold form of Rasa, etc. are also pointed out.

The Adhyāya winds up with the declaration that the Highest Puruṣa is beyond Avyakta, and he who reaches Him, secures Mokṣa (Ānantya).

## 50

This Adhyāya contains the description of the Brahmaratha (on the lines of आत्मानं रथिनं विद्धि etc. in the Kaṭhopaniṣad) and the Brahmavana. Manas is said to be the Bhūtātman and Adhiṣṭhātṛ of every thing. All creation takes place naturally (स्वभावत:).

12 विश्वकृतो विप्रा: —These are presumably the Prajāpatis.

The importance of Tapas and Dhyānayoga is stressed. Those who value Karman are extremely dull-witted. The Puruṣa is constituted of Vidyā, not of Karman. Those who are Asakta and Samadarśins reach the highest goal, viz. Mokṣa.

The pupil, thus advised by the preceptor, acted accordingly and secured Mokṣa.

On being asked by Arjuna—who was the pupil and who the preceptor?—Kṛṣṇa told him—'I am the preceptor and my mind is the pupil', and advised Arjuna to bear in mind what had been told (all this had been taught at the commencement of the War) and to shape his conduct in conformity with the same.

Here the Anugītā proper ends (though in some MSS. the rest of the Parvan is called the Anugītā-parva) and the narrative is continued from the fifteenth Adhyāya where Kṛṣṇa had expressed his desire to go back to Dvārakā.

The Anugītā portion (Adhyāyas 15–50) contains several passages taken bodily from the Bhagavad-gītā, and attempts to supplement or expand several topics from the Gītā. More than once it is stated that the instruction in the Anugītā had been conveyed to Arjuna when Kṛṣṇa instructed him at the beginning of the battle. The title Anugītā therefore is significant. The writer, however, wants to bolster up the instruction given here by calling to his aid several Purātana Itihāsas as he calls them. Whatever in the Bhagavadgītā was regarded as sketchy or incomplete is made complete as in the instruction about Yajñacakra, Kālacakra, the Triguṇātmaka nature of all objects in the universe, the Vibhūtis of the Lord, the nature of the Prāṇas, Yoga-technique, and so forth. On the whole, however, the Anugītā does not appear to have made any additional contribution to the philosophical thought contained in the Bhagavadgītā. *

The Jaimini-Aśvamedha makes no reference to the Anugītā at all, which is quite irrelevant to the matter in hand, viz the Aśvamedha of Yudhiṣṭhira.

50 गजसाह्वय—Hastināpura, bearing the appellation गज. Telang (p. 394, S. B. E. Vol. VIII), curiously enough, translates गजसाह्वयं नगरं as 'to the city of Gajasa', which is obviously a mistake.

## 51

28–29 Announcing one's name and then falling at the feet strictly in the order of precedence is in accordance with the आचारधर्म.

30 क्षत्तारं—विदुरं; according to the Śāstra,

ब्राह्मणं कुशलं पृच्छेत्, क्षत्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥

(Manusmṛti II. 127)

---

* It is proposed to publish an edition of the Anugītā, with Introduction, notes etc.; hence the notes given here are necessarily scanty.

कुशलं should not have been used in connection with Vidura (who was a दासीपुत्र). But as Vidura's father was the Brāhmaṇa Vyāsa, Vidura appears to have been treated as a Brāhmaṇa.

## 52

Uttaṅka had apparently been quite absorbed in his penance and so had not heard any news about the actual battle fought. He had expected that all would turn out well, owing to the efforts of Kṛṣṇa for reconciliation between the Kauravas and the Pāṇḍavas. Bnt when he learnt of the disastrous end of the war, he charges Kṛṣṇa for not having done his best to avert the war, calls him Mithyācārin, and threatens to curse him.

Kṛṣṇa appeals to Uttaṅka not to waste his penance-fruit by cursing him in a hurry; he should first hear him in order to get a proper appraisal of the situation.

## 54

This whole episode appears to be irrelevant and absurd. It is impossible to explain why Uttaṅka suddenly flies into a rage and as suddenly cools down, why Kṛṣṇa shows his 'World-form' to Uttaṅka, indulging in self-glorification as the Highest, why Indra appears disguised as a Mātaṅga and so forth.

The only plausible explanation appears to be that as the Anugītā did not refer to the Viśvarūpa (which forms an important episode in the Bhagavadgītā), some one thought that the lacuna ought to be filled in some way.

## 55

Adhyāyas 55-58 which describe the previous history of Uttaṅka, are obviously an interpolation as the first verse of Adhyāya 58 directly refers to the last verse of Adhyāya 54.

The Ādiparvan (Pauṣyaparvan) has also described the story of Uttaṅka who was famous for his Gurubhakti. There is not any material difference between the two versions.

In the Pauṣyaparvan, Uttaṅka is the pupil of Veda and the name of Veda's wife is not given. Here, the preceptor and the preceptor's wife are Gautama and Ahalyā. Uttaṅka has become a very old man before Gautama allows him to take to the Gṛhasthāśrama. Gautama transforms Uttaṅka into a handsome young man and offers his daughter to him in marriage. Ahalyā asks Uttaṅka to bring the Maṇikuṇḍalas of the wife of Saudāsa as Gurudakṣiṇā.

In both the versions, Uttaṅka's attempt to bring the Maṇikuṇḍalas is described practically in the same way.

## 56

Uttaṅka goes to Pātāla when the Kuṇḍalas were carried there by Takṣaka, aided by Indra, and secures the Kuṇḍalas with the help of Fire.

While in the Ādiparvan, the reference to Takṣaka is relevant as that directly leads to the Sarpasattra by Janamejaya, the story of Uttaṅka hardly serves any purpose here.

5 षष्ठे काले—On the sixth part of the day. In the case of kings, the sixth part is 3 P. M. to 4–30 P. M. when the king is free from all engagements. (See Kauṭilya's Arthaśāstra, and Daśakumāracarita which give the ideal time-table for a king. Kālidāsa also says, षष्ठे भागे (काले) त्वमपि दिवसस्यात्मनश्छन्दवर्ती । (Vikramorvaśīya II. 1). But here Saudāsa is a cannibal and he speaks of the षष्ठकाल as the आहारकाल. The Rākṣasas are said to be usually active at the प्रदोषकाल (evening, night-fall) in search of their prey. षष्ठकाल must therefore be understood to mean the period 7–30 P. M. to 10–30 P. M. The six Kālas are also given as (1) प्रातः, (2) संगव, (3) मध्याह्न, (4) अपराह्ण, (5) सायाह्न and प्रदोष which is the sixth (the भोजनकाल of the Rākṣasas). Monier Williams explains षष्ठे काले as 'at noon' and also as 'in the evening of the third day.' (षष्ठान्नकालः—one who eats only at the sixth meal-time, that is, who passes five meals without eating and has no meal till the evening of the third day—

> षष्ठान्नकालता मासं संहिताजप एव वा ।
>
> (Manusmṛti XI 200).

The day (twelve hours) is also divided into five parts (each part consisting of 144 minutes). Thus—

(1) प्रातः — 6 A. M. — 8–24 A. M.
(2) संगव — 8–25 A. M. — 10–48 A. M.

( 3 ) मध्याह्न — 10-49 A. M. — 1-12 P. M.
( 4 ) अपराह्न — 1-13 P. M. — 3-36 P. M.
( 5 ) सायाह्न — 3-37 P. M. — 6 P. M.

प्रदोप ( coming after सायाह्न ), the beginning of night — 6 P. M. — 8-24 P. M., is the पष्ठकाल.

24 In verses 22 and 23, Devas ( Suras ), Yakṣas and Mahoragas ( Nāgas ) are described as being intent upon snatching away the ear-rings. In verse 24, Yakṣas are substituted by Rākṣasas. The reading यक्षाणाम् for नागानाम् would substitute the Rākṣasas for Nāgas. The discrepancy cannot be easily explained.

## 57

2 एषा गतिः—The present state of the king as a cannibal. अन्या गतिः—no other alternative or no other means than securing the favour of Uttaṅka to end this calamity. एतन्मे मतम्—I somehow or other entertain the hope that I might be restored to my normal form, if the request of Uttaṅka is granted.

## 58

Kṛṣṇa goes to Dvārakā. The festivities on the Raivataka ( which is described as 'King of mountains' ) are pictured in an exaggerated manner.

## 59

Kṛṣṇa's father Vasudeva asks him to give the details of the Mahābhārata battle, which he had witnessed personally. Kṛṣṇa summarises the incidents naming the different C-in-C's on the side of the Kauravas and the Pāṇḍavas.

8-9 चमू is used as synonymous with अक्षौहिणी.

16 सेना also seems to mean the same as अक्षौहिणी.

Amarakośa II. 8 81-82 states—

> एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका ।
> पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरम् ।
> सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः ।
> अनीकिनी दशानीकिन्योऽक्षौहिणी .... ।

—That is, an army is usually divided into nine units— ( Ādiparvan, 1. 2. 15-19 ):

| Name | Chariot | Elephant | Horse | Foot-soldier |
|---|---|---|---|---|
| *Patti* | 1 | 1 | 3 | 5 |
| *Senāmukha* | 3 | 3 | 9 | 15 |
| *Gulma* | 9 | 9 | 27 | 45 |
| *Gaṇa* | 27 | 27 | 81 | 135 |
| *Vāhinī* | 81 | 81 | 243 | 405 |
| *Pṛtanā* | 243 | 243 | 729 | 1,215 |
| *Camū* | 729 | 729 | 2,187 | 3,645 |
| *Anīkinī* | 2,187 | 2,187 | 6,561 | 10,935 |
| *Akṣauhiṇī* | 21.870 | 21,870 | 65,610 | 109,350 |

The Nītiprakāśikā gives the number of elephants as ten times the above, and the number of horses as 1000;3000;9000, etc., and the number of Foot-soldiers as 100000;300000, etc, so that an Akṣauhiṇī would have 21870 Chariots, 218700 Elephants, 21,870,000 Horses and 2,187,000,000 Foot-soldiers !

9 Śikhaṇḍin is said to be the Netṛ during the first ten days. It appears that Dhṛṣṭadumna was the Netṛ for all the eighteen days, as described earlier. Śikhaṇḍin is called the Netṛ probably because he knocked out Bhīṣma.

## 60

Kṛṣṇa had skipped over the murder of Abhimanyu, so as not to add to the agonies of Vasudeva, but Subhadrā insisted upon Kṛṣṇa describing that episode. Kṛṣṇa then described how Abhimanyu, fighting single-handed with many warriors was ultimately murdered by the son of Duḥśāsana, and how Pṛthā had advised Subhadrā to submit to the workings of Fate, and to look after the pregnant Uttarā ( Abhmanyu's wife ).

## 70

The Pāṇḍavas returned from the Himālayas, with plenty of gold. Vyāsa gave his sanction for the Aśvamedha by Yudhiṣṭhira. Yudhiṣṭhira requests Kṛṣṇa to perform the Aśvamedha himself. Kṛṣṇa courteously refused to do that and said Yudhiṣṭhira was the fittest person for that job.

## 71

Vyāsa fixed upon the Paurṇimā in the month of Caitra for the consecration of Yudhiṣṭhira and the horse was duly let loose, with Arjuna as the Guardian of the horse. Yudhiṣṭhira warned Arjuna not to engage in fight unnecessarily and to invite all the kings to attend the sacrificial ceremony.

## 72

21 समारोत्तरतः पूर्वम्—The horse moved to the East taking a northernly course. To go to the East first was regarded as auspicious. In the *Kathāsaritsāgara*, in describing the course of the Digvijaya of Vatsarāja, the writer gives the reason why the East should be tackled first. Apparently the same formula obtains in the case of the sacrificial horse also.

24 म्लेच्छाः — Mlecca connotes any non-Aryan people.

## 73

1 त्रिगर्त country was to the north of Hastināpura, as in accordance with verse 21 in the last Adhyāya, the horse had moved on to the North.

7 The Trigartas ( Saṁśaptakas ) had been defeated by Arjuna on the 13th day of the Mahābhārata war. So, Arjuna was unwilling to fight with them, in conformity with the advice of Yudhiṣṭhira.—'Kings who had already lost their kinsmen, should not be killed.'

## 74

1 प्राग्ज्योतिष is usually taken to be the modern Assam.

## 76

1 Then the horse entered the Saindhava country. It is a long long way from Prāgjyotiṣa ( the Easternmost part ) to the Sindhu region on the West. One would have expected the itinerary of the horse to be described more rationally, but as the horse was to be allowed to move freely, there is no room for any objection. ( In the Digvijaya of Arjuna in the North, in the Sabhāparvan Prāgjyotiṣa is mentioned among the countries in the North ).

21-24 Arjuna was completely overwhelmed, and the gods, the Saptarṣis, Brahmarṣis etc. had to pray for Arjuna's victory.

## 77

33 Parikṣit who was hardly a few months old at that time is called here परवीरहा which represents what Parikṣit was going to be in future. The reading परवीरह is obviously due to the desire to avoid the apparent absurdity in calling the infant Parikṣit a परवीरहन्.

46 The horse then reached the Maṇipūra region. For Maṇipūra, there is the reading Maṇalūra ( Maṇipūra is possibly the Sanskrit rendering of Maṇalūra ).

Dr. Gustav Oppert in his *Weapons etc. of the Ancient Hindus* ( pp. 145-152 ), after discussing the views of Wheeler, who is of opinion that Maṇipūra is the modern 'Munnipur in the extreme east beyond the Bengal frontier... a secluded valley lying between Eastern Bengal and Burmah, and the people appear to be a genuine relic of the Ancient Nāgas' and of Prof. Lassen who places Manipūra on the Eastern coast of India south of Chicole at the mouth of the Lāṅgulya river, comes to the conclusion that Maṇipūra or Maṇalūra, must be located somewhere near Madura ( in some chronicles, Arjuna is said to have married the daughter of the Pāṇḍya king of Madurā ). Dr Oppert remarks—'The affection with which the Pāṇḍavas are remembered in India, and especially in the South, seems to me not only due to the interest which the story of their sufferings, their bravery, and final victory excited everywhere, but also to some cause by which their memory was effectually kept alive... We must not forget that Arjuna is the presumed ancestor of the Pāṇḍyas.'

## 79

11-12 The expiation for the murder of a Brāhmaṇa is given in the Yājñavalkya-smṛti as follows—

शिरःकपालीध्वजवान् भिक्षाशी कर्म वेदयन् ।
ब्रह्मा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥

— That is, the culprit was to pass twelve years, living on alms, exhibiting the head-skeletons of the person murdered, and announcing his heinous crime to all. Though this passage only mentions. the Brāhmaṇa-killer, Aparārka refers in this connection to the passage मातरं पितरं हत्वा सोदरं भ्रातरं तथा । अनेन विधिना -- ; hence as M. M. Vāsudevashastri Abhyankar points out, the expression ब्रह्मा should be taken to include the पितृहन् also.

Babhruvāhana is afraid that he would be required to go through the terrible ordeal of covering himself with his father's skin, and of wearing the head-skeletons, if he did not end his life.

## 83

5 कौशलात्—tactfully.

## 86

Arjuna then was on the way to Hastināpura. It was the Paurṇimā of the month of Māgha and only a month remained for the Sacrifice to commence.

## 91

उपसंवेशयन्—made Draupadī to sit or lie near. The Śatapathabrāhmaṇa and other works describe this function at great length, along with the obscene dialogue carried on by the three queens ( Mahiṣī, Vāvātā and Parityaktā ). It appears that during the period when the *Mahābhārata* received its present shape the obscene features connected with the उपसंवेशन had completely fallen into abeyance.

Similarly, the Pāriplava or the Revolving Cycle of Legends, which was gone through throughout the year when the horse was on its journey, is not even so much as mentioned in this context, while there are gorgeous descriptions of the mountains of food and rivers of wine consumed during the performance of the sacrifice ( Read in this connection articles by the present writer, 'The Aśvamedha' and 'The Pāriplava or Revolving Cycle of Legends'— Annals, B. O. R. I, Vol. XXX and XXXIII ).

कलाभिस्तिसृभिः is उपलक्षणे तृतीया. This appears to go with वपां in $4^a$ ( Mantra, Dravya and Śraddhā being the three कलाs ). But the word मनस्विनीम् cannot be properly explained as connected with वपाम्. The expression may be connected with द्रुपदात्मजाम् also In that case कला cannot be properly explained.

4, 9, 48 Here पष्ठकाल means the period, 3 P. M. to 4–30 P. M.

## 96

The explanation about the Nakula episode given here is hardly convincing. The whole episode could be regarded as an interpolation, being tacked on at the end. But it appears all the same that the writer was reflecting conscientiously the views about Hiṁsā in his own times. Public opinion seems to have undergone a great change during the time when the Mahābhārata incidents actually took place, and the time when the *Mahābhārata* took its present shape. The Ahiṁsā doctrine fervently promulgated by Buddha and Mahāvīra, and widely preached by Aśoka, had secured a firm hold two or three centuries before the Christian era, and this is usually regarded to be the period when the *Mahābhārata* was completed. Full credit must be given to the writer for courage shown in describing the Nakula episode as having happened at the Aśvamedha sacrifice itself.

## The Vaiṣṇavadharmaśāstra interpolation

The Āśvamedhikaparvan has the distinction of having a very big interpolation or addition ( constituting about 1700 ślokas ), which is shown by us as Appendix.

The Southern Recension MSS. contain this portion which is omitted in all MSS. representing the Northern Recension. Sāyaṇa in his *Parāśaramādhavīya* ( B. S. S. Vol. I ) and Vādirāja, the author of the Lakṣaṇālaṁkāra, have quoted from this section as P. P. S. Sastri has pointed out.

